इसके बाद उपधित्याग के सन्दर्भ में विस्तार से चर्चा की गई है। इसी के अन्तर्गत युक्ताहार-विहार एवं उत्सर्गमार्ग व अपवाद मार्ग की भी चर्चा हुई है। यह सम्पूर्ण प्रकरण मूलतः पठनीय है।

अन्त में उत्सर्गमार्ग एवं अपवाद मार्ग की मैत्री बताते हुए आचार्यदेव लिखते हैं –

"बालो वा वुड्ढो वा समभिहदो वा पुणो गिलाणो वा।
चरियं चरदु सजोग्गं मूलच्छेदो जधा ण हवदि॥[३]

बाल, वृद्ध थके हुए एवं रोगग्रस्त मुनिराज शुद्धोपयोगरूप मूलधर्म का उच्छेद न हो – इस बात का ध्यान रखकर उत्सर्ग या अपवाद जो भी मार्ग पर चलना संभव हो, सहज हो; उसी पर चले।"

---

१. प्रवचनसार गाथा २१७ २. वही, गाथा २१९

३. प्रवचनसार गाथा २३०

Please inform us of any errors on rajesh@AtmaDharma.com

तात्पर्य यह है कि वे उत्सर्ग मार्ग का हठ न करें। क्षेत्र-काल एवं अपने देहादिक की स्थिति देखकर आचरण करें, पर इस बात का ध्यान अवश्य रखें कि शुद्धोपयोगरूप मूलधर्म का उच्छेद न हो जावे।

इसप्रकार हम देखते हैं, कि इस अधिकार में जहाँ एक ओर शिथिलाचार के विरुद्ध चेतावनी दी गई है, वही अनावश्यक कठोर आचरण के विरुद्ध भी सावधान किया है।

इसके बाद २३२वीं गाथा से २४४वीं गाथा तक चलने वाले मोक्षमार्गप्रज्ञापन अधिकार में सर्वाधिक बल आगमाभ्यास पर दिया गया है। अधिकार का आरंभ ही 'आगमचेट्ठा तदोजेट्ठा' सूक्ति से हुआ है।

आचार्यदेव कहते हैं कि एकाग्रता के बिना श्रामण्य नहीं होता और एकाग्रता उसे ही होती है, जिसने आगम के अभ्यास द्वारा पदार्थों का निश्चय किया है। अतः आगम का अभ्यास ही सर्वप्रथम कर्तव्य है।

साधु को आगम चक्षु कहा गया है। आगमरूपी चक्षु के उपयोग बिना स्वपर भेदविज्ञान संभव नहीं। गुणपर्याय सहित सम्पूर्ण पदार्थ आगम से ही जाने जाते हैं। आगमानुसार दृष्टि से सम्पन्न पुरुष ही संयमी होते हैं।

इसी अधिकार में वह महत्वपूर्ण गाथा भी आती है, जिसका भावानुवाद पण्डित दौलतरामजी ने छहढाला की निम्नांकित पंक्तियों में किया है –

''कोटि जन्म तप तपैं ज्ञान विन कर्म झरैं जे।
ज्ञानी के छिन माँहि त्रिगुप्ति तैं सहज टरैं जे।।[१]

मूल गाथा इसप्रकार है –

''जं अण्णाणी कम्मं खवेदि भवसयसहस्सकोडीहिं।
तं णाणी तिहि गुत्तो खवेदि उस्सासमेत्तेण।।२३८।।

जो कार्य अज्ञानीजन लक्षकोटि भवों में खपाता है, वह कर्म ज्ञानी तीन प्रकार से गुप्त होने से उच्छ्वास मात्र में खपा देता है।''

यद्यपि इस अधिकार में आगमज्ञान की अद्भुत महिमा गाई है, तथापि आत्मज्ञान-शून्य आगमज्ञान को निरर्थक भी बताया है। वे लिखते हैं –

१. छहढाला, चतुर्थ ढाल, छन्द ५

परमाणुपमाणं वा मुच्छा देहादिएसु जस्स पुणो।
विज्जदि जदि सो सिद्धिं ण लहदि सव्वागमधरो वि।।२३९।।

जिसके शरीरादि के प्रति परमाणुमात्र भी मूर्छा हो, वह यदि सर्वागम का भी धारी हो तो भी वह सिद्धि को प्राप्त नहीं होता।''

इसप्रकार हम देखते हैं कि इस अधिकार में आत्मज्ञान सहित आगमज्ञान के ही गीत गाए हैं।

अन्त में सम्यग्दर्शन-ज्ञान-चारित्र से सम्पन्न श्रमणों के स्वरूप पर प्रकाश डालते हुए कहते हैं –

समसत्तुबंधुसग्गो समसुहदुक्खो पसंसणिंदसमो।
समलोट्ठकंचणो पुण जीविदमरणे समो समणो।।२४१।।

जिसे शत्रु और बंधुवर्ग समान हैं, सुख-दु:ख समान हैं, प्रशंसा-निन्दा समान हैं, मिट्टी का ढेला एवं स्वर्ण समान हैं एवं जीवन और मरण भी समान हैं, वही सच्चा श्रमण है।''

इसी गाथा के आधार पर पण्डित दौलतरामजी लिखते हैं –

''अरि-मित्र, महल-मसान, कंचन-काँच, निन्दन-थुतिकरन।
अर्घावतारन असिप्रहारन में सदा समता धरन।।[१]

गाथा २४५ से शुभोपयोगप्रज्ञापन अधिकार आरंभ होता है, जो २७० गाथा तक चलता है। यद्यपि ज्ञानतत्त्वप्रज्ञापन में इस विषय से संबंधित शुभपरिणाम अधिकार आ चुका है, तथापि यहाँ भावलिंगी सन्तों के होनेवाले शुभोपयोग की दृष्टि से निरूपण है। यद्यपि यह शुभोपयोग भी आस्रव का ही कारण है, तथापि यह भावलिंगी सन्तों के भी पाया जाता है।

इस अधिकार में मुख्यत: यही बताया है कि छठवें-सातवें गुणस्थान में झूलते रहनेवाले सच्चे भावलिंगी मुनिराजों की भूमिका में किस प्रकार का शुभपरिणाम संभव है और किस प्रकार का शुभ परिणाम संभव नहीं है। मुनिधर्म का सच्चा स्वरूप समझने के इच्छुक महानुभावों को इस प्रकरण का अध्ययन गहराई से करना चाहिए।

आत्मानुभवी वीतरागी सन्तों के भी शुभोपयोग के सन्दर्भ में आचार्य कुन्दकुन्द के दृष्टिकोण को स्पष्ट करने के लिए उदाहरणों के रूप में निम्नांकित गाथाएँ दृष्टव्य हैं –

''वंदणणमंसणेहिं अब्भुट्ठाणाणुगमणपडिवत्ती।
समणेसु समावण्णओ ण णिंदिदा रागचरियम्हि।।२४७।।

---

१. छहढाला, छठवीं ढाल, छन्द ६

श्रमणों के प्रति वंदन नमस्कार सहित अभ्युस्थान और अनुगमनरूप विनीत प्रवृत्ति तथा उनका श्रम दूर करने रूप रागचर्या श्रमणों के लिए निन्दित नहीं है।

वेज्जावच्चणिमित्तं गिलाणगुरुबालवुड्ढसमणाणं।
लोगिगजणसंभासा ण णिंदिदा वा सुहोवजुदा।।२५३।।

शुद्धात्म-परिणति को प्राप्त रोगी, गुरु, बाल या वृद्ध श्रमणों की सेवा के निमित्त से शुद्धात्म-परिणतिशून्य शुभोपयुक्त लौकिक-जनों के साथ बातचीत करना निन्दित नहीं है, किन्तु अन्य निमित्त से लौकिक-जनों से बातचीत करना निन्दित है।''

उक्त दोनों ही गाथाओं में एक बात जोर देकर कही गई है कि अपने से बड़े शुद्धापयोगी सन्तों की यथोचित विनय संबंधी शुभराग या उनकी वैयावृत्ति आदि के लिए लौकिक-जनों से चर्चा भी निन्दित नहीं है। तात्पर्य यह है कि ये कार्य शुद्धोपयोगरूप धर्म के समय अभिनन्दनीय अर्थात् उपादेय तो नहीं, पर निन्दनीय भी नहीं है, क्षमा के योग्य अपराध है। वास्तविक धर्म तो शुद्धोपयोगरूप मुनिधर्म ही है, ये तो शुद्धोपयोग के सहचारी होने से व्यवहार धर्म कहे जाते हैं। ये संवर-निर्जरारूप नहीं, आस्रवरूप ही हैं।

इनके अतिरिक्त गृहस्थोचित शुभराग तो मुनियों के लिए सर्वथा हेय ही है।

लौकिक-जनों के सम्पर्क में रहनेवाले श्रमणों के लिए आचार्य कुन्दकुन्द का निम्नांकित आदेश ध्यान देने योग्य है –

''णिच्छिदसुत्तत्थपदो समिदकषसाओ तवोधिगो चावि।
लौगिगजणसंसग्गं ण चयदि जदि संजदो ण हवेदि।।२६८।।

जो जिनसूत्रों के मर्म को जानता है, जिसकी कषायें उपसमित हैं, जो तप में भी अधिक है; पर यदि वह लौकिक-जनों के संसर्ग को नहीं छोड़ता है तो वह संयमी नहीं है।''

लौकिक-जन की परिभाषा लिखते हुए वे लिखते हैं –

णिग्गंथं पव्वइदो वट्टदि जदि एहिगेहिं कम्मेहिं।
सो लोगिगो त्ति भणिदो संजमतवसंपजुत्तो वि।।२६९।।

निर्ग्रन्थरूप से दीक्षित होने के कारण जो संयम तपयुक्त भी हों, पर यदि वह ऐहिक कार्यों सहित वर्तता हो, उसे लौकिक कहते हैं।''

इसप्रकार हम देखते हैं कि इस अधिकार में शुद्धोपयोगी भावलिंगी सन्तों के शुभापयोग की क्या मर्यादायें हैं ? – इस पर सर्वाङ्गीण प्रकाश डाला गया है।

२७१ से २७५ गाथा तक की अन्तिम पाँच गाथाएँ पंचरत्न के नाम से प्रसिद्ध हैं। इनमें मुनिराजों को संसारतत्त्व एवं मुनिराजों को ही मोक्षतत्त्व और मोक्ष के साधन तत्त्व कहा है। वस्तु के अयथार्थ रूप को ग्रहण करनेवाले अनन्त संसारी श्रमणाभास ही संसारतत्त्व है; तथा वस्तुस्वरूप के यथार्थ ज्ञाता आत्मानुभवी शुद्धोपयोगी श्रमण ही मोक्षतत्त्व हैं, मोक्ष के साधनतत्त्व हैं।

सर्वान्त में मंगल आशीर्वाद देते हुए आचार्य कहते हैं कि जो व्यक्ति जिनेन्द्र भगवान के प्रवचनों के सार इस प्रवचनसार ग्रन्थ का भलीभाँति अध्ययन करेगा, वह प्रवचनसार के सार शुद्धात्मा को अवश्य प्राप्त करेगा।''

इसप्रकार आचार्य अमृतचन्द्र के अनुसार आचार्य कुन्दकुन्दकृत प्रवचनसार २७५ गाथाओं में समाप्त हो जाता है। इसके बाद आचार्य अमृतचन्द्र अपनी तत्त्वप्रदीपिका टीका में परिशिष्ट के रूप में ४७ नयों की चर्चा करते हैं, जो मूलत: पठनीय है।

आचार्य अमृतचन्दकृत समयसार की आत्मख्याति नामक टीका के अन्त में समागत ४७ शक्तियों एवं प्रवचनसार की तत्त्वप्रदीपिका टीका के अन्त में समागत ४७ नयों का निरूपण आचार्य अमृतचन्द्र की अपनी विशेषता है।

इसप्रकार हम देखते हैं कि अपनी अभूतपूर्व विषयवस्तु एवं प्रौढ़ प्रतिपादन शैली के कारण यह प्रवचनसार परमागम आज भी अद्वितीय है। मोह और क्षोभ से रहित साम्यभावरूप आत्म-परिणामों की प्राप्ति का मार्गदर्शक यह प्रवचनसार ग्रन्थ मात्र विद्वानों के अध्ययन की ही वस्तु नहीं है, अपितु इसका गहराई से अध्ययन करना प्रत्येक आत्मार्थी का प्राथमिक कर्तव्य है।

जन-जन की वस्तु इस अद्भुत कृति का गहराई से अध्ययन कर मुझ सहित प्रत्येक आत्मार्थीजन आचार्य कुन्दकुन्द एवं अमृतचन्द्र के समान ही साम्यभाव को प्राप्त हों – इस पावन भावना से विराम लेता हूँ।

Please inform us of any errors on rajesh@AtmaDharma.com



नमः श्री सिद्धेभ्यः ।

नमोऽनेकान्ताय ।

श्रीमद्भगवत्कुन्दकुन्दाचार्यदेवप्रणीतः

श्री प्रवचनसारः

●

— १ —

ज्ञानतत्त्व-प्रज्ञापन

●

श्रीमदमृतचन्द्रसूरिकृततत्त्वप्रदीपिकावृत्तिः

(मङ्गलाचरणम्)

सर्वव्याप्येकचिद्रूपस्वरूपाय परात्मने ।
स्वोपलब्धिप्रसिद्धाय ज्ञानानन्दात्मने नमः ॥ १ ॥

श्रीजयसेनाचार्यकृततात्पर्यवृत्तिः ।

नमः परमचैतन्यस्वात्मोत्थसुखसम्पदे ।
परमागमसाराय सिद्धाय परमेष्ठिने ॥

श्रीमद्भगवत्कुन्दकुन्दाचार्यकृत मूल गाथाओं और श्रीमद्
अमृतचन्द्रसूरिकृत तत्त्वप्रदीपिका नामक टीकाका

हिन्दी भाषानुवाद

[सर्व प्रथम, ग्रन्थके प्रारंभमें श्रीमद्भगवत्कुन्दकुन्दाचार्यदेवविरचित प्राकृत गाथाबद्ध श्री प्रवचनसार नामक शास्त्रकी 'तत्त्वप्रदीपिका' नामक संस्कृत टीकाके रचयिता श्री अमृतचन्द्राचार्यदेव उपरोक्त श्लोकोंके द्वारा मङ्गलाचरण करते हुए ज्ञानानन्दस्वरूप परमात्माका नमस्कार करते हैं :–]

Version 001: remember to check http://www.AtmaDharma.com for updates

हेलोल्लुप्तमहामोहतमस्तोमं जयत्यदः ।
प्रकाशयज्जगत्तत्त्वमनेकान्तमयं महः ।। २ ।।
परमानन्दसुधारसपिपासितानां हिताय भव्यानाम् ।
क्रियते प्रकटिततत्त्वा प्रवचनसारस्य वृत्तिरियम् ।। ३ ।।

अथ खलु कश्चिदासन्नसंसारपारावारपारः समुन्मीलितसातिशयविवेकज्योति-

---

अथ प्रवचनसारव्याख्यायां मध्यमरुचिशिष्यप्रतिबोधनार्थायां मुख्यगौणरूपेणान्तस्तत्त्वबहिस्तत्त्वप्ररूपणसमर्थायां च प्रथमत एकोत्तरशतगाथाभिर्ज्ञानाधिकारः, तदनन्तरं त्रयोदशाधिकशतगाथाभिर्दर्शनाधिकारः, ततश्च सप्तनवतिगाथाभिश्चारित्राधिकारश्चेति समुदायेनैकादशाधिकत्रिशतप्रमितसूत्रैः सम्यग्ज्ञानदर्शनचारित्ररूपेण महाधिकारत्रयं भवति । अथवा टीकाभिप्रायेण तु सम्यग्ज्ञानज्ञेयचारित्राधिकारचूलिकारूपेणाधिकारत्रयम् । तत्राधिकारत्रये प्रथमतस्तावज्ज्ञानाभिधानमहाधिकारमध्ये द्वासप्ततिगाथापर्यन्तं शुद्धोपयोगाधिकारः कथ्यते । तासु द्वासप्ततिगाथासु मध्ये 'एस सुरासुर–' इमां गाथामादिं कृत्वा पाठक्रमेण चतुर्दशगाथापर्यन्तं पीठिका, तदनन्तरं सप्तगाथापर्यन्तं सामान्येन सर्वज्ञसिद्धिः, तदनन्तरं त्रयस्त्रिंशद्गाथापर्यन्तं ज्ञानप्रपञ्चः, ततश्चाष्टादशगाथापर्यन्तं सुखप्रपञ्चश्चेत्यन्तराधिकारचतुष्टयेन शुद्धोपयोगाधिकारो भवति । अथ पञ्चविंशतिगाथापर्यन्तं ज्ञानकण्डिकाचतुष्टयप्रतिपादकनामा द्वितीयोऽधिकारश्चेत्यधिकारद्वयेन, तदनन्तरं स्वतन्त्रगाथाचतुष्टयेन चैकोत्तरशतगाथाभिः प्रथममहाधिकारे समुदायपातनिका ज्ञातव्या ।

अर्थ :– सर्वव्यापी (सबका ज्ञाता-द्रष्टा) एक चैतन्यरूप (मात्र चैतन्य ही) जिसका स्वरूप है और जो स्वानुभव प्रसिद्ध है (अर्थात् शुद्ध आत्मानुभवसे प्रकृष्टतया सिद्ध है) उस ज्ञानानन्दात्मक (ज्ञान और आनन्दस्वरूप) उत्कृष्ट आत्माको नमस्कार हो ।

[अब अनेकान्तमय ज्ञानकी मंगलके लिये श्लोक द्वारा स्तुति करते हैं :–]

अर्थ :– जो महामोहरूपी अंधकारसमूहको लीलामात्रमें नष्ट करता है और जगतके स्वरूपको प्रकाशित करता है ऐसा अनेकांतमय तेज सदा जयवंत है ।

[अब श्री अमृतचंद्राचार्यदेव श्लोक द्वारा अनेकांतमय जिनप्रवचनके सारभूत इस 'प्रवचनसार' शास्त्रकी टीका करनेकी प्रतिज्ञा करते हैं –]

अर्थ :– परमानन्दरूपी सुधारसके पिपासु भव्य जीवोंके हितार्थ, तत्त्वको (वस्तुस्वरूपको) प्रगट करनेवाली प्रवचनसारकी यह टीका रची जा रही है ।

[इसप्रकार मंगलाचरण और टीका रचनेकी प्रतिज्ञा करके, भगवान् कुन्द-कुन्दाचार्यदेवविरचित प्रवचनसारकी पहली पाँच गाथाओंके प्रारम्भमें श्री अमृतचन्द्राचार्यदेव उन गाथाओंकी उत्थानिका करते हैं ।]

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

रस्तमितसमस्तैकान्तवादाविद्याभिनिवेशः पारमेश्वरीमनेकान्तवादविद्यामुपगम्य मुक्त-समस्तपक्षपरिग्रहतयात्यन्तमध्यस्थो भूत्वा सकलपुरुषार्थसारतया नितान्तमात्मनो हिततमां भगवत्पंचपरमेष्ठिप्रसादोपजन्यां परमार्थसत्यां मोक्षलक्ष्मीमक्षयामुपादेयत्वेन निश्चिन्वन् प्रवर्तमानतीर्थनायकपुरःसरान् भगवतः पंचपरमेष्ठिनः प्रणमनवन्दनोपजनितनमस्करणेन संभाव्य सर्वारम्भेण मोक्षमार्गं संप्रतिपद्यमानः प्रतिजानीते –

इदानीं प्रथमपातनिकाभिप्रायेण प्रथमतः पीठिकाव्याख्यानं क्रियते, तत्र पञ्चस्थलानि भवन्ति; तेष्वादौ नमस्कारमुख्यत्वेन गाथापञ्चकं, तदनन्तरं चारित्रसूचनमुख्यत्वेन 'संपज्जइ णिव्वाणं' इति प्रभृति गाथात्रयमथ शुभाशुभशुद्धोपयोगत्रयसूचनमुख्यत्वेन 'जीवो परिणमदि' इत्यादिगाथासूत्रद्वयमथ तत्फलकथनमुख्यतया 'धम्मेण परिणदप्पा' इति प्रभृति सूत्रद्वयम्। अथ शुद्धोपयोगध्यातुः पुरुषस्य प्रोत्साहनार्थं शुद्धोपयोगफलदर्शनार्थं च प्रथमगाथा, शुद्धोपयोगिपुरुषलक्षणकथनेन द्वितीया चेति 'अइसयमादसमुत्थं' इत्यादि गाथाद्वयम्। एवं पीठिकाभिधानप्रथमान्तराधिकारे स्थलपञ्चकेन चतुर्दशगाथाभिस्समुदायपातनिका। तद्यथा –

अथ कश्चिदासन्नभव्यः शिवकुमारनामा स्वसंवित्तिसमुत्पन्नपरमानन्दैकलक्षणसुखामृतविपरीत-चतुर्गतिसंसारदुःखभयभीतः, समुत्पन्नपरमभेदविज्ञानप्रकाशातिशयः, समस्तदुर्नयैकान्तनिराकृतदुराग्रहः, परित्यक्तसमस्तशत्रुमित्रादिपक्षपातेनात्यन्तमध्यस्थो भूत्वा धर्मार्थकामेभ्यः सारभूतामत्यन्तात्म-हितामविनश्वरां पंचपरमेष्ठिप्रसादोत्पन्नां मुक्तिश्रियमुपादेयत्वेन स्वीकुर्वाणः, श्रीवर्धमानस्वामितीर्थ-करपरमदेवप्रमुखान् भगवतः पंचपरमेष्ठिनो द्रव्यभावनमस्काराभ्यां प्रणम्य परमचारित्रमाश्रयामीति प्रतिज्ञां करोति –

अब, जिनके संसार समुद्रका किनारा निकट है, सातिशय (उत्तम) विवेकज्योति प्रगट होगई है (अर्थात् परम भेदविज्ञानका प्रकाश उत्पन्न होगया है) तथा समस्त एकांतवादरूप अविद्याका अभिनिवेश* अस्त होगया है ऐसे कोई (आसन्नभव्य महात्मा श्रीमद्भगवत्कुन्दकुन्दाचार्य), पारमेश्वरी (परमेश्वर जिनेन्द्रदेवकी) अनेकान्तवादविद्याको प्राप्त करके, समस्त पक्षका परिग्रह (शत्रुमित्रादिका समस्त पक्षपात) त्याग देनेसे अत्यन्त मध्यस्थ होकर, [१]सर्व पुरुषार्थमें सारभूत होनेसे आत्माके लिये अत्यन्त [२]हिततम भगवन्त पंचपरमेष्ठीके [३]प्रसादसे उत्पन्न होने योग्य, परमार्थसत्य (पारमार्थिक रीतिसे सत्य), अक्षय (अविनाशी) मोक्षलक्ष्मीको [४]उपादेयरूपसे निश्चित करते हुए प्रवर्तमान

---

* अभिनिवेश=अभिप्राय; निश्चय; आग्रह। [१] पुरुषार्थ=धर्म, अर्थ, काम और मोक्ष इन चार पुरुष-अर्थों में (पुरुष-प्रयोजनों में) मोक्ष ही सारभूत श्रेष्ठ तात्विक पुरुष-अर्थ है। [२] हिततम=उत्कृष्ट हितस्वरूप।
[३] प्रसाद=प्रसन्नता, कृपा। [४] उपादेय=ग्रहण करने योग्य, (मोक्षलक्ष्मी हिततम, यथार्थ और अविनाशी होनेसे उपादेय है।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ सूत्रावतारः—

एस सुरासुरमणुसिंदवंदिदं धोदघाइकम्ममलं ।
पणमामि वड्ढमाणं तित्थं धम्मस्स कत्तारं ॥ १ ॥
सेसे पुण तित्थयरे ससव्वसिद्धे विसुद्धसब्भावे ।
समणे य णाणदंसणचरित्ततववीरियायारे ॥ २ ॥

पणमामीत्यादिपदखण्डनारूपेण व्याख्यानं क्रियते—**पणमामि** प्रणमामि । स कः । कर्ता **एस** एषोऽहं ग्रंथकरणोद्यतमनाः स्वसंवेदनप्रत्यक्षः । कं । **वड्ढमाणं** अवसमन्तादृद्धं वृद्धं मानं प्रमाणं ज्ञानं यस्य स भवति वर्धमानः, 'अवाप्योरलोपः' इति लक्षणेन भवत्यकारलोपोऽवशब्दस्यात्र, तं रत्नत्रयात्मकप्रवर्तमानधर्मतीर्थोपदेशकं श्रीवर्धमानतीर्थंकरपरमदेवम् । क्व प्रणमामि । प्रथमत एव । किंविशिष्टं । **सुरासुरमणुसिंदवंदिदं** त्रिभुवनाराध्यानन्तज्ञानादिगुणाधारपदाधिष्ठितत्वात्तत्पदाभिलाषिभिस्त्रिभुवनाधीशैः सम्यगाराध्यपादारविन्दत्वाच्च सुरासुरमनुष्येन्द्रवन्दितम् । पुनरपि किंविशिष्टं । **धोदघाइकम्ममलं** परमसमाधिसमुत्पन्नरागादिमलरहितपारमार्थिकसुखामृतरूपनिर्मलनीरप्रक्षालितघातिकर्ममलत्वादन्येषां पापमलप्रक्षालनहेतुत्वाच्च धौतघातिकर्ममलम् । पुनश्च किंलक्षणम् । **तित्थं** दृष्टश्रुतानुभूतविषयसुखाभिलाषरूपनीरप्रवेशरहितेन परमसमाधिपोतेनोत्तीर्णसंसारसमुद्रत्वात् अन्येषां तरणोपायभूतत्वाच्च तीर्थम् । पुनश्च किंरूपम् । **धम्मस्स कत्तारं** निरुपरागात्मतत्त्वपरिणतिरूपनिश्चयधर्मस्योपादानकारणत्वात् अन्येषामुत्तमक्षमादिबहुविधधर्मोपदेश-

---

तीर्थके नायक (श्री महावीरस्वामी) पूर्वक भगवंत पंचपरमेष्ठीको [१]प्रणमन और वन्दनसे होनेवाले नमस्कारके द्वारा सन्मान करके सर्वारम्भसे (उद्यमसे) मोक्षमार्गका आश्रय करते हुए प्रतिज्ञा करते हैं ।

अब, यहाँ (भगवत्कुन्दकुन्दाचार्यविरचित) गाथासूत्रोंका अवतरण किया जाता है ।

गाथा १–५

अन्वयार्थ :–[**एषः**] यह मैं [**सुरासुरमनुष्येन्द्रवंदितं**] जो [२]सुरेन्द्रों, [३]असुरेन्द्रों और [४]नरेन्द्रोंसे वन्दित हैं तथा जिन्होंने [**धौतघातिकर्ममलं**] घाति कर्ममलको धो डाला है ऐसे [**तीर्थं**] तीर्थरूप और [**धर्मस्य कर्तारं**] धर्मके कर्ता [**वर्धमानं**] श्री वर्द्धमानस्वामीको [**प्रणमामि**] नमस्कार करता हूँ ।

---

[१] प्रणमन=देहसे नमस्कार करना । वन्दन=वचनसे स्तुति करना । नमस्कारमें प्रणमन और वन्दन दोनों का समावेश होता है । [२] सुरेन्द्र=ऊर्ध्वलोकवासी देवोंके इन्द्र । [३] अधोसुरेन्द्र=अधोलोकवासी देवों के इन्द्र । [४] नरेन्द्र=(मध्यलोकवासी) मनुष्योंके अधिपति, राजा ।

सुर–असुर–नरपतिवंद्यने, प्रविनष्ट घातीकर्मने ।
प्रणमन करूं हूँ धर्मकर्त्ता तीर्थ श्रीमहावीरने ॥ १ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

ते ते सव्वे समगं समगं पत्तेगमेव पत्तेगं ।
वंदामि य वट्टंते अरहंते माणुसे खेत्ते ॥ ३ ॥

एष सुरासुरमनुष्येन्द्रवन्दितं धौतघातिकर्ममलम् ।
प्रणमामि वर्धमानं तीर्थं धर्मस्य कर्तारम् ॥ १ ॥
शेषान् पुनस्तीर्थकरान् ससर्वसिद्धान् विशुद्धसद्भावान् ।
श्रमणांश्च ज्ञानदर्शनचारित्रतपोवीर्याचारान् ॥ २ ॥
तांस्तान् सर्वान् समकं समकं प्रत्येकमेव प्रत्येकम् ।
वन्दे च वर्तमानानर्हतो मानुषे क्षेत्रे ॥ ३ ॥

कत्वाच्च धर्मस्य कर्तारम्। इति क्रियाकारकसम्बन्धः। एवमन्तिमतीर्थकरनमस्कारमुख्यत्वेन गाथा गता ॥१॥ तदनन्तरं प्रणमामि। कान्। **सेसे पुण तित्थयरे ससव्वसिद्धे** शेषतीर्थकरान्, पुनः ससर्वसिद्धान् वृषभादिपार्श्वपर्यन्तान् शुद्धात्मोपलब्धिलक्षणसर्वसिद्धसहितानेतान् सर्वानपि। कथंभूतान्। **विसुद्धसब्भावे** निर्मलात्मोपलब्धिबलेन विश्लेषिताखिलावरणत्वात्केवलज्ञानदर्शनस्वभावत्वाच्च विशुद्धसद्भावान्। **समणे य** श्रमणशब्दवाच्यानाचार्योपाध्यायसाधूंश्च। किंलक्षणान्। **णाणदंसण-चरित्ततववीरियायारे** सर्वविशुद्धद्रव्यगुणपर्यायात्मके चिद्वस्तुनि यासौ रागादिविकल्परहितनिश्चल-चित्तवृत्तिस्तदन्तर्भूतेन व्यवहारपञ्चाचारसहकारिकारणोत्पन्नेन निश्चयपञ्चाचारेण परिणतत्वात् सम्यग्ज्ञानदर्शनचारित्रतपोवीर्याचारोपेतानिति। एवं शेषत्रयोविंशतितीर्थकरनमस्कारमुख्यत्वेन गाथा

[**पुनः**] और [**विशुद्धसद्भावान्**] विशुद्ध [1]सत्तावाले [**शेषान् तीर्थकरान्**] शेष तीर्थंकरोंको [**ससर्वसिद्धान्**] सर्व सिद्धभगवन्तोंके साथ ही, [**च**] और [**ज्ञानदर्शन-चारित्रतपोवीर्याचारान्**] ज्ञानाचार, दर्शनाचार, चारित्राचार, तपाचार तथा वीर्याचार युक्त [**श्रमणान्**] [2]श्रमणोंको नमस्कार करता हूँ।

[**तान् तान् सर्वान्**] उन उन सबको [**च**] तथा [**मानुषे क्षेत्रे वर्तमानान्**] मनुष्य क्षेत्रमें विद्यमान [**अर्हतः**] अरहन्तोंको [**समकं समकं**] साथ ही साथ – समुदाय-रूपसे और [**प्रत्येकं एव प्रत्येकं**] प्रत्येक प्रत्येकको – व्यक्तिगत [**वंदे**] वन्दना करता हूँ।

---

[1] सत्ता=अस्तित्व। [2] श्रमण=आचार्य उपाध्याय और साधु।

वली शेष तीर्थंकर अने सौ सिद्ध शुद्धास्तित्वने ।
मुनि ज्ञान दृग–चारित्र–तप–वीर्याचरण संयुक्तने ॥ २ ॥
ते सर्वने साथे तथा प्रत्येकने प्रत्येकने ।
वंदुं वली हुं मनुष्य क्षेत्रे वर्तता अर्हंतने ॥ ३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

किच्चा अरहंताणं सिद्धाणं तह णमो गणहराणं ।
अज्झावयवग्गाणं साहूणं चेव सव्वेसिं ॥ ४ ॥
तेसिं विसुद्धदंसणणाणहाणासमं समासेज्ज ।
उवसंपयामि सम्मं जत्तो णिव्वाणसंपत्ती ॥ ५ ॥ (पणगं)

कृत्वार्हद्भ्यः सिद्धेभ्यस्तथा नमो गणधरेभ्यः ।
अध्यापकवर्गेभ्यः साधुभ्यश्चैव सर्वेभ्यः ॥ ४ ॥
तेषां विशुद्धदर्शनज्ञानप्रधानाश्रमं समासाद्य ।
उपसंपद्ये साम्यं यतो निर्वाणसंप्राप्तिः ॥ ५ ॥ [पंचकम्]

एष स्वसंवेदनप्रत्यक्षदर्शनज्ञानसामान्यात्माहं सुरासुरमनुष्येन्द्रवन्दितत्वात्त्रिलोकैकगुरुं, धौतघातिकर्ममलत्वाज्जगदनुग्रहसमर्थानन्तशक्तिपारमैश्वर्यं, योगिनां तीर्थत्वात्तारणसमर्थं, धर्मकर्तृत्वाच्छुद्धस्वरूपवृत्तिविधातारं, प्रवर्तमानतीर्थनायकत्वेन प्रथमत एव परमभट्टारकमहादेवाधिदेवपरमेश्वरपरमपूज्यसुगृहीतनामश्रीवर्धमानदेवं प्रणमामि ॥१॥

[अर्हद्भ्यः] इसप्रकार अरहन्तोंको [सिद्धेभ्यः] सिद्धोंको [तथा गणधरेभ्यः] आचार्योंको [अध्यापकवर्गेभ्यः] उपाध्यायवर्गको [च एवं] और [सर्वेभ्यः साधुभ्यः] सर्व साधुओंको [नमः कृत्वा] नमस्कार करके [तेषां] उनके [विशुद्धदर्शनज्ञानप्रधानाश्रमं] [1]विशुद्धदर्शनज्ञानप्रधान आश्रमको [समासाद्य] प्राप्त करके [साम्यं उपसंपद्ये] मैं [2]साम्यको प्राप्त करता हूँ [यतः] जिससे [निर्वाणसंप्राप्तिः] निर्वाणकी प्राप्ति होती है ।

टीका :– यह [3]स्वसंवेदनप्रत्यक्ष [4]दर्शनज्ञानसामान्यस्वरूप मैं, जो सुरेन्द्रों, असुरेन्द्रों और नरेन्द्रोंके द्वारा वन्दित होनेसे तीन लोकके एक (अनन्य सर्वोत्कृष्ट) गुरु हैं, जिनमें घातिकर्ममलके धो डालनेसे जगत पर अनुग्रह करनेमें समर्थ अनन्तशक्तिरूप परमेश्वरता

---

[1] विशुद्धदर्शनज्ञानप्रधान=विशुद्ध दर्शन और ज्ञान जिसमें प्रधान (मुख्य) हैं, ऐसे । [2] साम्य=समता, समभाव ।
[3] स्वसंवेदनप्रत्यक्ष=स्वानुभवसे प्रत्यक्ष (दर्शनज्ञानसामान्य स्वानुभवसे प्रत्यक्ष है) ।
[4] दर्शनज्ञानसामान्यस्वरूप=दर्शनज्ञानसामान्य अर्थात् चेतना जिसका स्वरूप है ऐसा ।

अर्हंतने श्री सिद्धने य नमस्करण करी ए रीते ।
गणधर अने अध्यापकोने सर्व साधु समूहने ॥ ४ ॥
तसु शुद्ध दर्शन ज्ञान मुख्य पवित्र आश्रम पामीने ।
प्राप्ति करूं हुं साम्यनी, जेनाथी शिवप्राप्ति बने ॥ ५ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

तदनु विशुद्धसद्भावत्वादुपात्तपाकोत्तीर्णजात्यकार्तस्वरस्थानीयशुद्धदर्शनज्ञानस्वभावान् शेषानतीततीर्थनायकान्, सर्वान् सिद्धांश्च, ज्ञानदर्शनचारित्रतपोवीर्याचारयुक्तत्वात् संभावित-परमशुद्धोपयोगभूमिकानाचार्योपाध्यायसाधुत्वविशिष्टान् श्रमणांश्च प्रणमामि ।। २ ।। तदन्वेतानेव पंचपरमेष्ठिनस्तत्तद्व्यक्तिव्यापिनः सर्वानेव सांप्रतमेतत्क्षेत्रसंभवतीर्थकरासंभवान्महाविदेहभूमिसंभवत्वे सति मनुष्यक्षेत्रप्रवर्तिभिस्तीर्थनायकैः सह वर्तमानकालं गोचरीकृत्य युगपद्युगपत्प्रत्येकं प्रत्येकं च मोक्षलक्ष्मीस्वयंवरायमाणपरमनैर्ग्रन्थ्यदीक्षाक्षणोचितमंगलाचारभूतकृतिकर्मशास्त्रोपदिष्टवंदनाभिधानेन सम्भावयामि ।। ३ ।। अथैवमर्हत्सिद्धाचार्योपा-

---

गता ॥२॥ अथ **ते ते सव्वे** तांस्तान्पूर्वोक्तानेव पञ्चपरमेष्ठिनः सर्वान् **वंदामि य** वन्दे, अहं कर्ता। कथं। **समगं समगं** समुदायवन्दनापेक्षया युगपद्युगपत्। पुनरपि कथं। **पत्तेगमेव पत्तेगं** प्रत्येकवन्दनापेक्षया प्रत्येकं प्रत्येकम्। न केवलमेतान् वन्दे। **अरहंते** अर्हतः। किंविशिष्टान्। **वट्टंते माणुसे खेत्ते** वर्तमानान्। क्व। मानुषे क्षेत्रे। तथा हि—साम्प्रतमत्र भरतक्षेत्रे तीर्थंकराभावात् पञ्चमहाविदेहस्थितश्रीसीमन्धरस्वामितीर्थंकरपरमदेवप्रभृतितीर्थंकरैः सह तानेव पञ्चपरमेष्ठिनो नमस्करोमि। कया। करणभूतया मोक्षलक्ष्मीस्वयंवरमण्डपभूतजिनदीक्षाक्षणे मङ्गलाचारभूतया अनन्तज्ञानादिसिद्धगुणभावनारूपया सिद्धभक्त्या, तथैव निर्मलसमाधिपरिणतपरमयोगिगुणभावनालक्षणया योगभक्त्या चेति। एवं पूर्वविदेहतीर्थंकरनमस्कारमुख्यत्वेन गाथा गतेत्यभिप्रायः ॥ ३ ॥ अथ **किच्चा**

है, जो तीर्थताके कारण योगियोंको तारनेमें समर्थ हैं, धर्मके कर्ता होनेसे जो शुद्ध स्वरूपपरिणतिके कर्ता हैं, उन परम भट्टारक, महादेवाधिदेव, परमेश्वर, परमपूज्य, जिनका नामग्रहण भी अच्छा है ऐसे श्री वर्द्धमानदेवको प्रवर्तमान तीर्थकी नायकताके कारण प्रथम ही, प्रणाम करता हूँ ।। १ ।।

तत्पश्चात् जो विशुद्ध सत्तावान् होनेसे तापसे उत्तीर्ण हुए (अन्तिम ताव दिये हुए अग्निमेंसे बाहर निकले हुए) उत्तम सुवर्णके समान शुद्धदर्शनज्ञानस्वभावको प्राप्त हुए हैं, ऐसे शेष [1]अतीत तीर्थंकरोंको और सर्वसिद्धोंको तथा ज्ञानाचार, दर्शनाचार, चारित्राचार, तपाचार और वीर्याचारयुक्त होनेसे जिन्होंने परम शुद्ध उपयोगभूमिकाको प्राप्त किया है, ऐसे श्रमणोंको – जो कि आचार्यत्व, उपाध्यायत्व और साधुत्वरूप विशेषोंसे विशिष्ट (भेदयुक्त) हैं उन्हें – नमस्कार करता हूँ ।। २ ।।

तत्पश्चात् इन्हीं पंचपरमेष्ठियोंको, उस-उस व्यक्तिमें (पर्यायमें) व्याप्त होनेवाले सभीको, वर्तमानमें इस क्षेत्रमें उत्पन्न तीर्थंकरोंका अभाव होनेसे और महाविदेहक्षेत्रमें उनका सद्भाव होनेसे मनुष्यक्षेत्रमें प्रवर्तमान तीर्थनायकयुक्त वर्तमानकालगोचर करके, (महाविदेहक्षेत्रमें वर्तमान श्री सीमंधरादि तीर्थंकरोंकी भाँति मानों सभी पंच

---

[1] अतीत=गत, होगये, भूतकालीन।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

ध्यायसर्वसाधूनां प्रणतिवन्दनाभिधानप्रवृत्तद्वैतद्वारेण भाव्यभावकभावविजृम्भितातिनिर्भरेतरेतरसंवलनबलविलीननिखिलस्वपरविभागतया प्रवृत्ताद्वैतं नमस्कारं कृत्वा ॥४॥ तेषामेवार्हत्सिद्धाचार्योपाध्यायसर्वसाधूनां विशुद्धज्ञानदर्शनप्रधानत्वेन सहजशुद्धदर्शनज्ञानस्वभावात्मतत्त्वश्रद्धानावबोधलक्षणसम्यग्दर्शनज्ञानसंपादकमाश्रमं समासाद्य सम्यग्दर्शनज्ञानसंपन्नो भूत्वा, जीवत्कषायकणतया पुण्यबन्धसंप्राप्तिहेतुभूतं सरागचारित्रं क्रमापतितमपि

कृत्वा । कम् । **णमो** नमस्कारम् । केभ्यः । **अरहंताणं सिद्धाणं तह णमो गणहराणं अज्झावयवग्गाणं साहूणं चेव** अर्हत्सिद्धगणधरोपाध्यायसाधुभ्यश्चैव । कतिसंख्योपेतेभ्यः । **सव्वेसिं** सर्वेभ्यः । इति पूर्वगाथात्रयेण कृतपञ्चपरमेष्ठिनमस्कारोपसंहारोऽयम् ॥ ४ ॥ एवं पञ्चपरमेष्ठिनमस्कारं कृत्वा किं करोमि । **उवसंपयामि** उपसंपद्ये समाश्रयामि । किम् । **सम्मं** साम्यं चारित्रम् । यस्मात् किं भवति । **जत्तो णिव्वाणसंपत्ती** यस्मान्निर्वाणसंप्राप्तिः । किं कृत्वा पूर्वं । **समासिज्ज** समासाद्य प्राप्य । कम् । **विसुद्धणाणदंसणपहाणासमं** विशुद्धज्ञानदर्शनलक्षणप्रधानाश्रमम् । केषां सम्बंधित्वेन । **तेसिं** तेषां पूर्वोक्तपञ्चपरमेष्ठिनामिति । तथाहि–अहमाराधकः, एते चार्हदादय आराध्या, इत्याराध्याराधकविकल्परूपो

परमेष्ठी भगवान वर्तमानकालमें ही विद्यमान हों, इसप्रकार अत्यन्त भक्तिके कारण भावना भाकर – चिंतवन करके उन्हें) युगपद् युगपद् अर्थात् समुदायरूपसे और प्रत्येक प्रत्येकको अर्थात् व्यक्तिगतरूपसे [१]संभावना करता हूँ । किस प्रकारसे संभावना करता हूँ ? मोक्षलक्ष्मीके स्वयंवर समान जो परम निर्ग्रन्थताकी दीक्षाका उत्सव (आनन्दमय प्रसंग) है उसके उचित मंगलाचरणभूत जो [२]कृतिकर्मशास्त्रोपदिष्ट वन्दनोच्चार (कृतिकर्मशास्त्रमें उपदेशे हुए स्तुतिवचन) के द्वारा सम्भावना करता हूँ ॥ ३ ॥

अब इस प्रकार अरहन्त, सिद्ध, आचार्य, उपाध्याय तथा सर्व साधुओंको प्रणाम और वन्दनोच्चारसे प्रवर्तमान द्वैतके द्वारा, [३]भाव्यभावक भावसे उत्पन्न अत्यन्त गाढ़ [४]इतरेतर मिलनके कारण समस्त स्वपरका विभाग विलीन होजानेसे जिसमें [५]अद्वैत प्रवर्तमान है ऐसा नमस्कार करके, उन्हीं अर्हन्त, सिद्ध, आचार्य, उपाध्याय, सर्व-

---

[१] संभावना=संभावना करना, सन्मान करना, आराधन करना ।

[२] कृतिकर्म=अंगबाह्य १४ प्रकीर्णकोंमें छट्ठा प्रकीर्णक कृतिकर्म है जिसमें नित्यनैमित्तिक क्रियाका वर्णन है ।

[३] भाव्य=भाने योग्य; चिंतवन करने योग्य; ध्यान करने योग्य अर्थात् ध्येय । भावक=भावना करनेवाला, चिंतवन करनेवाला, ध्यान करनेवाला अर्थात् ध्याता ।

[४] इतरेतरमिलन=एक दूसरे का परस्पर मिल जाना अर्थात् मिश्रित हो जाना ।

[५] अद्वैत=पंच परमेष्ठी के प्रति अत्यंत आराध्य भावके कारण आराध्यरूप पंच परमेष्ठी भगवान् और आराधकरूप अपने भेदका विलय हो जाता है । इस प्रकार नमस्कारमें अद्वैत पाया जाता है । यद्यपि नमस्कारमें प्रणाम और वंदनोच्चार दोनोंका समावेश होता है इसलिये उसमें द्वैत कहा है, तथापि तीव्र भक्तिभावसे स्वपरका भेदविलीन हो जानेकी अपेक्षासे उसमें अद्वैत पाया जाता है ।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

दूरमुत्क्रम्य सकलकषायकलिकलङ्कविविक्ततया निर्वाणसंप्राप्तिहेतुभूतं वीतरागचारित्राख्यं साम्यमुपसंपद्ये। सम्यग्दर्शनज्ञानचारित्रैक्यात्मकैकाग्र्यं गतोऽस्मीति प्रतिज्ञार्थः। एवं तावदयं साक्षान्मोक्षमार्गं संप्रतिपन्नः ॥५॥

अथायमेव वीतरागसरागचारित्रयोरिष्टानिष्टफलत्वेनोपादेयहेयत्वं विवेचयति –

संपज्जदि णिव्वाणं देवासुरमणुयरायविहवेहिं।
जीवस्स चरित्तादो दंसणणाणप्पहाणादो ॥ ६ ॥

द्वैतनमस्कारो भण्यते। रागाद्युपाधिविकल्परहितपरमसमाधिबलेनात्मन्येवाराध्याराधकभावः पुनरद्वैतनमस्कारो भण्यते। इत्येवंलक्षणं पूर्वोक्तगाथात्रयकथितप्रकारेण पञ्चपरमेष्ठिसम्बंधिनं द्वैताद्वैतनमस्कारं कृत्वा। ततः किं करोमि। रागादिभ्यो भिन्नोऽयं स्वात्मोत्थसुखस्वभावः परमात्मेति भेदज्ञानं, तथा स एव सर्वप्रकारोपादेय इति रुचिरूपं सम्यक्त्वमित्युक्तलक्षणज्ञानदर्शनस्वभावं, मठचैत्यालयादिलक्षणव्यवहाराश्रमाद्विलक्षणं, भावाश्रमरूपं प्रधानाश्रमं प्राप्य, तत्पूर्वकं क्रमायातमपि सरागचारित्रं पुण्यबन्धकारणमिति ज्ञात्वा परिहृत्य निश्चलशुद्धात्मानुभूतिस्वरूपं वीतरागचारित्रमहमाश्रयामीति भावार्थः। एवं प्रथमस्थले नमस्कारमुख्यत्वेन गाथापञ्चकं गतम् ॥५॥ अथोपादेयभूतस्यातींद्रियसुखस्य कारणत्वाद्वीतरागचारित्रमुपादेयम्। अतींद्रियसुखापेक्षया हेयस्येन्द्रियसुखस्य कारणत्वात्सरागचारित्रं हेयमित्युपदिशति—**संपज्जदि** संपद्यते। किम्। **णिव्वाणं** निर्वाणम्। कथम्। सह। कैः। **देवासुरमणुयरायविहवेहिं** देवासुरमनुष्यराजविभवैः। कस्य। **जीवस्स** जीवस्य। कस्मात्। **चरित्तादो** चारित्रात्। कथंभूतात्। **दंसणणाणप्पहाणादो** सम्यग्दर्शनज्ञानप्रधानादिति। तद्यथा—आत्माधीनज्ञानसुखस्वभावे शुद्धात्मद्रव्ये यन्निश्चलनिर्विकारानुभूतिरूपमवस्थानं तल्लक्षणनिश्चयचारित्राज्जीवस्य समुत्पद्यते। किम्। पराधीनेन्द्रियजनितज्ञानसुखविलक्षणं, स्वाधीनातीन्द्रियरूपपरमज्ञानसुखलक्षणं निर्वाणम्। सरागचारित्रात्पुनर्देवासुरमनुष्यराजविभूतिजनको मुख्यवृत्त्या

साधुओंके आश्रमको, – जो कि (आश्रम) विशुद्धज्ञानदर्शनप्रधान होनेसे [1]सहजशुद्धदर्शनज्ञानस्वभाववाले आत्मतत्त्वका श्रद्धान और ज्ञान जिसका लक्षण है ऐसे सम्यग्दर्शन और सम्यग्ज्ञानका [2]सम्पादक है उसे – प्राप्त करके, सम्यग्दर्शनज्ञानसम्पन्न होकर, जिसमें [3]कषायकण विद्यमान होनेसे जीवको जो पुण्यबन्धकी प्राप्तिका कारण है ऐसे सराग चारित्रको – वह (सराग चारित्र) क्रमसे आ पड़ने पर भी (गुणस्थान-आरोहणके क्रममें बलात् चारित्रमोहके मन्द उदयसे आ पड़ने पर भी) – दूर उल्लंघन

---

[1] सहजशुद्धदर्शनज्ञानस्वभाववाले=सहज शुद्ध दर्शन और ज्ञान जिनका स्वभाव है वे।

[2] सपादक=प्राप्त करानेवाला, उत्पन्न करनेवाला।

[3] कषायकण=कषायका सूक्ष्मांश।

सुर असुर–मनुजेन्द्रो तणा विभवो सहित निर्वाणनी।
प्राप्ति करे चारित्रथी जीव ज्ञानदर्शन मुख्य थी ॥ ६ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

संपद्यते निर्वाणं देवासुरमनुजराजविभवैः ।
जीवस्य चरित्राद्दर्शनज्ञानप्रधानात् ॥ ६ ॥

संपद्यते हि दर्शनज्ञानप्रधानाच्चारित्राद्वीतरागान्मोक्षः । तत एव च सरागाद्देवासुर-मनुजराजविभवक्लेशरूपो बन्धः । अतो मुमुक्षुणेष्टफलत्वाद्वीतरागचारित्रमुपादेयमनिष्ट-फलत्वात्सरागचारित्रं हेयम् ॥ ६ ॥

विशिष्टपुण्यबन्धो भवति, परम्परया निर्वाणं चेति। असुरेषु मध्ये सम्यग्दृष्टिः कथमुत्पद्यते इति चेत्-निदानबन्धेन सम्यक्त्वविराधनां कृत्वा तत्रोत्पद्यत इति ज्ञातव्यम्। अत्र निश्चयेन वीतरागचारित्र-मुपादेयं सरागं हेयमिति भावार्थः ॥ ६ ॥ अथ निश्चयचारित्रस्य पर्यायनामानि कथयामीत्यभिप्रायं

करके, जो समस्त कषायक्लेशरूपी कलंकसे भिन्न होनेसे निर्वाणप्राप्तिका कारण है ऐसे वीतरागचारित्र नामक साम्यको प्राप्त करता हूँ। सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्रकी ऐक्यस्वरूप एकाग्रताको मैं प्राप्त हुआ हूँ, यह (इस) प्रतिज्ञाका अर्थ है। इस प्रकार तब इन्होंने (श्रीमद्भगवत्कुन्दकुन्दाचार्यदेवने) साक्षात् मोक्षमार्गको अंगीकार किया ॥ ४-५ ॥

अब वे ही (कुन्दकुन्दाचार्यदेव) वीतरागचारित्र इष्ट फलवाला है इसलिये उसकी उपादेयता और सरागचारित्र अनिष्ट फलवाला है इसलिये उसकी हेयताका विवेचन करते हैं :—

गाथा ६

अन्वयार्थ :— [**जीवस्य**] जीवको [**दर्शनज्ञानप्रधानात्**] दर्शनज्ञानप्रधान [**चारित्रात्**] चारित्रसे [**देवासुरमनुजराजविभवैः**] देवेन्द्र, असुरेन्द्र और नरेन्द्रके वैभवोंके साथ [**निर्वाणं**] निर्वाण [**संपद्यते**] प्राप्त होता है। (जीवको सराग चारित्रसे देवेन्द्र इत्यादिके वैभवोंकी और वीतराग चारित्रसे निर्वाणकी प्राप्ति होती है।)

टीका :— दर्शनज्ञानप्रधान चारित्रसे, यदि वह (चारित्र) वीतराग हो तो मोक्ष प्राप्त होता है; और उससे ही, यदि वह सराग हो तो देवेन्द्र-असुरेन्द्र-नरेन्द्रके वैभवक्लेशरूप बन्धको प्राप्ति होती है। इसलिये मुमुक्षुओंको इष्ट फलवाला होनेसे वीतरागचारित्र ग्रहण करने योग्य (उपादेय) है, और अनिष्ट फलवाला होनेसे सरागचारित्र त्यागने योग्य (हेय) है ॥ ६ ॥

अब चारित्रका स्वरूप व्यक्त करते हैं :—

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ चारित्रस्वरूपं विभावयति –

चारित्तं खलु धम्मो धम्मो जो सो समो त्ति णिद्दिट्ठो ।
मोहक्खोहविहीणो परिणामो अप्पणो हु समो ॥ ७ ॥

चारित्रं खलु धर्मो धर्मो यस्तत्साम्यमिति निर्दिष्टम् ।
मोहक्षोभविहीनः परिणाम आत्मनो हि साम्यम् ॥ ७ ॥

मनसि संप्रधार्य सूत्रमिदं निरूपयति, एवमग्रेऽपि विवक्षितसूत्रार्थं मनसि धृत्वाथवास्य सूत्रस्याग्रे सूत्रमिदमुचितं भवत्येवं निश्चित्य सूत्रमिदं प्रतिपादयतीति पातनिकालक्षणं यथासंभवं सर्वत्र ज्ञातव्यम्– **चारित्तं** चारित्रं कर्तृ **खलु धम्मो** खलु स्फुटं धर्मो भवति । **धम्मो जो सो समो त्ति णिद्दिट्ठो** धर्मो यः स तु शम इति निर्दिष्टः । **समो** यस्तु शमः सः **मोहक्खोहविहीणो परिणामो अप्पणो हु** मोहक्षोभविहीनः परिणामः । कस्य । आत्मनः । **हु** स्फुटमिति । तथाहि–शुद्धचित्स्वरूपे चरणं चारित्रं, तदेव चारित्रं मिथ्यात्वरागादिसंसरणरूपे भावसंसारे पतन्तं प्राणिनमुद्धृत्य निर्विकारशुद्धचैतन्ये धरतीति धर्मः । स एव धर्मः स्वात्मभावनोत्थसुखामृतशीतजलेन कामक्रोधादिरूपाग्निजनितस्य संसारदुःखदाहस्योपशमकत्वात् शम इति । ततश्च शुद्धात्मश्रद्धानरूपसम्यक्त्वस्य विनाशको दर्शनमोहाभिधानो मोह इत्युच्यते । निर्विकारनिश्चलचित्तवृत्तिरूपचारित्रस्य विनाशकश्चारित्रमोहाभिधानः क्षोभ इत्युच्यते । तयोर्विध्वंसकत्वात्स एव शमो मोहक्षोभविहीनः शुद्धात्मपरिणामो भण्यत इत्यभिप्रायः ॥ ७ ॥

गाथा ७

अन्वयार्थ :– [**चारित्रं**] चारित्र [**खलु**] वास्तवमें [**धर्मः**] धर्म है । [**यः धर्मः**] जो धर्म है [**तत् साम्यम्**] वह साम्य है [**इति निर्दिष्टम्**] ऐसा (शास्त्रोंमें) कहा है । [**साम्यं हि**] साम्य [**मोहक्षोभविहीनः**] मोहक्षोभरहित ऐसा [**आत्मनः परिणामः**] आत्माका परिणाम (भाव) है ।

टीका :– स्वरूपमें चरण करना (रमना) सो चारित्र है। स्वसमयमें प्रवृत्ति करना (अपने स्वभावमें प्रवृत्ति करना) ऐसा इसका अर्थ है । यही वस्तुका स्वभाव होनेसे धर्म है । शुद्ध चैतन्यका प्रकाश करना यह इसका अर्थ है । वही यथावस्थित आत्मगुण होनेसे (विषमतारहित सुस्थित आत्माका गुण होनेसे) साम्य है । और साम्य, दर्शनमोहनीय तथा चारित्रमोहनीयके उदयसे उत्पन्न होनेवाले समस्त मोह और क्षोभके अभावके कारण अत्यन्त निर्विकार ऐसा जीवका परिणाम है ।

भावार्थ :– शुद्ध आत्माके श्रद्धारूप सम्यक्त्वसे विरुद्ध भाव (मिथ्यात्व) वह मोह है और निर्विकार निश्चल चैतन्यपरिणतिरूप चारित्रसे विरुद्ध भाव (अस्थिरता)

चारित्र छे ते धर्म, जे धर्म छे ते साम्य छे ।
ने साम्य जीवनो मोह क्षोभ विहीन निज परिणाम छे ॥ ७ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

स्वरूपे चरणं चारित्रं, स्वसमयप्रवृत्तिरित्यर्थः। तदेव वस्तुस्वभावत्वाद्धर्मः। शुद्धचैतन्यप्रकाशनमित्यर्थः। तदेव च यथावस्थितात्मगुणत्वात्साम्यम्। साम्यं तु दर्शनचारित्रमोहनीयोदयापादितसमस्तमोहक्षोभाभावादत्यन्तनिर्विकारो जीवस्य परिणामः ॥ ७ ॥

अथात्मनश्चारित्रत्वं निश्चिनोति –

परिणमदि जेण दव्वं तक्कालं तम्मयं ति पण्णत्तं।
तम्हा धम्मपरिणदो आदा धम्मो मुणेयव्वो ॥ ८ ॥

अथाभेदनयेन धर्मपरिणत आत्मैव धर्मो भवतीत्यावेदयति–**परिणमदि जेण दव्वं तक्काले तम्मय त्ति पण्णत्तं** परिणमति येन पर्यायेण द्रव्यं कर्तृ तत्काले तन्मयं भवतीति प्रज्ञप्तम् यतः कारणात्, **तम्हा धम्मपरिणदो आदा धम्मो मुणेदव्वो** ततः कारणात् धर्मेण परिणत आत्मैव धर्मो मन्तव्य इति। तद्यथा-निजशुद्धात्मपरिणतिरूपो निश्चयधर्मो भवति। पञ्चपरमेष्ठ्यादिभक्तपरिणामरूपो व्यवहारधर्मस्तावदुच्यते। यतस्तेन तेन विवक्षितावविवक्षितपर्यायेण परिणतं द्रव्यं तन्मयं भवति, ततः पूर्वोक्तधर्मद्वयेन परिणतस्तप्तायःपिण्डवदभेदनयेनात्मैव धर्मो भवतीति ज्ञातव्यम्। तदपि कस्मात्, उपादानकारणसदृशं हि कार्यमिति वचनात्। तच्च पुनरुपादानकारणं शुद्धाशुद्धभेदेन द्विधा। रागादिविकल्परहितस्वसंवेदनज्ञानमागमभाषया शुक्लध्यानं वा केवलज्ञानोत्पत्तौ शुद्धोपादानकारणं भवति। अशुद्धात्मा तु रागादीनामशुद्धनिश्चयेनाशुद्धोपादानकारणं भवतीति सूत्रार्थः। एवं चारित्रस्य संक्षेपसूचनरूपेण द्वितीयस्थले गाथात्रयं गतम् ॥ ८ ॥ अथ शुभाशुभशुद्धोपयोगत्रयेण परिणतो जीवः शुभा-

---

वह क्षोभ है। मोह और क्षोभ रहित परिणाम, साम्य, धर्म और चारित्र यह सब पर्यायवाची हैं ॥ ७ ॥

अब आत्माकी चारित्रता (अर्थात् आत्मा ही चारित्र है ऐसा) निश्चय करते हैं :–

गाथा ८

अन्वयार्थ :– [**द्रव्यं**] द्रव्य जिस समय [**येन**] जिस भावरूपसे [**परिणमति**] परिणमन करता है [**तत्कालं**] उस समय [**तन्मयं**] उस मय है [**इति**] ऐसा [**प्रज्ञप्तं**] (जिनेन्द्र देवने) कहा है, [**तस्मात्**] इसलिये [**धर्मपरिणतः आत्मा**] धर्मपरिणत आत्माको [**धर्मः मन्तव्यः**] धर्म समझना चाहिये।

टीका :– वास्तवमें जो द्रव्य जिस समय जिस भावरूपसे परिणमन करता है, वह द्रव्य उस समय उष्णतारूपसे परिणमित लोहेके गोलेकी भाँति उस मय है, इसलिये यह आत्मा धर्मरूप परिणमित होनेसे धर्म ही है। इसप्रकार आत्माकी चारित्रता सिद्ध हुई।

जे भावमां प्रणमे दरव, ते काल तन्मय ते कह्युं।
जीवद्रव्य तेथी धर्ममां प्रणमेल धर्म ज जाणवुं ॥ ८ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

परिणमति येन द्रव्यं तत्कालं तन्मयमिति प्रज्ञप्तम् ।
तस्माद्धर्मपरिणत आत्मा धर्मो मन्तव्यः ॥ ८ ॥

यत्खलु द्रव्यं यस्मिन्काले येन भावेन परिणमति तत् तस्मिन् काले किलौष्ण्यपरिणतायःपिण्डवत्तन्मयं भवति । ततोऽयमात्मा धर्मेण परिणतो धर्म एव भवतीति सिद्धमात्मनश्चारित्रत्वम् ॥ ८ ॥

अथ जीवस्य शुभाशुभशुद्धत्वं निश्चिनोति –

जीवो परिणमदि जदा सुहेण असुहेण वा सुहो असुहो ।
सुद्धेण तदा सुद्धो हवदि हि परिणामसब्भावो ॥ ९ ॥

जीवः परिणमति यदा शुभेनाशुभेन वा शुभोऽशुभः ।
शुद्धेन तदा शुद्धो भवति हि परिणामस्वभावः ॥ ९ ॥

शुभशुद्धोपयोगस्वरूपो भवतीत्युपदिशति—**जीवो परिणमदि जदा सुहेण असुहेण वा** जीवः कर्ता यदा परिणमति शुभेनाशुभेन वा परिणामेन **सुहो असुहो हवदि** तदा शुभेन शुभो भवति, अशुभेन वाऽशुभो भवति । **सुद्धेण तदा सुद्धो हि** शुद्धेन यदा परिणमति तदा शुद्धो भवति, हि स्फुटम् । कथंभूतः सन् । **परिणामसब्भावो** परिणामसद्भावः सन्निति । तद्यथा-यथा स्फटिकमणिविशेषो निर्मलोऽपि जपापुष्पादिरक्तकृष्णश्वेतोपाधिवशेन रक्तकृष्णश्वेतवर्णो भवति, तथाऽयं जीवः स्वभावेन शुद्धबुद्धैकस्वरूपोऽपि व्यवहारेण गृहस्थापेक्षया यथासंभवं सरागसम्यक्त्वपूर्वकदानपूजादिशुभानुष्ठानेन, तपोधनापेक्षया तु मूलोत्तरगुणादिशुभानुष्ठानेन परिणतः शुभो ज्ञातव्य इति । मिथ्यात्वाविरति-

---

भावार्थ :– सातवीं गाथामें कहा गया है कि चारित्र आत्माका ही भाव है । और इस गाथामें अभेदनयसे यह कहा है कि जैसे उष्णतारूप परिणमित लोहेका गोला स्वयं ही उष्णता है – लोहेका गोला और उष्णता पृथक् नहीं है, इसी प्रकार चारित्रभावसे परिणमित आत्मा स्वयं ही चारित्र है ॥ ८ ॥

अब यहाँ जीवका शुभ, अशुभ और शुद्धत्व (अर्थात् यह जीव ही शुभ, अशुभ और शुद्ध है ऐसा) निश्चित करते हैं ।

गाथा ९

अन्वयार्थ :– [**जीवः**] जीव [**परिणामस्वभावः**] परिणामस्वभावी होनेसे [**यदा**] जब [**शुभेन वा अशुभेन**] शुभ या अशुभ भावरूप [**परिणमति**] परिणमन

शुभ के अशुभमां प्रणमतां शुभ के अशुभ आत्मा बने ।
शुद्धे प्रणमतां शुद्ध परिणाम स्वभावी होइने ॥ ९ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यदाऽयमात्मा शुभेनाशुभेन वा रागभावेन परिणमति तदा जपातापिच्छरागपरिणतस्फटिकवत् परिणामस्वभावः सन् शुभोऽशुभश्च भवति। यदा पुनः शुद्धेनारागभावेन परिणमति तदा शुद्धारागपरिणतस्फटिकवत्परिणामस्वभावः सन् शुद्धो भवतीति सिद्धं जीवस्य शुभाशुभशुद्धत्वम् ॥ ९ ॥

प्रमादकषाययोगपञ्चप्रत्ययरूपाशुभोपयोगेनाशुभो विज्ञेयः। निश्चयरत्नत्रयात्मकशुद्धोपयोगेन परिणतः शुद्धो ज्ञातव्य इति। किंच जीवस्यासंख्येयलोकमात्रपरिणामाः सिद्धान्ते मध्यमप्रतिपत्त्या मिथ्यादृष्ट्यादिचतुर्दशगुणस्थानरूपेण कथिताः। अत्र प्राभृतशास्त्रे तान्येव गुणस्थानानि संक्षेपेणाशुभशुभशुद्धोपयोगरूपेण कथितानि। कथमिति चेत्—मिथ्यात्वसासादनमिश्रगुणस्थानत्रये तारतम्येनाशुभोपयोगः, तदनन्तर तसम्यग्दृष्टिदेशविरतप्रमत्तसंयतगुणस्थानत्रये तारतम्येन शुभोपयोगः, तदनन्तरमप्रमत्तादिक्षीणकषायान्तगुणस्थानषट्के तारतम्येन शुद्धोपयोगः, तदनन्तरं सयोग्ययोगिजिनगुणस्थानद्वये शुद्धोपयोगफलमिति भावार्थः ॥ ९ ॥ अथ नित्यैकान्तक्षणिकैकान्तनिषेधार्थं परिणाम-

---

करता है [**शुभः अशुभः**] तब शुभ या अशुभ (स्वयं ही) होता है, [**शुद्धेन**] और जब शुद्धभावरूप परिणमित होता है [**तदा शुद्धः हि भवति**] तब शुद्ध होता है।

टीका :—जब यह आत्मा शुभ या अशुभ राग भावसे परिणमित होता है तब जवा कुसुम या तमाल पुष्पके (लाल या काले) रंगरूप परिणमित स्फटिककी भाँति, परिणामस्वभाव होनेसे शुभ या अशुभ होता है (उस समय आत्मा स्वयं ही शुभ या अशुभ है); और जब वह शुद्ध अरागभावसे परिणमित होता है तब शुद्ध अरागपरिणत (रंग रहित) स्फटिककी भाँति, परिणामस्वभाव होनेसे शुद्ध होता है। (उस समय आत्मा स्वयं ही शुद्ध है)। इस प्रकार जीवका शुभत्व, अशुभत्व और शुद्धत्व सिद्ध हुआ।

भावार्थ :— आत्मा सर्वथा कूटस्थ नहीं है किन्तु स्थिर रहकर परिणमन करना उसका स्वभाव है, इसलिये वह जैसे जैसे भावोंसे परिणमित होता है वैसा वैसा ही वह स्वयं हो जाता है। जैसे स्फटिकमणि स्वभावसे निर्मल है तथापि जब वह लाल या काले फूलके संयोगनिमित्तसे परिणमित होता है तब लाल या काला स्वयं ही हो जाता है। इसीप्रकार आत्मा स्वभावसे शुद्ध-बुद्ध-एकस्वरूपी होने पर भी व्यवहारसे जब गृहस्थदशामें सम्यक्त्व पूर्वक दानपूजादि शुभ अनुष्ठानरूप शुभोपयोगमें और मुनिदशामें मूलगुण तथा उत्तरगुण इत्यादि शुभ अनुष्ठानरूप शुभोपयोगमें परिणमित होता है तब स्वयं ही शुभ होता है, और जब मिथ्यात्वादि पाँच प्रत्ययरूप अशुभोपयोगमें परिणमित होता है तब स्वयं ही अशुभ होता है और जैसे स्फटिकमणि अपने स्वाभाविक निर्मल

Please inform us of any errors on rajesh@AtmaDharma.com

अथ परिणामं वस्तुस्वभावत्वेन निश्चिनोति–

णत्थि विणा परिणामं अत्थो अत्थं विणेह परिणामो ।
दव्वगुणपज्जयत्थो अत्थो अत्थित्तणिव्वत्तो ॥ १० ॥

नास्ति विना परिणाममर्थोऽर्थं विनेह परिणामः ।
द्रव्यगुणपर्ययस्थोऽर्थोऽस्तित्वनिर्वृत्तः ॥१०॥

न खलु परिणाममन्तरेण वस्तु सत्तामालम्बते । वस्तुनो द्रव्यादिभिः परिणामात् पृथगुपलम्भाभावान्निःपरिणामस्य खरशृङ्गकल्पत्वाद् दृश्यमानगोरसादिपरिणामविरोधाच्च ।

परिणामिनोः परस्परं कथंचिदभेदं दर्शयति—**णत्थि विणा परिणामं अत्थो** मुक्तजीवे तावत्कथ्यते, सिद्धपर्यायरूपशुद्धपरिणामं विना शुद्धजीवपदार्थो नास्ति । कस्मात् । संज्ञालक्षणप्रयोजनादिभेदेऽपि प्रदेशभेदाभावात् । **अत्थं विणेह परिणामो** मुक्तात्मपदार्थं विना इह जगति शुद्धात्मोपलम्भलक्षणः

रंगमें परिणमित होता है तब स्वयं ही शुद्ध होता है, उसीप्रकार आत्मा भी जब निश्चय रत्नत्रयात्मक शुद्धोपयोगमें परिणमित होता है तब स्वयं ही शुद्ध होता है ।

सिद्धान्त ग्रन्थोंमें जीवके असंख्य परिणामोंको मध्यम वर्णनसे चौदह गुणस्थान-रूप कहा गया है । उन गुणस्थानोंको संक्षेपसे 'उपयोग' रूप वर्णन करते हुए, प्रथम तीन गुणस्थानोंमें तारतम्य पूर्वक (घटता हुआ) अशुभोपयोग, चौथेसे छट्ठे गुणस्थान तक तारतम्य पूर्वक (बढ़ता हुआ) शुभोपयोग, सातवेंसे बारहवें गुणस्थान तक तारतम्य पूर्वक शुद्धोपयोग और अन्तिम दो गुणस्थानोंमें शुद्धोपयोगका फल कहा गया है, – ऐसा वर्णन कथंचित् हो सकता है ॥ ९ ॥

अब परिणाम वस्तुका स्वभाव है यह निश्चय करते हैं :–

गाथा १०

अन्वयार्थ :– [**इह**] इस लोकमें [**परिणामं विना**] परिणामके बिना [**अर्थः नास्ति**] पदार्थ नहीं है, [**अर्थं विना**] पदार्थके बिना [**परिणामः**] परिणाम नहीं है; [**अर्थः**] पदार्थ [**द्रव्यगुणपर्ययस्थः**] द्रव्य-गुण-पर्यायमें रहनेवाला और [**अस्तित्वनिर्वृत्तः**] (उत्पादव्ययध्रौव्यमय) अस्तित्वसे बना हुआ है ।

टीका :– परिणामके बिना वस्तु अस्तित्व धारण नहीं करती, क्योंकि वस्तु द्रव्यादिके द्वारा (द्रव्य-क्षेत्र-काल-भावसे) परिणामसे भिन्न अनुभवमें (देखनेमें) नहीं आती, क्योंकि (१) परिणाम रहित वस्तु गधेके सींगके समान है, (२) तथा उसका,

---

परिणाम विण न पदार्थ, ने न पदार्थ विण परिणाम छे ।
गुण-द्रव्य-पर्यय स्थित ने अस्तित्व सिद्ध पदार्थ छे ॥१०॥

Version 001: remember to check http://www.AtmaDharma.com for updates

अन्तरेण वस्तु परिणामोऽपि न सत्तामालम्बते। स्वाश्रयभूतस्य वस्तुनोऽभावे निराश्रयस्य परिणामस्य शून्यत्वप्रसंगात्। वस्तु पुनरूर्ध्वतासामान्यलक्षणे द्रव्ये सहभाविविशेषलक्षणेषु गुणेषु क्रमभाविविशेषलक्षणेषु पर्यायेषु व्यवस्थितमुत्पादव्ययध्रौव्यमयास्तित्वेन निर्वर्तित-निर्वृत्तिमच्च। अतः परिणामस्वभावमेव ॥१०॥

सिद्धपर्यायरूपः शुद्धपरिणामो नास्ति। कस्मात्। संज्ञादिभेदेऽपि प्रदेशभेदाभावात् **दव्वगुणपज्जयत्थो** आत्मस्वरूपं द्रव्यं तत्रैव केवलज्ञानादयो गुणाः सिद्धरूपः पर्यायश्च, इत्युक्तलक्षणेषु द्रव्यगुणपर्यायेषु तिष्ठतीति द्रव्यगुणपर्यायस्थो भवति। स कः कर्ता। **अत्थो** परमात्मपदार्थः सुवर्णद्रव्यपीतत्वादि-गुणकुण्डलादिपर्यायस्थसुवर्णपदार्थवत्। पुनश्च किंरूपः। **अत्थित्तणिव्वत्तो** शुद्धद्रव्यगुणपर्यायाधारभूतं यच्छुद्धास्तित्वं तेन निर्वृत्तोऽस्तित्वनिर्वृत्तः, सुवर्णद्रव्यगुणपर्यायास्तित्वनिर्वृत्तसुवर्णपदार्थवदिति। अयमत्र तात्पर्यार्थः। यथा—मुक्तजीवे द्रव्यगुणपर्यायत्रयं परस्पराविनाभूतं दर्शितं तथा संसारिजीवेऽपि मतिज्ञानादिविभावगुणेषु नरनारकादिविभावपर्यायेषु नयविभागेन यथासंभवं विज्ञेयम्, तथैव पुद्गलादिष्वपि। एवं शुभाशुभशुद्धपरिणामव्याख्यानमुख्यत्वेन तृतीयस्थले गाथाद्वयं गतम् ॥ १० ॥

दिखाई देनेवाले गोरस इत्यादि (दूध, दही वगैरह) के परिणामोंके साथ [१]विरोध आता है। (जैसे – परिणामके बिना वस्तु अस्तित्व धारण नहीं करती उसीप्रकार) वस्तुके बिना परिणाम भी अस्तित्वको धारण नहीं करता, क्योंकि स्वाश्रयभूत वस्तुके अभावमें (अपने आश्रयरूप जो वस्तु है वह न हो तो) निराश्रय परिणामको शून्यताका प्रसंग आता है।

और वस्तु तो [२]ऊर्ध्वतासामान्यस्वरूप द्रव्यमें, सहभावी विशेषस्वरूप (साथ ही साथ रहनेवाले विशेष-भेद जिनका स्वरूप है ऐसे) गुणोंमें तथा क्रमभावी विशेषस्वरूप पर्यायोंमें रही हुई और उत्पाद-व्यय-ध्रौव्यमय अस्तित्वसे बनी हुई है, इसलिये वस्तु परिणाम-स्वभाववाली ही है।

भावार्थ :– जहाँ जहाँ वस्तु दिखाई देती है वहाँ वहाँ परिणाम दिखाई देता है। जैसे – गोरस अपने दूध, दही, घी, छाछ इत्यादि परिणामोंसे युक्त ही दिखाई देता है। जहाँ परिणाम नहीं होता वहाँ वस्तु भी नहीं होती। जैसे कालापन, स्निग्धता इत्यादि परिणाम नहीं हैं तो गधेके सींगरूप वस्तु भी नहीं है। इससे सिद्ध हुआ कि वस्तु परिणाम रहित कदापि नहीं होती। जैसे वस्तु परिणामके बिना नहीं होती उसीप्रकार परिणाम भी वस्तुके बिना नहीं होते, क्योंकि वस्तुरूप आश्रयके बिना परिणाम

---

[१] यदि वस्तु को परिणाम रहित माना जावे तो गोरस इत्यादि वस्तुओंके दूध, दही आदि जो परिणाम प्रत्यक्ष दिखाई देते हैं उनके साथ विरोध आयेगा।

[२] कालकी अपेक्षासे स्थिर होनेको अर्थात् कालापेक्षित प्रवाहको ऊर्ध्वता अथवा ऊँचाई कहा जाता है। ऊर्ध्वता-सामान्य अर्थात अनादि-अनन्त उच्च (कालापेक्षित) प्रवाहसामान्य द्रव्य है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ चारित्रपरिणामसंपर्कसम्भववतोः शुद्धशुभपरिणामयोरुपादानहानाय फल-मालोचयति—

धम्मेण परिणदप्पा अप्पा जदि सुद्धसंपयोगजुदो ।
पावदि णिव्वाणसुहं सुहोवजुत्तो य सग्गसुहं ॥ ११ ॥

अथ वीतरागसरागचारित्रसंज्ञयोः शुद्धशुभोपयोगपरिणामयोः संक्षेपेण फलं दर्शयति—**धम्मेण परिणदप्पा अप्पा** धर्मेण परिणतात्मा परिणतस्वरूपः सन्नयमात्मा **जदि सुद्धसंपयोगजुदो** यदि चेच्छुद्धोपयोगाभिधानशुद्धसंप्रयोगपरिणामयुतः परिणतो भवति **पावदि णिव्वाणसुहं** तदा निर्वाणसुखं प्राप्नोति । **सुहोवजुत्तो व सग्गसुहं** शुभोपयोगयुतः परिणतः सन् स्वर्गसुखं प्राप्नोति । इतो विस्तरम्— इह धर्मशब्देनाहिंसालक्षणः सागारानगाररूपस्तथोत्तमक्षमादिलक्षणो रत्नत्रयात्मको वा, तथा मोह-क्षोभरहित आत्मपरिणामः शुद्धवस्तुस्वभावश्चेति गृह्यते । स एव धर्मः पर्यायान्तरेण चारित्रं भण्यते ।

किसके आश्रयसे रहेंगे ? गोरसरूप आश्रयके बिना दूध, दही इत्यादि परिणाम किसके आधारसे होंगे ?

और फिर वस्तु तो द्रव्य-गुण-पर्यायमय है । उसमें त्रैकालिक ऊर्ध्व प्रवाह-सामान्य द्रव्य है, और साथ ही साथ रहनेवाले भेद वे गुण हैं, तथा क्रमशः होनेवाले भेद वे पर्यायें हैं । ऐसे द्रव्य, गुण और पर्यायकी एकतासे रहित कोई वस्तु नहीं होती । दूसरी रीतिसे कहा जाय तो, वस्तु उत्पाद-व्यय-ध्रौव्यमय है अर्थात् वह उत्पन्न होती है, नष्ट होती है और स्थिर रहती है । इसप्रकार वह द्रव्य-गुण-पर्यायमय और उत्पाद-व्यय-ध्रौव्यमय होनेसे उसमें क्रिया (परिणमन) होती ही रहती है । इसलिये परिणाम वस्तुका स्वभाव ही है ॥ १० ॥

अब जिनका चारित्र परिणामके साथ सम्पर्क (सम्बन्ध) है ऐसे जो शुद्ध और शुभ (दो प्रकारके) परिणाम हैं उनके ग्रहण तथा त्यागके लिये (शुद्ध परिणामके ग्रहण और शुभ परिणामके त्यागके लिये) उनका फल विचारते हैं :—

गाथा ११

अन्वयार्थ :— [**धर्मेण परिणतात्मा**] धर्मसे परिणमित स्वरूपवाला [**आत्मा**] आत्मा [**यदि**] यदि [**शुद्धसंप्रयोगयुतः**] शुद्ध उपयोग में युक्त हो तो [**निर्वाणसुखं**] मोक्ष सुखको [**प्राप्नोति**] प्राप्त करता है [**शुभोपयुक्तः च**] और यदि शुभोपयोगवाला हो तो (स्वर्गसुखं) स्वर्गके सुखको (बन्धको) प्राप्त करता है ।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

धर्मेण परिणतात्मा आत्मा यदि शुद्धसंप्रयोगयुतः ।
प्राप्नोति निर्वाणसुखं शुभोपयुक्तः च स्वर्गसुखम् ॥११॥

यदायमात्मा धर्मपरिणतस्वभावः शुद्धोपयोगपरिणतिमुद्वहति तदा निःप्रत्यनीकशक्तितया स्वकार्यकरणसमर्थचारित्रः साक्षान्मोक्षमवाप्नोति । यदा तु धर्मपरिणतस्वभावोऽपि शुभोपयोगपरिणत्या संगच्छते तदा सप्रत्यनीकशक्तितया स्वकार्यकरणासमर्थः कथंचिद्विरुद्धकार्यकारिचारित्रः शिखितप्तघृतोपसिक्तपुरुषो दाहदुःखमिव स्वर्गसुखबन्धमवाप्नोति । अतः शुद्धोपयोग उपादेयः शुभोपयोगो हेयः ॥११॥

'चारित्तं खलु धम्मो' इति वचनात् । तच्च चारित्रमपहृतसंयमोपेक्षासंयमभेदेन सरागवीतरागभेदेन वा शुभोपयोगशुद्धोपयोगभेदेन च द्विधा भवति । तत्र यच्छुद्धसंप्रयोगशब्दवाच्यं शुद्धोपयोगस्वरूपं वीतरागचारित्रं तेन निर्वाणं लभते । निर्विकल्पसमाधिरूपशुद्धोपयोगशक्त्यभावे सति यदा शुभोपयोगरूपसरागचारित्रेण परिणमति तदा पूर्वमनाकुलत्वलक्षणपारमार्थिकसुखविपरीतमाकुलत्वोत्पादकं स्वर्गसुखं लभते । पश्चात् परमसमाधिसामग्रीसद्भावे मोक्षं च लभते इति सूत्रार्थः ॥ ११ ॥ अथ

टीका :-- जब यह आत्मा धर्मपरिणत स्वभाववाला होता हुआ शुद्धोपयोग परिणतिको धारण करता है -- बनाये रखता है तब, जो विरोधी शक्तिसे रहित होनेके कारण अपना कार्य करनेके लिये समर्थ है ऐसा चारित्रवान होनेसे, (वह) साक्षात् मोक्षको प्राप्त करता है, और जब वह धर्मपरिणत स्वभाववाला होनेपर भी शुभोपयोग परिणतिके साथ युक्त होता है तब जो [१]विरोधी शक्ति सहित होनेसे स्वकार्य करनेमें असमर्थ है और कथंचित् विरुद्ध कार्य करनेवाला है ऐसे चारित्रसे युक्त होनेसे, जैसे अग्निसे गर्म किया हुआ घी किसी मनुष्य पर डाल दिया जावे तो वह उसकी जलनसे दुखी होता है, उसीप्रकार वह स्वर्ग सुखके बन्धको प्राप्त होता है, इसलिये शुद्धोपयोग उपादेय है और शुभोपयोग हेय है ।

भावार्थ :-- जैसे घी स्वभावतः शीतलता उत्पन्न करनेवाला है तथापि गर्म घी से जल जाते हैं, इसीप्रकार चारित्र स्वभावसे मोक्ष दाता है तथापि सराग चारित्रसे

---

[१] दान, पूजा, पंच-महाव्रत, देवगुरुधर्म प्रति राग इत्यादिरूप जो शुभोपयोग है वह चारित्रका विरोधी है--इसलिये सराग (शुभोपयोगवाला) चारित्र विरोधी शक्ति सहित है और वीतराग चारित्र विरोधी शक्ति रहित है ।

जो धर्म परिणत स्वरूप जिव शुद्धोपयोगी होय तो ।
ते पामतो निर्वाण सुख, ने स्वर्ग सुख शुभ युक्त जो ॥११॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ चारित्रपरिणामसंपर्कासंभवादत्यन्तहेयस्याशुभपरिणामस्य फलमालोचयति –

असुहोदएण आदा कुणरो तिरियो भवीय णेरइयो ।
दुक्खसहस्सेहिं सदा अभिद्दुदो भमदि अच्चंतं ॥ १२ ॥

अशुभोदयेनात्मा कुनरस्तिर्यग्भूत्वा नैरयिकः ।
दुःखसहस्रैः सदा अभिद्रुतो भ्रमत्यत्यन्तम् ॥ १२ ॥

यदायमात्मा मनागपि धर्मपरिणतिमनासादयन्नशुभोपयोगपरिणतिमालम्बते तदा

चारित्रपरिणामासंभवादत्यन्तहेयस्याशुभोपयोगस्य फलं दर्शयति–**असुहोदयेण** अशुभोदयेन **आदा** आत्मा **कुणरो तिरियो भवीय णेरइयो** कुनरस्तिर्यङ्नारको भूत्वा । किं करोति । **दुक्खसहस्सेहिं सदा अभिधुदो भमदि अच्चंतं** दुःखसहस्रैः सदा सर्वकालमभिद्रुतः कदर्थितः पीडितः सन् संसारे अत्यन्तं भ्रमतीति । तथाहि–निर्विकारशुद्धात्मतत्त्वरुचिरूपनिश्चयसम्यक्त्वस्य तत्रैव शुद्धात्मन्यविक्षिप्त-चित्तवृत्तिरूपनिश्चयचारित्रस्य च विलक्षणेन विपरीताभिनिवेशजनकेन दृष्टश्रुतानुभूतपञ्चेन्द्रिय-

---

बन्ध होता है । जैसे ठंडा घी शीतलता उत्पन्न करता है इसीप्रकार वीतराग चारित्र साक्षात् मोक्षका कारण है ॥ ११ ॥

अब चारित्र परिणामके साथ सम्पर्क रहित होनेसे जो अत्यन्त हेय है ऐसे अशुभ परिणामका फल विचारते हैं :–

गाथा १२

अन्वयार्थ :– [**अशुभोदयेन**] अशुभ उदयसे [**आत्मा**] आत्मा [**कुनरः**] कुमनुष्य [**तिर्यग्**] तिर्यंच [**नैरयिकः**] और नारकी [**भूत्वा**] होकर [**दुःखसहस्रैः**] हजारों दुःखोंसे [**सदा अभिद्रुतः**] सदा पीड़ित होता हुआ [**अत्यंतं भ्रमति**] (संसारमें) अत्यन्त भ्रमण करता है ।

टीका :– जब यह आत्मा किंचित् मात्र भी धर्मपरिणतिको प्राप्त न करता हुआ अशुभोपयोग परिणतिका अवलम्बन करता है, तब वह कुमनुष्य, तिर्यंच और नारकीके रूपमें परिभ्रमण करता हुआ (तद्रूप) हजारों दुःखोंके बन्धनका अनुभव करता है; इसलिये चारित्रके लेशमात्रका भी अभाव होनेसे यह अशुभोपयोग अत्यन्त हेय ही है ॥ १२ ॥

अशुभोदये आत्मा कुनर तिर्यंच ने नारकपणे ।
नित्ये सहस्र दुःखे पीड़ित संसारमां अति अति भमे ॥ १२ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

कुमनुष्यतिर्यङ्नारकभ्रमणरूपं दुःखसहस्रबन्धमनुभवति। ततश्चारित्रलवस्याप्यभावादत्यन्तहेय एवायमशुभोपयोग इति ॥ २२ ॥

एवमयमपास्तसमस्तशुभाशुभोपयोगवृत्तिः शुद्धोपयोगवृत्तिमात्मसात्कुर्वाणः शुद्धोपयोगाधिकारमारभते। तत्र शुद्धोपयोगफलमात्मनः प्रोत्साहनार्थमभिष्टौति –

अइसयमादसमुत्थं विसयातीदं अणोवममणंतं।
अव्वुच्छिण्णं च सुहं सुद्धवओगप्पसिद्धाणं ॥ १३ ॥

अतिशयमात्मसमुत्थं विषयातीतमनौपम्यमनन्तम्।
अव्युच्छिन्नं च सुखं शुद्धोपयोगप्रसिद्धानाम् ॥ १३ ॥

आसंसारापूर्वपरमाद्भुताह्लादरूपत्वादात्मानमेवाश्रित्य प्रवृत्तत्वात्पराश्रयनिरपेक्ष-

---

विषयाभिलाषतीव्रसंक्लेशरूपेण चाशुभोपयोगेन यदुपार्जितं पापकर्म तदुदयेनायमात्मा सहजशुद्धात्मानन्दैकलक्षणपारमार्थिकसुखविपरीतेन दुःखेन दुःखितः सन् स्वस्वभावभावनाच्युतो भूत्वा संसारेऽत्यन्तं भ्रमतीति तात्पर्यार्थः। एवमुपयोगत्रयफलकथनरूपेण चतुर्थस्थले गाथाद्वयं गतम् ॥ १२ ॥ अथ शुभाशुभोपयोगद्वयं निश्चयनयेन हेयं ज्ञात्वा शुद्धोपयोगाधिकारं प्रारभमाणः, शुद्धात्मभावनामात्मसात्कुर्वाणः सन् जीवस्य प्रोत्साहनार्थं शुद्धोपयोगफलं प्रकाशयति। अथवा द्वितीयपातनिका-यद्यपि शुद्धोपयोगफलमग्रे ज्ञानं सुखं च संक्षेपेण विस्तरेण च कथयति तथाप्यत्रापि पीठिकायां सूचनां

इसप्रकार यह (भगवान् कुन्दकुन्दाचार्य देव) समस्त शुभाशुभोपयोगवृत्तिको (शुभ उपयोगरूप और अशुभ उपयोगरूप परिणतिको) अपास्त कर (हेय मानकर, तिरस्कार करके, दूर करके) शुद्धोपयोगवृत्तिको आत्मसात् (आत्मरूप, अपनेरूप) करते हुए शुद्धोपयोग अधिकार प्रारम्भ करते हैं। उसमें (पहले) शुद्धोपयोगके फलकी आत्माके प्रोत्साहनके लिये प्रशंसा करते हैं।

गाथा १३

अन्वयार्थ :– [**शुद्धोपयोगप्रसिद्धानां**] शुद्धोपयोगसे [1]निष्पन्न हुए आत्माओंका (केवली और सिद्धोंका) [**सुखं**] सुख [**अतिशयं**] अतिशय [**आत्मसमुत्थं**] आत्मोत्पन्न

---

[1] निष्पन्न होना=उत्पन्न होना; फलरूप होना; सिद्ध होना। (शुद्धोपयोगसे निष्पन्न हुए अर्थात् शुद्धोपयोग कारणसे कार्यरूप हुए।)

अत्यंत, आत्मोत्पन्न, विषयातीत, अनुप अनंत ने।
विच्छेद हीन छे सुख अहो! शुद्धोपयोग प्रसिद्ध ने ॥ १३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

त्वादत्यन्तविलक्षणत्वात्समस्तायतिनिरपायित्वान्नैरन्तर्यप्रवर्तमानत्वाच्चातिशयवदात्मसमुत्थं विषयातीतमनौपम्यमनन्तमव्युच्छिन्नं च शुद्धोपयोगनिष्पन्नानां सुखमतस्तत्सर्वथा प्रार्थनीयम् ॥ १३ ॥

अथ शुद्धोपयोगपरिणतात्मस्वरूपं निरूपयति –

सुविदिदपयत्थसुत्तो संजमतवसंजुदो विगदरागो ।
समणो समसुहदुक्खो भणिदो सुद्धोवओगो त्ति ॥ १४ ॥

सुविदितपदार्थसूत्रः संयमतपःसंयुतो विगतरागः ।
श्रमणः समसुखदुःखो भणितः शुद्धोपयोग इति ॥ १४ ॥

सूत्रार्थज्ञानबलेन स्वपरद्रव्यविभागपरिज्ञानश्रद्धानविधानसमर्थत्वात्सुविदितपदार्थसूत्रः ।

करोति । अथवा तृतीयपातनिका-पूर्वं शुद्धोपयोगफलं निर्वाणं भणितमिदानीं पुनर्निर्वाणस्य फलमनन्तसुखं कथयतीति पातनिकात्रयस्यार्थं मनसि धृत्वा सूत्रमिदं प्रतिपादयति—**अइसयं** आसंसाराद्देवेन्द्रादिसुखेभ्योऽप्यपूर्वाद्भुतपरमाह्लादरूपत्वादतिशयस्वरूपं, **आदसमुत्थं** रागादिविकल्परहितस्वशुद्धात्मसंवित्तिसमुत्पन्नत्वादात्मसमुत्थं, **विसयातीदं** निर्विषयपरमात्मतत्त्वप्रतिपक्षभूतपञ्चेन्द्रियविषयातीतत्वाद्विषयातीतं. **अणोवमं** निरुपमपरमानन्दैकलक्षणत्वेनोपमारहितत्वादनुपमं, **अणंतं** अनन्तागामिकाले विनाशाभावादप्रमितत्वाद्वाऽनन्तं, **अव्वुच्छिण्णं च** असातोदयाभावान्निरन्तरत्वादविच्छिन्नं च **सुहं** एवमुक्तविशेषणविशिष्टं सुखं भवति । केषाम् । **सुद्धुवओगप्पसिद्धाणं** वीतरागपरमसामायिकशब्दवाच्यशुद्धोपयोगेन प्रसिद्धा उत्पन्ना येऽर्हत्सिद्धास्तेषामिति । अत्रेदमेव सुखमुपादेयत्वेन निरन्तरं भावनीयमिति भावार्थः ॥ १३ ॥ अथ येन शुद्धोपयोगेन पूर्वोक्तसुखं भवति तत्परिणतपुरुष-

---

[**विषयातीतं**] विषयातीत (अतीन्द्रिय) [**अनौपम्यं**] अनुपम [**अनन्तं**] अनन्त (अविनाशी) [**अव्युच्छिन्नं च**] और अविच्छिन्न (अटूट) है ।

टीका :– (१) अनादि संसारसे जो पहले कभी अनुभवमें नहीं आया ऐसे अपूर्व, परम अद्भुत आह्लादरूप होनेसे 'अतिशय', (२) आत्माका ही आश्रय लेकर (स्वाश्रित) प्रवर्तमान होनेसे 'आत्मोत्पन्न', (३) पराश्रयसे निरपेक्ष होनेसे (स्पर्श, रस, गंध, वर्ण और शब्दके तथा संकल्पविकल्पके आश्रयकी अपेक्षासे रहित होनेसे) 'विषयातीत', (४) अत्यन्त विलक्षण होनेसे (अन्य सुखोंसे सर्वथा भिन्न लक्षणवाला होनेसे) 'अनुपम', (५) समस्त आगामी कालमें कभी भी नाशको प्राप्त न होनेसे

सुविदित सूत्र पदार्थ, संयम तप सहित वीतराग ने ।
सुख दुःखमां सम श्रमणने शुद्धोपयोग जिनो कहे ॥ १४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

सकलषड्जीवनिकायनिशुम्भनविकल्पात्पंचेन्द्रियाभिलाषविकल्पाच्च व्यावर्त्यात्मनः शुद्धस्वरूपे संयमनात्, स्वरूपविश्रान्तनिस्तरङ्गचैतन्यप्रतपनाच्च संयमतपःसंयुतः। सकल-मोहनीयविपाकविवेकभावनासौष्ठवस्फुटीकृतनिर्विकारात्मस्वरूपत्वाद्विगतरागः। परम-

---

लक्षणं प्रकाशयति—**सुविदिदपयत्थसुत्तो** सुष्ठु संशयादिरहितत्वेन विदिता ज्ञाता रोचिताश्च निजशुद्धात्मादिपदार्थास्तत्प्रतिपादकसूत्राणि च येन स सुविदितपदार्थसूत्रो भण्यते। **संजमतवसंजुदो** बाह्ये द्रव्येन्द्रियव्यावर्तनेन षड्जीवरक्षणेन चाभ्यन्तरे निजशुद्धात्मसंवित्तिबलेन स्वरूपे संयमनात् संयमयुक्तः बाह्याभ्यन्तरतपोबलेन कामक्रोधादिशत्रुभिरखण्डितप्रतापस्य स्वशुद्धात्मनि प्रतपनाद्विजय-नात्तपः संयुक्तः। **विगदरागो** वीतरागशुद्धात्मभावनाबलेन समस्तरागादिदोषरहितत्वाद्विगतरागः। **समसुहदुक्खो** निर्विकारनिर्विकल्पसमाधेरुद्गता समुत्पन्ना तथैव परमानन्दसुखरसे लीना तल्लया निर्विकारस्वसंवित्तिरूपा या तु परमकला तदवष्टम्भेनेष्टानिष्टेन्द्रियविषयेषु हर्षविषादरहितत्वात्सम-

---

'अनन्त' और (६) बिना ही अन्तरके प्रवर्तमान होनेसे 'अविच्छिन्न' सुख शुद्धोपयोगसे निष्पन्न हुए आत्माओंके होता है, इसलिये वह (सुख) सर्वथा प्रार्थनीय (वांछनीय) है ॥ १३ ॥

अब शुद्धोपयोगपरिणत आत्माका स्वरूप कहते हैं :—

गाथा १४

अन्वयार्थः – [**सुविदितपदार्थसूत्रः**] जिन्होंने (निज शुद्ध आत्मादि) पदार्थोंको और सूत्रोंको भली भाँति जान लिया है, [**संयमतपःसंयुतः**] जो संयम और तपयुक्त हैं, [**विगतरागः**] जो वीतराग अर्थात् राग रहित हैं [**समसुखदुःखः**] और जिन्हें सुख-दुःख समान हैं, [**श्रमणः**] ऐसे श्रमणको (मुनिवरको) [**शुद्धोपयोगः इति भणितः**] 'शुद्धोपयोगी' कहा गया है।

टीका :– सूत्रोंके अर्थके ज्ञानबलसे स्वद्रव्य और परद्रव्यके विभागके [१]परिज्ञानमें श्रद्धानमें और विधानमें (आचरणमें) समर्थ होनेसे (स्वद्रव्य और परद्रव्यकी भिन्नताका ज्ञान, श्रद्धान और आचरण होनेसे) जो श्रमण पदार्थोंको और (उनके प्रतिपादक) सूत्रोंको जिन्होंने भलीभाँति जान लिया है ऐसे हैं, समस्त छह जीवनिकायके हननके विकल्पसे और पंचेन्द्रिय सम्बन्धी अभिलाषाके विकल्पसे आत्माको [२]व्यावृत्त करके आत्माका शुद्धस्वरूपमें संयमन करनेसे, और [३]स्वरूपविश्रान्त [४]निस्तरंग [५]चैतन्यप्रतपन

---

[१] परिज्ञान=पूरा ज्ञान; ज्ञान। [२] व्यावृत्त करके=विमुख करके; रोककर; अलग करके। [३] स्वरूपविश्रान्त=स्वरूप में स्थिर हुआ। [४]निस्तरंग=तरंग रहित; चंचलता रहित; विकल्प रहित; शांत। [५] प्रतपन होना=प्रतापवान होना, प्रकाशित होना, देदीप्यमान होना।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

कलावलोकनाननुभूयमानसातासातवेदनीयविपाकनिर्वर्तितसुखदुःखजनितपरिणामवैषम्यत्वात्समसुखदुःखः श्रमणः शुद्धोपयोग इत्यभिधीयते ॥ १४ ॥

अथ शुद्धोपयोगलाभानन्तरभाविशुद्धात्मस्वभावलाभमभिनन्दति –

उवओगविसुद्धो जो विगदावरणंतरायमोहरओ ।
भूदो सयमेवादा जादि परं णेयभूदाणं ॥ १५ ॥

उपयोगविशुद्धो यो विगतावरणान्तरायमोहरजाः ।
भूतः स्वयमेवात्मा याति पारं ज्ञेयभूतानाम् ॥ १५ ॥

सुखदुःखः । **समणो** एवंगुणविशिष्टः श्रमणः परममुनिः **भणिदो सुद्धोवओगो त्ति** शुद्धोपयोगो भणित इत्यभिप्रायः ॥ १४ ॥ एवं शुद्धोपयोगफलभूतानन्तसुखस्य शुद्धोपयोगपरिणतपुरुषस्य च कथनरूपेण पञ्चमस्थले गाथाद्वयं गतम् ॥

इति चतुर्दशगाथाभिः स्थलपञ्चकेन **पीठिकाभिधानः** प्रथमोऽन्तराधिकारः समाप्तः ॥

होनेसे जो संयम और तपयुक्त हैं, सकल मोहनीयके विपाकसे भेदकी भावनाकी उत्कृष्टतासे (समस्त मोहनीय कर्मके उदयसे भिन्नत्वकी उत्कृष्ट भावनासे) निर्विकार आत्मस्वरूपको प्रगट किया होनेसे जो वीतराग है, और परमकलाके अवलोकनके कारण साता वेदनीय तथा असाता वेदनीयके विपाकसे उत्पन्न होनेवाले जो सुख-दुःख उन सुख-दुःख जनित परिणामोंकी विषमताका अनुभव नहीं होनेसे (परम सुखरसमें लीन निर्विकार स्वसंवेदनरूप परमकलाके अनुभवके कारण इष्टानिष्ट संयोगोंमें हर्ष शोकादि विषय परिणामोंका अनुभव न होनेसे) जो [१]समसुखदुःख हैं, ऐसे श्रमण शुद्धोपयोगी कहलाते हैं ॥ १४ ॥

अब, शुद्धोपयोगकी प्राप्तिके बाद तत्काल (अन्तर पड़े बिना) ही होनेवाली शुद्ध आत्मस्वभाव (केवलज्ञान) प्राप्तिकी प्रशंसा करते हैं :–

गाथा १५

अन्वयार्थ :– (यः) जो (**उपयोगविशुद्धः**) उपयोग विशुद्ध (शुद्धोपयोगी) है

---

[१] समसुखदुःख=जिन्हें सुख और दुःख (इष्टानिष्ट संयोग) दोनों समान हैं ।

जे उपयोग विशुद्ध ते मोहादि घाती रज थकी ।
स्वयमेव रहित थयो थको ज्ञेयान्त ने पामे सही ॥ १५ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यो हि नाम चैतन्यपरिणामलक्षणेनोपयोगेन यथाशक्ति विशुद्धो भूत्वा वर्तते स खलु प्रतिपदमुद्भिद्यमानविशिष्टविशुद्धिशक्तिरुद्ग्रन्थितासंसारबद्धदृढतरमोहग्रंथित-यात्यंतनिर्विकारचैतन्यो निरस्तसमस्तज्ञानदर्शनावरणान्तरायतया निःप्रतिघविजृम्भि-

---

तदनन्तरं सामान्येन सर्वज्ञसिद्धिर्ज्ञानविचारः संक्षेपेण शुद्धोपयोगफलं चेति कथनरूपेण गाथा-सप्तकम्। तत्र स्थलचतुष्टयं भवति, तस्मिन् प्रथमस्थले सर्वज्ञस्वरूपकथनार्थं प्रथमगाथा, स्वयम्भू-कथनार्थं द्वितीया चेति 'उवओगविसुद्धो' इत्यादि गाथाद्वयम्। अथ तस्यैव भगवत उत्पादव्ययध्रौव्य-स्थापनार्थं प्रथमगाथा, पुनरपि तस्यैव दृढीकरणार्थं द्वितीया चेति 'भंगविहीणो' इत्यादि गाथाद्वयम्। अथ सर्वज्ञश्रद्धानेनानन्तसुखं भवतीति दर्शनार्थं 'तं सव्वट्ठवरिट्ठं' इत्यादि सूत्रमेकम्। अथातीन्द्रिय-ज्ञानसौख्यपरिणमनकथनमुख्यत्वेन प्रथमगाथा, केवलिभुक्तिनिराकरणमुख्यत्वेन द्वितीया चेति 'पक्खीणघाइकम्मो' इति प्रभृति गाथाद्वयम्। एवं द्वितीयान्तराधिकारे स्थलचतुष्टयेन समुदाय-पातनिका। तद्यथा—अथ शुद्धोपयोगलाभानन्तरं केवलज्ञानं भवतीति कथयति। अथवा द्वितीय-पातनिका—**कुन्दकुन्दाचार्य**देवाः सम्बोधनं कुर्वन्ति, हे शिवकुमारमहाराज, कोऽप्यासन्नभव्यः संक्षेप-रुचिः पीठिकाव्याख्यानमेव श्रुत्वात्मकार्यं करोति, अन्यः कोऽपि पुनर्विस्तररुचिः शुद्धोपयोगेन संजात-

---

[**आत्मा**] वह आत्मा [**विगतावरणान्तरायमोहरजाः**] ज्ञानावरण, दर्शनावरण, अन्तराय और मोहरूप रजसे रहित [**स्वयमेव भूतः**] स्वयमेव होता हुआ [**ज्ञेयभूतानां**] ज्ञेयभूत पदार्थोंके [**पारं याति**] पारको प्राप्त होता है।

टीका :— जो (आत्मा) चैतन्य परिणामस्वरूप उपयोगके द्वारा यथाशक्ति विशुद्ध होकर वर्तता है, वह (आत्मा), जिसे पद पद पर (प्रत्येक पर्यायमें) [1]विशिष्ट विशुद्ध शक्ति प्रगट होती जाती है, ऐसा होनेसे, अनादि संसारसे बँधी हुई दृढ़तर मोहग्रन्थि छूट जानेसे अत्यन्त निर्विकार चैतन्यवाला और समस्त ज्ञानावरण, दर्शनावरण तथा अन्तरायके नष्ट हो जानेसे निर्विघ्न विकसित आत्मशक्तिवान स्वयमेव होता हुआ ज्ञेयताको प्राप्त (पदार्थों) के अन्तको पा लेता है।

यहाँ (यह कहा है कि) आत्मा ज्ञानस्वभाव है, और ज्ञान ज्ञेय प्रमाण है; इसलिये समस्त ज्ञेयोंके भीतर प्रवेशको प्राप्त (ज्ञाता) ज्ञान जिसका स्वभाव है ऐसे आत्माको आत्मा शुद्धोपयोगके ही प्रसादसे प्राप्त करता है।

भावार्थ :— शुद्धोपयोगी जीव प्रतिक्षण अत्यन्त शुद्धिको प्राप्त करता रहता है; और इस प्रकार मोहका क्षय करके निर्विकार चेतनावान होकर, बारहवें गुणस्थानके

---

[1] विशिष्ट=विशेष; असाधारण; खास।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

तात्मशक्तिश्च स्वयमेव भूतो ज्ञेयत्वमापन्नानामन्तमवाप्नोति। इह किलात्मा ज्ञानस्वभावो, ज्ञानं तु ज्ञेयमात्रं; ततः समस्तज्ञेयान्तर्वर्तिज्ञानस्वभावमात्मानमात्मा शुद्धोपयोगप्रसादादेवासादयति ॥१५॥

अथ शुद्धोपयोगजन्यस्य शुद्धात्मस्वभावलाभस्य कारकान्तरनिरपेक्षतयाऽत्यन्तमात्मायत्तत्वं द्योतयति—

तह सो लद्धसहावो सव्वण्हू सव्वलोगपदिमहिदो।
भूदो सयमेवादा हवदि सयंभु त्ति णिद्दिट्ठो ॥ १६ ॥

सर्वज्ञस्य ज्ञानसुखादिकं विचार्य पश्चादात्मकार्यं करोतीति व्याख्याति—**उवओगविसुद्धो जो** उपयोगेन शुद्धोपयोगेन परिणामेन विशुद्धो भूत्वा वर्तते यः **विगदावरणंतरायमोहरओ भूदो** विगतावरणान्तरायमोहरजोभूतः सन्। कथम्। **सयमेव** निश्चयेन स्वयमेव **आदा** स पूर्वोक्त आत्मा **जादि** याति गच्छति। किं। **पारं** पारमवसानम्। केषाम्। **णेयभूदाणं** ज्ञेयभूतपदार्थानाम्। सर्वं जानातीत्यर्थः। अतो विस्तरः—यो निर्मोहशुद्धात्मसंवित्तिलक्षणेन शुद्धोपयोगसंज्ञेनागमभाषया पृथक्त्ववितर्कवीचारप्रथमशुक्लध्यानेन पूर्वं निरवशेषमोहक्षपणं कृत्वा तदनन्तरं रागादिविकल्पोपाधिरहितस्वसंवित्तिलक्षणेनैकत्ववितर्कावीचारसंज्ञद्वितीयशुक्लध्यानेन क्षीणकषायगुणस्थानेऽन्तर्मुहूर्तकालं स्थित्वा तस्यैवान्त्यसमये ज्ञानदर्शनावरणवीर्यान्तरायाभिधानघातिकर्मत्रयं युगपद्विनाशयति, स जगत्त्रयकालत्रयवर्तिसमस्तवस्तुगतानन्तधर्माणां युगपत्प्रकाशकं केवलज्ञानं प्राप्नोति। ततः स्थितं शुद्धोपयोगात्सर्वज्ञो भवतीति ॥ १५ ॥ अथ शुद्धोपयोगजन्यस्य शुद्धात्मस्वभावलाभस्य भिन्नकारकनिरपेक्षत्वेनात्माधीनत्वं प्रकाशयति—**तह सो लद्धसहावो** यथा निश्चयरत्नत्रयलक्षणशुद्धोपयोगप्रसादात्सर्वं जानाति तथैव सः पूर्वोक्तलब्धशुद्धात्मस्वभावः सन् **आदा** अयमात्मा **हवदि सयंभु त्ति णिद्दिट्ठो**

अन्तिम समयमें ज्ञानावरण, दर्शनावरण और अन्तरायका युगपद् क्षय करके समस्त ज्ञेयोंको जाननेवाले केवलज्ञानको प्राप्त करता है। इसप्रकार शुद्धोपयोगसे ही शुद्धात्मस्वभावका लाभ होता है ॥ १५ ॥

अब, शुद्धोपयोगसे होनेवाली शुद्धात्मस्वभावकी प्राप्ति अन्य कारकोंसे निरपेक्ष (स्वतंत्र) होनेसे अत्यन्त आत्माधीन है (लेशमात्र पराधीन नहीं है) यह प्रगट करते हैं :—

गाथा १६

अन्वयार्थ :— [**तथा**] इसप्रकार [**सः आत्मा**] वह आत्मा [**लब्धस्वभावः**] स्वभावको प्राप्त [**सर्वज्ञः**] सर्वज्ञ [**सर्वलोकपतिमहितः**] और [1]सर्व (तीन) लोकके अधिपतियोंसे पूजित [**स्वयमेव भूतः**] स्वयमेव हुआ होनेसे [**स्वयंभूः भवति**] 'स्वयंभू' है [**इति निर्दिष्टः**] ऐसा जिनेन्द्रदेवने कहा है।

---

[1] सर्वलोक के अधिपति = तीनों लोक के स्वामी – सुरेन्द्र, असुरेन्द्र और चक्रवर्ति।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

तथा स लब्धस्वभावः सर्वज्ञः सर्वलोकपतिमर्हितः।
भूतः स्वयमेवात्मा भवति स्वयम्भूरिति निर्दिष्टः ॥१६॥

अयं खल्वात्मा शुद्धोपयोगभावनानुभावप्रत्यस्तमितसमस्तघातिकर्मतया समुपलब्ध-शुद्धानन्तशक्तिचित्स्वभावः, शुद्धानन्तशक्तिज्ञायकस्वभावेन स्वतन्त्रत्वाद्गृहीतकर्तृत्वा-धिकारः, शुद्धानन्तशक्तिज्ञानविपरिणमनस्वभावेन प्राप्यत्वात् कर्मत्वं कलयन्, शुद्धानन्त-शक्तिज्ञानविपरिणमन [स्वभावेन साधकतमत्वात् करणत्वमनुबिभ्राणः, शुद्धानन्तशक्तिज्ञान-विपरिणमनस्वभावेन कर्मणा समाश्रियमाणत्वात् संप्रदानत्वंदधानः, शुद्धानन्तशक्तिज्ञान-विपरिणमन] समये पूर्वप्रवृत्तविकलज्ञानस्वभावापगमेऽपि सहजज्ञानस्वभावेन ध्रुवत्वालम्ब-नादपादानत्वमुपाददानः शुद्धानन्तशक्तिज्ञानविपरिणमनस्वभावस्याधारभूतत्वादधिकरण-

---

स्वयम्भूर्भवतीति निर्दिष्टः कथितः। किंविशिष्टो भूतः। **सव्वण्हू सव्वलोगपदिमहिदो भूदो** सर्वज्ञः सर्वलोकपतिमहितश्च भूतः संजातः। कथम्। **सयमेव** निश्चयेन स्वयमेवेति। तथाहि—अभिन्नकारक-चिदानन्दैकचैतन्यस्वभावेन स्वतन्त्रत्वात् कर्ता भवति। नित्यानन्दैकस्वभावेन स्वयं प्राप्यत्वात् कर्मकारकं भवति। शुद्धचैतन्यस्वभावेन साधकतमत्वात्करणकारकं भवति। निर्विकारपरमानन्दैक-

---

टीका :– शुद्ध उपयोगकी भावनाके प्रभावसे समस्त घातिकर्मोंके नष्ट होनेसे जिसने शुद्ध अनन्तशक्तिवान चैतन्य स्वभावको प्राप्त किया है, ऐसा यह (पूर्वोक्त) आत्मा, (१) शुद्ध अनन्तशक्तियुक्त ज्ञायक स्वभावके कारण स्वतन्त्र होनेसे जिसने **कर्तृत्वके** अधिकारको ग्रहण किया है ऐसा, (२) शुद्ध अनन्तशक्तियुक्त ज्ञानरूपसे परिणमित होनेके स्वभावके कारण स्वयं ही प्राप्य होनेसे (स्वयं ही प्राप्त होता होनेसे) **कर्मत्वका** अनुभव करता हुआ, (३) शुद्ध अनन्तशक्तियुक्त ज्ञानरूपसे परिणमित होनेके स्वभावसे स्वयं ही साधकतम (उत्कृष्ट साधन) होनेसे **करणताको** धारण करता हुआ, (४) शुद्ध अनन्तशक्तियुक्त ज्ञानरूपसे परिणमित होनेके स्वभावके कारण स्वयं ही कर्म द्वारा समाश्रित होनेसे (अर्थात् कर्म स्वयंको ही देनेमें आता होनेसे) **सम्प्रदानताको** धारण करता हुआ, (५) शुद्ध अनन्तशक्तिमय ज्ञानरूपसे परिणमित होनेके समय पूर्वमें प्रवर्तमान [१]विकलज्ञानस्वभावका नाश होने

---

[१] विकलज्ञान = अपूर्ण (मति श्रुतादि) ज्ञान।

सर्वज्ञ, लब्ध स्वभावने त्रिजगेन्द्र पूजित ए रीते।
स्वयमेव जीव थयो थको तेने स्वयंभूं जिन कहे ॥१६॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

त्वमात्मसात्कुर्वाणः, स्वयमेव षट्कारकीरूपेणोपजायमानः, उत्पत्तिव्यपेक्षया द्रव्यभाव-भेदभिन्नघातिकर्माण्यपास्य स्वयमेवाविर्भूतत्वाद्वा स्वयंभूरिति निर्दिश्यते। अतो न

परिणतिलक्षणेन शुद्धात्मभावरूपकर्मणा समाश्रियमाणत्वात्संप्रदानं भवति। तथैव पूर्वमत्यादिज्ञान-विकल्पविनाशेऽप्यखण्डितैकचैतन्यप्रकाशेनाविनश्वरत्वादपादानं भवति। निश्चयशुद्धचैतन्यादिगुण-स्वभावात्मनः स्वयमेवाधारत्वादधिकरणं भवतीत्यभेदषट्कारकीरूपेण स्वत एव परिणममाणः

पर भी सहज ज्ञानस्वभावसे स्वयं ही ध्रुवता का अवलम्बन करनेसे **अपादानताको** धारण करता हुआ, और (६) शुद्ध अनन्तशक्तियुक्त ज्ञानरूपसे परिणमित होनेके स्वभावका स्वयं ही आधार होने से **अधिकरणता को** आत्मसात् करता हुआ—(इस प्रकार स्वयमेव छह कारकरूप होनेसे, अथवा उत्पत्ति-अपेक्षा से [१]द्रव्य-भावभेद से भिन्न घातिकर्मोंको दूर करके स्वयमेव आविर्भूत होने से, 'स्वयंभू' कहलाता है।

यहाँ यह कहा गया है कि—निश्चयसे पर के साथ आत्मा का कारकताका सम्बन्ध नहीं है, कि जिससे शुद्धात्मस्वभावकी प्राप्तिके लिये सामग्री (बाह्य साधन) ढूँढ़नेकी व्यग्रतासे जीव (व्यर्थ ही) परतंत्र होते हैं।

भावार्थ :— कर्ता, कर्म, करण, सम्प्रदान, अपादान और अधिकरण नामक छह कारक हैं। जो स्वतंत्रतया—स्वाधीनता से करता है वह कर्त्ता है; कर्त्ता जिसे प्राप्त करता है वह कर्म है; साधकतम अर्थात् उत्कृष्ट साधनको करण कहते हैं; कर्म जिसे दिया जाता है अथवा जिसके लिये किया जाता है वह सम्प्रदान है; जिसमेंसे कर्म किया जाता है, वह ध्रुववस्तु अपादान है, और जिसमें अर्थात् जिसके आधारसे कर्म किया जाता है वह अधिकरण है। यह छह कारक व्यवहार और निश्चयके भेदसे दो प्रकारके हैं। जहाँ परके निमित्तसे कार्य की सिद्धि कहलाती है वहाँ व्यवहार कारक हैं और जहाँ अपने ही उपादान कारण से कार्य की सिद्धि कही जाती है वहाँ निश्चय कारक हैं।

व्यवहार कारकोंका दृष्टान्त इस प्रकार है—कुम्हार कर्त्ता है; घड़ा कर्म है; दंड, चक्र, चीवर इत्यादि करण हैं; कुम्हार जल भरनेवालेके लिए घड़ा बनाता है, इसलिए जल भरनेवाला सम्प्रदान है; टोकरीमेंसे मिट्टी लेकर घड़ा बनाता है, इसलिए टोकरी अपादान है, और पृथ्वीके आधार पर घड़ा बनाता है, इसलिए पृथ्वी अधिकरण

[१] द्रव्य-भावभेदसे भिन्न घातिकर्म = द्रव्य और भावके भेदसे घातिकर्म दो प्रकारके हैं, द्रव्यघातिकर्म और भावघातिकर्म।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

निश्चयतः परेण सहात्मनः कारकत्वसम्बन्धोऽस्ति, यतः शुद्धात्मस्वभावलाभाय सामग्री-मार्गणव्यग्रतया परतंत्रैर्भूयते ॥१६॥

सन्नयमात्मा परमात्मस्वभावकेवलज्ञानोत्पत्तिप्रस्तावे यतो भिन्नकारकं नापेक्षते ततः स्वयंभूर्भवतीति

है। यहाँ सभी कारक भिन्न-भिन्न हैं। अन्य कर्त्ता है; अन्य कर्म है; अन्य करण है; अन्य सम्प्रदान; अन्य अपादान और अन्य अधिकरण है। परमार्थतः कोई द्रव्य किसीका कर्त्ता–हर्ता नहीं हो सकता, इसलिये यह छहों व्यवहार कारक असत्य हैं। वे मात्र उपचरित असद्भूत व्यवहारनयसे कहे जाते हैं। निश्चयसे किसी द्रव्यका अन्य द्रव्यके साथ कारणताका सम्बन्ध है ही नहीं।

निश्चय कारकोंका दृष्टान्त इस प्रकार है :–मिट्टी स्वतन्त्रतया घटरूप कार्यको प्राप्त होती है इसलिए मिट्टी कर्ता है और घड़ा कर्म है। अथवा, घड़ा मिट्टीसे अभिन्न है इसलिए मिट्टी स्वयं ही कर्म है; अपने परिणमन स्वभाव से मिट्टीने घड़ा बनाया इसलिए मिट्टी स्वयं ही करण है; मिट्टीने घड़ारूप कर्म अपनेको ही दिया इसलिए मिट्टी स्वयं सम्प्रदान है; मिट्टीने अपनेमेंसे पिंडरूप अवस्था नष्ट करके घटरूप कर्म किया और स्वयं ध्रुव बनी रही इसलिए वह स्वयं ही अपादान है, मिट्टीने अपने ही आधार से घड़ा बनाया इसलिए स्वयं ही अधिकरण है। इसप्रकार निश्चयसे छहों कारक एक ही द्रव्यमें हैं। परमार्थतः एक द्रव्य दूसरे की सहायता नहीं कर सकता और द्रव्य स्वयं ही, अपने को, अपनेसे, अपने लिए, अपनेमेंसे, अपनेमें करता है इसलिए निश्चय छह कारक ही परम सत्य हैं।

उपरोक्त प्रकारसे द्रव्य स्वयं ही अपनी अनन्त शक्तिरूप सम्पदासे परिपूर्ण है इसलिए स्वयं ही छह कारकरूप होकर अपना कार्य करनेके लिए समर्थ है, उसे बाह्य सामग्री कोई सहायता नहीं कर सकती। इसलिए केवलज्ञान प्राप्तिके इच्छुक आत्माको बाह्य सामग्रीकी अपेक्षा रखकर परतंत्र होना निरर्थक है। शुद्धोपयोगमें लीन आत्मा स्वयं ही छह कारकरूप होकर केवलज्ञान प्राप्त करता है। वह आत्मा स्वयं अनन्तशक्तिवान ज्ञायकस्वभावसे स्वतन्त्र है इसलिए स्वयं ही कर्ता है, स्वयं अनन्तशक्तिवाले केवलज्ञानको प्राप्त करनेके केवलज्ञान कर्म है, अथवा केवलज्ञानसे स्वयं अभिन्न होनेसे आत्मा स्वयं ही कर्म है; अपने अनन्त शक्तिवाले परिणमन स्वभावरूप उत्कृष्ट साधनसे केवलज्ञानको प्रगट करता है, इसलिए आत्मा स्वयं ही करण है; अपनेको ही केवलज्ञान देता है, इसलिये आत्मा स्वयं ही सम्प्रदान है;

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ स्वायम्भुवस्यास्य शुद्धात्मस्वभावलाभस्यात्यन्तमनपायित्वं कथंचिदुत्पादव्यय-ध्रौव्ययुक्तत्वं चालोचयति–

भंगविहूणो य भवो संभवपरिवज्जिदो विणासो हि ।
विज्जदि तस्सेव पुणो ठिदिसंभवणाससमवाओ ॥१७॥

भङ्गविहीनश्च भवः संभवपरिवर्जितो विनाशो हि ।
विद्यते तस्यैव पुनः स्थितिसंभवनाशसमवायः ॥१७॥

भावार्थः ॥ १६ ॥ एवं सर्वज्ञमुख्यत्वेन प्रथमगाथा । स्वयंभूमुख्यत्वेन द्वितीया चेति प्रथमस्थले गाथाद्वयं गतम् ॥ अथास्य भगवतो द्रव्यार्थिकनयेन नित्यत्वेऽपि पर्यायार्थिकनयेनानित्यत्वमुपदिशति— **भंगविहीणो य भवो** भङ्गविहीनश्च भवः जीवितमरणादिसमताभावलक्षणपरमोपेक्षासंयमरूप-शुद्धोपयोगेनोत्पन्नो योऽसौ भवः केवलज्ञानोत्पादः । स किंविशिष्टः । भङ्गविहीनो विनाशरहितः । **संभवपरिवज्जिदो विणासो त्ति** संभवपरिवर्जितो विनाश इति । योऽसौ मिथ्यात्वरागादिसंसरणरूप-संसारपर्यायस्य विनाशः । स किंविशिष्टः । संभवविहीनः निर्विकारात्मतत्त्वविलक्षणरागादि-

---

अपनेमेंसे मति श्रुतादि अपूर्ण ज्ञान दूर करके केवलज्ञान प्रगट करता है इसलिये और स्वयं सहज ज्ञान स्वभावके द्वारा ध्रुव रहता है इसलिये स्वयं ही अपादान है, अपनेमें ही अर्थात् अपने ही आधारसे केवलज्ञान प्रगट करता है, इसलिये स्वयं ही अधिकरण है। इसप्रकार स्वयं छह कारकरूप होता है, इसलिये वह 'स्वयंभू' कहलाता है। अथवा, अनादिकालसे अति दृढ़ बँधे हुए (ज्ञानावरण, दर्शनावरण, मोहनीय और अंतरायरूप) द्रव्य तथा भाव घातिकर्मोंको नष्ट करके स्वयमेव आविर्भूत हुआ अर्थात् किसीकी सहायताके बिना अपने आप ही स्वयं प्रगट हुआ इसलिये 'स्वयंभू' कहलाता है ॥ १६ ॥

अब इस स्वयंभूके शुद्धात्मस्वभावकी प्राप्तिके अत्यन्त अविनाशीपना और कथंचित् (कोई प्रकारसे) उत्पाद-व्यय-ध्रौव्ययुक्तताका विचार करते हैं :–

गाथा १७

अन्वयार्थ :– [**भङ्गविहीनः च भवः**] उसके (शुद्धात्मस्वभावको प्राप्त आत्माके) विनाश रहित उत्पाद है, और [**संभवपरिवर्जितः विनाशः हि**] उत्पाद रहित विनाश है।

व्ययहीन छे उत्पाद ने उत्पाद हीन विनाश छे ।
तेने ज वली उत्पाद ध्रौव्य विनाशनो समवाय छे ॥१७॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अस्य खल्वात्मनः शुद्धोपयोगप्रसादात् शुद्धात्मस्वभावेन यो भवः स पुनस्तेन रूपेण प्रलयाभावाद्भङ्गविहीनः। यस्त्वशुद्धात्मस्वभावेन विनाशः स पुनरुत्पादाभावात्संभव-परिवर्जितः। अतोऽस्य सिद्धत्वेनानपायित्वम्। एवमपि स्थितिसंभवनाशसमवायोऽस्य न विप्रतिषिध्यते, भङ्गरहितोत्पादेन संभववर्जितविनाशेन तद्द्वयाधारभूतद्रव्येण च समवेतत्वात् ॥१७॥

परिणामाभावादुत्पत्तिरहितः। तस्माज्ज्ञायते तस्यैव भगवतः सिद्धस्वरूपतो द्रव्यार्थिकनयेन विनाशो नास्ति। **विज्जदि तस्सेव पुणो ठिदिसंभवणाससमवायो** विद्यते तस्यैव पुनः स्थितिसंभवनाशसमवायः। तस्यैव भगवतः पर्यायार्थिकनयेन शुद्धव्यञ्जनपर्यायापेक्षया सिद्धपर्यायेणोत्पादः, संसारपर्यायेण विनाशः, केवलज्ञानादिगुणाधारद्रव्यत्वेन ध्रौव्यमिति। ततः स्थितं द्रव्यार्थिकनयेन नित्यत्वेऽपि पर्यायार्थिकनयेनोत्पादव्ययध्रौव्यत्रयं संभवतीति ॥ १७ ॥ अथोत्पादादित्रयं यथा सुवर्णादिमूर्तपदार्थेषु

[**तस्य एव पुनः**] उसके ही फिर [**स्थितिसंभवनाशसमवायः विद्यते**] स्थिति, उत्पाद और विनाशका समवाय मिलाप, एकत्रपना विद्यमान है।

टीका :– वास्तवमें इस (शुद्धात्मस्वभावको प्राप्त) आत्माके शुद्धोपयोगके प्रसादसे हुआ जो शुद्धात्मस्वभावसे (शुद्धात्मस्वभावरूपसे) उत्पाद है वह, पुनः उसरूपसे प्रलयका अभाव होनेसे विनाश रहित है; और (उस आत्माके शुद्धोपयोगके प्रसादसे हुआ) जो अशुद्धात्मस्वभावसे विनाश है वह पुनः उत्पत्तिका अभाव होनेसे, उत्पाद रहित है। इससे (यह कहा है कि) उस आत्माके सिद्धरूपसे अविनाशीपन है। ऐसा होनेपर भी उस आत्माके उत्पाद, व्यय और ध्रौव्यका समवाय विरोधको प्राप्त नहीं होता, क्योंकि वह विनाश रहित उत्पादके साथ, उत्साह रहित विनाशके साथ और उन दोनोंके आधारभूत द्रव्यके साथ समवेत (तन्मयतासे युक्त एकमेक) है।

भावार्थ :– स्वयंभू सर्वज्ञ भगवानके जो शुद्धात्म स्वभाव उत्पन्न हुआ वह कभी नष्ट नहीं होता, इसलिये उनके विनाशरहित उत्पाद है, और अनादि अविद्या जनित विभाव परिणाम एक बार सर्वथा नाशको प्राप्त होनेके बाद फिर कभी उत्पन्न नहीं होते, इसलिये उनके उत्पाद रहित विनाश है। इसप्रकार यहाँ यह कहा है कि वे सिद्ध-रूपसे अविनाशी हैं। इसप्रकार अविनाशी होनेपर भी वे उत्पाद-व्यय-ध्रौव्ययुक्त हैं; क्योंकि शुद्ध पर्यायकी अपेक्षासे उनके उत्पाद है, अशुद्ध पर्यायकी अपेक्षासे व्यय है और उन दोनोंके आधारभूत आत्मत्वकी अपेक्षासे ध्रौव्य है ॥ १७ ॥

अब, उत्पाद आदि तीनों (उत्पाद, व्यय और ध्रौव्य) सर्व द्रव्योंके साधारण है

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथोत्पादादित्रयं सर्वद्रव्यसाधारणत्वेन शुद्धात्मनोऽप्यवश्यंभावीति विभावयति—

उप्पादो य विणासो विज्जदि सव्वस्स अट्ठजादस्स ।
पज्जाएण दु केणवि अट्ठो खलु होदि सब्भूदो ॥१८॥

उत्पादश्च विनाशो विद्यते सर्वस्यार्थजातस्य ।
पर्यायेण तु केनाप्यर्थः खलु भवति सद्भूतः ॥१८॥

दृश्यते तथैवामूर्तेऽपि सिद्धस्वरूपे विज्ञेयं पदार्थत्वादिति निरूपयति—**उप्पादो य विणासो विज्जदि सव्वस्स अट्ठजादस्स** उत्पादश्च विनाशश्च विद्यते तावत्सर्वस्यार्थजातस्य पदार्थसमूहस्य । केन कृत्वा । **पज्जाएण दु केणवि** पर्यायेण तु केनापि विवक्षितेनार्थव्यञ्जनरूपेण स्वभावविभावरूपेण वा । स चार्थः किंविशिष्टः । **अट्ठो खलु होदि सब्भूदो** अर्थः खलु स्फुटं सत्ताभूतः सत्ताया अभिन्नो भवतीति ।

इसलिये शुद्धआत्मा (केवली भगवान और सिद्ध भगवान) के भी [१]अवश्यम्भावी है ऐसा व्यक्त करते हैं ।

गाथा १८

अन्वयार्थ :– [**उत्पादः**] किसी पर्यायसे उत्पाद [**विनाशः च**] और किसी पर्यायसे विनाश [**सर्वस्य**] सर्व [**अर्थजातस्य**] पदार्थमात्रके [**विद्यते**] होता हैं, [**केन अपि पर्यायेण तु**] और किसी पर्यायसे [**अर्थः**] पदार्थ [**सद्भूतः खलु भवति**] वास्तवमें ध्रुव है ।

टीका :– जैसे उत्तम स्वर्णकी बाजूबन्दरूप पर्यायसे उत्पत्ति दिखाई देती है, पूर्व अवस्थारूपसे वर्तनेवाली अँगूठी इत्यादिक पर्यायसे विनाश देखा जाता हैं और पीलापन इत्यादि पर्यायसे दोनोंमें (बाजूबन्द और अँगूठी में) उत्पत्ति-विनाशको प्राप्त न होनेसे ध्रौव्यत्व दिखाई देता है । इसप्रकार सर्व द्रव्योंके किसी पर्यायसे उत्पाद, किसी पर्यायसे विनाश और किसी पर्यायसे ध्रौव्य होता है, ऐसा जानना चाहिये । इससे (यह कहा गया है कि) शुद्ध आत्माके भी द्रव्यका लक्षणभूत उत्पाद, व्यय ध्रौव्यरूप अस्तित्व अवश्यम्भावी है ।

---

[१] अवश्यम्भावी = जरूर होनेवाला; अपरिहार्य्य ।

उत्पाद तेम विनाश छे सौ कोई वस्तु मात्र ने ।
वली कोई पर्यय थी दरेक पदार्थ छे सद्भूत खरे ॥१८॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यथाहि जात्यजाम्बूनदस्याङ्गदपर्यायेणोत्पत्तिर्दृष्टा; पूर्वव्यवस्थितांगुलीयकादिपर्यायेण च विनाशः, पीतत्वादिपर्यायेण तूभयत्राप्युत्पत्तिविनाशावनासादयतः ध्रुवत्वम्; एवमखिलद्रव्याणां केनचित्पर्यायेणोत्पादः केनचिद्विनाशः केनचिद्ध्रौव्यमित्यवबोद्धव्यम्। अतः शुद्धात्मनोऽप्युत्पादादित्रयरूपं द्रव्यलक्षणभूतमस्तित्वमवश्यंभावि ॥१८॥

तथाहि—सुवर्णगोरसमृत्तिकापुरुषादिमूर्तपदार्थेषु यथोत्पादादित्रयं लोके प्रसिद्धं तथैवामूर्तेऽपि मुक्तजीवे। यद्यपि शुद्धात्मरुचिपरिच्छित्तिनिश्चलानुभूतिलक्षणस्य संसारावसानोत्पन्नकारणसमयसारपर्यायस्य विनाशो भवति तथैव केवलज्ञानादिव्यक्तिरूपस्य कार्यसमयसारपर्यायस्योत्पादश्च भवति, तथाप्युभयपर्यायपरिणतात्मद्रव्यत्वेन ध्रौव्यत्वं पदार्थत्वादिति। अथवा यथा ज्ञेयपदार्थाः प्रतिक्षणं भङ्गत्रयेण परिणमन्ति तथा ज्ञानमपि परिच्छित्त्यपेक्षया भङ्गत्रयेण परिणमति। षट्स्थानगतागुरुलघुकगुणवृद्धिहान्यपेक्षया वा भङ्गत्रयमवबोद्धव्यमिति सूत्रतात्पर्यम् ॥ १८ ॥ एवं सिद्धजीवे द्रव्यार्थिक

भावार्थ :— द्रव्यका लक्षण अस्तित्व है और अस्तित्व उत्पाद-व्यय-ध्रौव्यरूप हैं। इसलिये किसी पर्यायसे उत्पाद, किसी पर्यायसे विनाश और किसी पर्यायसे ध्रौव्यत्व प्रत्येक पदार्थके होता है।

प्रश्न :— 'द्रव्यका अस्तित्व उत्पादादिक तीनोंसे क्यों कहा है? एकमात्र ध्रौव्यसे ही कहना चाहिये, क्योंकि जो ध्रुव रहता है वह सदा बना रह सकता है?'

उत्तर :— यदि पदार्थ ध्रुव ही हो तो मिट्टी, सोना, दूध इत्यादि समस्त पदार्थ एक ही सामान्य आकारसे रहना चाहिये; और घड़ा, कुंडल, दही इत्यादि भेद कभी न होना चाहिये। किन्तु ऐसा नहीं होता अर्थात् भेद तो अवश्य दिखाई देते हैं। इसलिये पदार्थ सर्वथा ध्रुव न रहकर किसी पर्यायसे उत्पन्न और किसी पर्यायसे नष्ट भी होते हैं। यदि ऐसा न माना जाये तो संसारका ही लोप हो जाये।

इसप्रकार प्रत्येक द्रव्य उत्पाद-व्यय-ध्रौव्यमय है, इसलिये मुक्त आत्माके भी उत्पाद-व्यय-ध्रौव्य अवश्य होते हैं। यदि स्थूलतासे देखा जाये तो, सिद्ध पर्यायका उत्पाद और संसार पर्यायका व्यय हुआ तथा आत्मत्व ध्रुव बना रहा। इस अपेक्षासे मुक्त आत्माके भी उत्पाद-व्यय-ध्रौव्य होता है। अथवा, मुक्त आत्माका ज्ञान ज्ञेय पदार्थोंके आकाररूप हुआ करता है इसलिये समस्त ज्ञेय पदार्थोंमें जिस-जिस प्रकारसे उत्पादादिक होता है उस-उस प्रकारसे ज्ञानमें उत्पादादिक होता रहता हैं, इसलिये मुक्त आत्माके समय समय पर उत्पाद-व्यय-ध्रौव्य होता है। अथवा अधिक सूक्ष्मतासे देखा जाये तो, अगुरुलघुगुणमें होनेवाली षटगुनी हानि वृद्धिके कारण मुक्त आत्मामें समय-समयपर उत्पाद-व्यय-ध्रौव्य वर्तता है। यहाँ जैसे सिद्धभगवानके उत्पादादि कहे हैं

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथास्यात्मनः शुद्धोपयोगानुभावात्स्वयंभुवो भूतस्य कथमिन्द्रियैर्विना ज्ञानानन्दाविति संदेहमुदस्यति –

पक्खीणघादिकम्मो अणंतवरवीरिओ अहियतेजो ।
जादो अदिंदिओ सो णाणं सोक्खं च परिणमदि ॥१९॥

प्रक्षीणघातिकर्मा अनन्तवरवीर्योऽधिकतेजाः ।
जातोऽतीन्द्रियः स ज्ञानं सौख्यं च परिणमति ॥१९॥

नयेन नित्यत्वेऽपि विवक्षितं पर्यायेणोत्पादव्ययध्रौव्यस्थापनरूपेण द्वितीयस्थले गाथाद्वयं गतम् । अथ तं पूर्वोक्तसर्वज्ञं ये मन्यन्ते ते सम्यग्दृष्टयो भवन्ति, परम्परया मोक्षं च लभन्त इति प्रतिपादयति –

तं सव्वट्ठवरिट्ठं इट्ठं अमरासुरप्पहाणेहिं ।
ये सद्दहंति जीवा तेसिं दुक्खाणि खीयंति ॥ १ ॥

तं सव्वट्ठवरिट्ठं तं सर्वार्थवरिष्ठं **इट्ठं** इष्टमभिमतं । कैः । **अमरासुरप्पहाणेहिं** अमरासुरप्रधानैः । **ये सद्दहंति** ये श्रद्दधति रोचन्ते **जीवा** भव्यजीवाः । **तेसिं** तेषाम् । **दुक्खाणि** वीतरागपारमार्थिकसुखविलक्षणानि दुःखानि । **खीयंति** विनाशं गच्छन्ति, इति सूत्रार्थः ॥ १ ॥ एवं निर्दोषिपरमात्मश्रद्धानान्मोक्षो भवतीति कथनरूपेण तृतीयस्थले गाथा गता ॥ अथास्यात्मनो निर्विकारस्वसंवेदनलक्षणशुद्धोपयोगप्रभावात्सर्वज्ञत्वे सतीन्द्रियैर्विना कथं ज्ञानानन्दाविति पृष्टे प्रत्युत्तरं ददाति - **पक्खीणघादिकम्मो** ज्ञानाद्यनन्तचतुष्टयस्वरूपपरमात्मद्रव्यभावनालक्षणशुद्धोपयोग-

---

उसीप्रकार केवली भगवानके भी यथायोग्य समझ लेना चाहिये ॥१८॥

अब, शुद्धोपयोगके प्रभावसे स्वयंभू हुए इस (पूर्वोक्त) आत्माके इन्द्रियोंके बिना ज्ञान और आनन्द कैसे होता है ? ऐसे संदेहका निवारण करते हैं :–

गाथा १९

अन्वयार्थ :– [**प्रक्षीणघातिकर्मा**] जिसके घातिकर्म क्षय हो चुके हैं, [**अतीन्द्रियः जातः**] जो अतीन्द्रिय होगया है, [**अनन्तवरवीर्यः**] अनन्त जिसका उत्तम वीर्य है और [**अधिकतेजाः**] [१]अधिक जिसका (केवलज्ञान और केवलदर्शनरूप) तेज है [**सः**] ऐसा वह (स्वयंभू आत्मा) [**ज्ञानं सौख्यं च**] ज्ञान और सुखरूप [**परिणमति**] परिणमन करता है ।

---

[१] अधिक=उत्कृष्ट; असाधारण; अत्यन्त ।

प्रक्षीण घाति कर्म, अनहद वीर्य, अधिक प्रकाशने ।
इन्द्रिय-अतीत थयेल आत्मा ज्ञानसौख्ये परिणमे ॥१९॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अयं खल्वात्मा शुद्धोपयोगसामर्थ्यात् प्रक्षीणघातिकर्मा, क्षायोपशमिकज्ञानदर्शनासंपृक्तत्वादतीन्द्रियो भूतः सन्निखिलान्तरायक्षयादनन्तवरवीर्यः, कृत्स्नज्ञानदर्शनावरणप्रलयादधिककेवलज्ञानदर्शनाभिधानतेजाः, समस्तमोहनीयाभावादत्यन्तनिर्विकारचैतन्यस्वभावमात्मानमासादयन् स्वयमेव स्वपरप्रकाशकत्वलक्षणं ज्ञानमनाकुलत्वलक्षणं सौख्यं च भूत्वा परिणमते। एवमात्मनो ज्ञानानन्दौ स्वभाव एव। स्वभावस्य तु परानपेक्षत्वादिन्द्रियैर्विनाप्यात्मनो ज्ञानानन्दौ संभवतः ॥१९॥

बलेन प्रक्षीणघातिकर्मा सन्। **अणंतवरवीरिओ** अनन्तवरवीर्यः। पुनरपि किंविशिष्टः। **अहियतेजो** अधिकतेजाः। अत्र तेजःशब्देन केवलज्ञानदर्शनद्वयं ग्राह्यम्। **जादो सो** स पूर्वोक्तलक्षण आत्मा जातः संजातः। कथंभूतः। **अणिंदियो** अनिन्द्रिय इन्द्रियविषयव्यापाररहितः। अनिन्द्रियः सन् किं करोति। **णाणं सोक्खं च परिणमदि** केवलज्ञानमनन्तसौख्यं च परिणमतीति। तथाहि – अनेन व्याख्यानेन किमुक्तं भवति, आत्मा तावन्निश्चयेनानन्तज्ञानसुखस्वभावोऽपि व्यवहारेण संसारावस्थायां कर्मप्रच्छादितज्ञानसुखः सन् पञ्चादिन्द्रियाधारेण किमप्यल्पज्ञानं सुखं च परिणमति। यदा पुनर्निर्विकल्पस्वसंवित्तिबलेन कर्माभावो भवति तदा क्षयोपशमाभावादिन्द्रियाणि न सन्ति स्वकीयातीन्द्रियज्ञानं सुखं चानुभवति। ततः स्थितं इन्द्रियाभावेऽपि स्वकीयानन्तज्ञानं सुखं चानुभवति। तदपि

टीका :– शुद्धोपयोगके सामर्थ्यसे जिसके घातिकर्म क्षयको प्राप्त हुए हैं, क्षायोपशमिक ज्ञान-दर्शनके साथ असंपृक्त (संपर्क रहित) होनेसे जो अतीन्द्रिय होगया है, समस्त अन्तरायका क्षय होनेसे अनन्त जिसका उत्तम वीर्य है, समस्त ज्ञानावरण और दर्शनावरणका प्रलय हो जानेसे अधिक जिसका केवलज्ञान और केवलदर्शन नामक तेज है – ऐसा यह (स्वयंभू) आत्मा, समस्त मोहनीयके अभावके कारण अत्यन्त निर्विकार शुद्ध चैतन्य स्वभाववाले आत्माका (अत्यन्त निर्विकार शुद्ध चैतन्य जिसका स्वभाव है ऐसे आत्माका) अनुभव करता हुआ स्वयमेव स्वपरप्रकाशकता लक्षण ज्ञान और अनाकुलता लक्षण सुख होकर परिणमित होता है। इसप्रकार आत्माका, ज्ञान और आनन्द स्वभाव ही है। और स्वभाव परसे [१]अनपेक्ष होनेके कारण इन्द्रियोंके बिना भी आत्माके ज्ञान और आनन्द होता है।

भावार्थ :– आत्माको ज्ञान और सुखरूप परिणमित होनेमें इन्द्रियादिक पर निमित्तोंकी आवश्यकता नहीं है; क्योंकि जिसका लक्षण अर्थात् स्वरूप स्वपरप्रकाशकता है ऐसा ज्ञान और जिसका लक्षण अनाकुलता है ऐसा सुख आत्माका स्वभाव ही है ॥१९॥

---

[१] अनपेक्ष=स्वतंत्र; उदासीन; अपेक्षा रहित।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथातीन्द्रियत्वादेव शुद्धात्मनः शारीरं सुखदुःखं नास्तीति विभावयति –

सोक्खं वा पुण दुक्खं केवलणाणिस्स णत्थि देहगदं ।
जम्हा अदिंदियत्तं जादं तम्हा दु तं णेयं ॥२०॥

कस्मात् । स्वभावस्य परापेक्षा नास्तीत्यभिप्रायः ॥ १९ ॥ अथातीन्द्रियत्वादेव केवलिनः शरीराधारोद्भूतं भोजनादिसुखं क्षुधादिदुःखं च नास्तीति विचारयति – **सोक्खं वा पुण दुक्खं केवलणाणिस्स णत्थि** सुखं वा पुनर्दुःखं वा केवलज्ञानिनो नास्ति । कथंभूतम् । **देहगदं** देहगतं देहाधारजिह्वेन्द्रियादिसमुत्पन्नं कवलाहारादिसुखम्, असातोदयजनितं क्षुधादिदुःखं च । कस्मान्नास्ति । **जम्हा अदिंदियत्तं जादं** यस्मान्मोहादिघातिकर्माभावे पञ्चेन्द्रियविषयव्यापाररहितत्वं जातम् । **तम्हा दु तं णेयं** तस्मादतीन्द्रियत्वाद्धेतोरतीन्द्रियमेव तज्ज्ञानं सुखं च ज्ञेयमिति । तद्यथा – लोहपिण्डसंसर्गाभावादग्निर्यथा घनघातपिट्टनं न लभते तथायमात्मापि लोहपिण्डस्थानीयेन्द्रियग्रामाभावात् सांसारिकसुखदुःखं नानुभवतीत्यर्थः । कश्चिदाह–केवलिनां भुक्तिरस्ति, औदारिकशरीरसद्भावात् । असद्वेद्यकर्मोदयसद्भावाद्वा । अस्मदादिवत् । परिहारमाह–तद्भगवतः शरीरमौदारिकं न भवति किंतु परमौदारिकम् । तथा चोक्तं – "शुद्धस्फटिकसंकाशं तेजोमूर्तिमयं वपुः । जायते क्षीणदोषस्य सप्तधातुविवर्जितम्" ॥ यच्चोक्तमसद्वेद्योदयसद्भावात्तत्र परिहारमाह – यथा व्रीह्यादिबीजं जलसहकारिकारणसहितमङ्कुरादिकार्यं जनयति तथैवासद्वेद्यकर्म मोहनीयसहकारिकारणसहितं क्षुधादिकार्यमुत्पादयति । कस्मात् । 'मोहस्स बलेण घाददे जीवं' इति वचनात् । यदि पुनर्मोहाभावेऽपि क्षुधादिपरीषहं जनयति तर्हि वधरोगादिपरीषहमपि जनयतु, न च तथा । तदपि कस्मात् । 'भुक्त्युपसर्गाभावात्' इति वचनात् । अन्यदपि दूषणमस्ति । यदि क्षुधाबाधास्ति तर्हि क्षुधाक्षीणशक्तेरनन्तवीर्यं नास्ति । तथैव क्षुधादुःखितस्यानन्तसुखमपि नास्ति । जिह्वेन्द्रियपरिच्छित्तिरूपमतिज्ञानपरिणतस्य केवलज्ञानमपि न संभवति । अथवा अन्यदपि कारणमस्ति । असद्वेद्योदयापेक्षया सद्वेद्योदयोऽनन्तगुणोऽस्ति । ततः कारणात् शर्करारााशिमध्ये निम्बकणिकावदसद्वेद्योदयो विद्यमानोऽपि न ज्ञायते । तथैवान्यदपि

अब अतीन्द्रियताके कारण ही शुद्ध आत्माके (केवली भगवानके) शारीरिक सुख दुःख नहीं है यह व्यक्त करते हैं :–

गाथा २०

अन्वयार्थ :– [**केवलज्ञानिनः**] केवलज्ञानीके [**देहगतं**] शरीरसम्बन्धी [**सौख्यं**] सुख [**वा पुनः दुःखं**] या दुःख [**नास्ति**] नहीं है, [**यस्मात्**] क्योंकि [**अतीन्द्रियत्वं जातं**] अतीन्द्रियता उत्पन्न हुई है [**तस्मात् तु तत् ज्ञेयम्**] इसलिये ऐसा जानना चाहिये ।

कँइ देहगत नथी सुख के नथी दुःख केवलज्ञानीने ।
जेथी अतीन्द्रियता थई ते कारणे अे जाणजे ॥२०॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

सौख्यं वा पुनर्दुःखं केवलज्ञानिनो नास्ति देहगतम् ।
यस्मादतोन्द्रियत्वं जातं तस्मात्तु तज्ज्ञेयम् ॥२०॥

बाधकमस्ति – यथा प्रमत्तसंयतादितपोधनानां वेदोदये विद्यमानेऽपि मन्दमोहोदयत्वादखण्डब्रह्मचारिणां स्त्रीपरीषहबाधा नास्ति, यथैव च नवग्रैवेयकाद्यहमिन्द्रदेवानां वेदोदये विद्यमानेऽपि मन्दमोहोदयेन स्त्रीविषयबाधा नास्ति, तथा भगवत्यसद्वेद्योदये विद्यमानेऽपि निरवशेषमोहाभावात् क्षुधाबाधा नास्ति। यदि पुनरुच्यते भवद्भिः – मिथ्यादृष्ट्यादिसयोगकेवलिपर्यन्तास्त्रयोदशगुणस्थानवर्तिनो जीवा आहारका भवन्तीत्याहारकमार्गणायामागमे भणितमास्ते, ततः कारणात् केवलिनामाहारोऽस्तीति। तदप्ययुक्तम्। "णोकम्म-कम्महारो कवलाहारो य लेप्पमाहारो। ओजमणो वि य कमसो आहारो छव्विहो णेयो" ॥ इति गाथाकथितक्रमेण यद्यपि षट्प्रकार आहारो भवति तथापि नोकर्माहारापेक्षया केवलिनामाहारकत्वमवबोद्धव्यम्। न च कवलाहारापेक्षया। तथाहि – सूक्ष्माः सुरसाः सुगन्धा अन्यमनुजानामसंभविनः कवलाहारं विनापि किञ्चिदूनपूर्वकोटिपर्यन्तं शरीरस्थितिहेतवः सप्तधातुरहितपरमौदारिकशरीरनोकर्माहारयोग्या लाभान्तरायकर्मनिरवशेषक्षयात् प्रतिक्षणं पुद्गला आस्रवन्तीति नवकेवललब्धिव्याख्यानकाले भणितं तिष्ठति। ततो ज्ञायते नोकर्माहारापेक्षया केवलिनामाहारकत्वम्। अथ मतम् – भवदीयकल्पनया आहारानाहारकत्वं नोकर्माहारापेक्षया, न च कवलाहारापेक्षया चेति कथं ज्ञायते। नैवम्। "एकं द्वौ त्रीन् वानाहारकः" इति **तत्त्वार्थे** कथितमास्ते। अस्य सूत्रस्यार्थः कथ्यते – भवान्तरगमनकाले विग्रहगतौ शरीराभावे सति नूतनशरीरधारणार्थं त्रयाणां शरीराणां षण्णां पर्याप्तीनां योग्यपुद्गलपिण्डग्रहणं नोकर्माहार उच्यते। स च विग्रहगतौ कर्माहारे विद्यमानेऽप्येकद्वित्रिसमयपर्यन्तं नास्ति। ततो नोकर्माहारापेक्षयाऽऽहारानाहारकत्वमागमे ज्ञायते। यदि पुनः कवलाहारापेक्षया तर्हि भोजनकालं विहाय सर्वदैवानाहारक एव, समयत्रयनियमो न घटते। अथ मतम् – केवलिनां कवलाहारोऽस्ति मनुष्यत्वात् वर्तमानमनुष्यवत्। तदप्ययुक्तम्। तर्हि पूर्वकालपुरुषाणां सर्वज्ञत्वं नास्ति, रामरावणादिपुरुषाणां च विशेषसामर्थ्यं नास्ति वर्तमानमनुष्यवत्। न च तथा। किंच छद्मस्थतपोधना अपि सप्तधातुरहितपरमौदारिकशरीराभावे 'छट्ठो त्ति पढमसण्णा' इति वचनात् प्रमत्तसंयतषष्ठगुणस्थानवर्तिनो यद्यप्याहारं गृह्णन्ति तथापि ज्ञानसंयमध्यानसिद्धयर्थं, न च देहममत्वार्थम्"। उक्तं च – "कायस्थित्यर्थमाहारः कायो ज्ञानार्थमिष्यते। ज्ञानं कर्मविनाशाय तन्नाशे परमं सुखम्" ॥ "ण बलाउसाहणट्ठं ण सरीरस्स य चयट्ठ तेजट्ठं। णाणट्ठ संजमट्ठं झाणट्ठं चेव भुंजंति ॥" तस्य भगवतो ज्ञानसंयमध्यानादिगुणाः स्वभावेनैव तिष्ठन्ति न चाहारबलेन। यदि पुनर्देहममत्वेनाहारं गृह्णाति तर्हि छद्मस्थेभ्योऽप्यसौ हीनः प्राप्नोति। अथोच्यते – तस्यातिशय-

टीका :– जैसे अग्निको लोहपिण्डके तप्त पुद्गलोंका समस्त विलास नहीं है (अर्थात् अग्नि लोहेके गोलेके पुद्गलोंके विलाससे – उनकी क्रियासे भिन्न है) उसीप्रकार शुद्ध आत्माके (अर्थात् केवलज्ञानी भगवानके) इन्द्रिय-समूह नहीं है; इसीलिये जैसे अग्निको घनके घोर आघातोंकी परम्परा नहीं है (लोहेके गोलेके संसर्गका अभाव होने पर घनके लगातार आघातोंकी भयंकर मार अग्निपर नहीं पड़ती) इसीप्रकार शुद्ध आत्माके शरीर सम्बन्धी सुख दुःख नहीं हैं।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यत एव शुद्धात्मनो जातवेदस इव कालायसगोलोत्कूलितपुद्गलाशेषविलासकल्पो नास्तीन्द्रियग्रामस्तत एव घोरघनघाताभिघातपरम्परास्थानीयं शरीरगतं सुखदुःखं न स्यात् ॥२०॥

अथ ज्ञानस्वरूपप्रपञ्चं सौख्यस्वरूपप्रपञ्चं च क्रमप्रवृत्तप्रबन्धद्वयेनाभिदधाति। तत्र केवलिनोऽतीन्द्रियज्ञानपरिणतत्वात्सर्वं प्रत्यक्षं भवतीति विभावयति –

परिणमदो खलु णाणं पच्चक्खा सव्वदव्वपज्जया।
सो णेव ते विजाणदि उग्गहपुव्वाहिं किरियाहिं ॥२१॥

विशेषात्प्रकटा भुक्तिर्नास्ति प्रच्छन्ना विद्यते। तर्हि परमौदारिकशरीरत्वाद्भुक्तिरेव नास्त्ययमेवातिशयः किं न भवति। तत्र तु प्रच्छन्नभुक्तौ मायास्थानं दैन्यवृत्तिः, अन्येऽपि पिण्डशुद्धिकथिता दोषा बहवो भवन्ति। ते चान्यत्र तर्कशास्त्रे ज्ञातव्याः। अत्र चाध्यात्मग्रंथत्वान्नोच्यन्त इति। अयमत्र भावार्थः– इदं वस्तुस्वरूपमेव ज्ञातव्यमत्राग्रहो न कर्तव्यः। कस्मात्। दुराग्रहे सति रागद्वेषोत्पत्तिर्भवति ततश्च निर्विकारचिदानन्दैकस्वभावपरमात्मभावनाविघातो भवतीति ॥ २० ॥ एवमनन्तज्ञानसुखस्थापने प्रथमगाथा केवलिभुक्तिनिराकरणे द्वितीया चेति गाथाद्वयं गतम्।

इति सप्तगाथाभिः स्थलचतुष्टयेन सामान्येन **सर्वज्ञसिद्धि**नामा द्वितीयोऽन्तराधिकारः समाप्तः ॥

अथ ज्ञानप्रपञ्चाभिधानान्तराधिकारे त्रयस्त्रिंशद्गाथा भवन्ति। तत्राष्टौ स्थलानि। तेष्वादौ केवलज्ञानस्य सर्वं प्रत्यक्षं भवतीति कथनमुख्यत्वेन 'परिणमदो खलु' इत्यादिगाथाद्वयम्, अथात्मज्ञानयोर्निश्चयेनासंख्यातप्रदेशत्वेऽपि व्यवहारेण सर्वगतत्वं भवतीत्यादिकथनमुख्यत्वेन 'आदा णाणपमाणं' इत्यादिगाथापञ्चकम्, ततः परं ज्ञानज्ञेययोः परस्परगमननिराकरणमुख्यतया 'णाणी णाणसहावो' इत्यादिगाथापञ्चकम्, अथ निश्चयव्यवहारकेवलिप्रतिपादनादिमुख्यत्वेन 'जो हि सुदेण' इत्यादिसूत्रचतुष्टयम्, अथ वर्तमानज्ञाने कालत्रयपर्यायपरिच्छित्तिकथनादिरूपेण 'तक्कालिगेव सव्वे' इत्यादिसूत्रपञ्चकम्, अथ केवलज्ञानं बन्धकारणं न भवति रागादिविकल्परहितं छद्मस्थज्ञानमपि, किंतु रागादयो बन्धकारणमित्यादिनिरूपणमुख्यतया 'परिणमदि णेयं' इत्यादिसूत्रपञ्चकम्, अथ

भावार्थ :– केवली भगवानके शरीर सम्बन्धी क्षुधादिका दुःख या भोजनादिका सुख नहीं होता इसलिये उनके कवलाहार नहीं होता ॥२०॥

अब, ज्ञानके स्वरूपका विस्तार और सुखके स्वरूपका विस्तार क्रमशः प्रवर्तमान दो अधिकारोंके द्वारा कहते हैं। इनमेंसे (प्रथम) अतीन्द्रिय ज्ञानरूप परिणमित होनेसे केवली भगवानके सब प्रत्यक्ष है यह प्रगट करते हैं :–

प्रत्यक्ष छे सौ द्रव्यपर्यय ज्ञानपरिणमनारने।
जाणे नहीं ते तेमने अवग्रह-ईहादिक्रिया वडे ॥२१॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

परिणममानस्य खलु ज्ञानं प्रत्यक्षाः सर्वद्रव्यपर्यायाः ।
स नैव तान् विजानात्यवग्रहपूर्वाभिः क्रियाभिः ॥२१॥

यतो न खल्विन्द्रियाण्यालम्ब्यावग्रहेहावायपूर्वकप्रक्रमेण केवली विजानाति, स्वयमेव

केवलज्ञानं सर्वज्ञानं सर्वज्ञत्वेन प्रतिपादयतीत्यादिव्याख्यानमुख्यत्वेन 'जं तक्कालियमिदरं' इत्यादि-गाथापञ्चकम्, अथ ज्ञानप्रपञ्चोपसंहारमुख्यत्वेन प्रथमगाथा, नमस्कारकथनेन द्वितीया चेति 'णवि परिणमदि' इत्यादि गाथाद्वयम्। एवं ज्ञानप्रपञ्चाभिधानतृतीयान्तराधिकारे त्रयस्त्रिंशद्गाथाभिः स्थलाष्टकेन समुदायपातनिका। तद्यथा – अथातीन्द्रियज्ञानपरिणतत्वात्केवलिनः सर्वं प्रत्यक्षं भवतीति प्रतिपादयति – **पच्चक्खा सव्वदव्वपज्जाया** सर्वद्रव्यपर्यायाः प्रत्यक्षा भवन्ति। कस्य। केवलिनः। किं कुर्वतः। **परिणमदो** परिणममानस्य। **खलु** स्फुटम्। किम्। **णाणं** अनन्तपदार्थपरिच्छित्तिसमर्थं केवल-ज्ञानम्। तर्हि किं क्रमेण जानाति। **सो णेव ते विजाणदि उग्गहपुव्वाहिं किरियाहिं** स च भगवान्नैव तान् जानात्यवग्रहपूर्वाभिः क्रियाभिः, किंतु युगपदित्यर्थः। इतो विस्तरः–अनाद्यनन्तमहेतुकं चिदानन्दैक-स्वभावं निजशुद्धात्मानमुपादेयं कृत्वा केवलज्ञानोत्पत्तेर्बीजभूतेनागमभाषया शुक्लध्यानसंज्ञेन रागादि-विकल्पजालरहितस्वसंवेदनज्ञानेन यदायमात्मा परिणमति, तदा स्वसंवेदनज्ञानफलभूतकेवलज्ञान-

---

गाथा २१

अन्वयार्थ :– [**खलु**] वास्तवमें [**ज्ञानं परिणममानस्य**] ज्ञानरूपसे (केवलज्ञानरूपसे) परिणमित होते हुए केवलीभगवानके [**सर्वद्रव्यपर्यायाः**] सर्व द्रव्य-पर्यायें [**प्रत्यक्षाः**] प्रत्यक्ष हैं; [**सः**] वे [**तान्**] उन्हें [**अवग्रहपूर्वाभिः क्रियाभिः**] अवग्रहादि क्रियाओंसे [**नैव विजानाति**] नहीं जानते।

टीका :– केवलीभगवान इन्द्रियोंके आलम्बनसे अवग्रह-ईहा-अवाय पूर्वक क्रमसे नहीं जानते, (किन्तु) स्वयमेव समस्त आवरणके क्षयके क्षण ही, अनादि अनन्त, अहेतुक और असाधारण ज्ञानस्वभावको ही कारणरूप ग्रहण करनेसे तत्काल ही प्रगट होनेवाले केवलज्ञानोपयोगरूप होकर परिणमित होते हैं; इसलिये उनके समस्त द्रव्य, क्षेत्र, काल और भावका अक्रमिक ग्रहण होनेसे समक्ष संवेदनकी (प्रत्यक्ष ज्ञानकी) आलम्बनभूत द्रव्य-पर्यायें प्रत्यक्ष ही हैं।

भावार्थ :– जिसका न आदि है न अंत है, तथा जिसका कोई कारण नहीं और जो अन्य किसी द्रव्यमें नहीं है, ऐसे ज्ञान स्वभावको ही उपादेय करके, केवलज्ञानकी उत्पत्तिके बीजभूत शुक्लध्यान नामक स्वसंवेदनज्ञानरूपसे जब आत्मा परिणमित होता है तब उसके निमित्तसे सर्व घातिकर्मोंका क्षय हो जाता है और उस क्षय होनेके समय ही आत्मा स्वयमेव केवलज्ञानरूप परिणमित होने लगता है। वे केवलज्ञानी भगवान क्षायोप-

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

समस्तावरणक्षयक्षण एवानाद्यनन्ताहेतुकासाधारणभूतज्ञानस्वभावमेव कारणत्वेनोपादाय तदुपरि प्रविकसत्केवलज्ञानोपयोगीभूय विपरिणमते, ततोऽस्याक्रमसमाक्रान्तसमस्तद्रव्य-क्षेत्रकालभावतया समक्षसंवेदनालम्बनभूताः सर्वद्रव्यपर्यायाः प्रत्यक्षा एव भवन्ति ॥२१॥

अथास्य भगवतोऽतीन्द्रियज्ञानपरिणतत्वादेव न किंचित्परोक्षं भवतीत्यभिप्रैति –

णत्थि परोक्खं किंचि वि समंत सव्वक्खगुणसमिद्धस्स ।
अक्खातीदस्स सदा सयमेव हि णाणजादस्स ॥२२॥

नास्ति परोक्षं किंचिदपि समन्ततः सर्वाक्षगुणसमृद्धस्य ।
अक्षातीतस्य सदा स्वयमेव हि ज्ञानजातस्य ॥२२॥

परिच्छित्त्याकारपरिणतस्य तस्मिन्नेव क्षणे क्रमप्रवृत्तक्षायोपशमिकज्ञानाभावादक्रमसमाक्रान्तसमस्त-द्रव्यक्षेत्रकालभावतया सर्वद्रव्यगुणपर्याया अस्यात्मनः प्रत्यक्षा भवन्तीत्यभिप्रायः ॥ २१ ॥ अथ सर्वं प्रत्यक्षं भवतीत्यन्वयरूपेण पूर्वसूत्रे भणितमिदानीं तु परोक्षं किमपि नास्तीति तमेवार्थं व्यतिरेकेण दृढयति – **णत्थि परोक्खं किंचि वि** अस्य भगवतः परोक्षं किमपि नास्ति । किंविशिष्टस्य । **समंत सव्वक्खगुणसमिद्धस्स** समन्ततः सर्वात्मप्रदेशैः सामस्त्येन वा स्पर्शरसगन्धवर्णशब्दपरिच्छित्तिरूप-सर्वेन्द्रियगुणसमृद्धस्य । तर्हि किमक्षसहितस्य । नैवम् । **अक्खातीदस्स** अक्षातीतस्येन्द्रियव्यापार-रहितस्य, अथवा द्वितीयव्याख्यानम् – अक्ष्णोति ज्ञानेन व्याप्नोतीत्यक्ष आत्मा तद्गुणसमृद्धस्य । **सदा**

शमिक ज्ञानवाले जीवोंकी भाँति अवग्रह-ईहा-अवाय और धारणारूप क्रमसे नहीं जानते किन्तु सर्व द्रव्य, क्षेत्र, काल, भावको युगपत् जानते हैं । इसप्रकार उनके सब कुछ प्रत्यक्ष होता है ॥२१॥

अब, अतीन्द्रिय ज्ञानरूप परिणमित होनेसे ही इन भगवानको कुछ भी परोक्ष नहीं है, ऐसा अभिप्राय प्रगट करते हैं :–

गाथा २२

अन्वयार्थ :– [**सदा अक्षातीतस्य**] जो सदा इन्द्रियातीत हैं, [**समन्ततः सर्वाक्षगुण-समृद्धस्य**] जो सर्व ओरसे (सर्व आत्मप्रदेशोंसे) सर्व इन्द्रिय गुणोंसे समृद्ध हैं [**स्वयमेव हि ज्ञानजातस्य**] और जो स्वयमेव ज्ञानरूप हुए हैं, उन केवलीभगवान को [**किंचित् अपि**] कुछ भी [**परोक्षं नास्ति**] परोक्ष नहीं है ।

न परोक्ष कँई पण सर्वतः सर्वाक्षगुण समृद्धने ।
इन्द्रिय-अतीत सदैव ने स्वयमेव ज्ञान थयेलने ॥२२॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अस्य खलु भगवतः समस्तावरणक्षयक्षण एव सांसारिकपरिच्छित्तिनिष्पत्तिबलाधानहेतुभूतानि प्रतिनियतविषयग्राहीण्यक्षाणि तैरतीतस्य, स्पर्शरसगन्धवर्णशब्दपरिच्छेदरूपैः समरसतया समन्ततः सर्वैरेवेन्द्रियगुणैः समृद्धस्य, स्वयमेव सामस्त्येन स्वपरप्रकाशनक्षममनश्वरं लोकोत्तरज्ञानजातस्य, अक्रमसमाक्रान्तसमस्तद्रव्यक्षेत्रकालभावतया न किंचनापि परोक्षमेव स्यात् ॥२२॥

अथात्मनो ज्ञानप्रमाणत्वं ज्ञानस्य सर्वगतत्वं चोद्योतयति –

सर्वदा सर्वकालम्। पुनरपि किंरूपस्य। **सयमेव हि णाणजादस्स** स्वयमेव हि स्फुटं केवलज्ञानरूपेण जातस्य परिणतस्येति। तद्यथा – अतीन्द्रियस्वभावपरमात्मनो विपरीतानि क्रमप्रवृत्तिहेतुभूतानीन्द्रियाण्यतिक्रान्तस्य जगत्त्रयकालत्रयवर्तिसमस्तपदार्थयुगपत्प्रत्यक्षप्रतीतिसमर्थमविनश्वरमखण्डैकप्रतिभासमयं केवलज्ञानं परिणतस्यास्य भगवतः परोक्षं किमपि नास्तीति भावार्थः॥ २२॥ एवं केवलिनां समस्तं प्रत्यक्षं भवतीति कथनरूपेण प्रथमस्थले गाथाद्वयं गतम्। अथात्मा ज्ञानप्रमाणो भवतीति ज्ञानं च व्यवहारेण सर्वगतमित्युपदिशति – **आदा णाणपमाणं** ज्ञानेन सह हीनाधिकत्वा-

---

टीका :– समस्त आवरणके क्षयके क्षण ही जो (भगवान) सांसारिक ज्ञानको उत्पन्न करनेके बलको कार्यरूप देनेमें हेतुभूत ऐसी अपने अपने निश्चित विषयोंको ग्रहण करनेवाली इन्द्रियोंसे अतीत हुए हैं, जो स्पर्श, रस, गंध, वर्ण और शब्दके ज्ञानरूप सर्व इन्द्रिय – गुणोंके द्वारा सर्व ओरसे समरसरूपसे समृद्ध हैं (अर्थात् जो भगवान स्पर्श, रस, गंध, वर्ण तथा शब्दको सर्व आत्मप्रदेशोंसे समानरूपसे जानते हैं) और जो स्वयमेव समस्तरूपसे स्वपरका प्रकाशन करनेमें समर्थ अविनाशी लोकोत्तर ज्ञानरूप हुए हैं, ऐसे इन (केवली) भगवानको समस्त द्रव्य-क्षेत्र-काल-भावका अक्रमिक ग्रहण होनेसे कुछ भी परोक्ष नहीं है।

भावार्थ :– इन्द्रियका गुण तो स्पर्शादिक एक-एक गुणको ही जानना है, जैसे चक्षुइन्द्रियका गुण रूपको ही जानना है अर्थात् रूपको ही जाननेमें निमित्त होना है। और इन्द्रियज्ञान क्रमिक है। केवलीभगवान इन्द्रियोंके निमित्तके बिना समस्त आत्मप्रदेशोंसे स्पर्शादि सर्व विषयोंको जानते हैं, और जो समस्तरूपसे स्व-पर प्रकाशक है ऐसे लोकोत्तर ज्ञानरूप (लौकिकज्ञानसे भिन्न केवलज्ञानरूप) स्वयमेव परिणमित हुआ करते हैं, इसलिये समस्त द्रव्य-क्षेत्र-काल और भाव को अवग्रहादि क्रम रहित जानते हैं इसलिये केवली भगवानके कुछ भी परोक्ष नहीं है ॥२२॥

अब, आत्माका ज्ञानप्रमाणपना और ज्ञानका सर्वगतपना उद्योत करते हैं :–

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

आदा णाणपमाणं णाणं णेयप्पमाणमुद्दिट्ठं ।
णेयं लोयालोयं तम्हा णाणं तु सव्वगयं ॥२३॥

आत्मा ज्ञानप्रमाणं ज्ञानं ज्ञेयप्रमाणमुद्दिष्टम् ।
ज्ञेयं लोकालोकं तस्माज्ज्ञानं तु सर्वगतम् ॥२३॥

आत्मा हि 'समगुणपर्यायं द्रव्यम्' इति वचनात् ज्ञानेन सह हीनाधिकत्वरहितत्वेन परिणतत्वात्तत्परिमाणः, ज्ञानं तु ज्ञेयनिष्ठत्वाद्दाह्यनिष्ठदहनवत्तत्परिमाणं; ज्ञेयं तु

भावादात्मा ज्ञानप्रमाणो भवति । तथाहि – 'समगुणपर्यायं द्रव्यं भवति' इति वचनाद्वर्तमानमनुष्यभवे वर्तमानमनुष्यपर्यायप्रमाणः, तथैव मनुष्यपर्यायप्रदेशवर्तिज्ञानगुणप्रमाणश्च प्रत्यक्षेण दृश्यते यथायमात्मा, तथा निश्चयतः सर्वदैवाव्याबाधाक्षयसुखाद्यनन्तगुणाधारभूतो योऽसौ केवलज्ञानगुणस्तत्प्रमाणोऽयमात्मा । **णाणं णेयप्पमाणमुद्दिट्ठं** दाह्यनिष्ठदहनवत् ज्ञानं ज्ञेयप्रमाणमुद्दिष्टं कथितम् । **णेयं लोयालोयं** ज्ञेयं लोकालोकं भवति । शुद्धबुद्धैकस्वभावसर्वप्रकारोपादेयभूतपरमात्मद्रव्यादिषड्-

---

गाथा २३

अन्वयार्थ :–[**आत्मा**] आत्मा [**ज्ञानप्रमाणं**] ज्ञान प्रमाण है; [**ज्ञानं**] ज्ञान [**ज्ञेयप्रमाणं**] ज्ञेय प्रमाण [**उद्दिष्टं**] कहा गया है । [**ज्ञेयं लोकालोकं**] ज्ञेय लोकालोक है [**तस्मात्**] इसलिये [**ज्ञानं तु**] ज्ञान [**सर्वगतं**] सर्वगत – सर्व व्यापक है ।

टीका :–'समगुणपर्यायं द्रव्यं (गुण-पर्यायें अर्थात् युगपद् सर्वगुण और पर्यायें ही द्रव्य है)' इस वचनके अनुसार आत्मा ज्ञानसे हीनाधिकतारहितरूपसे परिणमित होनेके कारण ज्ञानप्रमाण है, और ज्ञान [१]ज्ञेयनिष्ठ होनेसे, दाह्यनिष्ठ [२]दहनकी भाँति, ज्ञेय प्रमाण है । ज्ञेय तो लोक और अलोकके विभागसे [३]विभक्त, [४]अनन्त पर्यायमालासे आलिंगित स्वरूपसे सूचित (प्रगट, ज्ञान,) नाशवान दिखाई देता हुआ भी ध्रुव ऐसा षट्द्रव्य-समूह, अर्थात् सब कुछ है । (ज्ञेय छहों द्रव्योंका समूह अर्थात् सब कुछ है) इसलिये निःशेष आवरणके क्षयके समय ही लोक और अलोकके विभागसे

---

१ ज्ञेयनिष्ठ=ज्ञेयोंका अवलम्बन करनेवाला; ज्ञेयोंमें तत्पर ।

२ दहन=जलाना; अग्नि ।

३ विभक्त=विभागवाला । (षट्द्रव्योंके समूहमें लोक-अलोकरूप दो विभाग हैं) ।

४ अनन्त पर्यायें द्रव्यको आलिंगित करती हैं (द्रव्यमें होती हैं) ऐसे स्वरूपवाला प्रत्येक द्रव्य ज्ञात होता है ।

जीवद्रव्य ज्ञानप्रमाण भाख्युं ज्ञान ज्ञेय प्रमाण छे ।
ने ज्ञेय लोकालोक तेथी सर्वगत अे ज्ञान छे ॥२३॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

लोकालोकविभागविभक्तानन्तपर्यायमालिकालीढस्वरूपसूचिता विच्छेदोत्पादध्रौव्या षड्द्रव्यी सर्वमिति यावत् । ततो निःशेषावरणक्षयक्षण एव लोकालोकविभागविभक्तसमस्तवस्त्वाकारपारमुपगम्य तथैवाप्रच्युतत्वेन व्यवस्थितत्वात् ज्ञानं सर्वगतम् ॥२३॥

अथात्मनो ज्ञानप्रमाणत्वानभ्युपगमे द्वौ पक्षावुपन्यस्य दूषयति –

णाणप्पमाणमादा ण हवदि जस्सेह तस्स सो आदा ।
हीणो वा अहिओ वा णाणादो हवदि धुवमेव ॥२४॥
हीणो जदि सो आदा तण्णाणमचेदणं ण जाणादि ।
अहिओ वा णाणादो णाणेण विणा कहं जाणादि ॥२५॥ जुगलं ।

द्रव्यात्मको लोकः, लोकाद्बहिर्भागे शुद्धाकाशमलोकः, तच्च लोकालोकद्वयं स्वकीयस्वकीयानन्तपर्यायपरिणतिरूपेणानित्यमपि द्रव्यार्थिकनयेन नित्यम् । **तम्हा णाणं तु सव्वगयं** यस्मान्निश्चयरत्नत्रयात्मकशुद्धोपयोगभावनाबलेनोत्पन्नं यत्केवलज्ञानं तट्टङ्कोत्कीर्णाकारन्यायेन निरन्तरं पूर्वोक्तज्ञेयं जानाति, तस्माद्व्यवहारेण तु ज्ञानं सर्वगतं भण्यते । ततः स्थितमेतदात्मा ज्ञानप्रमाणं ज्ञानं सर्वगतमिति ॥२३॥

विभक्त समस्त वस्तुओंके आकारोंके पारको प्राप्त करके इसीप्रकार अच्युतरूप रहने से ज्ञान सर्वगत है ।

भावार्थ :– गुण-पर्यायोंसे द्रव्य अनन्य है इसलिये आत्मा ज्ञानसे हीनाधिक न होनेसे ज्ञान जितना ही है; और जैसे दाह्य (जलने योग्य पदार्थ) का अवलम्बन करनेवाला दहन दाह्यके बराबर ही है उसीप्रकार ज्ञेयका अवलम्बन करनेवाला ज्ञान ज्ञेयके बराबर ही है । ज्ञेय तो समस्त लोकालोक अर्थात् सब ही है । इसलिये, सर्व आवरणका क्षय होते ही (ज्ञान) सबको जानता है और फिर कभी भी सबके जाननेसे च्युत नहीं होता इसलिये ज्ञान सर्वव्यापक है ॥२३॥

अब, आत्माको ज्ञान प्रमाण न माननेमें दो पक्ष उपस्थित करके दोष बतलाते हैं :–

जीवद्रव्य ज्ञानप्रमाण नहि – अें मान्यता छे जेहने ।
तेना मते जीव ज्ञानथी हीन के अधिक अवश्य छे ॥२४॥
जो हीन आत्मा होय, नव जाणे अचेतन ज्ञान ए ।
ने अधिक ज्ञानथी होय तो वण ज्ञान क्यम जाणे अरे ॥२५॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

ज्ञानप्रमाणमात्मा न भवति यस्येह तस्य स आत्मा ।
हीनो वा अधिको वा ज्ञानाद्भवति ध्रुवमेव ॥२४॥
हीनो यदि स आत्मा तत् ज्ञानमचेतनं न जानाति ।
अधिको वा ज्ञानात् ज्ञानेन विना कथं जानाति ॥२५॥ युगलम् ।

यदि खल्वयमात्मा हीनो ज्ञानादित्यभ्युपगम्यते, तदात्मनोऽतिरिच्यमानं ज्ञानं स्वाश्रयभूतचेतनद्रव्यसमवायाभावादचेतनं भवद्रूपादिगुणकल्पतामापन्नं न जानाति । यदि

अथात्मानं ज्ञानप्रमाणं ये न मन्यन्ते तत्र हीनाधिकत्वे दूषणं ददाति – **णाणप्पमाणमादा ण हवदि जस्सेह** ज्ञानप्रमाणमात्मा न भवति यस्य वादिनो मतेऽत्र जगति **तस्स सो आदा** तस्य मते स आत्मा **हीणो वा अहिओ वा णाणादो हवदि धुवमेव** हीनो वा अधिको वा ज्ञानात्सकाशाद् भवति निश्चितमेवेति ॥ २४ ॥ **हीणो जदि सो आदा तं णाणमचेदणं ण जाणादि** हीनो यदि स आत्मा तदाग्नेरभावे सति उष्णगुणो यथा शीतलो भवति तथा स्वाश्रयभूतचेतनात्मकद्रव्यसमवायाभावात्त-

---

गाथा २४–२५

अन्वयार्थ :– [**इह**] इस जगतमें [**यस्य**] जिसके मतमें [**आत्मा**] आत्मा [**ज्ञानप्रमाणं**] ज्ञानप्रमाण [**न भवति**] नहीं है, [**तस्य**] उसके मतमें [**सः आत्मा**] वह आत्मा [**ध्रुवम् एव**] अवश्य [**ज्ञानात् हीनः वा**] ज्ञानसे हीन [**अधिकः वा भवति**] अथवा अधिक होना चाहिये ।

[**यदि**] यदि [**सः आत्मा**] वह आत्मा [**हीनः**] ज्ञानसे हीन हो [**तत्**] तो वह [**ज्ञानं**] ज्ञान [**अचेतनं**] अचेतन होनेसे [**न जानाति**] नहीं जानेगा, [**ज्ञानात् अधिकः वा**] और यदि (आत्मा) ज्ञानसे अधिक हो तो (वह आत्मा) [**ज्ञानेन विना**] ज्ञानके बिना [**कथं जानाति**] कैसे जानेगा ?

टीका :– यदि यह स्वीकार किया जाये कि यह आत्मा ज्ञानसे हीन है तो आत्मासे आगे बढ़ जानेवाला ज्ञान (आत्माके क्षेत्रसे आगे बढ़कर उससे बाहर व्याप्त होनेवाला ज्ञान) अपने आश्रयभूत चेतनद्रव्यका समवाय (सम्बन्ध) न रहनेसे अचेतन होता हुआ रूपादि गुण जैसा होनेसे नहीं जानेगा; और यदि ऐसा पक्ष स्वीकार किया जाये कि यह आत्मा ज्ञानसे अधिक है तो अवश्य (आत्मा) ज्ञानसे आगे बढ़ जानेसे (ज्ञानके क्षेत्रसे बाहर व्याप्त होनेसे) ज्ञानसे पृथक् होता हुआ घटपटादि जैसा होनेसे ज्ञानके बिना नहीं जानेगा । इसलिये यह आत्मा ज्ञानप्रमाण ही मानना योग्य है ।

Please inform us of any errors on rajesh@AtmaDharma.com

(१) उसका दृष्टके साथ (जगतमें जो दिखाई देता है–अनुभवमें आता है उसके साथ) अविरोध है। (जगतमें) दिखाई देता है कि छद्मस्थके भी, जैसे वर्तमान वस्तुका चिंतवन करते हुए ज्ञान उसके आकारका अवलम्बन करता है उसीप्रकार भूत और भविष्यत वस्तुका चिंतवन करते हुए (भी) ज्ञान उसके आकारका अवलम्बन करता है।

---

[1] ज्ञानमें समस्त द्रव्योंकी तीनोंकालकी पर्यायें एक ही साथ ज्ञात होने पर भी प्रत्येक पर्यायका विशिष्ट स्वरूप –प्रदेश, काल, आकार इत्यादि विशेषतायें – स्पष्ट ज्ञात होता है; संकर – व्यतिकर नहीं होते।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

एवावभासन्ते, तथा संविद्भित्तावपि। – किंच सर्वज्ञेयाकाराणां तादात्विकत्वाविरोधात्; यथा हि प्रध्वस्तानामनुदितानां च वस्तूनामालेख्याकारा वर्तमाना एव, तथातीतानामनागतानां च पर्यायाणां ज्ञेयाकारा वर्तमाना एव भवन्ति ॥३७॥

स्वकीयस्वकीयप्रदेशकालाकारविशेषैः संकरव्यतिकरपरिहारेणेत्यर्थः। **किंच** – यथा छद्मस्थपुरुषस्यातीतानागतपर्याया मनसि चिन्तयतः प्रतिस्फुरन्ति, यथा च चित्रभित्तौ बाहुबलिभरतादिव्यतिक्रान्तरूपाणि श्रेणिकतीर्थकरादिभाविरूपाणि च वर्तमानानीव प्रत्यक्षेण दृश्यन्ते तथा चित्रभित्तिस्थानीयकेवलज्ञाने भूतभाविनश्च पर्याया युगपत्प्रत्यक्षेण दृश्यन्ते, नास्ति विरोधः। यथायं केवली भगवान् परद्रव्यपर्यायान् परिच्छित्तिमात्रेण जानाति, न च तन्मयत्वेन, निश्चयेन तु केवलज्ञानादिगुणाधारभूतं स्वकीयसिद्धपर्यायमेव स्वसंवित्त्याकारेण तन्मयो भूत्वा परिच्छिनत्ति जानाति, तथासन्नभव्यजीवेनापि निजशुद्धात्मसम्यक्श्रद्धानज्ञानानुष्ठानरूपनिश्चयरत्नत्रयपर्याय एव सर्वतात्पर्येण ज्ञातव्य इति

---

(२) और ज्ञान चित्रपटके समान है। जैसे चित्रपटमें अतीत, अनागत और वर्तमान वस्तुओंके [१]आलेख्याकार साक्षात् एक क्षणमें ही भासित होते हैं; उसीप्रकार ज्ञानरूपी भित्तिमें (-ज्ञानभूमिकामें, ज्ञानपटमें) भी अतीत, अनागत और वर्तमान पर्यायोंके ज्ञेयाकार साक्षात् एक क्षणमें ही भासित होते हैं।

(३) और सर्व ज्ञेयाकारोंकी तात्कालिकता (वर्तमानता, साम्प्रतिकता) अविरुद्ध है। जैसे नष्ट और अनुत्पन्न वस्तुओंके आलेख्याकार वर्तमान ही हैं, उसीप्रकार अतीत और अनागत पर्यायोंके ज्ञेयाकार वर्तमान ही हैं।

भावार्थ :– केवलज्ञान समस्त द्रव्योंकी तीनों कालकी पर्यायोंको युगपद् जानता है। यहाँ यह प्रश्न हो सकता है कि ज्ञान नष्ट और अनुत्पन्न पर्यायोंको वर्तमान कालमें कैसे जान सकता है? उसका समाधान है कि – जगतमें भी देखा जाता है कि अल्पज्ञ जीवका ज्ञान भी नष्ट और अनुत्पन्न वस्तुओंका चिंतवन कर सकता है, अनुमानके द्वारा जान सकता है, तदाकार हो सकता है; तब फिर पूर्ण ज्ञान नष्ट और अनुत्पन्न पर्यायोंको क्यों न जान सकेगा? ज्ञानशक्ति ही ऐसी है कि वह चित्रपटकी भाँति अतीत और अनागत पर्यायोंको भी जान सकती है। और आलेख्यत्वशक्तिकी भाँति, द्रव्योंकी ज्ञेयत्व शक्ति ऐसी है कि उनकी अतीत और अनागत पर्यायें भी ज्ञानमें ज्ञेयरूप होती हैं –ज्ञात होती हैं। इसप्रकार आत्माकी अद्भुत ज्ञानशक्ति और द्रव्योंकी अद्भुत ज्ञेयत्वशक्तिके कारण केवलज्ञानमें समस्त द्रव्योंकी तीनोंकालकी पर्यायोंका एक ही समयमें भासित होना अविरुद्ध है ॥३७॥

---

[१] आलेख्य = आलेखन योग्य; चित्रित करने योग्य।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथासद्भूतपर्यायाणां कथंचित्सद्भूतत्वं विदधाति –

जे णेव हि संजाया जे खलु णट्ठा भवीय पज्जाया ।
ते होंति असब्भूदा पज्जाया णाणपच्चक्खा ॥३८॥

ये नैव हि संजाता ये खलु नष्टा भूत्वा पर्यायाः ।
ते भवन्ति असद्भूताः पर्याया ज्ञानप्रत्यक्षाः ॥३८॥

ये खलु नाद्यापि संभूतिमनुभवन्ति, ये चात्मलाभमनुभूय विलयमुपगतास्ते किलासद्भूता अपि परिच्छेदं प्रति नियतत्वात् ज्ञानप्रत्यक्षतामनुभवन्तः शिलास्तम्भोत्कीर्णभूतभाविदेववदप्रकम्पार्पितस्वरूपाः सद्भूता एव भवन्ति ॥३८॥

तात्पर्यम् ॥ ३७ ॥ अथातीतानागतपर्यायाणामसद्भूतसंज्ञा भवतीति प्रतिपादयति – **जे णेव हि संजाया जे खलु णट्ठा भवीय पज्जाया** ये नैव संजाता नाद्यापि भवन्ति, भाविन इत्यर्थः । हि स्फुटं ये च खलु नष्टा विनष्टाः पर्यायाः । किं कृत्वा । भूत्वा । **ते होंति असब्भूदा पज्जाया** ते पूर्वोक्ता भूता भाविनश्च पर्याया

अब, अविद्यमान पर्यायोंकी (भी) कथंचित् (-किसी प्रकारसे; किसी अपेक्षासे) विद्यमानता बतलाते हैं :–

गाथा ३८

अन्वयार्थ :– [**ये पर्यायाः**] जो पर्यायें [**हि**] वास्तवमें [**न एव संजाताः**] उत्पन्न नहीं हुई हैं, तथा [**ये**] जो पर्यायें [**खलु**] वास्तवमें [**भूत्वा नष्टाः**] उत्पन्न होकर नष्ट होगई हैं, [**ते**] वे [**असद्भूताः पर्यायाः**] अविद्यमान पर्यायें [**ज्ञानप्रत्यक्षाः भवन्ति**] ज्ञान प्रत्यक्ष हैं ।

टीका :– जो (पर्यायें) अभी तक भी उत्पन्न नहीं हुईं और जो उत्पन्न होकर नष्ट हो गई हैं, वे (पर्यायें) वास्तवमें अविद्यमान होने पर भी, ज्ञानके प्रति नियत होनेसे (ज्ञानमें निश्चित-स्थिर-लगी हुई होनेसे, ज्ञानमें सीधी ज्ञात होनेसे) [१]ज्ञानप्रत्यक्ष वर्तती हुई, पाषाण स्तम्भमें उत्कीर्ण, भूत और भावी देवों (तीर्थंकरदेवों) की भाँति

---

[१] प्रत्यक्ष=अक्षके प्रति – अक्षके सम्मुख – अक्षके निकटमें – अक्षके संबंधमें हो ऐसा । [अक्ष=ज्ञान; आत्मा ।]

जे पर्ययो अणजात छे, वली जन्मीने प्रविनष्ट जे ।
ते सौ असद्भूत पर्ययो पण ज्ञानमां प्रत्यक्ष छे ॥३८॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथैतदेवासद्भूतानां ज्ञानप्रत्यक्षत्वं दृढयति –

जदि पच्चक्खमजादं पज्जायं पलयिदं च णाणस्स ।
ण हवदि वा तं णाणं दिव्वं ति हि के परूवेंति ॥३९॥

यदि प्रत्यक्षोऽजातः पर्यायः प्रलयितश्च ज्ञानस्य ।
न भवति वा तत् ज्ञानं दिव्यमिति हि के प्ररूपयन्ति ॥३९॥

अविद्यमानत्वादसद्भूता भण्यन्ते । **णाणपच्चक्खा** ते चाविद्यमानत्वादसद्भूता अपि वर्तमानज्ञान-विषयत्वाद्व्यवहारेण भूतार्था भण्यन्ते, तथैव ज्ञानप्रत्यक्षाश्चेति । यथायं भगवान्निश्चयेन परमानन्दैक-लक्षणसुखस्वभावं मोक्षपर्यायमेव तन्मयत्वेन परिच्छिनत्ति, परद्रव्यपर्यायं तु व्यवहारेणेति; तथा भावितात्मना पुरुषेण रागादिविकल्पोपाधिरहितस्वसंवेदनपर्याय एव तात्पर्येण ज्ञातव्यः, बहिर्द्रव्य-पर्यायाश्च गौणवृत्त्येति भावार्थः ॥ ३८ ॥ अथासद्भूतपर्यायाणां वर्तमानज्ञानप्रत्यक्षत्वं दृढयति – **जइ पच्चक्खमजायं पज्जायं पलइयं च णाणस्स ण हवदि वा** यदि प्रत्यक्षो न भवति । स कः । अजातपर्यायो भाविपर्यायः । न केवलं भाविपर्यायः प्रलयितश्च वा । कस्य । ज्ञानस्य । **तं णाणं दिव्वं ति हि के परूवेति** तद्ज्ञानं दिव्यमिति के प्ररूपयन्ति, न केऽपीति । तथा हि – यदि वर्तमानपर्यायवदतीतानागतपर्यायं ज्ञानं कर्तृ क्रमकरणव्यवधानरहितत्वेन साक्षात्प्रत्यक्षं न करोति, तर्हि तत् ज्ञानं दिव्यं न भवति । वस्तु-

---

अपने स्वरूपको अकम्पतया (ज्ञानको) अर्पित करती हुई (वे पर्यायें) विद्यमान ही हैं ॥३८॥

अब, इन्हीं अविद्यमान पर्यायोंकी ज्ञानप्रत्यक्षताको दृढ़ करते हैं :–

गाथा ३९

अन्वयार्थ :– [**यदि वा**] यदि [**अजातः पर्यायः**] अनुत्पन्न पर्याय [**च**] तथा [**प्रलयितः**] नष्ट पर्याय [**ज्ञानस्य**] ज्ञानके (केवलज्ञानके) [**प्रत्यक्षः न भवति**] प्रत्यक्ष न हो तो [**तत् ज्ञानं**] उस ज्ञानको [**दिव्यं इति हि**] 'दिव्य' [**के प्ररूपयंति**] कौन प्ररूपेगा ?

टीका :– जिसने अस्तित्वका अनुभव नहीं किया और जिसने अस्तित्वका अनुभव कर लिया है ऐसी (अनुत्पन्न और नष्ट) पर्यायमात्रको यदि ज्ञान अपनी निर्विघ्न विकसित, अखंडित प्रतापयुक्त प्रभुशक्तिके (-महा सामर्थ्य) द्वारा बलात् अत्यन्त आक्रमित करे (-प्राप्त करे), तथा वे पर्यायें अपने स्वरूपसर्वस्वको अक्रमसे अर्पित करें (-एकही

ज्ञाने अजात-विनष्ट पर्यायो तणी प्रत्यक्षता ।
नव होय जो, तो ज्ञानने अे 'दिव्य' कोण कहे भला ? ॥३९॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यदि खल्वसंभावितभावं संभावितभावं च पर्यायजातमप्रतिघविजृम्भिताखण्डित-प्रतापप्रभुशक्तितया प्रसभेनैव नितान्तमाक्रम्याक्रमसमर्पितस्वरूपसर्वस्वमात्मानं प्रतिनियतं ज्ञानं न करोति, तदा तस्य कुतस्तनी दिव्यता स्यात् । अतः काष्ठाप्राप्तस्य परिच्छेदस्य सर्वमेतदुपपन्नम् ॥३९॥

अथेन्द्रियज्ञानस्यैव प्रलीनमनुत्पन्नं च ज्ञातुमशक्यमिति वितर्कयति –

अत्थं अक्खणिवदिदं ईहापुव्वेहिं जे विजाणंति ।
तेसिं परोक्खभूदं णादुमसक्कं ति पण्णत्तं ॥४०॥

अर्थमक्षनिपतितमीहापूर्वैर्ये विजानन्ति ।
तेषां परोक्षभूतं ज्ञातुमशक्यमिति प्रज्ञप्तम् ॥४०॥

तस्तु ज्ञानमेव न भवतीति। यथायं केवली परकीयद्रव्यपर्यायान् यद्यपि परिच्छित्तिमात्रेण जानाति, तथापि निश्चयनयेन सहजानन्दैकस्वभावे स्वशुद्धात्मनि तन्मयत्वेन परिच्छित्तिं करोति, तथा निर्मल-विवेकिजनोऽपि यद्यपि व्यवहारेण परकीयद्रव्यगुणपर्यायपरिज्ञानं करोति, तथापि निश्चयेन निर्विकारस्वसंवेदनपर्याये विषयत्वात्पर्यायेण परिज्ञानं करोतीति सूत्रतात्पर्यम् ॥ ३९ ॥ अथातीतानागत-

---

साथ ज्ञानमें ज्ञात हों) इसप्रकार उन्हें अपने प्रति नियत न करे (-अपनेमें निश्चित न करे, प्रत्यक्ष न जाने), तो उस ज्ञानकी दिव्यता क्या है ? इससे (यह कहा गया है कि) पराकाष्ठाको प्राप्त ज्ञानके लिये यह सब योग्य है ।

भावार्थ :– अनन्त महिमावान केवलज्ञानकी यह दिव्यता है कि वह अनन्त द्रव्योंकी समस्त पर्यायोंको (अतीत और अनागत पर्यायोंको भी) सम्पूर्णतया एक ही समय प्रत्यक्ष जानता है ॥३९॥

अब, इन्द्रियज्ञानके लिये नष्ट और अनुत्पन्नका जानना अशक्य है (अर्थात् इन्द्रियज्ञान ही नष्ट और अनुत्पन्न पदार्थोंको-पर्यायोंको नहीं जान सकता) ऐसा न्यायसे निश्चित करते हैं ।

गाथा ४०

अन्वयार्थ :– [ये] जो [अक्षनिपतितं] अक्षपतित अर्थात् इन्द्रियगोचर [अर्थं]

ईहादिपूर्वक जाणता जे अक्षपतित पदार्थ ने ।
तेने परोक्ष पदार्थ जाणवु शक्य ना–जिनजी कहे ॥४०॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

ये खलु विषयविषयिसन्निपातलक्षणमिन्द्रियार्थसन्निकर्षमधिगम्य क्रमोपजायमानेनेहादिकप्रक्रमेण परिच्छिन्दन्ति, ते किलातिवाहितस्वास्तित्वकालमनुपस्थितस्वास्तित्वकालं वा यथोदितलक्षणस्य ग्राह्यग्राहकसंबंधस्यासंभवतः परिच्छेत्तुं न शक्नुवन्ति ।।४०।।

सूक्ष्मादिपदार्थानिन्द्रियज्ञानं न जानातीति विचारयति – **अत्थं** घटपटादिज्ञेयपदार्थं। कथंभूतं। **अक्खणिवदिदं** अक्षनिपतितं इन्द्रियप्राप्तं इन्द्रियसंबद्धं। इत्थंभूतमर्थं **ईहापुव्वेहिं जे विजाणंति** अवग्रहेहावायादिक्रमेण ये पुरुषा विजानन्ति हि स्फुटं। **तेसिं परोक्खभूदं** तेषां सम्बन्धि ज्ञानं परोक्षभूतं सत् **णादुमसक्कं ति पण्णत्तं** सूक्ष्मादिपदार्थान् ज्ञातुमशक्यमिति प्रज्ञप्तं कथितम्। कैः। ज्ञानिभिरिति। तद्यथा–चक्षुरादीन्द्रियं घटपटादिपदार्थपार्श्वे गत्वा पश्चादर्थं जानातीति सन्निकर्षलक्षणं नैयायिकमते। अथवा संक्षेपेणेन्द्रियार्थयोः संबंधः सन्निकर्षः स एव प्रमाणम्। स च सन्निकर्ष आकाशाद्यमूर्तपदार्थेषु देशांतरितमेर्वादिपदार्थेषु कालान्तरितरामरावणादिषु स्वभावान्तरितभूतादिषु तथैवातिसूक्ष्मेषु परचेतोवृत्तिपुद्गलपरमाण्वादिषु च न प्रवर्तते। कस्मादिति चेत्। इन्द्रियाणां स्थूलविषयत्वात्, तथैव मूर्तविषयत्वाच्च। ततः कारणादिन्द्रियज्ञानेन सर्वज्ञो न भवति। तत एव चातीन्द्रियज्ञानोत्पत्तिकारणं रागादिविकल्परहितं स्वसंवेदनज्ञानं विहाय पञ्चेन्द्रियसुखसाधनभूतेन्द्रियज्ञाने नानामनोरथविकल्पजालरूपे मानसज्ञाने च ये रतिं कुर्वन्ति ते सर्वज्ञपदं न लभन्ते इति सूत्राभिप्रायः ।। ४० ।। अथातीन्द्रियज्ञानमतीतानागतसूक्ष्मादिपदार्थान्

पदार्थको [**ईहापूर्वैः**] ईहादिक द्वारा [**विजानन्ति**] जानते हैं, [**तेषां**] उनके लिये [**परोक्षभूतं**] [१]परोक्षभूत पदार्थको [**ज्ञातुं**] जानना [**अशक्यं**] अशक्य है [**इति प्रज्ञप्तं**] ऐसा सर्वज्ञदेवने कहा है।

टीका :– विषय और विषयीका [२]सन्निपात जिसका लक्षण (-स्वरूप) है, ऐसे इन्द्रिय और पदार्थके [३]सन्निकर्षको प्राप्त करके, जो अनुक्रमसे उत्पन्न ईहादिकके क्रमसे जानते हैं वे उसे नहीं जान सकते जिसका स्व-अस्तित्वकाल बीत गया है तथा जिसका स्व-अस्तित्वकाल उपस्थित नहीं हुआ है क्योंकि (अतीत-अनागत पदार्थ और इन्द्रियके) यथोक्त लक्षण (-यथोक्तस्वरूप, ऊपर कहा जैसा) [४]ग्राह्यग्राहकसम्बन्धका असंभव है।

भावार्थ :– इन्द्रियोंके साथ पदार्थका (अर्थात् विषयीके साथ विषयका) सन्निकर्ष-सम्बन्ध हो तभी (अवग्रह-ईहा-अवाय-धारणारूप क्रमसे) इन्द्रिय ज्ञान पदार्थको जान सकता है। नष्ट और अनुत्पन्न पदार्थोंके साथ इन्द्रियोंका सन्निकर्ष-सम्बन्ध न होनेसे इन्द्रिय ज्ञान उन्हें नहीं जान सकता। इसलिये इन्द्रियज्ञान हीन है, हेय है ।।४०।।

---

१ परोक्ष = अक्षसे पर अर्थात् अक्षसे दूर होवे ऐसा; इन्द्रिय अगोचर।

२ सन्निपात = मिलाप; संबंध होना वह। ३ सन्निकर्ष = संबंध, समीपता।

४ इंद्रियगोचर पदार्थ ग्राह्य है और इन्द्रियाँ ग्राहक हैं।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथातीन्द्रियज्ञानस्य तु यद्यदुच्यते तत्तत्संभवतीति संभावयति –

अपदेसं सपदेसं मुत्तममुत्तं च पज्जयमजादं ।
पलयं गदं च जाणदि तं णाणमदिंदियं भणियं ॥४१॥

अप्रदेशं सप्रदेशं मूर्तममूर्तं च पर्ययमजातम् ।
प्रलयं गतं च जानाति तज्ज्ञानमतीन्द्रियं भणितम् ॥४१॥

जानातीत्युपदिशति – **अपदेसं** अप्रदेशं कालाणुपरमाण्वादि **सपदेसं** शुद्धजीवास्तिकायादिपञ्चास्तिकाय-स्वरूपं **मुत्तं** मूर्तं पुद्गुलद्रव्यं **अमुत्तं च** अमूर्तं च शुद्धजीवद्रव्यादि **पज्जयमजादं पलयं गयं च** पर्यायमजातं भाविनं प्रलयं गतं चातीतमेतत्सर्वं पूर्वोक्तं ज्ञेयं वस्तु **जाणदि** जानाति यद्ज्ञानं कर्तृ **तं णाणमदिंदियं भणियं** तद्ज्ञानमतीन्द्रियं भणितं, तेनैव सर्वज्ञो भवति। तत एव च पूर्वगाथोदितमिन्द्रियज्ञानं

अब, ऐसा स्पष्ट करते हैं कि अतीन्द्रिय ज्ञानके लिये जो जो कहा जाता है वह (सब) संभव है :–

गाथा ४१

अन्वयार्थ :– [**अप्रदेशं**] जो ज्ञान अप्रदेशको, [**सप्रदेशं**] सप्रदेशको, [**मूर्तं**] मूर्तको, [**अमूर्तं च**] और अमूर्तको तथा [**अजातं**] अनुत्पन्न [**च**] और [**प्रलयं गतं**] नष्ट [**पर्यायं**] पर्यायको [**जानाति**] जानता है, [**तत् ज्ञानं**] वह ज्ञान [**अतीन्द्रियं**] अतीन्द्रिय [**भणितम्**] कहा गया है।

टीका :– इन्द्रियज्ञान उपदेश, अन्तःकरण और इन्द्रिय इत्यादिको [१]विरूप-कारणतासे (ग्रहणकरके) और उपलब्धि (-क्षयोपशम), संस्कार इत्यादिको अंतरङ्ग स्वरूप-कारणतासे ग्रहण करके प्रवृत्त होता है; और वह प्रवृत्त होता हुआ सप्रदेशको ही जानता है क्योंकि वह स्थूलको जाननेवाला है, अप्रदेशको नहीं जानता, (क्योंकि वह सूक्ष्मको जाननेवाला नहीं है]; वह मूर्तको ही जानता है क्योंकि वैसे (मूर्तिक) विषयके साथ उसका सम्बन्ध है, वह अमूर्तको नहीं जानता (क्योंकि अमूर्तिक विषयके साथ

---

[१] विरूप = ज्ञानके स्वरूपसे भिन्न स्वरूपवाले। (उपदेश, मन और इन्द्रियाँ पौद्गलिक होनेसे उनका रूप ज्ञानके स्वरूपसे भिन्न है। वे इन्द्रियज्ञानमें बहिरंग कारण हैं।)

जे जाणतु अप्रदेशने, सप्रदेश, मूर्त, अमूर्तने ।
पर्याय नष्ट-अजातने, भाख्युं अतींद्रिय ज्ञान ते ॥४१॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

इन्द्रियज्ञानं नाम उपदेशान्तःकरणेन्द्रियादीनि विरूपकारणत्वेनोपलब्धिसंस्कारादीन् अन्तरङ्गस्वरूपकारणत्वेनोपादाय प्रवर्तते; प्रवर्तमानं च सप्रदेशमेवाध्यवस्यति स्थूलोपलम्भकत्वान्नाप्रदेशम्; मूर्तमेवावगच्छति तथाविधविषयनिबन्धनसद्भावान्नामूर्तम्; वर्तमानमेव परिच्छिनत्ति विषयविषयिसन्निपातसद्भावान्न तु वृत्तं वर्त्स्यच्च। यत्तु पुनरनावरणमतीन्द्रियं ज्ञानं तस्य समिद्धधूमध्वजस्येवानेकप्रकारतालिङ्गितं दाह्यं दाह्यतानतिक्रमाद्दाह्यमेव यथा तथात्मनः अप्रदेशं सप्रदेशं मूर्तममूर्तमजातमतिवाहितं च पर्यायजातं ज्ञेयतानतिक्रमात्परिच्छेद्यमेव भवतीति ॥४१॥

अथ ज्ञेयार्थपरिणमनलक्षणा क्रिया ज्ञानान्न भवतीति श्रद्दधाति –

परिणमदि णेयमट्ठं णादा जदि णेव खाइगं तस्स।
णाणं ति तं जिणिंदा खवयंतं कम्ममेवुत्ता ॥ ४२ ॥

मानसज्ञानं च त्यक्त्वा ये निर्विकल्पसमाधिरूपस्वसंवेदनज्ञाने समस्तविभावपरिणामत्यागेन रतिं कुर्वन्ति त एव परमाह्लादैकलक्षणस्वभावं सर्वज्ञपदं लभन्ते इत्यभिप्रायः ॥ ४१ ॥ एवमतीतानागतपर्याया वर्तमानज्ञाने प्रत्यक्षा न भवन्तीति बौद्धमतनिराकरणमुख्यत्वेन गाथात्रयं, तदनन्तरमिन्द्रियज्ञानेन सर्वज्ञो न भवत्यतीन्द्रियज्ञानेन भवतीति नैयायिकमतानुसारिशिष्यसंबोधनार्थं च गाथाद्वयमिति समुदायेन पञ्चमस्थले गाथापञ्चकं गतम्। अथ रागद्वेषमोहाः बन्धकारणं, न च ज्ञानमित्यादि-

---

इन्द्रियज्ञानका सम्बन्ध नहीं है); वह वर्तमानको ही जानता है क्योंकि विषय-विषयीके सन्निपातका सद्भाव है, वह प्रवर्तित हो चुकनेवालेको और भविष्यमें प्रवृत्त होनेवालेको नहीं जानता (क्योंकि इन्द्रिय और पदार्थके सन्निकर्षका अभाव है)।

परन्तु जो अनावरण अतीन्द्रिय ज्ञान है उसे अपने अप्रदेश, सप्रदेश, मूर्त और अमूर्त (पदार्थ मात्र) तथा अनुत्पन्न एवं व्यतीत पर्यायमात्र, ज्ञेयताका अतिक्रमण न करनेसे ज्ञेय ही हैं – जैसे प्रज्वलित अग्निको अनेक प्रकारका ईंधन, दाह्यताका अतिक्रमण न करनेसे, दाह्य ही है। (जैसे प्रदीप्त अग्नि दाह्यमात्रको – ईंधनमात्रको-जला देती है, उसीप्रकार निरावरण ज्ञान ज्ञेयमात्रको – द्रव्यपर्यायमात्रको – जानता है) ॥ ४१ ॥

अब, ऐसी श्रद्धा व्यक्त करते हैं कि ज्ञेय पदार्थरूप परिणमन जिसका लक्षण है ऐसी (ज्ञेयार्थपरिणमनस्वरूप) क्रिया ज्ञानमेंसे उत्पन्न नहीं होती :–

जो ज्ञेय अर्थे परिणमे ज्ञाता, न क्षायिक ज्ञान छे।
ते कर्मने ज अनुभवे छे एम जिनदेवो कहे ॥ ४२ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

परिणमति ज्ञेयमर्थं ज्ञाता यदि नैव क्षायिकं तस्य ।
ज्ञानमिति तं जिनेन्द्राः क्षपयन्तं कर्मैवोक्तवन्तः ।। ४२ ।।

परिच्छेत्ता हि यत्परिच्छेद्यमर्थं परिणमति तन्न तस्य सकलकर्मकक्षक्षयप्रवृत्तस्वाभाविकपरिच्छेदनिदानमथवा ज्ञानमेव नास्ति तस्य; यतः प्रत्यर्थपरिणतिद्वारेण मृगतृष्णाम्भोभारसंभावनाकरणमानसः सुदुःसहं कर्मभारमेवोपभुञ्जानः स जिनेन्द्रैरुद्गीतः ।।४२।।

कथनरूपेण गाथापञ्चकपर्यन्तं व्याख्यानं करोति । तद्यथा – यस्येष्टानिष्टविकल्परूपेण कर्मबन्धकारणभूतेन ज्ञेयविषये परिणमनमस्ति तस्य क्षायिकज्ञानं नास्तीत्यावेदयति—**परिणमदि णेयमट्ठं णादा जदि** नीलमिदं पीतमिदमित्यादिविकल्परूपेण यदि ज्ञेयार्थं परिणमति ज्ञातात्मा **णेव खाइगं तस्स णाणं ति** तस्यात्मनः क्षायिकज्ञानं नैवास्ति । अथवा ज्ञानमेव नास्ति । कस्मान्नास्ति । **तं जिणिंदा खवयंतं कम्ममेवुत्ता** तं पुरुषं कर्मतापन्नं जिनेन्द्राः कर्तारः उक्तवन्तः । किं कुर्वन्तम् । क्षपयन्तमनुभवन्तम् । किमेव । कर्मैव । निर्विकारसहजानन्दैकसुखस्वभावानुभवनशून्यः सन्नुदयागतं स्वकीयकर्मैव स अनुभवन्नास्ते न च ज्ञानमित्यर्थः । अथवा द्वितीयव्याख्यानम् – यदि ज्ञाता प्रत्यर्थं परिणम्य पश्चादर्थं जानाति तदा अर्थानामानन्त्यात्सर्वपदार्थपरिज्ञानं नास्ति । अथवा तृतीयव्याख्यानम्–बहिरङ्गज्ञेयपदार्थान् यदा छद्मस्थावस्थायां चिन्तयति तदा रागादिविकल्परहितं स्वसंवेदनज्ञानं नास्ति, तदभावे क्षायिकज्ञानमेव नोत्पद्यते इत्यभिप्रायः ॥ ४२ ॥ अथानन्तपदार्थपरिच्छित्तिपरिणमनेऽपि ज्ञानं

गाथा ४२

अन्वयार्थ :–[**ज्ञाता**] ज्ञाता [**यदि**] यदि [**ज्ञेयं अर्थं**] ज्ञेय पदार्थरूप [**परिणमति**] परिणमित होता हो तो [**तस्य**] उसके [**क्षायिकं ज्ञानं**] क्षायिक ज्ञान [**न एव इति**] होता ही नहीं । [**जिनेन्द्राः**] जिनेन्द्रदेवोंने [**तं**] उसे [**कर्म एव**] कर्मको ही [**क्षपयन्तं**] अनुभव करनेवाला [**उक्तवन्तः**] कहा है ।

टीका :– यदि ज्ञाता ज्ञेय पदार्थरूप परिणमित होता हो, तो उसे सकल कर्मवनके क्षयसे प्रवर्तमान स्वाभाविक जानपनका कारण (क्षायिक ज्ञान) नहीं है; अथवा उसे ज्ञान ही नहीं है; क्योंकि प्रत्येक पदार्थरूपसे परिणतिके द्वारा मृगतृष्णामें जलसमूहकी कल्पना करनेकी भावनावाला वह (आत्मा) अत्यन्त दुःसह कर्मभारको ही भोगता है ऐसा जिनेन्द्रोंने कहा है ।

भावार्थ :– ज्ञेय पदार्थरूपसे परिणमन करना अर्थात् 'यह हरा है, यह पीला है' इत्यादि विकल्परूपसे ज्ञेय पदार्थोंमें परिणमन करना वह कर्मका भोगना है, ज्ञानका नहीं । निर्विकार सहज आनन्दमें लीन रहकर सहजरूपसे जानते रहना वही ज्ञानका स्वरूप है; ज्ञेय पदार्थोंमें रुकना – उनके सन्मुख वृत्ति होना, वह ज्ञानका स्वरूप नहीं है ।।४२।।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ कुतस्तर्हि ज्ञेयार्थपरिणमनलक्षणा क्रिया तत्फलं च भवतीति विवेचयति –

उदयगदा कम्मंसा जिणवरवसहेहिं णियदिणा भणिया ।
तेसु विमूढो रत्तो दुट्ठो वा बंधमणुभवदि ॥ ४३ ॥

उदयगताः कर्मांशा जिनवरवृषभैः नियत्या भणिताः ।
तेषु विमूढो रक्तो दुष्टो वा बन्धमनुभवति ॥ ४३ ॥

बन्धकारणं न भवति, न च रागादिरहितकर्मोदयोऽपीति निश्चिनोति – **उदयगदा कम्मंसा जिणवरवसहेहिं णियदिणा भणिया** उदयगता उदयं प्राप्ताः कर्मांशा ज्ञानावरणादिमूलोत्तरकर्मप्रकृतिभेदाः जिनवरवृषभैर्नियत्या स्वभावेन भणिताः, किंतु स्वकीयशुभाशुभफलं दत्वा गच्छन्ति, न च रागादिपरिणामरहिताः सन्तो बन्धं कुर्वन्ति । तर्हि कथं बन्धं करोति जीवः इति चेत् । **तेसु विमूढो**

(यदि ऐसा है) तो फिर ज्ञेय पदार्थरूप परिणमन जिसका लक्षण है ऐसी (ज्ञेयार्थपरिणमनस्वरूप) क्रिया और उसका फल कहाँसे (किस कारणसे) उत्पन्न होता है, ऐसा अब विवेचन करते हैं :–

गाथा ४३

अन्वयार्थ :– [**उदयगताः कर्मांशाः**] (संसारी जीवके) उदयप्राप्त कर्मांश (ज्ञानावरणीय आदि पुद्गलकर्मके भेद) [**नियत्या**] नियमसे [**जिनवरवृषभैः**] जिनवर वृषभोंने [**भणिताः**] कहे हैं । [**तेषु**] जीव उन कर्मांशोंके होने पर, [**विमूढः रक्तः दुष्टः वा**] मोही, रागी अथवा द्वेषी होता हुआ [**बन्धं अनुभवति**] बन्धका अनुभव करता है ।

टीका :– प्रथम तो, संसारीके नियमसे उदयगत पुद्गल कर्मांश होते ही हैं । अब वह संसारी, उन उदयगत कर्मांशोंके अस्तित्वमें, चेतते-जानते-अनुभव करते हुए, मोह-राग-द्वेषमें परिणत होनेसे ज्ञेय पदार्थोंमें परिणमन जिसका लक्षण है ऐसी (ज्ञेयार्थ-परिणमनस्वरूप) क्रियाके साथ युक्त होता है; और इसीलिये क्रियाके फलभूत बन्धका अनुभव करता है । इससे (ऐसा कहा है कि) मोहके उदयसे ही (मोहके उदयमें युक्त होनेके कारणसे ही) क्रिया और क्रियाफल होता है, ज्ञानसे नहीं ।

भाख्यां जिने कर्मो उदयगत नियमथी संसारीने ।
ते कर्म होतां मोही-रागी-द्वेषी बंध अनुभवे ॥ ४३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

ससारिणो हि नियमेन तावदुदयगताः पुद्गलकर्मांशाः सन्त्येव। अथ स सत्सु तेषु संचेतयमानो मोहरागद्वेषपरिणतत्वात् ज्ञेयार्थपरिणमनलक्षणया क्रियया युज्यते। तत एव च क्रियाफलभूतं बन्धमनुभवति। अतो मोहोदयात् क्रियाक्रियाफले, न तु ज्ञानात् ॥ ४३ ॥

अथ केवलिनां क्रियापि क्रियाफलं न साधयतीत्यनुशास्ति –

ठाणणिसेज्जविहारा धम्मुवदेसो य णियदयो तेसिं।
अरहंताणं काले मायाचारो व्व इत्थीणं ॥ ४४ ॥

स्थाननिषद्याविहारा धर्मोपदेशश्च नियतयस्तेषाम्।
अर्हतां काले मायाचार इव स्त्रीणाम् ॥ ४४ ॥

रत्तो दुट्ठो वा बन्धमणुभवदि तेषु उदयागतेषु सत्सु कर्मांशेषु मोहरागद्वेषविलक्षणनिजशुद्धात्मतत्त्व-भावनारहितः सन् यो विशेषेण मूढो रक्तो दुष्टो वा भवति सः केवलज्ञानाद्यनन्तगुणव्यक्तिलक्षण-मोक्षाद्विलक्षणं प्रकृतिस्थित्यनुभागप्रदेशभेदभिन्नं बन्धमनुभवति। ततः स्थितमेतत् ज्ञानं बन्धकारणं न भवति कर्मोदयोऽपि, किंतु रागादयो बन्धकारणमिति ॥ ४३ ॥ अथ केवलिनां रागाद्यभावाद्धर्मो-

---

भावार्थ :– समस्त संसारी जीवोंके कर्मका उदय है, परन्तु वह उदय बन्धका कारण नहीं है। यदि कर्मनिमित्तक इष्ट-अनिष्ट भावोंमें जीव रागी-द्वेषी-मोही होकर परिणमन करे तो बन्ध होता है। इससे यह बात सिद्ध हुई कि ज्ञान, उदयप्राप्त पौद्गलिक कर्म या कर्मोदयसे उत्पन्न देहादिकी क्रियाएं बन्धका कारण नहीं हैं, बन्धके कारण मात्र राग-द्वेष-मोहभाव हैं। इसलिये वे भाव सर्वप्रकारसे त्यागने योग्य हैं ॥४३॥

अब, ऐसा उपदेश देते हैं कि केवलीभगवानके क्रिया भी क्रियाफल (-बन्ध) उत्पन्न नहीं करती :–

गाथा ४४

अन्वयार्थ :– [**तेषाम् अर्हतां**] उन अरहन्त भगवन्तोंके [**काले**] उस समय [**स्थाननिषद्याविहाराः**] खड़े रहना, बैठना, विहार [**धर्मोपदेशः च**] और धर्मोपदेश- [**स्त्रीणां मायाचारः इव**] स्त्रियोंके मायाचारकी भाँति, [**नियतयः**] स्वाभाविक ही – प्रयत्न बिना ही – होता है।

धर्मोपदेश, विहार, आसन, स्थान श्री अर्हंतने।
वर्ते सहज ते कालमां, मायाचरण ज्यम नारीने ॥ ४४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यथा हि महिलानां प्रयत्नमन्तरेणापि तथाविधयोग्यतासद्भावात् स्वभावभूत एव मायोपगुण्ठनागुण्ठितो व्यवहारः प्रवर्तते, तथा हि केवलिनां प्रयत्नमन्तरेणापि तथाविध-योग्यतासद्भावात् स्थानमासनं विहरणं धर्मदेशना च स्वभावभूता एव प्रवर्तन्ते। अपि चाविरुद्धमेतदम्भोधरदृष्टान्तात्। यथा खल्वम्भोधराकारपरिणतानां पुद्गलानां गमनमव-स्थानं गर्जनमम्बुवर्षं च पुरुषप्रयत्नमन्तरेणापि दृश्यन्ते, तथा केवलिनां स्थानादयोऽबुद्धि-पूर्वका एव दृश्यन्ते। अतोऽमी स्थानादयो मोहोदयपूर्वकत्वाभावात् क्रियाविशेषा अपि केवलिनां क्रियाफलभूतबन्धसाधनानि न भवन्ति ॥ ४४ ॥

पदेशादयोऽपि बन्धकारणं न भवन्तीति कथयति – **ठाणणिसेज्जविहारा धम्मुवदेसो य** स्थान-मूर्ध्वस्थितिर्निषद्या चासनं श्रीविहारो धर्मोपदेशश्च **णियदयो** एते व्यापारा नियतयः स्वभावा अनीहिताः। केषाम्। **तेसिं अरहंताणं** तेषामर्हतां निर्दोषिपरमात्मनाम्। क्व। **काले** अर्हदवस्थायाम्। क इव। **मायाचारो व्व इत्थीणं** मायाचार इव स्त्रीणामिति। तथा हि – यथा स्त्रीणां स्त्रीवेदोदयसद्भावात्प्रयत्नाभावेऽपि मायाचारः प्रवर्तते, तथा भगवतां शुद्धात्म-तत्त्वप्रतिपक्षभूतमोहोदयकार्येहापूर्वप्रयत्नाभावेऽपि श्रीविहारादयः प्रवर्तते। मेघानां स्थानगमनगर्जन-जलवर्षणादिवद्वा। ततः स्थितमेतत् मोहाद्यभावात् क्रियाविशेषा अपि बन्धकारणं न भवन्तीति

टीका :– जैसे स्त्रियोंके, प्रयत्नके बिना भी, उस प्रकारकी योग्यताका सद्भाव होनेसे स्वभावभूत ही मायाके ढक्कनसे ढँका हुआ व्यवहार प्रवर्तता है, उसीप्रकार केवलीभगवानके, प्रयत्नके बिना ही (– प्रयत्न न होनेपर भी) उस प्रकारकी योग्यताका सद्भाव होनेसे खड़े रहना, बैठना, विहार और धर्मदेशना स्वभावभूत ही प्रवर्तते हैं। और यह (प्रयत्नके बिना ही विहारादिका होना), बादलके दृष्टान्तसे अविरुद्ध है। जैसे बादलके आकाररूप परिणमित पुद्गलोंका गमन, स्थिरता, गर्जन और जलवृष्टि पुरुष-प्रयत्नके बिना भी देखी जाती है, उसीप्रकार केवलीभगवानके खड़े रहना इत्यादि अबुद्धिपूर्वक ही (इच्छाके बिना ही) देखा जाता है। इसलिये यह स्थानादिक (खड़े रहने-बैठने इत्यादिका व्यापार), मोहोदयपूर्वक न होनेसे, क्रियाविशेष (क्रियाके प्रकार) होने पर भी केवलीभगवानके क्रियाफलभूत बन्धके साधन नहीं होते।

भावार्थ :– केवली भगवानके स्थान, आसन और बिहार, यह काययोगसम्बन्धी क्रियाएं तथा दिव्यध्वनिसे निश्चय-व्यवहारस्वरूप धर्मका उपदेश–वचनयोग सम्बन्धी क्रिया-अघातिकर्मके निमित्तसे सहज ही होती है। उसमें केवली भगवानकी किंचित्मात्र इच्छा नहीं होती, क्योंकि जहाँ मोहनीय-कर्मका सर्वथा क्षय होगया है वहाँ उसकी कार्य-भूत इच्छा कहाँसे होगी ? इसप्रकार इच्छाके बिना ही – मोह-राग-द्वेषके बिना ही – होनेसे केवली-भगवानके लिये वे क्रियाएं बन्धका कारण नहीं होतीं ॥ ४४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथैवं सति तीर्थकृतां पुण्यविपाकोऽकिंचित्कर एवेत्यवधारयति –

पुण्णफला अरहंता तेसिं किरिया पुणो हि ओदइया ।
मोहादीहिं विरहिदा तम्हा सा खाइग त्ति मदा ॥ ४५ ॥

पुण्यफला अर्हन्तस्तेषां क्रिया पुनर्हि औदयिकी ।
मोहादिभिः विरहिता तस्मात् सा क्षायिकीति मता ॥ ४५ ॥

॥ ४४ ॥ अथ पूर्वं यदुक्तं रागादिरहितकर्मोदयो बन्धकारणं न भवति विहारादिक्रिया च, तमेवार्थं प्रकारान्तरेण दृढयति – **पुण्णफला अरहंता** पञ्चमहाकल्याणपूजाजनकं त्रैलोक्यविजयकरं यत्तीर्थकरनाम पुण्यकर्म तत्फलभूता अर्हन्तो भवन्ति । **तेसिं किरिया पुणो हि ओदइया** तेषां या दिव्यध्वनिरूपवचनव्यापारादिक्रिया सा निःक्रियशुद्धात्मतत्त्वविपरीतकर्मोदयजनितत्वात्सर्वाप्यौदयिकी भवति हि स्फुटम् । **मोहादीहिं विरहिया** निर्मोहशुद्धात्मतत्त्वप्रच्छादकममकाराहङ्कारोत्पादनसमर्थमोहादिविरहितत्वाद्यतः **तम्हा सा खायग त्ति मदा** तस्मात् सा यद्यप्यौदयिकी तथापि निर्विकारशुद्धात्मतत्त्वस्य

इसप्रकार होनेसे तीर्थंकरोंके पुण्यका विपाक अकिंचित्कर ही है (-कुछ करता नहीं है, स्वभावका किंचित् घात नहीं करता) ऐसा अब निश्चित करते हैं :–

गाथा ४५

अन्वयार्थ :– [**अर्हन्तः**] अरहन्त भगवान [**पुण्यफलाः**] पुण्यफलवाले हैं [**पुनः हि**] और [**तेषां क्रिया**] उनकी क्रिया [**औदयिकी**] औदयिकी है; [**मोहादिभिः विरहिता**] मोहादिसे रहित है [**तस्मात्**] इसलिये [**सा**] वह [**क्षायिकी**] क्षायिकी [**इति मता**] मानी गई है ।

टीका :– अरहन्तभगवान जिनके वास्तवमें पुण्यरूपी कल्पवृक्षके समस्त फल भलीभाँति परिपक्व हुए हैं ऐसे ही हैं, और उनकी जो भी क्रिया है वह सब उसके (-पुण्यके) उदयके प्रभावसे उत्पन्न होनेके कारण औदयिकी ही है । किन्तु ऐसी (पुण्यके उदयसे होनेवाली) होने पर भी वह सदा औदयिकी क्रिया महामोहराजाकी समस्त सेनाके सर्वथा क्षयसे उत्पन्न होती है इसलिये मोहरागद्वेषरूपी [१]उपरंजकोंका

---

[१] उपरंजकों = उपराग-मलिनता करनेवाले (विकारी भाव) ।

छे पुण्यफल अर्हंत, ने अर्हंतकिरिया उदयिकी ।
मोहादिथी विरहित तेथी ते क्रिया क्षायिक गणी ॥ ४५ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अर्हन्तः खलु सकलसम्यक्परिपक्वपुण्यकल्पपादपफला एव भवन्ति। क्रिया तु तेषां या काचन सा सर्वापि तदुदयानुभावसंभावितात्मसंभूतितया किलौदयिक्येव। अथैवंभूतापि सा समस्तमहामोहमूर्धाभिषिक्तस्कन्धावारस्यात्यन्तक्षये संभूतत्वान्मोहरागद्वेषरूपाणामुपरञ्जकानामभावाच्चैतन्यविकारकारणतामनासादयन्ती नित्यमौदयिकी कार्यभूतस्य बन्धस्याकारणभूततया कार्यभूतस्य मोक्षस्य कारणभूततया च क्षायिक्येव कथं हि नाम नानुमन्येत। अथानुमन्येत चेत्तर्हि कर्मविपाकोऽपि न तेषां स्वभावविघाताय ॥ ४५ ॥

अथ केवलिनामिव सर्वेषामपि स्वभावविघाताभावं निषेधयति—

विक्रियामकुर्वती सती क्षायिकीति मता। अत्राह शिष्यः—'औदयिका भावाः बन्धकारणम्' इत्यागमवचनं तर्हि वृथा भवति। परिहारमाह—औदयिका भावा बन्धकारणं भवन्ति, परं किंतु मोहोदयसहिताः। द्रव्यमोहोदयेऽपि सति यदि शुद्धात्मभावनाबलेन भावमोहेन न परिणमति तदा बंधो न भवति। यदि पुनः कर्मोदयमात्रेण बन्धो भवति तर्हि संसारिणां सर्वदैव कर्मोदयस्य विद्यमानत्वात् सर्वदैव बन्ध एव, न मोक्ष इत्यभिप्रायः ॥ ४५ ॥ अथ यथार्हतां शुभाशुभपरिणामविकारो नास्ति

अभाव होनेसे चैतन्यके विकारका कारण नहीं होती इसलिये कार्यभूत बन्धकी अकारणभूततासे और कार्यभूत मोक्षकी कारणभूततासे क्षायिकी ही क्यों न माननी चाहिये? (अवश्य माननी चाहिये) और जब क्षायिकी ही माने तब कर्मविपाक (-कर्मोदय) भी उनके (अरहन्तोंके) स्वभावविघातका कारण नहीं होता (ऐसा निश्चित होता है)।

भावार्थ :— अरहन्त भगवानके जो दिव्यध्वनि, विहार आदि क्रियाएँ हैं वे निष्क्रिय शुद्ध आत्मतत्त्वके प्रदेशपरिस्पंदमें निमित्तभूत पूर्वबद्ध कर्मोदयसे उत्पन्न होती हैं इसलिये औदयिकी हैं। वे क्रियाएँ अरहन्त भगवानके चैतन्यविकाररूप भावकर्म उत्पन्न नहीं करतीं, क्योंकि (उनके) निर्मोह शुद्ध आत्मतत्त्वके रागद्वेषमोहरूप विकारमें निमित्तभूत मोहनीयकर्मका क्षय हो चुका है। और वे क्रियाएँ उन्हें, रागद्वेषमोहका अभाव होजानेसे नवीन बन्धमें कारणरूप नहीं होतीं, परन्तु वे पूर्वकर्मोंके क्षयमें कारणरूप हैं क्योंकि जिन कर्मोंके उदयसे वे क्रियाएं होती हैं वे कर्म अपना रस देकर खिर जाते हैं। इसप्रकार मोहनीयकर्मके क्षयसे उत्पन्न होनेसे और कर्मोंके क्षयमें कारणभूत होनेसे अरहंत भगवानकी वह औदयिकी क्रिया क्षायिकी कहलाती है ॥ ४५ ॥

अब, केवलीभगवानकी भाँति समस्त जीवोंके स्वभावविघातका अभाव होनेका निषेध करते हैं :—

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

जदि सो सुहो व असुहो ण हवदि आदा सयं सहावेण ।
संसारो वि ण विज्जदि सव्वेसिं जीवकायाणं ॥ ४६ ॥

यदि स शुभो वा अशुभो न भवति आत्मा स्वयं स्वभावेन ।
संसारोऽपि न विद्यते सर्वेषां जीवकायानाम् ॥ ४६ ॥

तथैकान्तेन संसारिणामपि नास्तीति सांख्यमतानुसारिशिष्येण पूर्वपक्षे कृते सति दूषणद्वारेण परिहारं ददाति – **जदि सो सुहो व असुहो ण हवदि आदा सयं सहावेण** यथैव शुद्धनयेनात्मा शुभाशुभाभ्यां न परिणमति तथैवाशुद्धनयेनापि स्वयं स्वकीयोपादानकारणेन स्वभावेनाशुद्धनिश्चयरूपेणापि यदि न परिणमति तदा । किं दूषणं भवति । **संसारो वि ण विज्जदि** निस्संसारशुद्धात्मस्वरूपात्प्रतिपक्षभूतो व्यवहारनयेनापि संसारो न विद्यते । केषाम् । **सव्वेसिं जीवकायाणं** सर्वेषां जीव-

---

गाथा ४६

अन्वयार्थ :– [**यदि**] यदि (ऐसा माना जाये कि) [**सः आत्मा**] आत्मा [**स्वयं**] स्वयं [**स्वभावेन**] स्वभावसे (-अपने भावसे) [**शुभः वा अशुभः**] शुभ या अशुभ [**न भवति**] नहीं होता (शुभाशुभ भावमें परिणमित ही नहीं होता) [**सर्वेषां जीवकायानां**] तो समस्त जीवनिकायोंके [**संसारः अपि**] संसार भी [**न विद्यते**] विद्यमान नहीं है ऐसा सिद्ध होगा ।

टीका :– यदि एकान्तसे ऐसा माना जाये कि शुभाशुभभावरूप स्वभावमें (-अपने भावमें) आत्मा स्वयं परिणमित नहीं होता, तो यह सिद्ध हुआ कि (वह) सदा ही सर्वथा निर्विघात शुद्धस्वभावसे ही अवस्थित है; और इसप्रकार समस्त जीवसमूह, समस्त बन्धकारणोंसे रहित सिद्ध होनेसे संसार अभावरूप स्वभावके कारण नित्यमुक्तताको प्राप्त हो जायेंगे अर्थात् नित्यमुक्त सिद्ध होवेंगे ! किन्तु ऐसा स्वीकार नहीं किया जा सकता; क्योंकि आत्मा परिणामधर्मवाला होनेसे, जैसे स्फटिकमणि, जवाकुसुम और तमालपुष्पके रंग-रूप स्वभावयुक्ततासे प्रकाशित होता है उसीप्रकार, उसे (आत्माके) शुभाशुभ-स्वभाव-युक्तता प्रकाशित होती है । (जैसे स्फटिकमणि लाल और काले फूलके निमित्तसे लाल और काले स्वभावमें परिणमित दिखाई देता है उसीप्रकार आत्मा कर्मोपाधिके निमित्तसे शुभाशुभ स्वभावरूप परिणमित होता हुआ दिखाई देता है) ।

आत्मा स्वयं निजभावथी जो शुभ अशुभ बने नहि ।
तो सर्व जीवनिकायने संसार पण वर्ते नहि ? ॥ ४६ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यदि खल्वेकान्तेन शुभाशुभभावस्वभावेन स्वयमात्मा न परिणमते तदा सर्वदैव सर्वथा निर्विघातेन शुद्धस्वभावेनैवावतिष्ठते। तथा च सर्व एव भूतग्रामाः समस्तबन्धसाधनशून्यत्वादाजवंजवाभावस्वभावतो नित्यमुक्ततां प्रतिपद्येरन्। तच्च नाभ्युपगम्यते; आत्मनः परिणामधर्मत्वेन स्फटिकस्य जपातापिच्छरागस्वभावत्ववत् शुभाशुभस्वभावत्वद्योतनात् ॥ ४६ ॥

अथ पुनरपि प्रकृतमनुसृत्यातीन्द्रियज्ञानं सर्वज्ञत्वेनाभिनन्दति –

जं तक्कालियमिदरं जाणदि जुगवं समंतदो सव्वं।
अत्थं विचित्तविसमं तं णाणं खाइयं भणियं ॥ ४७ ॥

यत्तात्कालिकमितरं जानाति युगपत्समन्ततः सर्वम्।
अर्थं विचित्रविषमं तत् ज्ञानं क्षायिकं भणितम् ॥ ४७ ॥

संघातानामिति। तथा हि – आत्मा तावत्परिणामी, स च कर्मोपाधिनिमित्ते सति स्फटिकमणिरिवोपाधिं गृह्णाति, ततः कारणात्संसाराभावो न भवति। अथ मतम् – संसाराभावः सांख्यानां दूषणं न भवति, भूषणमेव। नैवम्। संसाराभावो हि मोक्षो भण्यते, स च संसारिजीवानां न दृश्यते, प्रत्यक्षविरोधादिति भावार्थः ॥ ४६ ॥ एवं रागादयो बन्धकारणं, न च ज्ञानमित्यादिव्याख्यानमुख्यत्वेन षष्ठस्थले गाथापञ्चकं गतम्। अथ प्रथमं तावत् केवलज्ञानमेव सर्वज्ञस्वरूपं, तदनन्तरं सर्वपरिज्ञाने सति एकपरिज्ञानं, एकपरिज्ञाने सति सर्वपरिज्ञानमित्यादिकथनरूपेण गाथापञ्चकपर्यन्तं व्याख्यानं

भावार्थ :– जैसे शुद्धनयसे कोई जीव शुभाशुभ भावरूप परिणमित नहीं होता उसीप्रकार यदि अशुद्धनयसे भी परिणमित न होता हो तो व्यवहारनयसे भी समस्त जीवोंके संसारका अभाव होजाये और सभी जीव सदा मुक्त ही सिद्ध होजावें ! किन्तु यह तो प्रत्यक्ष विरुद्ध है। इसलिये जैसे केवलीभगवानके शुभाशुभ परिणामोंका अभाव है उसीप्रकार सभी जीवोंके सर्वथा शुभाशुभ परिणामोंका अभाव नहीं समझना चाहिये ॥ ४६ ॥

अब, पुनः प्रकृत का (चालू विषय का) अनुसरण करके अतीन्द्रिय ज्ञानको सर्वज्ञरूपसे अभिनन्दन करते हैं। (अर्थात् अतीन्द्रिय ज्ञान सबका ज्ञाता है ऐसी उसकी प्रशंसा करते हैं) :–

सौ वर्तमान अवर्तमान, विचित्र विषम पदार्थ ने।
युगपत् सरवतः जाणतुं ते ज्ञान क्षायिक जिन कहे ॥ ४७ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

तत्कालकलितवृत्तिकमतीतोदर्ककालकलितवृत्तिकं चाप्येकपद एव समन्ततोऽपि सकलमप्यर्थजातं, पृथक्त्ववृत्तस्वलक्षणलक्ष्मीकटाक्षितानेकप्रकारव्यञ्जितवैचित्र्यमितरेतर-विरोधधापितासमानजातीयत्वोद्दामितवैषम्यं क्षायिकं ज्ञानं किल जानीयात्; तस्य हि

करोति। तद्यथा – अत्र ज्ञानप्रपञ्चव्याख्यानं प्रकृतं तावत्तत्प्रस्तुतमनुसृत्य पुनरपि केवलज्ञानं सर्वज्ञत्वेन निरूपयति – **जं** यज्ज्ञानं कर्तृ **जाणदि** जानाति। कम्। **अत्थं** अर्थं पदार्थमिति विशेष्यपदम्। किं-विशिष्टम्। **तक्कालियमिदरं** तात्कालिकं वर्तमानमितरं चातीतानागतम्। कथं जानाति। **जुगवं** युग-पदेकसमये **समंतदो** समन्ततः सर्वात्मप्रदेशैः सर्वप्रकारेण वा। कतिसंख्योपेतम्। **सव्वं** समस्तम्। पुनरपि किंविशिष्टम्। **विचित्तं** नानाभेदभिन्नम्। पुनरपि किंरूपम्। **विसमं** मूर्तामूर्तचेतनाचेतनादि-जात्यन्तरविशेषैर्विसदृशं। **तं णाणं खाइयं भणियं** यदेवंगुणविशिष्टं ज्ञानं तत्क्षायिकं भणितम्।

गाथा ४७

अन्वयार्थ :– [**यत्**] जो [**युगपद्**] एकही साथ [**समन्ततः**] सर्वतः (सर्वआत्म-प्रदेशोंसे) [**तात्कालिकं**] तात्कालिक [**इतरं**] या अतात्कालिक, [**विचित्रविषमं**] विचित्र (-अनेक प्रकारके) और विषम (मूर्त, अमूर्त आदि असमान जातिके) [**सर्वं अर्थं**] समस्त पदार्थोंको [**जानाति**] जानता है [**तत् ज्ञानं**] उस ज्ञानको [**क्षायिकं भणितम्**] क्षायिक कहा है।

टीका :– क्षायिक ज्ञान वास्तवमें एक समयमें ही सर्वतः (सर्व आत्मप्रदेशोंसे), वर्तमानमें वर्तते तथा भूत-भविष्यत कालमें वर्तते उन समस्त पदार्थोंको जानता है जिनमें [1]पृथक्रूपसे वर्तते स्वलक्षणरूप लक्ष्मीसे आलोकित अनेक प्रकारोंके कारण वैचित्र्य प्रगट हुआ है और जिनमें परस्पर विरोधसे उत्पन्न होनेवाली असमानजातीयता-के कारण वैषम्य प्रगट हुआ है। (इसी बातको युक्तिपूर्वक समझाते हैं :–) क्रम-प्रवृत्तिके हेतुभूत, क्षयोपशम-अवस्थामें रहनेवाले ज्ञानावरणीय कर्मपुद्गलोंका उसके (क्षायिक ज्ञानके) अत्यन्त अभाव होनेसे वह तात्कालिक या अतात्कालिक पदार्थ-मात्रको समकाल-में ही प्रकाशित करता है; (क्षायिक ज्ञान) सर्वतः विशुद्ध होनेके कारण प्रतिनियत प्रदेशोंकी विशुद्धि (सर्वतः विशुद्धि) के भीतर डूब जानेसे वह सर्वतः (सर्व आत्म-प्रदेशोंसे) भी प्रकाशित करता है; सर्व आवरणोंका क्षय होनेसे, देश-आवरणका क्षयोपशम न रहनेसे वह सबको भी प्रकाशित करता है, सर्वप्रकार ज्ञानावरणके क्षयके कारण (-सर्व प्रकारके पदार्थोंको जाननेवाले ज्ञानके आवरणमें निमित्तभूत कर्मके क्षय होनेसे)

---

[1] द्रव्योंके भिन्न-भिन्न वर्तनेवाले निज-निज लक्षण उन द्रव्योंकी लक्ष्मी-सम्पत्ति-शोभा हैं।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

क्रमप्रवृत्तिहेतुभूतानां क्षयोपशमावस्थावस्थितज्ञानावरणीयकर्मपुद्गलानामत्यन्ताभावात्तात्कालिकमतात्कालिकं वाप्यर्थजातं तुल्यकालमेव प्रकाशेत; सर्वतो विशुद्धस्य प्रतिनियतदेशविशुद्धेरन्तःप्लवनात् समन्ततोऽपि प्रकाशेत; सर्वावरणक्षयाद्देशावरणक्षयोपशमस्यानवस्थानात्सर्वमपि प्रकाशेत; [सर्वप्रकारज्ञानावरणीयक्षयादसर्वप्रकारज्ञानावरणीयक्षयोपशमस्य विलयनाद्विचित्रमपि प्रकाशेत;] असमानजातीयज्ञानावरणक्षयात्समानजातीयज्ञानावरणीयक्षयोपशमस्य विनाशनाद्विषममपि प्रकाशेत। अलमथवातिविस्तरेण, अनिवारितप्रसरप्रकाशशालितया क्षायिकज्ञानमवश्यमेव सर्वदा सर्वत्र सर्वथा सर्वमेव जानीयात् ॥ ४७ ॥

अभेदनयेन तदेव सर्वज्ञस्वरूपं तदेवोपादेयभूतानन्तसुखाद्यनन्तगुणानामाधारभूतं सर्वप्रकारोपादेयरूपेण भावनीयम्। इति तात्पर्यम् ॥ ४७ ॥ अथ यः सर्वं न जानाति स एकमपि न जानातीति विचारयति—

असर्वप्रकारके ज्ञानावरणका क्षयोपशम (-अमुक ही प्रकारके पदार्थोंको जाननेवाले ज्ञानके आवरणमें निमित्तभूत कर्मोंका क्षयोपशम) विलयको प्राप्त होनेसे वह विचित्र को भी (अनेक प्रकारके पदार्थोंको भी) प्रकाशित करता है; असमानजातीय-ज्ञानावरणके क्षयके कारण (असमानजातिके पदार्थोंको जाननेवाले ज्ञानके आवरणमें निमित्तभूत कर्मोंके क्षयके कारण) समानजातीय ज्ञानावरणका क्षयोपशम (-समान जातिके ही पदार्थोंको जाननेवाले ज्ञानके आवरणमें निमित्तभूत कर्मोंका क्षयोपशम) नष्ट होजानेसे वह विषम को भी (-असमानजातिके पदार्थोंको भी) प्रकाशित करता है। अथवा, अतिविस्तारसे पूरा पड़े (कुछ लाभ नहीं) ? जिसका अनिवार (रोका न जा सके ऐसा अमर्यादित) फैलाव है ऐसा प्रकाशमान होनेसे क्षायिक ज्ञान अवश्यमेव सर्वदा सर्वत्र सर्वथा सर्वको जानता है।

भावार्थ :— क्रमपूर्वक जानना, नियत आत्मप्रदेशोंसे ही जानना, अमुकको ही जानना — इत्यादि मर्यादायें मति — श्रुतादि क्षायोपशमिक ज्ञानमें ही सभव हैं। क्षायिक-ज्ञानके अमर्यादित होनेसे एक ही साथ सर्व आत्मप्रदेशोंसे तीनों कालकी पर्यायोंके साथ सर्व पदार्थोंको — उन पदार्थोंके अनेक प्रकारके और विरुद्ध जातिके होने पर भी जानता है अर्थात् केवलज्ञान एक ही समयमें सर्व आत्मप्रदेशोंसे समस्त द्रव्य-क्षेत्र-काल भावको जानता है ॥ ४७ ॥

अब, ऐसा निश्चित करते हैं कि जो सबको नहीं जानता वह एकको भी नहीं जानता :—

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ सवमजानन्नेकमपि न जानातीति निश्चिनोति –

जो ण विजाणदि जुगवं अत्थे तिक्कालिगे तिहुवणत्थे ।
णादुं तस्स ण सक्कं सपज्जयं दव्वमेगं वा ॥ ४८ ॥

यो न विजानाति युगपदर्थान् त्रैकालिकान् त्रिभुवनस्थान् ।
ज्ञातुं तस्य न शक्यं सपर्ययं द्रव्यमेकं वा ॥ ४८ ॥

इह किलैकमाकाशद्रव्यमेकं धर्मद्रव्यमेकमधर्मद्रव्यमसंख्येयानि कालद्रव्याण्यनन्तानि जीवद्रव्याणि । ततोऽप्यनन्तगुणानि पुद्गलद्रव्याणि । तथैषामेव प्रत्येकमतीतानागतानुभूयमानभेदभिन्ननिरवधिवृत्तिप्रवाहपरिपातिनोऽनन्ताः पर्यायाः । एवमेतत्समस्तमपि समुदितं

जो ण विजाणदि यः कर्ता नैव जानाति । कथम् । **जुगवं** युगपदेकक्षणे । कान् । **अत्थे** अर्थान् । कथंभूतान् । **तिक्कालिगे** त्रिकालपर्यायपरिणतान् । पुनरपि कथंभूतान् । **तिहुवणत्थे** त्रिभुवनस्थान् । **णादुं तस्स ण सक्कं** तस्य पुरुषस्य सम्बन्धि ज्ञानं ज्ञातुं समर्थं न भवति । किम् । **दव्वं** ज्ञेयद्रव्यम् । किंविशिष्टम् । **सपज्जयं** अनन्तपर्यायसहितम् । कतिसंख्योपेतम् । **एगं वा** एकमपीति । तथा हि— आकाशद्रव्यं तावदेकं, धर्मद्रव्यमेकं, तथैवाधर्मद्रव्यं च लोकाकाशप्रमितासंख्येयकालद्रव्याणि, ततोऽनन्तगुणानि जीवद्रव्याणि, तेभ्योऽप्यनन्तगुणानि पुद्गलद्रव्याणि । तथैव सर्वेषां प्रत्येकमनन्तपर्यायाः, एतत्सर्वं ज्ञेयं तावत्तत्रैकं विवक्षितं जीवद्रव्यं ज्ञातृ भवति । एवं तावद्वस्तुस्वभावः । तत्र तथा दहनः समस्तं दाह्यं दहन् सन् समस्तदाह्यहेतुकसमस्तदाह्याकारपर्यायपरिणतसकलैकदहनस्वरूपमुष्णपरिणततृणपर्णाद्याकारमात्मानं (स्वकीयस्वभावं) परिणमति, तथायमात्मा समस्तं ज्ञेयं जानन् सन् समस्त-

---

गाथा ४८

अन्वयार्थ :– [**यः**] जो [**युगपद्**] एकही साथ [**त्रैकालिकान् त्रिभुवनस्थान्**] त्रैकालिक त्रिभुवनस्थ (-तीनों कालके और तीनों लोकके) [**अर्थान्**] पदार्थोंको [**न विजानाति**] नहीं जानता, [**तस्य**] उसे [**सपर्ययं**] पर्याय सहित [**एकं द्रव्यं वा**] एक द्रव्य भी [**ज्ञातुं न शक्यं**] जानना शक्य नहीं है ।

टीका :– इस विश्वमें एक आकाशद्रव्य, एक धर्मद्रव्य, एक अधर्मद्रव्य, असंख्य कालद्रव्य और अनन्त जीवद्रव्य तथा उनसे भी अनन्तगुने पुद्गल द्रव्य हैं, और उन्हींके प्रत्येकके अतीत, अनागत और वर्तमान ऐसे (तीन) प्रकारोंसे भेदवाली [१]निरवधि

---

[१] निरवधि = अवधि – हद – मर्यादा अन्तरहित ।

जाणे नहि युगपद् त्रिकालिक त्रिभुवनस्थ पदार्थ ने ।
तेने सपर्यय एक पण नहि द्रव्य जाणवु शक्य छे ॥ ४८ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

ज्ञेयम् । इहैवैकं किंचिज्जीवद्रव्यं ज्ञातृ । अथ यथा समस्तं दाह्यं दहन् दहनः समस्तदाह्य-हेतुकसमस्तदाह्याकारपर्यायपरिणतसकलैकदहनाकारमात्मानं परिणमति, तथा समस्तं ज्ञेयं जानन् ज्ञाता समस्तज्ञेयहेतुकसमस्तज्ञेयाकारपर्यायपरिणतसकलैकज्ञानाकारं चेतनत्वात् स्वानुभवप्रत्यक्षमात्मानं परिणमति। एवं किल द्रव्यस्वभावः । यस्तु समस्तं ज्ञेयं न जानाति स समस्तं दाह्यमदहन् समस्तदाह्यहेतुकसमस्तदाह्याकारपर्यायपरिणतसकलैकदहनाकार-

---

ज्ञेयहेतुकसमस्तज्ञेयाकारपर्यायपरिणतसकलैकाखण्डज्ञानरूपं स्वकीयमात्मानं परिणमति जानाति परिच्छिनत्ति। यथैव च स एव दहनः पूर्वोक्तलक्षणं दाह्यमदहन् सन् तदाकारेण न परिणमति, तथाऽऽत्मापि पूर्वोक्तलक्षणं समस्तं ज्ञेयमजानन् पूर्वोक्तलक्षणमेव सकलैकाखण्डज्ञानाकारं स्वकीय-मात्मानं न परिणमति न जानाति न परिच्छिनत्ति। अपरमप्युदाहरणं दीयते – यथा कोऽप्यन्धक आदित्यप्रकाश्यान् पदार्थानपश्यन्नादित्यमिव, प्रदीपप्रकाश्यान् पदार्थानपश्यन् प्रदीपमिव, दर्पणस्थ-

---

[1]वृत्तिप्रवाहके भीतर पड़ने वाली (-समा जानेवाली) अनन्त पर्यायें हैं । इसप्रकार यह समस्त (द्रव्यों और पर्यायोंका) समुदाय ज्ञेय है । उसीमें एक कोई भी जीवद्रव्य ज्ञाता है । अब यहाँ, जैसे समस्त दाह्यको दहकती हुई अग्नि समस्त-दाह्यहेतुक (-समस्त दाह्य जिसका निमित्त है ऐसा) समस्तदाह्याकारपर्यायरूप परिणमित सकल एक [2]दहन जिसका आकार (स्वरूप) है ऐसे अपने रूपमें (-अग्निरूपमें) परिणमित होती है, वैसे ही समस्त ज्ञेयको जानता हुआ ज्ञाता (-आत्मा) समस्तज्ञेयहेतुक समस्तज्ञेयाकारपर्यायरूप परिणमित [3]सकल एक ज्ञान जिसका आकार (स्वरूप) है ऐसे निजरूपसे—जो चेतनताके कारण स्वानुभवप्रत्यक्ष है उस-रूप – परिणमित होता है । इसप्रकार वास्तवमें द्रव्यका स्वभाव है । किन्तु जो समस्त ज्ञेयको नहीं जानता वह (आत्मा), जैसे समस्त दाह्यको न दहती हुई अग्नि समस्तदाह्यहेतुक समस्तदाह्याकारपर्यायरूप परिणमित सकल एक दहन जिसका आकार है ऐसे अपने रूपमें परिणमित नहीं होता उसी प्रकार, समस्तज्ञेयहेतुक समस्तज्ञेयाकारपर्यायरूप परिणमित सकल एक ज्ञान जिसका आकार है ऐसे अपने रूपमें – स्वयं चेतनताके कारण स्वानुभवप्रत्यक्ष होने पर भी – परिणमित नहीं होता, (अपनेको परिपूर्णतया अनुभव नहीं करता – नहीं जानता) इसप्रकार यह फलित होता है कि जो सबको नहीं जानता वह अपनेको (-आत्माको) नहीं जानता ।

भावार्थ :– जो अग्नि काष्ठ, तृण, पत्ते इत्यादि समस्त दाह्यपदार्थोंको नहीं जलाता, उसका दहनस्वभाव (काष्ठादिक समस्त दाह्य जिसका निमित्त है ऐसा)

---

[1] वृत्ति = वर्त्तन करना; उत्पाद – व्यय – ध्रौव्य; अस्तित्व, परिणति ।

[2] दहन = जलाना, दहना । [3] सकल = सारा; परिपूर्ण ।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

मात्मानं दहन इव समस्तज्ञेयहेतुकसमस्तज्ञेयाकारपर्यायपरिणतसकलैकज्ञानाकारमात्मानं चेतनत्वात् स्वानुभवप्रत्यक्षत्वेऽपि न परिणमति। एवमेतदायाति यः सर्वं न जानाति स आत्मानं न जानाति ॥ ४८ ॥

अथैकमजानन् सर्वं न जानातीति निश्चिनोति –

दव्वं अणंतपज्जयमेगमणंताणि दव्वजादाणि।
ण विजाणदि जदि जुगवं किध सो सव्वाणि जाणादि ॥ ४९ ॥

द्रव्यमनन्तपर्यायमेकमनन्तानि द्रव्यजातानि।
व विजानाति यदि युगपत् कथं स सर्वाणि जानाति ॥ ४९ ॥

बिम्बान्यपश्यन् दर्पणमिव, स्वकीयदृष्टिप्रकाश्यान् पदार्थानपश्यन् हस्तपादाद्यवयवपरिणतं स्वकीयदेहाकारमात्मानं स्वकीयदृष्ट्या न पश्यति, तथायं विवक्षितात्मापि केवलज्ञानप्रकाश्यान् पदार्थानजानन् सकलाखण्डैककेवलज्ञानरूपमात्मानमपि न जानाति। तत एतत्स्थितं यः सर्वं न जानाति स आत्मानमपि न जानातीति ॥ ४८ ॥ अथैकमजानन् सर्वं न जानातीति निश्चिनोति – **दव्वं** द्रव्यं **अणंतपज्जयं** अनन्तपर्यायं **एगं** एकं **अणंताणि दव्वजादीणि** अनन्तानि द्रव्यजातीनि **जो ण विजाणदि**

समस्तदाह्याकारपर्यायरूप परिणमित न होनेसे अपूर्णरूपसे परिणमित होता है – परिपूर्णरूपसे परिणमित नहीं होता, इसलिये परिपूर्ण एक दहन जिसका स्वरूप है ऐसी वह अग्नि अपने रूप ही पूर्ण रीतिसे परिणमित नहीं होती; उसी प्रकार यह आत्मा समस्त द्रव्य-पर्यायरूप समस्तज्ञेयको नहीं जानता, उसका ज्ञान (समस्त ज्ञेय जिसका निमित्त है ऐसे) समस्तज्ञेयाकारपर्यायरूप परिणमित न होनेसे अपूर्णरूपसे परिणमित होता है – परिपूर्ण रूपसे परिणमित नहीं होता, इसलिये परिपूर्ण एक ज्ञान जिसका स्वरूप है ऐसा वह आत्मा अपने रूपसे ही पूर्ण रीतिसे परिणमित नहीं होता अर्थात् निजको ही पूर्णरीतिसे अनुभव नहीं करता – नहीं जानता। इसप्रकार सिद्ध हुआ कि जो सबको नहीं जानता वह एकको – अपनेको (पूर्ण रीतिसे) नहीं जानता ॥ ४८ ॥

अब, ऐसा निश्चित करते हैं कि एकको न जाननेवाला सबको नहीं जानता :–

गाथा ४९

अन्वयार्थ – [**यदि**] यदि [**अनन्तपर्यायं**] अनन्त पर्यायवाले [**एकं द्रव्यं**] एक

जो एक द्रव्य अनन्तपर्यय तेम द्रव्य अनन्तने।
युगपद न जाणे जीव, तो ते केम जाणे सर्वने ? ॥ ४९ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

आत्मा हि तावत्स्वयं ज्ञानमयत्वे सति ज्ञातृत्वात् ज्ञानमेव। ज्ञानं तु प्रत्यात्मवर्ति प्रतिभासमयं महासामान्यम्। तत्तु प्रतिभासमयानन्तविशेषव्यापि। ते च सर्वद्रव्यपर्याय-निबंधनाः। अथ यः सर्वद्रव्यपर्यायनिबन्धनानन्तविशेषव्यापिप्रतिभासमयमहासामान्य-रूपमात्मानं स्वानुभवप्रत्यक्षं न करोति स कथं प्रतिभासमयमहासामान्यव्याप्यप्रतिभा-

---

यो न विजानाति अनन्तद्रव्यसमूहान् **किध सो सव्वाणि जाणादि** कथं स सर्वान् जानाति **जुगवं** युगपदेकसमये, न कथमपीति। तथा हि – आत्मलक्षणं तावज्ज्ञानं तच्चाखण्डप्रतिभासमयं सर्वजीव-साधारणं महासामान्यम्। तच्च महासामान्यं ज्ञानमयानन्तविशेषव्यापि। ते च ज्ञानविशेषा अनन्त-द्रव्यपर्यायाणां विषयभूतानां ज्ञेयभूतानां परिच्छेदका ग्राहकाः। अखण्डैकप्रतिभासमयं यन्महासामान्यं तत्स्वभावमात्मानं योऽसौ प्रत्यक्षं न जानाति स पुरुषः प्रतिभासमयेन महासामान्येन ये व्याप्ता अनन्त-ज्ञानविशेषास्तेषां विषयभूताः येऽनन्तद्रव्यपर्यायास्तान् कथं जानाति, न कथमपि। अथ एतदायातम् – यः आत्मानं न जानाति स सर्वं न जानातीति। तथा चोक्तम् – "एको भावः सर्वभावस्वभावः सर्वे भावा एकभावस्वभावाः। एको भावस्तत्त्वतो येन बुद्धः सर्वे भावास्तत्त्वतस्तेन बुद्धाः॥" अत्राह शिष्यः– आत्मपरिज्ञाने सति सर्वपरिज्ञानं भवतीत्यत्र व्याख्यातं, तत्र तु पूर्वसूत्रे भणितं सर्वपरिज्ञाने

द्रव्यको (-आत्मद्रव्यको) [**अनन्तानि द्रव्यजातानि**] तथा अनन्त द्रव्यसमूहको [**युगपद्**] एक ही साथ [**न विजानाति**] नहीं जानता [**सः**] तो वह पुरुष [**सर्वाणि**] सब को (-अनन्त द्रव्यसमूह को) [**कथं जानाति**] कैसे जान सकेगा ? (अर्थात् जो आत्मद्रव्यको नहीं जानता हो वह समस्त द्रव्यसमूहको नहीं जान सकता)

प्रकारान्तरसे अन्वयार्थ :– [**यदि**] यदि [**अनन्तपर्यायं**] अनन्त पर्यायवाले [**एकं द्रव्यं**] एक द्रव्यको (-आत्मद्रव्यको) [**न विजानाति**] नहीं जानता [**सः**] तो वह पुरुष [**युगपद्**] एक ही साथ [**सर्वाणि अनन्तानि द्रव्यजातानि**] सर्व अनन्त द्रव्य-समूहको [**कथं जानाति**] कैसे जान सकेगा ?

टीका :– प्रथम तो आत्मा वास्तवमें स्वयं ज्ञानमय होनेसे ज्ञातृत्वके कारण ज्ञान ही है; और ज्ञान प्रत्येक आत्मामें वर्तता (-रहता) हुआ प्रतिभासमय महासामान्य है। वह प्रतिभासमय महासामान्य प्रतिभासमय अनन्तविशेषोंमें व्याप्त होनेवाला है; और उन विशेषोंके (-भेदोंके) निमित्त सर्व द्रव्यपर्याय हैं। अब जो पुरुष सर्व द्रव्यपर्याय जिनके निमित्त हैं ऐसे अनन्त विशेषोंमें व्याप्त होनेवाले प्रतिभासमय महासामान्यरूप आत्माका स्वानुभव प्रत्यक्ष नहीं करता, वह (पुरुष) प्रतिभासमय महासामान्यके द्वारा [१]व्याप्य (-व्याप्य होने योग्य) जो प्रतिभासमय अनन्त विशेष हैं उनकी निमित्तभूत सर्व

---

[१] ज्ञान सामान्य व्यापक है, और ज्ञान विशेष-भेद व्याप्य हैं। उन ज्ञानविषयोंके निमित्त ज्ञेयभूत सर्व द्रव्य और पर्यायें हैं।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

समयानन्तविशेषनिबन्धनभूतसर्वद्रव्यपर्यायान् प्रत्यक्षीकुर्यात्। एवमेतदायाति य आत्मानं न जानाति स सर्वं न जानाति। अथ सर्वज्ञानादात्मज्ञानमात्मज्ञानात्सर्वज्ञानमित्यवतिष्ठते। एवं च सति ज्ञानमयत्वेन स्वसंचेतकत्वादात्मनो ज्ञातृज्ञेययोर्वस्तुत्वेनान्यत्वे सत्यपि प्रतिभासप्रतिभास्यमानयोः स्वस्यामवस्थायामन्योन्यसंवलनेनात्यन्तमशक्यविवेचनत्वात्सर्वमात्मनि निखातमिव प्रतिभाति। यद्येवं न स्यात् तदा ज्ञानस्य परिपूर्णात्मसंचेतनाभावात् परिपूर्णस्यैकस्यात्मनोऽपि ज्ञानं न सिद्धयेत् ॥ ४९ ॥

सत्यात्मपरिज्ञानं भवतीति। यद्येवं तर्हि छद्मस्थानां सर्वपरिज्ञानं नास्त्यात्मपरिज्ञानं कथं भविष्यति, आत्मपरिज्ञानाभावे चात्मभावना कथं, तदभावे केवलज्ञानोत्पत्तिर्नास्तीति। परिहारमाह – परोक्षप्रमाणभूतश्रुतज्ञानेन सर्वपदार्था ज्ञायन्ते। कथमिति चेत् – लोकालोकादिपरिज्ञानं व्याप्तिज्ञानरूपेण छद्मस्थानामपि विद्यते, तच्च व्याप्तिज्ञानं परोक्षाकारेण केवलज्ञानविषयग्राहकं कथंचिदात्मैव भण्यते। अथवा स्वसंवेदनज्ञानेनात्मा ज्ञायते, ततश्च भावना क्रियते, तया रागादिविकल्परहितस्वसंवेदनज्ञानभावनया केवलज्ञानं च जायते। इति नास्ति दोषः ॥ ४९ ॥ अथ क्रमप्रवृत्तज्ञानेन सर्वज्ञो न

द्रव्यपर्यायोंको कैसे प्रत्यक्ष कर सकेगा ? (नहीं कर सकेगा) इससे ऐसा फलित हुआ कि जो आत्माको नहीं जानता वह सबको नहीं जानता।

अब इससे ऐसा निश्चित होता है कि सर्वके ज्ञानसे आत्माका ज्ञान और आत्माके ज्ञानसे सर्वका ज्ञान (होता है) ; और ऐसा होनेसे, आत्मा ज्ञानमयताके कारण स्वसंचेतक होनेसे, ज्ञाता और ज्ञेयका वस्तुरूपसे अन्यत्व होनेपर भी प्रतिभास और प्रतिभास्यमान-कर अपनी अवस्थामें अन्योन्य मिलन होनेके कारण (ज्ञान और ज्ञेय, आत्माकी – ज्ञानकी अवस्थामें परस्पर मिश्रित – एकमेकरूप होनेसे) उन्हें भिन्न करना अत्यन्त अशक्य होनेसे मानो सब कुछ आत्मामें [१]निखात (प्रविष्ट) हो गया हो इसप्रकार प्रतिभासित होता है – ज्ञात होता है। (आत्मा ज्ञानमय होनेसे वह अपनेको अनुभव करता है – जानता है, और अपनेको जाननेपर समस्त ज्ञेय ऐसे ज्ञात होते हैं – मानों वे ज्ञानमें स्थित ही हों, क्योंकि ज्ञानकी अवस्थामेंसे ज्ञेयाकारोंको भिन्न करना अशक्य है।) यदि ऐसा न हो तो (यदि आत्मा सबको न जानता हो तो) ज्ञानके परिपूर्ण आत्मसंचेतनका अभाव होनेसे परिपूर्ण एक आत्माका भी ज्ञान सिद्ध न हो।

भावार्थ :– ४८ और ४९ वीं गाथामें ऐसा बताया गया है कि जो सबको नहीं जानता वह अपनेको नहीं जानता, और जो अपनेको नहीं जानता वह सबको नहीं जानता। अपना ज्ञान और सबका ज्ञान एक साथ ही होता है। स्वयं और सर्व इन दोमेंसे एकका ज्ञान हो और दूसरेका न हो यह असम्भव है।

---

[१] निखात=खोदकर भीतर गहरा उतर गया हुवा; भीतर प्रविष्ट हुआ।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ क्रमकृतप्रवृत्त्या ज्ञानस्य सर्वगतत्व न सिद्धयतीति निश्चिनोति –

उप्पज्जदि जदि णाणं कमसो अट्ठे पडुच्च णाणिस्स ।
तं णेव हवदि णिच्चं ण खाइगं णेव सव्वगदं ॥ ५० ॥

उत्पद्यते यदि ज्ञानं क्रमशोऽर्थान् प्रतीत्य ज्ञानिनः ।
तन्नैव भवति नित्यं न क्षायिकं नैव सर्वगतम् ॥ ५० ॥

भवतीति व्यवस्थापयति – **उप्पज्जदि जदि णाणं** उत्पद्यते ज्ञानं यदि चेत् । **कमसो** क्रमशः सकाशात् । किं कृत्वा । **अट्ठे पडुच्च** ज्ञेयार्थानाश्रित्य । कस्य । **णाणिस्स** ज्ञानिनः आत्मनः **तं णेव हवदि णिच्चं** उत्पत्तिनिमित्तभूतपदार्थविनाशे तस्यापि विनाश इति नित्यं न भवति । **ण खाइगं** ज्ञानावरणीयकर्म-क्षयोपशमाधीनत्वात् क्षायिकमपि न भवति । **णेव सव्वगदं** यत एव पूर्वोक्तप्रकारेण पराधीनत्वेन नित्यं न भवति, क्षयोपशमाधीनत्वेन क्षायिकं च न भवति, तत एव युगपत्समस्तद्रव्यक्षेत्रकालभावानां

यह कथन एकदेश ज्ञानकी अपेक्षासे नहीं किन्तु पूर्णज्ञानकी (केवलज्ञानकी) अपेक्षासे है ॥ ४९ ॥

अब, ऐसा निश्चित करते हैं कि क्रमशः प्रवर्तमान ज्ञानकी सर्वगतता सिद्ध नहीं होती :–

गाथा ५०

अन्वयार्थ :– [**यदि**] यदि [**ज्ञानिनः ज्ञानं**] आत्माका ज्ञान [**क्रमशः**] क्रमश [**अर्थान् प्रतीत्य**] पदार्थोंका अवलम्बन लेकर [**उत्पद्यते**] उत्पन्न होता हो [**तत्**] तो वह (ज्ञान) [**न एव नित्यं भवति**] नित्य नहीं है, [**न क्षायिकं**] क्षायिक नहीं है, [**न एव सर्वगतम्**] और सर्वगत नहीं है ।

टीका :– जो ज्ञान क्रमशः एक एक पदार्थका अवलम्बन लेकर प्रवृत्ति करता है वह (ज्ञान) एक पदार्थके अवलम्बनसे उत्पन्न होकर दूसरे पदार्थके अवलम्बनसे नष्ट होजानेसे नित्य नहीं होता तथा कर्मोदयके कारण एक [१]व्यक्तिको प्राप्त करके फिर अन्य व्यक्तिको प्राप्त करता है इसलिये क्षायिक भी न होता हुआ, वह अनन्त द्रव्य-क्षेत्र-काल-भावको प्राप्त होने में (-जानने में) असमर्थ होनेके कारण सर्वगत नहीं है ।

---

[१] व्यक्ति = प्रगटता; विशेष, भेद ।

जो ज्ञान 'ज्ञानी' नु ऊपजे क्रमशः अरथ अवलंबीने ।
तो नित्य नहि, क्षायिक नहि ने सर्वगत नहि ज्ञान ऐ ॥ ५० ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यत्किल क्रमेणैकैकमर्थमालम्ब्य प्रवर्तते ज्ञानं तदेकार्थालम्बनादुत्पन्नमन्यार्थालम्बनात् प्रलीयमानं नित्यमसत्तथा कर्मोदयादेकां व्यक्तिं प्रतिपन्नं पुनर्व्यक्त्यन्तरं प्रतिपद्यमानं क्षायिकमप्यसदनन्तद्रव्यक्षेत्रकालभावानाक्रान्तुमशक्तत्वात् सर्वगतं न स्यात् ॥ ५० ॥

अथ यौगपद्यप्रवृत्त्यैव ज्ञानस्य सर्वगतत्वं सिद्ध्यतीति व्यवतिष्ठते –

तिक्कालणिच्चविसमं सयलं सव्वत्थसंभवं चित्तं ।
जुगवं जाणदि जोण्हं अहो हि णाणस्स माहप्पं ॥ ५१ ॥

त्रैकाल्यनित्यविषमं सकलं सर्वत्रसंभवं चित्रम् ।
युगपज्जानाति जैनमहो हि ज्ञानस्य माहात्म्यम् ॥ ५१ ॥

परिज्ञानसामर्थ्याभावात्सर्वगतं न भवति । अत एतत्स्थितं यद्ज्ञानं क्रमेणार्थान् प्रतीत्य जायते तेन सर्वज्ञो न भवति इति ॥ ५० ॥ अथ युगपत्परिच्छित्तिरूपज्ञानेनैव सर्वज्ञो भवतीत्यावेदयति – **जाणदि** जानाति । किं कर्तृ । **जोण्हं** जैनज्ञानम् । कथम् । **जुगवं** युगपदेकसमये । **अहो हि णाणस्स माहप्पं** अहो हि स्फुटं जैनज्ञानस्य माहात्म्यं पश्यताम् । किं जानाति । अर्थमित्यध्याहारः । कथंभूतम् । **तिक्कालणिच्चविसयं** त्रिकाल-विषयं त्रिकालगतं नित्यं सर्वकालम् । पुनरपि किंविशिष्टम् । **सयलं** समस्तम् । पुनरपि कथंभूतम् । **सव्वत्थ संभवं** सर्वत्र लोके संभवं समुत्पन्नं स्थितम् । पुनश्च किंरूपम् ।

भावार्थ :– क्रमशः प्रवर्तमान ज्ञान अनित्य है, क्षायोपशमिक है; ऐसा क्रमिक ज्ञानवाला पुरुष सर्वज्ञ नहीं हो सकता ॥ ५० ॥

अब ऐसा निश्चित होता है कि युगपत् प्रवृत्तिके द्वारा ही ज्ञानका सर्वगतत्व सिद्ध होता है (अर्थात् अक्रमसे प्रवर्तमान ज्ञान ही सर्वगत हो सकता है) :–

गाथा ५१

अन्वयार्थ :– [**त्रैकाल्यनित्यविषमं**] तीनों कालमें सदा विषम (असमान जातिके), [**सर्वत्र संभवं**] सर्व क्षेत्रके [**चित्रं**] अनेक प्रकारके [**सकलं**] समस्त पदार्थोंको [**जैनं**] जिनदेवका ज्ञान [**युगपत् जानाति**] एक साथ जानता है [**अहो हि**] अहो ! [**ज्ञानस्य माहात्म्यम्**] ज्ञानका माहात्म्य !

टीका :– वास्तवमें क्षायिक ज्ञानका, सर्वोत्कृष्टताका स्थानभूत परम माहात्म्य है; और जो ज्ञान एक साथही समस्त पदार्थोंका अवलम्बन लेकर प्रवृत्ति करता है वह

नित्ये विषम, विधविध, सकल पदार्थगण सर्वत्रनो ।
जिनज्ञान जाणे युगपदे, महिमा अहो ए ज्ञाननो ! ॥ ५१ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

क्षायिकं हि ज्ञानमतिशयास्पदीभूतपरममाहात्म्यं। यत्तु युगपदेव सर्वार्थानालम्ब्य प्रवर्तते ज्ञानं तट्टङ्कोत्कीर्णन्यायावस्थितसमस्तवस्तुज्ञेयाकारतयाधिरोपितनित्यत्वं प्रतिपन्न-समस्तव्यक्तित्वेनाभिव्यक्तस्वभावभासिक्षायिकभावं त्रैकाल्येन नित्यमेव विषमीकृतां सकलामपि सर्वार्थसंभूतिमनन्तजातिप्रापितवैचित्र्यां परिच्छिन्ददक्रमसमाक्रान्तानन्तद्रव्य-क्षेत्रकालभावतया प्रकटीकृताद्भुतमाहात्म्यं सर्वगतमेव स्यात् ॥ ५१ ॥

अथ ज्ञानिनो ज्ञप्तिक्रियासद्भावेऽपि क्रियाफलभूतं बन्धं प्रतिषेधयन्नुपसंहरति –

ण वि परिणमदि ण गेण्हदि उप्पज्जदि णेव तेसु अट्ठेसु।
जाणण्णवि ते आदा अबंधगो तेण पण्णत्तो ॥ ५२ ॥

चित्तं नानाजातिभेदेन विचित्रमिति। तथा हि – युगपत्सकलग्राहकज्ञानेन सर्वज्ञो भवतीति ज्ञात्वा किं कर्तव्यम्। ज्योतिष्कमन्त्रवादरससिद्ध्यादीनि यानि खण्डविज्ञानानि मूढजीवानां चित्तचमत्कारकारणानि परमात्मभावनाविनाशकानि च तत्राग्रहं त्यक्त्वा जगत्त्रयकालत्रयसकलवस्तुयुगपत्प्रकाशकमविनश्वर-मखण्डैकप्रतिभासरूपं सर्वज्ञशब्दवाच्यं यत्केवलज्ञानं तस्यैवोत्पत्तिकारणभूतं यत्समस्तरागादिविकल्प-जालेन रहितं सहजशुद्धात्मनोऽभेदज्ञानं तत्र भावना कर्तव्या, इति तात्पर्यम् ॥ ५१ ॥ एवं केवल-

---

ज्ञान – अपनेमें समस्त वस्तुओंके ज्ञेयाकार [१]टंकोत्कीर्ण – न्यायसे स्थित होनेसे जिसने नित्यत्व प्राप्त किया है और समस्त व्यक्तिको प्राप्त कर लेनेसे जिसने स्वभावप्रकाशक क्षायिकभाव प्रगट किया है ऐसा–त्रिकालमें सदा विषम रहनेवाले (-असमान जातिरूपसे परिणमित होनेवाले) और अनन्त प्रकारोंके कारण विचित्रताको प्राप्त सम्पूर्ण सर्व पदार्थों-के समूहको जानता हुआ, अक्रमसे अनन्त द्रव्य-क्षेत्र-काल-भावको प्राप्त होनेसे जिसने अद्भुत माहात्म्य प्रगट किया है ऐसा सर्वगत ही है।

भावार्थ :– अक्रमसे प्रवर्तमान ज्ञान एक ज्ञेयसे दूसरेके प्रति नहीं बदलता इसलिये नित्य है, अपनी समस्त शक्तियोंके प्रगट हो जानेसे क्षायिक है, ऐसे अक्रमिक ज्ञानवाला पुरुष ही सर्वज्ञ हो सकता है। सर्वज्ञके इस ज्ञानका कोई परम अद्भुत माहात्म्य है ॥ ५१ ॥

अब, ज्ञानीके (-केवलज्ञानी आत्माके) ज्ञप्तिक्रियाका सद्भाव होने पर भी उसके क्रियाके फलरूप बन्धका निषेध करते हुए उपसंहार करते हैं (अर्थात् केवलज्ञानी आत्माके जाननेकी क्रिया होने पर भी बन्ध नहीं होता, ऐसा कहकर ज्ञान-अधिकार पूर्ण करते हैं) –

---

[१] टंकोत्कीर्ण न्याय = पत्थरमें टांकीसे उत्कीर्ण आकृतिकी भाँति।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

नापि परिणमति न गृह्णाति उत्पद्यते नैव तेष्वर्थेषु ।
जानन्नपि तानात्मा अबन्धकस्तेन प्रज्ञप्तः ।। ५२ ।।

इह खलु 'उदयगदा कम्मंसा जिणवरवसहेहिं णियदिणा भणिया । तेसु विमूढो रत्तो दुट्ठो वा बंधमणुभवदि ।।' इत्यत्र सूत्रे उदयगतेषु पुद्गलकर्मांशेषु सत्सु संचेतयमानो मोह-रागद्वेषपरिणतत्वात् ज्ञेयार्थपरिणमनलक्षणया क्रियया युज्यमानः क्रियाफलभूतं बंधमनुभवति, न तु ज्ञानादिति प्रथममेवार्थपरिणमनक्रियाफलत्वेन बन्धस्य समर्थितत्वात्, तथा 'गेण्हदि णेव ण मुञ्चदि ण परं परिणमदि केवली भगवं । पेच्छदि समंतदो सो जाणदि सव्वं णिरवसेसं ।।' इत्यर्थपरिणमनादिक्रियाणामभावस्य शुद्धात्मनो निरूपितत्वाच्चार्थान-परिणमतोऽगृह्णतस्तेष्वनुत्पद्यमानस्य चात्मनो ज्ञप्तिक्रियासद्भावेऽपि न खलु क्रियाफलभूतो बन्धः सिद्धयेत् ।। ५२ ।।

ज्ञानमेव सर्वज्ञ इति कथनरूपेण गाथैका, तदनन्तरं सर्वपदार्थपरिज्ञानात्परमात्मज्ञानमिति प्रथमगाथा परमात्मज्ञानाच्च सर्वपदार्थपरिज्ञानमिति द्वितीया चेति। ततश्च क्रमप्रवृत्तज्ञानेन सर्वज्ञो न भवतीति प्रथमगाथा, युगपद्ग्राहकेण स भवतीति द्वितीया चेति समुदायेन सप्तमस्थले गाथापञ्चकं गतम् । अथ

गाथा ५२

अन्वयार्थ :– [**आत्मा**] (केवलज्ञानी) आत्मा [**तान् जानन् अपि**] पदार्थोंको जानता हुआ भी [**न अपि परिणमति**] उसरूप परिणमित नहीं होता, [**न गृह्णाति**] उन्हें ग्रहण नहीं करता [**तेषु अर्थेषु न एव उत्पद्यते**] और उन पदार्थोंके रूपमें उत्पन्न नहीं होता [**तेन**] इसलिये [**अबन्धकः प्रज्ञप्तः**] उसे अबन्धक कहा है ।

टीका :– यहाँ 'उदयगदा कम्मंसा जिणवरवसहेहिं णियदिणा भणिया । तेसु विमूढो रत्तो दुट्ठो वा बन्धमणुभवदि ।।' इस गाथासूत्रमें, 'उदयगत पुद्गलकर्मांशोंके अस्तित्वमें चेतितहोनेपर – जाननेपर – अनुभवकरनेपर मोह-राग-द्वेषमें परिणत होनेसे ज्ञेयार्थ-परिणमनस्वरूप क्रियाके साथ युक्त होता हुआ आत्मा क्रियाफलभूत बन्धका अनुभव करता है, किन्तु ज्ञानसे नहीं' इसप्रकार प्रथम ही अर्थपरिणमनक्रियाके फलरूपसे बन्धका समर्थन किया गया है (अर्थात् बन्ध तो पदार्थरूपमें परिणमनरूप क्रियाका फल है ऐसा

---

[१] ज्ञानतत्व – प्रज्ञापनकी ४३ वीं गाथा ।

ते अर्थरूप न परिणमे जीव, नव ग्रहे, नव ऊपजे ।
सौ अर्थने जाणे छतां, तेथी अबंधक जिन कहे ।। ५२ ।।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

❀ स्रग्धरा छंद ❀

जानन्नप्येष विश्वं युगपदपि भवद्भाविभूतं समस्तं
मोहाभावाद्यदात्मा परिणमति परं नैव निर्लूनकर्मा ।
तेनास्ते मुक्त एव प्रसभविकसितज्ञप्तिविस्तारपांत-
ज्ञेयाकारां त्रिलोकीं पृथगपृथगथ द्योतयन् ज्ञानमूर्तिः ॥ ४ ॥

– इति ज्ञानाधिकारः ॥

पूर्वं यदुक्तं पदार्थपरिच्छित्तिसद्भावेऽपि रागद्वेषमोहाभावात् केवलिना बन्धो नास्तीति तमेवार्थं प्रकारान्तरेण दृढीकुर्वन् ज्ञानप्रपञ्चाधिकारमुपसंहरति – **ण वि परिणमदि** यथा स्वकीयात्मप्रदेशैः समरसीभावेन सह परिणमति तथा ज्ञेयरूपेण न परिणमति । **ण गेण्हदि** यथैव चानन्तज्ञानादिचतुष्टयरूपमात्मरूपमात्मरूपतया गृह्णाति तथा ज्ञेयरूपं न गृह्णाति । **उप्पज्जदि णेव तेसु अट्ठेसु** यथा च निर्विकारपरमानन्दैकसुखरूपेण स्वकीयसिद्धपर्यायेणोत्पद्यते तथैव च ज्ञेयपदार्थेषु नोत्पद्यते । किं कुर्वन्नपि । **जाणण्णवि ते** तान् ज्ञेयपदार्थान् स्वस्मात् पृथग्रूपेण जानन्नपि । स कः कर्ता । **आदा** मुक्तात्मा । **अबंधगो तेण पण्णत्तो** ततः कारणात्कर्मणामबन्धकः प्रज्ञप्त इति । तद्यथा – रागादिरहितज्ञानं बन्धकारणं न भवतीति ज्ञात्वा शुद्धात्मोपलम्भलक्षणमोक्षविपरीतस्य नारकादिदुःखकारणकर्मबन्धस्य कारणानीन्द्रियमनोजनितान्येकदेशविज्ञानानि त्यक्त्वा सकलविमलकेवलज्ञानस्य कर्मबन्धाकारणभूतस्य यद्बीजभूतं निर्विकारस्वसंवेदनज्ञानं तत्रैव भावना कर्तव्येत्यभिप्रायः ॥ ५२ ॥

निश्चित किया गया है) तथा 'गेण्हदि णेव ण मुञ्चदि ण परं परिणमदि केवली भगवं । पेच्छदि समंतदो सो जाणदि सव्वं [१]णिरवसेसं ॥'

इस गाथा सूत्रमें शुद्धात्माके अर्थ परिणमनादि क्रियाओंका अभाव निरूपित किया गया है इसलिये जो (आत्मा) पदार्थरूपमें परिणमित नहीं होता उसे ग्रहण नहीं करता और उसरूप उत्पन्न नहीं होता उस आत्माके ज्ञप्तिक्रियाका सद्भाव होनेपर भी वास्तवमें क्रियाफलभूत बन्ध सिद्ध नहीं होता ।

भावार्थ :– कर्मके तीन भेद किये गये हैं – प्राप्य – विकार्य और निर्वर्त्य । केवली-भगवानके प्राप्य कर्म, विकार्य कर्म और निर्वर्त्य कर्म ज्ञान ही है, क्योंकि वे ज्ञानको ही ग्रहण करते हैं, ज्ञानरूप ही परिणमित होते हैं और ज्ञानरूप ही उत्पन्न होते हैं । इस-प्रकार ज्ञान ही उनका कर्म और ज्ञप्ति ही उनकी क्रिया है । ऐसा होनेसे केवली-भगवानके बन्ध नहीं होता, क्योंकि ज्ञप्तिक्रिया बन्धका कारण नहीं है किन्तु ज्ञेयार्थ-परिणमनक्रिया अर्थात् ज्ञेय पदार्थोंके सन्मुख वृत्ति होना (-ज्ञेय पदार्थोंके प्रति परिणमित होना) वह बन्धका कारण है ॥ ५२ ॥

---

[१] ज्ञानतत्त्व – प्रज्ञापनकी ३२ वीं गाथा ।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ ज्ञानादभिन्नस्य सौख्यस्य स्वरूपं प्रपञ्चयन् ज्ञानसौख्ययोः हेयोपादेयत्वं चिन्तयति –

अत्थि अमुत्तं मुत्तं अदिंदियं इंदियं च अत्थेसु ।
णाणं च तहा सोक्खं जं तेसु परं च तं णेयं ॥ ५३ ॥

अस्त्यमूर्तं मूर्तमतीन्द्रियमैन्द्रियं चार्थेषु ।
ज्ञानं च तथा सौख्यं यत्तेषु परं च तत् ज्ञेयम् ॥ ५३ ॥

एवं रागद्वेषमोहरहितत्वात्केवलिनां बन्धो नास्तीति कथनरूपेण ज्ञानप्रपञ्चसमाप्तिमुख्यत्वेन चैकसूत्रेणाष्टमस्थलं गतम् ।

अथ ज्ञानप्रपञ्चव्याख्यानानन्तरं ज्ञानाधारसर्वज्ञं नमस्करोति –

तस्स णमाइं लोगो देवासुरमणुअरायसंबंधो ।
भत्तो करेदि णिच्चं उवजुत्तो तं तहा वि अहं ॥ ❀२ ॥

करेदि करोति । स कः । **लोगो** लोकः । कथंभूतः । **देवासुरमणुअरायसंबंधो** देवासुरमनुष्यराजसंबन्धः । पुनरपि कथंभूतः । **भत्तो** भक्तः । **णिच्चं** नित्यं सर्वकालम् । पुनरपि किंविशिष्टः । **उवजुत्तो** उपयुक्त उद्यतः । इत्थंभूतो लोकः कां करोति । **णमाइं** नमस्यां नमस्क्रियाम् । कस्य । **तस्स** तस्य पूर्वोक्तसर्वज्ञस्य । **तं तहा वि अहं** तं सर्वज्ञं तथा तेनैव प्रकारेणाहमपि ग्रन्थकर्ता नमस्करोमीति । अयमत्रार्थः– यथा देवेन्द्रचक्रवर्त्यादयोऽनन्ताक्षयसुखादिगुणास्पदं सर्वज्ञस्वरूपं नमस्कुर्वन्ति, तथैवाहमपि तत्पदाभिलाषी परमभक्त्या प्रणमामि ॥ ❀२ ॥ एवमष्टाभिः स्थलैर्द्वात्रिंशद्गाथास्तदनन्तरं

(अब, पूर्वोक्त आशयको काव्यद्वारा कहकर, केवलज्ञानी आत्माकी महिमा बताकर यह ज्ञान-अधिकार पूर्ण किया जाता है ।)

अर्थ :– जिसने कर्मोंको छेद डाला है ऐसा यह आत्मा भूत, भविष्यत और वर्तमान समस्त विश्वको (अर्थात् तीनों कालकी पर्यायोंसे मुक्त समस्त पदार्थोंको) एक ही साथ जानता हुआ भी मोहके अभावके कारण पररूप परिणमित नहीं होता, इसलिये अब, जिसके समस्त ज्ञेयाकारोंको अत्यन्त विकसित ज्ञप्तिके विस्तारसे स्वयं पी गया है ऐसे तीनोंलोकके पदार्थोंको पृथक् और अपृथक् प्रकाशित करता हुआ वह ज्ञानमूर्ति मुक्त ही रहता है ।

इसप्रकार ज्ञान – अधिकार समाप्त हुआ ।

अर्थोनुं ज्ञान अमूर्त, मूर्त, अतीन्द्रिय ने ऐन्द्रिय छे ।
छे सुखपण एवुंज, त्यां परधान जे ते ग्राह्य छे ॥ ५३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अत्र ज्ञानं सौख्यं च मूर्तमिन्द्रियजं चैकमस्ति। इतरदमूर्तमतीन्द्रियं चास्ति। तत्र यदमूर्तमतीन्द्रियं च तत्प्रधानत्वादुपादेयत्वेन ज्ञातव्यम्। तत्राद्यं मूर्ताभिः क्षायोपशमिकी-भिरुपयोगशक्तिभिस्तथाविधेभ्य इन्द्रियेभ्यः समुत्पद्यमानं परायत्तत्वात् कादाचित्कं, क्रय-कृतप्रवृत्ति सप्रतिपक्षं सहानिवृद्धि च गौणमिति कृत्वा ज्ञानं च सौख्यं च हेयम्। इतर-

---

नमस्कारगाथा चेति समुदायेन त्रयस्त्रिंशत्सूत्रैर्ज्ञानप्रपञ्चनामा तृतीयोऽन्तराधिकारः समाप्तः। अथ सुखप्रपञ्चाभिधानान्तराधिकारेऽष्टादश गाथा भवन्ति। अत्र पञ्चस्थलानि, तेषु प्रथमस्थले 'अत्थि अमुत्तं' इत्याद्यधिकारगाथासूत्रमेकं, तदनन्तरमतीन्द्रियज्ञानमुख्यत्वेन 'जं पेच्छदो' इत्यादि सूत्रमेकं, अथेन्द्रियज्ञानमुख्यत्वेन 'जीवो सयं अमुत्तो' इत्यादि गाथाचतुष्टयं, तदनन्तरमतीन्द्रियसुखमुख्यतया 'जादं सयं' इत्यादि गाथाचतुष्टयं, अथानन्तरमिन्द्रियसुखप्रतिपादनरूपेण गाथाष्टकम्, तत्राप्यष्टकमध्ये प्रथमत इन्द्रियसुखस्य दुःखत्वस्थापनार्थं 'मणआसुरा' इत्यादि गाथाद्वयं, अथ मुक्तात्मनां देहाभावेऽपि सुखमस्तीति ज्ञापनार्थं देहः सुखकारणं न भवतीति कथनरूपेण 'पप्पा इट्ठे विसये' इत्यादि सूत्रद्वयं, तदनन्तरमिन्द्रियविषया अपि सुखकारणं न भवन्तीति कथनेन 'तिमिरहरा' इत्यादि गाथाद्वयम्, अतोऽपि सर्वज्ञनमस्कारमुख्यत्वेन 'तेजोदिट्ठि' इत्यादि गाथाद्वयम्। एवं पञ्चमस्थले अन्तरस्थलचतुष्टयं भवतीति सुखप्रपञ्चाधिकारे समुदायपातनिका॥ अथातीन्द्रियसुखस्योपादेयभूतस्य स्वरूपं प्रपञ्चय-न्नतीन्द्रियज्ञानमतीन्द्रियसुखं चोपादेयमिति, यत्पुनरिन्द्रियजं ज्ञानं सुखं च तद्धेयमिति प्रतिपादनरूपेण

अब, ज्ञानसे अभिन्न सुखका स्वरूप विस्तारपूर्वक वर्णन करते हुए ज्ञान और सुखकी हेयोपादेयताका (अर्थात् कौनसा ज्ञान तथा सुख हेय है और कौनसा उपादेय है वह) विचार करते हैं :–

गाथा ५३

अन्वयार्थ :– [**अर्थेषु ज्ञानं**] पदार्थ सम्बन्धी ज्ञान [**अमूर्तं मूर्तं**] अमूर्त या मूर्त, [**अतीन्द्रियं ऐन्द्रियं च अस्ति**] अतीन्द्रिय या ऐन्द्रिय होता है; [**च तथा सौख्यं**] और इसीप्रकार (अमूर्त या मूर्त, अतीन्द्रिय या ऐन्द्रिय) सुख होता है। [**तेषु च यत् परं**] उसमें जो प्रधान – उत्कृष्ट है [**तत् ज्ञेयं**] वह उपादेयरूप जानना।

टीका :– यहाँ, (ज्ञान तथा सुख दो प्रकारका है –) एक ज्ञान तथा सुख मूर्त और [1]इन्द्रियज है; और दूसरा (ज्ञान तथा सुख) अमूर्त और अतीन्द्रिय है। उसमें जो अमूर्त और अतीन्द्रिय है वह प्रधान होनेसे उपादेयरूप जानना।

वहाँ, पहला ज्ञान तथा सुख मूर्तरूप ऐसी क्षायोपशमिक उपयोगशक्तियोंसे उस-उस प्रकारकी इन्द्रियोंके द्वारा उत्पन्न होता हुआ पराधीन होनेसे [2]कादाचित्क, क्रमशः

---

[1] इन्द्रियज = इन्द्रियों द्वारा उत्पन्न होनेवाला; ऐन्द्रिय। [2]कादाचित्क = कदाचित् – कभी कभी होनेवाला; अनित्य।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

त्पुनरमूर्ताभिश्चैतन्यानुविधायिनीभिरेकाकिनीभिरेवात्मपरिणामशक्तिभिस्तथाविधेभ्योऽती-न्द्रियेभ्यः स्वाभाविकचिदाकारपरिणामेभ्यः समुत्पद्यमानमत्यन्तमात्मायत्तत्वान्नित्यं, युगपत्कृतप्रवृत्ति निःप्रतिपक्षमहानिवृद्धि च मुख्यमिति कृत्वा ज्ञानं सौख्यं चोपादेयम् ॥५३॥

अथातीन्द्रियसौख्यसाधनीभूतमतीन्द्रियज्ञानमुपादेयमभिष्टौति –

जं पेच्छदो अमुत्तं मुत्तेसु अदिंदियं च पच्छण्णं ।
सयलं सगं च इदरं तं णाणं हवदि पच्चक्खं ॥ ५४ ॥

प्रथमतस्तावदधिकारस्थलगाथया स्थलचतुष्टयं सूत्रयति – **अत्थि** अस्ति विद्यते। किं कर्तृ। **णाणं** ज्ञानमिति भिन्नप्रक्रमो व्यवहितसम्बन्धः। किंविशिष्टम् **अमुत्तं मुत्तं** अमूर्तं मूर्तं च। पुनरपि किंवि-शिष्टम्। **अदिंदियं इंदियं च** यदमूर्तं तदतीन्द्रियं मूर्तं पुनरिन्द्रियजम्। इत्थंभूतं ज्ञानमस्ति। केषु विषयेषु। **अत्थेसु** ज्ञेयपदार्थेषु, **तहा सोक्खं च** तथैव ज्ञानवदमूर्तमतीन्द्रियं मूर्तमिन्द्रियजं च सुखमिति। **जं तेसु परं च तं णेयं** यत्तेषु पूर्वोक्तज्ञानसुखेषु मध्ये परमुत्कृष्टमतीन्द्रियं तदुपादेयमिति ज्ञातव्यम्। तदेव विव्रियते – अमूर्ताभिः क्षायिकीभिरतीन्द्रियाभिश्चिदानन्दैकलक्षणाभिः शुद्धात्मशक्तिभिरुत्पन्नत्वा-दतीन्द्रियज्ञानं सुखं चात्माधीनत्वेनाविनश्वरत्वादुपादेयमिति, पूर्वोक्तामूर्तशुद्धात्मशक्तिभ्यो विलक्षणाभिः क्षायोपशमिकेन्द्रियशक्तिभिरुत्पन्नत्वादिन्द्रियजं ज्ञानं सुखं च परायत्तत्वेन विनश्वरत्वाद्धेयमिति

[1] प्रवृत्त होनेवाला, [2]सप्रतिपक्ष और [3]सहानिवृद्धि है इसलिये गौण है ऐसा समझकर वह हेय है अर्थात् छोड़ने योग्य है; और दूसरा ज्ञान तथा सुख अमूर्तरूप ऐसी [4]चैतन्यानु-विधायी एकाकी आत्मपरिणामशक्तियोंसे तथाविध अतीन्द्रिय स्वाभाविक-चिदाकार-परिणामोंके द्वारा उत्पन्न होता हुआ अत्यन्त आत्माधीन होनेसे नित्य युगपत् प्रवर्तमान, निःप्रतिपक्ष और हानिवृद्धिसे रहित है, इसलिये मुख्य है, ऐसा समझकर वह (ज्ञान और सुख) उपादेय अर्थात् ग्रहण करने योग्य है ॥ ५३ ॥

अब, अतीन्द्रिय सुखका साधनभूत (-कारणरूप) अतीन्द्रिय ज्ञान उपादेय है – इसप्रकार उसकी प्रशंसा करते हैं :–

[1] मूर्तिक इन्द्रियज ज्ञान क्रमसे प्रवृत्त होता है; युगपत् नहीं होता; तथा मूर्तिक इन्द्रियज सुख भी क्रमशः होता है, एक ही साथ सर्व इन्द्रियोंके द्वारा या सर्व प्रकारसे नहीं होता।

[2] सप्रतिपक्ष=प्रतिपक्ष – विरोधी सहित। (मूर्त इन्द्रियज ज्ञान अपने प्रतिपक्ष अज्ञानसहित ही होता है, और मूर्त इन्द्रियज सुख उसके प्रतिपक्षभूत दुःख सहित ही होता है।

[3] सहानिवृद्धि=हानिवृद्धि सहित।

[4] चैतन्यानुविधायी=चैतन्यके अनुसार वर्तनेवाली; चैतन्यके अनुकूलरूपसे – विरुद्धरूपसे नहीं वर्तनेवाली।

देखे अमूर्तिक, मूर्तमांय अतीन्द्रिने प्रच्छन्नने ।
ते सर्वने पर के स्वकीयने, ज्ञान ते प्रत्यक्ष छे ॥ ५४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यत्प्रेक्षमाणस्यामूर्तं मूर्तेष्वतीन्द्रियं च प्रच्छन्नम् ।
सकलं स्वकं च इतरत् तद्ज्ञानं भवति प्रत्यक्षम् ।। ५४ ।।

अतीन्द्रियं हि ज्ञानं यदमूर्तं यन्मूर्तेष्वप्यतीन्द्रियं यत्प्रच्छन्नं च तत्सकलं स्वपर-विकल्पांतःपाति प्रेक्षत एव । तस्य खल्वमूर्तेषु धर्माधर्मादिषु, मूर्तेष्वप्यतीन्द्रियेषु

तात्पर्यम् ।। ५३ ।। एवमधिकारगाथया प्रथमस्थलं गतम्। अथ पूर्वोक्तमुपादेयभूतमतीन्द्रियज्ञानं विशेषेण व्यक्तीकरोति – जं यदतीन्द्रियं ज्ञानं कर्तृ। **पेच्छदो** प्रेक्षमाणपुरुषस्य जानाति। किं किम् **अमुत्तं** अमूर्तमतीन्द्रियनिरुपरागसदानन्दैकसुखस्वभावं यत्परमात्मद्रव्यं तत्प्रभृति समस्तामूर्तद्रव्य समूहं **मुत्तेसु अदिंदियं च** मूर्तेषु पुद्गलद्रव्येषु यदतीन्द्रियं परमाण्वादि। **पच्छण्णं** कालाणुप्रभृतिद्रव्य-रूपेण प्रच्छन्नं व्यवहितमन्तरितं, अलोकाकाशप्रदेशप्रभृति क्षेत्रप्रच्छन्नं, निर्विकारपरमानन्दैकसुखा-स्वादपरिणतिरूपपरमात्मनो वर्तमानसमयगतपरिणामास्तत्प्रभृतयो ये समस्तद्रव्याणां वर्तमानसमय-गतपरिणामास्ते कालप्रच्छन्नाः, तस्यैव परमात्मनः सिद्धरूपशुद्धव्यञ्जनपर्यायः शेषद्रव्याणां च ये यथासंभवं व्यञ्जनपर्यायास्तेष्वन्तर्भूताः प्रतिसमयप्रवर्तमानषट्प्रकारप्रवृद्धिहानिरूपा अर्थपर्याया भावप्रच्छन्ना भण्यन्ते। **सयलं** तत्पूर्वोक्तं समस्तं ज्ञेयं द्विधा भवति। कथमिति चेत्। **सगं च इदरं** किमपि यथासंभवं स्वद्रव्यगतं इतरत्परद्रव्यगतं च। तदुभयं यतः कारणाज्जानाति तेन कारणेन **तं**

गाथा ५४

अन्वयार्थ :– [**प्रेक्षमाणस्य यत्**] देखनेवालेका जो ज्ञान [**अमूर्तं**] अमूर्तको, [**मूर्तेषु**] मूर्त पदार्थोंमें भी [**अतीन्द्रियं**] अतीन्द्रियको, [**च प्रच्छन्नं**] और प्रच्छन्नको, [**सकलं**] इन सबको – [**स्वकं च इतरत्**] स्व तथा परको-देखता है, [**तद् ज्ञानं**] वह ज्ञान [**प्रत्यक्षं भवति**] प्रत्यक्ष है ।

टीका :– जो अमूर्त है, जो मूर्त पदार्थोंमें भी अतीन्द्रिय है, और जो [१]प्रच्छन्न है, उस सबको – जो कि स्व और पर इन दो भेदोंमें समा जाता है उसे-अतीन्द्रिय ज्ञान अवश्य देखता है। अमूर्त धर्मास्तिकाय अधर्मास्तिकाय इत्यादि, मूर्त पदार्थोंमें भी अतीन्द्रिय परमाणु इत्यादि, तथा द्रव्यमें प्रच्छन्न काल इत्यादि (-द्रव्य अपेक्षासे गुप्त ऐसे जो काल धर्मास्तिकाय वगैरह), क्षेत्रमें प्रच्छन्न अलोकाकाशके प्रदेश इत्यादि, कालमें प्रच्छन्न असाम्प्रतिक (अतीत-अनागत) पर्यायें तथा भाव-प्रच्छन्न स्थूल पर्यायोंमें [२]अन्तर्लीन सूक्ष्म पर्यायें हैं, उन सबका – जो कि स्व और परके भेदसे विभक्त हैं उनका वास्तवमें उस अतीन्द्रिय ज्ञानके द्रष्टापन है; (अर्थात् उन सबको वह अतीन्द्रिय ज्ञान देखता है) क्योंकि वह (अतीन्द्रिय ज्ञान) प्रत्यक्ष है। जिसे अनन्त शुद्धिका सद्भाव प्रगट हुआ है,

[१] प्रच्छन्न=गुप्त; अन्तरित; ढका हुआ। [२] अन्तर्लीन=अन्दर लीन हुए; अन्तर्मग्न।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

परमाण्वादिषु, द्रव्यप्रच्छन्नेषु कालादिषु, क्षेत्रप्रच्छन्नेष्वलोकाकाशप्रदेशादिषु, कालप्रच्छन्नेष्वसांप्रतिकपर्यायेषु, भावप्रच्छन्नेषु स्थूलपर्यायान्तर्लीनसूक्ष्मपर्यायेषु सर्वेष्वपि स्वपरव्यवस्थाव्यवस्थितेष्वस्ति द्रष्टृत्वं, प्रत्यक्षत्वात्। प्रत्यक्षं हि ज्ञानमुद्भिन्नानन्तशुद्धिसन्निधानमनादिसिद्धचैतन्यसामान्यसंबन्धमेकमेवाक्षनामानमात्मानं प्रतिनियतमितरां सामग्रीममृगयमाणमनन्तशक्तिसद्भावतोऽनन्ततामुपगतं दहनस्येव दाह्याकाराणां ज्ञानस्य ज्ञेयाकाराणामनतिक्रमाद्यथोदितानुभावमनुभवत्तत् केन नाम निवार्येत। अतस्तदुपादेयम् ॥ ५४ ॥

अथेन्द्रियसौख्यसाधनीभूतमिन्द्रियज्ञानं हेयं प्रणिन्दति –

जीवो सयं अमुत्तो मुत्तिगदो तेण मुत्तिणा मुत्तं।
ओगेण्हित्ता जोग्गं जाणदि वा तं ण जाणादि ॥ ५५ ॥

णाणं तत्पूर्वोक्तज्ञानं हवदि भवति। कथंभूतम्। पच्चक्खं प्रत्यक्षमिति। अत्राह शिष्यः–ज्ञानप्रपञ्चाधिकारः पूर्वमेव गतः; अस्मिन् सुखप्रपञ्चाधिकारे सुखमेव कथनीयमिति। परिहारमाह – यदतीन्द्रियं ज्ञानं पूर्वं भणितं तदेवाभेदनयेन सुखं भवतीति ज्ञापनार्थं, अथवा ज्ञानस्य मुख्यवृत्त्या तत्र हेयोपादेयचिन्ता नास्तीति ज्ञापनार्थं वा। एवमतीन्द्रियज्ञानमुपादेयमिति कथनमुख्यत्वेनैकगाथया द्वितीयस्थलं गतम् ॥५४॥

अथ हेयभूतस्येन्द्रियसुखस्य कारणत्वादल्पविषयत्वाच्चेन्द्रियज्ञानं हेयमित्युपदिशति –

ऐसे चैतन्यसामान्यके साथ अनादिसिद्ध सम्बन्धवाले एक ही [3]'अक्ष' नामक आत्माके प्रति जो नियत है (अर्थात् जो ज्ञान आत्माके साथ ही लगा हुआ है – आत्माके द्वारा सीधा प्रवृत्ति करता है), जो (इन्द्रियादिक) अन्य सामग्रीको नहीं ढूँढता और जो अनन्तशक्तिके सद्भावके कारण अनन्तताको (-बेहदताको) प्राप्त है, ऐसे उस प्रत्यक्ष ज्ञानको-जैसे दाह्याकार दहनका अतिक्रमण नहीं करते उसीप्रकार ज्ञेयाकार ज्ञानका अतिक्रम (उल्लंघन) न करनेसे यथोक्त प्रभावका अनुभव करते हुए (-उपर्युक्त पदार्थोंको जानते हुए) कौन रोक सकता है? (अर्थात् कोई नहीं रोक सकता।) इसलिये वह (अतीन्द्रिय ज्ञान) उपादेय है ॥ ५४ ॥

अब, इन्द्रियसुखका साधनभूत (-कारणरूप) इन्द्रियज्ञान हेय है – इसप्रकार उसकी निन्दा करते हैं –

---

[3] अक्ष=आत्माका नाम 'अक्ष' भी है। (इन्द्रियज्ञान अक्ष=अर्थात् इन्द्रियोंके द्वारा जानता है; अतीन्द्रिय प्रत्यक्ष ज्ञान अक्ष अर्थात् आत्माके द्वारा ही जानता है।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

जीवः स्वयममूर्तो मूर्तिगतस्तेन मूर्तेन मूर्तम् ।
अवगृह्य योग्यं जानाति वा तन्न जानाति ।। ५५ ।।

इन्द्रियज्ञानं हि मूर्तोपलम्भकं मूर्तोपलभ्यं च । तद्वान् जीवः स्वयममूर्तोऽपि पंचेन्द्रियात्मकं शरीरं मूर्तमुपागतस्तेन ज्ञप्तिनिष्पत्तौ बलाधाननिमित्ततयोपलम्भकेन मूर्तेन मूर्तं स्पर्शादिप्रधानं वस्तूपलभ्यतामुपागतं योग्यमवगृह्य कदाचित्तदुपर्युपरि शुद्धिसंभवादवगच्छति, कदाचित्तदसंभवान्नावगच्छति, परोक्षत्वात् । परोक्षं हि ज्ञानमतिदृढतराज्ञानतमोग्रन्थिगुण्ठनान्निमीलितस्यानादिसिद्धचैतन्यसामान्यसंबन्धस्याप्यात्मनः स्वयं परिच्छेत्तुमर्थमसमर्थस्योपात्तानुपात्तपरप्रत्ययसामग्रीमार्गणव्यग्रतयात्यंतविसंष्ठुलत्वमवलम्बमानमन -

---

जीवो सयं अमुत्तो जीवस्तावच्छक्तिरूपेण शुद्धद्रव्यार्थिकनयेनामूर्तातीन्द्रियज्ञानसुखस्वभावः, पश्चादनादिबन्धवशात् व्यवहारनयेन **मुत्तिगदो** मूर्तशरीरगतो मूर्तशरीरपरिणतो भवति । **तेण मुत्तिणा** तेन मूर्तशरीरेण मूर्तशरीराधारोत्पन्नमूर्तद्रव्येन्द्रियभावेन्द्रियाधारेण **मुत्तं** मूर्तं वस्तु **ओगेण्हित्ता** अवग्रहादिकेन

गाथा ५५

अन्वयार्थ :– [**स्वयं अमूर्तः**] स्वयं अमूर्त ऐसा [**जीवः**] जीव [**मूर्तिगतः**] मूर्त शरीरको प्राप्त होता हुआ [**तेन मूर्तेन**] उस मूर्त शरीरके द्वारा [**योग्यं मूर्तं**] योग्य मूर्त पदार्थको [**अवगृह्य**] [१]अवग्रह करके (-इन्द्रियग्रहणयोग्य मूर्त पदार्थका अवग्रह करके) [**तत्**] उसे [**जानाति**] जानता है [**वा न जानाति**] अथवा नहीं जानता (-कभी जानता है और कभी नहीं जानता) ।

टीका :– इन्द्रियज्ञानको [२]उपलम्भक भी मूर्त है और [३]उपलभ्य भी मूर्त है । वह इन्द्रियज्ञानवाला जीव स्वयं अमूर्त होने पर भी मूर्त-पंचेन्द्रियात्मक शरीरको प्राप्त होता हुआ, ज्ञप्ति उत्पन्न करनेमें बल-धारणका निमित्त होनेसे जो उपलम्भक है ऐसे उस मूर्त (शरीर) के द्वारा मूर्त ऐसी [४]स्पर्शादिप्रधान वस्तुको – जो कि योग्य हो

---

[१] अवग्रह=मतिज्ञानसे किसी पदार्थको जाननेका प्रारम्भ होने पर पहले ही अवग्रह होता है क्योंकि मतिज्ञान अवग्रह, ईहा, अवाय, और धारणा – इस क्रमसे जानता है ।

[२] उपलम्भक=बतानेवाला, जाननेमें निमित्तभूत । (इन्द्रियज्ञानको पदार्थोंके जाननेमें निमित्तभूत मूर्त पंचेंद्रियात्मक शरीर है) । [३] उपलभ्य=जनाने योग्य ।

[४] स्पर्शादिप्रधान=जिसमें स्पर्श, रस, गंध और वर्ण मुख्य हैं, ऐसो ।

पोते अमूर्तिक जीव मूर्तशरीरगत ए मूर्त थी ।
कदी योग्य मूर्त अवग्रही जाणे कदीक जाणे नहीं ।। ५५ ।।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

न्तायाः शक्तेः परिस्खलनान्नितान्तविक्लवीभूतं महामोहमल्लस्य जीवदवस्थत्वात् परपरिणतिप्रवर्तिताभिप्रायमपि पदे पदे प्राप्तविप्रलम्भमनुपलम्भसंभावनामेव परमार्थतोऽर्हति। अतस्तद्धेयम् ॥ ५५ ॥

क्रमकरणव्यवधानरूपं कृत्वा **जोग्गं** तत्स्पर्शादिमूर्तं वस्तु। कथंभूतम्। इन्द्रियग्रहणयोग्यं **जाणदि** वा **तण्ण जाणादि** स्वावरणक्षयोपशमयोग्यं किमपि स्थूलं जानाति, विशेषक्षयोपशमाभावात् सूक्ष्मं न जानातीति। अयमत्र भावार्थः– इन्द्रियज्ञानं यद्यपि व्यवहारेण प्रत्यक्षं भण्यते, तथापि निश्चयेन केवलज्ञानापेक्षया परोक्षमेव। परोक्षं तु यावतांशेन सूक्ष्मार्थं न जानाति तावतांशेन चित्तखेदकारणं भवति। खेदश्च दुःखं, ततो दुःखजनकत्वादिन्द्रियज्ञानं हेयमिति ॥ ५५ ॥ अथ चक्षुरादीन्द्रियज्ञानं

अर्थात् जो (इन्द्रियोंके द्वारा) उपलभ्य हो उसे – अवग्रह करके, कदाचित् उससे आगे-आगेकी शुद्धिके सद्भावके कारण उसे जानता है और कदाचित् अवग्रह से आगे आगेकी शुद्धिके असद्भावके कारण नहीं जानता, क्योंकि वह (इन्द्रिय ज्ञान) परोक्ष है। परोक्ष-ज्ञान, चैतन्यसामान्यके साथ (आत्माका) अनादिसिद्ध सम्बन्ध होने पर भी जो अति दृढ़तर अज्ञानरूप तमोग्रन्थि (अन्धकारसमूह) द्वारा आवृत हो गया है, ऐसा आत्मा पदार्थको स्वयं जाननेके लिये असमर्थ होनेसे [१]उपात्त और [२]अनुपात्त परपदार्थरूप सामग्री-को ढूँढ़नेकी व्यग्रतासे अत्यन्त चंचल-तरल-अस्थिर वर्तता हुआ, अनन्तशक्तिसे च्युत होनेसे अत्यन्त [३]विक्लव वर्तता हुआ, महामोह-मल्लके जीवित होनेसे परपरिणतिका (-परको परिणमित करनेका) अभिप्राय करनेपर भी पद पद पर ठगाता हुआ, परमार्थतः अज्ञानमें गिने जाने योग्य है। इसलिये वह हेय है।

भावार्थ :– इन्द्रियज्ञान इन्द्रियोंके निमित्तसे मूर्त स्थूल इन्द्रियगोचर पदार्थोंको ही क्षायोपशमिक ज्ञानके अनुसार जान सकता है। परोक्षभूत वह इन्द्रिय ज्ञान इन्द्रिय, प्रकाश, आदि बाह्य सामग्रीको ढूँढ़नेकी व्यग्रताके (-अस्थिरताके) कारण अतिशय चंचल-क्षुब्ध है, अल्प शक्तिवान होनेसे खेद खिन्न है, परपदार्थोंको परिणमित करानेका अभिप्राय होने पर भी पद पद पर ठगा जाता है (क्योंकि पर पदार्थ आत्माके अधीन परिणमित नहीं होते) इसलिये परमार्थसे वह ज्ञान 'अज्ञान' नामके ही योग्य है। इसलिये वह हेय है ॥ ५५ ॥

अब, इन्द्रियाँ मात्र अपने विषयोंमें भी युगपत् प्रवृत्त नहीं होतीं, इसलिये इन्द्रिय-ज्ञान हेय ही है, ऐसा निश्चय करते हैं :–

---

[१] उपात्त=प्राप्त (इन्द्रिय, मन इत्यादि उपात्त पर पदार्थ हैं)

[२] अनुपात्त=अप्राप्त (प्रकाश इत्यादि अनुपात्त पर पदार्थ हैं)

[३] विक्लव=खिन्न; दुःखी, घबराया हुआ।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथेन्द्रियाणां स्वविषयमात्रेऽपि युगपत्प्रवृत्त्यसंभवाद्धेयमेवेन्द्रियज्ञानमित्यवधारयति—

फासो रसो य गंधो वण्णो सद्दो य पोग्गला होंति ।
अक्खाणं ते अक्खा जुगवं ते णेव गेण्हंति ॥ ५६ ॥

स्पर्शो रसश्च गन्धो वर्णः शब्दश्च पुद्गला भवन्ति ।
अक्षाणां तान्यक्षाणि युगपत्तान्नैव गृह्णन्ति ॥ ५६ ॥

रूपादिस्वविषयमपि युगपन्न जानाति तेन कारणेन हेयमिति निश्चिनोति – **फासो रसो य गंधो वण्णो सद्दो व पुग्गला होंति** स्पर्शरसगन्धवर्णशब्दाः पुद्गला मूर्ता भवन्ति । ते च विषयाः । केषाम् । **अक्खाणं** स्पर्शनादीन्द्रियाणां । **ते अक्खा** तान्यक्षाणीन्द्रियाणि कर्तृणि **जुगवं ते णेव गेण्हंति** युगपत्तान्

गाथा ५६

अन्वयार्थ :– [**स्पर्शः**] स्पर्श, [**रसः च**] रस, [**गंधः**] गंध, [**वर्णः**] वर्ण [**शब्दः च**] और शब्द [**पुद्गलाः**] पुद्गल हैं, वे [**अक्षाणां भवन्ति**] इन्द्रियोंके विषय हैं [**तानि अक्षाणि**] (परन्तु) वे इन्द्रियाँ [**तान्**] उन्हें (भी) [**युगपत्**] एक साथ [**न एव गृह्णन्ति**] ग्रहण नहीं करतीं (नहीं जान सकतीं) ।

टीका :– मुख्य स्पर्श, रस, गंध और वर्ण – यह पुद्गलके मुख्य गुण हैं । मुख्य ऐसे स्पर्श-रस-गंध-वर्ण तथा शब्द – जो कि पुद्गल हैं वे – इन्द्रियोंके द्वारा ग्रहण होने योग्य (-ज्ञात होने योग्य), हैं । (किन्तु) इन्द्रियोंके द्वारा वे भी युगपद् (एक साथ) ग्रहण नहीं होते (-जाननेमें नहीं आते), क्योंकि क्षयोपशमकी उसप्रकारकी शक्ति नहीं है । इन्द्रियोंके जो क्षयोपशम नामकी अन्तरंग ज्ञातृशक्ति है वह कौवेकी आँखकी पुतलीकी भाँति क्रमिक प्रवृत्तिवाली होनेसे अनेकतः प्रकाशके लिये (-एक ही साथ अनेक विषयोंको जाननेके लिये) असमर्थ है, इसलिये द्रव्येन्द्रियद्वारोंके विद्यमान होने पर भी समस्त इन्द्रियोंके विषयोंका (-विषयभूत पदार्थोंका) ज्ञान एक ही साथ नहीं होता, क्योंकि इन्द्रिय ज्ञान परोक्ष है ।

रस, गंध, स्पर्श वली वरण ने शब्द जे पौद्गलिक ते ।
छे इन्द्रिविषयो, तेमनेय न इन्द्रियो युगपद ग्रहे ॥ ५६ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

इन्द्रियाणां हि स्पर्शरसगन्धवर्णप्रधानाः शब्दश्च ग्रहणयोग्याः पुद्गलाः। अथेन्द्रियैर्युगपत्तेऽपि न गृह्यन्ते, तथाविधक्षयोपशमनशक्तेरसंभवात्। इन्द्रियाणां हि क्षयोपशमसंज्ञिकायाः परिच्छेत्र्याः शक्तेरन्तरङ्गायाः काकाक्षितारकवत् क्रमप्रवृत्तिवशादनेकतः प्रकाशयितुमसमर्थत्वात्सत्स्वपि द्रव्येन्द्रियद्वारेषु न यौगपद्येन निखिलेन्द्रियार्थावबोधः सिद्धयेत्, परोक्षत्वात् ॥ ५६ ॥

अथेन्द्रियज्ञानं न प्रत्यक्षं भवतीति निश्चिनोति –

स्वकीयविषयानपि न गृह्णन्ति न जानन्तीति। अयमत्राभिप्रायः – यथा सर्वप्रकारोपादेयभूतस्यानन्तसुखस्योपादानकारणभूतं केवलज्ञानं युगपत्समस्तं वस्तु जानत्सत् जीवस्य सुखकारणं भवति, तथेदमिन्द्रियज्ञानं स्वकीयविषयेऽपि युगवत्परिज्ञानाभावात्सुखकारणं न भवति ॥ ५६ ॥ अथेन्द्रियज्ञानं

भावार्थ :– कौवेकी दो आँखें होती हैं किन्तु पुतली एक ही होती है। कौवेको जिस आँखसे देखना हो उस आँखमें पुतली आ जाती है; उस समय वह दूसरी आँखसे नहीं देख सकता। ऐसा होने पर भी वह पुतली इतनी जल्दी दोनों आँखोंमें आती-जाती है कि लोगोंको ऐसा मालूम होता है कि दोनों आँखोंमें दो भिन्न भिन्न पुतलियाँ हैं; किन्तु वास्तवमें वह एक ही होती है। ऐसी ही दशा क्षायोपशमिक ज्ञानकी है। द्रव्य-इन्द्रियरूपी द्वार तो पाँच हैं, किन्तु क्षायोपशमिक ज्ञान एक समय एक इन्द्रिय द्वारा ही जाना जा सकता है; उस समय दूसरी इन्द्रियोंके द्वारा कार्य नहीं होता। जब क्षायोपशमिक ज्ञान नेत्रके द्वारा वर्णको देखनेका कार्य करता है तब वह शब्द, गंध, रस या स्पर्शको नहीं जान सकता; अर्थात् जब उस ज्ञानका उपयोग नेत्रके द्वारा वर्णके देखनेमें लगा होता है तब कानमें कौनसे शब्द पड़ते हैं या नाकमें कैसी गन्ध आती है इत्यादि ख्याल नहीं रहता। यद्यपि ज्ञानका उपयोग एक विषयमेंसे दूसरेमें अत्यन्त शीघ्रतासे बदलता है, इसलिये स्थूलदृष्टिसे देखनेमें ऐसा लगता है कि मानों सभी विषय एक ही साथ ज्ञात होते हों, तथापि सूक्ष्म दृष्टिसे देखने पर क्षायोपशमिक ज्ञान एक समयमें एक ही इन्द्रियके द्वारा प्रवर्तमान होता हुआ स्पष्टतया भासित होता है। इस-प्रकार इन्द्रियाँ अपने विषयोंमें भी क्रमशः प्रवर्तमान होनेसे परोक्षभूत इन्द्रियज्ञान हेय है ॥ ५६ ॥

अब, यह निश्चय करते हैं कि इन्द्रियज्ञान प्रत्यक्ष नहीं है :–

गाथा ५७

अन्वयार्थ :– [तानि अक्षाणि] वे इन्द्रियां [परद्रव्यं] पर द्रव्य हैं [आत्मन.

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

परदव्वं ते अक्खा णेव सहावो त्ति अप्पणो भणिदा ।
उवलद्धं तेहि कधं पच्चक्खं अप्पणो होदि ॥ ५७ ॥

परद्रव्यं तान्यक्षाणि नैव स्वभाव इत्यात्मनो भणितानि ।
उपलब्धं तैः कथं प्रत्यक्षमात्मनो भवति ॥ ५७ ॥

आत्मानमेव केवलं प्रति नियतं किल प्रत्यक्षं । इदं तु व्यतिरिक्तास्तित्वयोगितया परद्रव्यतामुपगतैरात्मनः स्वभावतां मनागप्यसंस्पृशद्भिरिन्द्रियैरुपलभ्योपजन्यमानं न नामात्मनः प्रत्यक्षं भवितुमर्हति ॥ ५७ ॥

प्रत्यक्षं न भवतीति व्यवस्थापयति – **परदव्वं ते अक्खा** तानि प्रसिद्धान्यक्षाणीन्द्रियाणि परद्रव्यं भवन्ति । कस्य । आत्मनः । **णेव सहावो त्ति अप्पणो भणिदा** योऽसौ विशुद्धज्ञानदर्शनस्वभाव आत्मनः संबन्धी तत्स्वभावानि निश्चयेन न भणितानीन्द्रियाणि । कस्मात् । भिन्नास्तित्वनिष्पन्नत्वात् । **उवलद्धं तेहि** उपलब्धं ज्ञातं यत्प्रञ्चेन्द्रियविषयभूतं वस्तु तैरिन्द्रियैः **कधं पच्चक्खं अप्पणो होदि** तद्वस्तु कथं प्रत्यक्षं भवत्यात्मनो, न कथमपीति । तथैव च नानामनोरथव्याप्तिविषये प्रतिपाद्य-प्रतिपादकादिविकल्पजालरूपं यन्मनस्तदपीन्द्रियज्ञानवन्निश्चयेन परोक्षं भवतीति ज्ञात्वा किं कर्तव्यम् । सकलैकाखण्डप्रत्यक्षप्रतिभासमयपरमज्योतिःकारणभूते स्वशुद्धात्मस्वरूपभावनासमुत्पन्नपरमाह्लादै-कलक्षणसुखसंवित्त्याकारपरिणतिरूपे रागादिविकल्पोपाधिरहिते स्वसंवेदनज्ञाने भावना कर्तव्या

स्वभावः इति] उन्हें आत्मस्वभावरूप [**न एव भणितानि**] नहीं कहा है , [**तैः**] उनके द्वारा [**उपलब्धं**] ज्ञात [**आत्मनः**] आत्माका [**प्रत्यक्षं**] प्रत्यक्ष [**कथं भवति**] कैसे हो सकता है ?

टीका :– जो केवल आत्माके प्रति ही नियत हो वह (ज्ञान) वास्तवमें प्रत्यक्ष है । यह (इन्द्रियज्ञान) तो, जो भिन्न अस्तित्ववाली होनेसे परद्रव्यत्वको प्राप्त हुई हैं, और आत्मस्वभावत्वको किंचित्मात्र स्पर्श नहीं करतीं (आत्मस्वभावरूप किंचित्मात्र भी नहीं हैं) ऐसी इन्द्रियोंके द्वारा उपलब्धि करके (ऐसी इन्द्रियोंके निमित्तसे पदार्थोंको जानकर) उत्पन्न होता है, इसलिये वह (इन्द्रियज्ञान) आत्माके लिये प्रत्यक्ष नहीं हो सकता ।

भावार्थ :– जो सीधा आत्माके द्वारा ही जानता है वह ज्ञान प्रत्यक्ष है । इन्द्रिय-ज्ञान परद्रव्यरूप इन्द्रियोंके द्वारा जानता है इसलिये वह प्रत्यक्ष नहीं है ॥ ५७ ॥

ते इन्द्रियो परद्रव्य, जीवस्वभाव भाखी न तेमने ।
तेनाथी जे उपलब्ध ते प्रत्यक्ष कइ रीत जीवने ? ॥ ५७ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ परोक्षप्रत्यक्षलक्षणमुपलक्षयति –

जं परदो विण्णाणं तं तु परोक्खं ति भणिदमट्ठेसु ।
जदि केवलेण णादं हवदि हि जीवेण पच्चक्खं ॥ ५८ ॥

यत्परतो विज्ञानं तत्तु परोक्षमिति भणितमर्थेषु ।
यदि केवलेन ज्ञातं भवति हि जीवेन प्रत्यक्षम् ॥ ५८ ॥

इत्यभिप्रायः ॥ ५७ ॥ अथ पुनरपि प्रकारान्तरेण प्रत्यक्षपरोक्षलक्षणं कथयति – **जं परदो विण्णाणं तं तु परोक्ख त्ति भणिदं** यत्परतः सकाशाद्विज्ञानं परिज्ञानं भवति तत्पुनः परोक्षमिति भणितम् । केषु विषयेषु । **अट्ठेसु** ज्ञेयपदार्थेषु । **जदि केवलेण णादं हवदि हि** यदि केवलेनासहायेन ज्ञातं भवति हि स्फुटम् । केन कर्तृभूतेन । **जीवेण** जीवेन । तर्हि **पच्चक्खं** प्रत्यक्षं भवतीति । अतो विस्तरः–

अब, परोक्ष और प्रत्यक्षके लक्षण बतलाते हैं :–

गाथा ५८

अन्वयार्थ : [**परतः**] परके द्वारा होनेवाला [**यत्**] जो [**अर्थेषु विज्ञानं**] पदार्थ सम्बन्धी विज्ञान है [**तत् तु**] वह तो [**परोक्षं इति भणितं**] परोक्ष कहा गया है, [**यदि**] यदि [**केवलेन जीवेण**] मात्र जीवके द्वारा ही [**ज्ञातं भवति हि**] जाना जाये तो [**प्रत्यक्षं**] वह ज्ञान प्रत्यक्ष है ।

टीका :– निमित्तताको प्राप्त (निमित्तरूप बने हुए) ऐसे जो परद्रव्यभूत अंतःकरण (मन), इन्द्रिय, परोपदेश, [१]उपलब्धि, संस्कार या प्रकाशादिक हैं उनके द्वारा होनेवाला जो स्वविषयभूत पदार्थका ज्ञान, वह परके द्वारा [२]प्रादुर्भावको प्राप्त होनेसे 'परोक्ष'-के रूपमें जाना जाता है, और अंतःकरण, इन्द्रिय, परोपदेश, उपलब्धि [3]संस्कार या [४]प्रकाशादिक सब परद्रव्यकी अपेक्षा रखे बिना एकमात्र आत्मस्वभावको ही कारणरूपसे ग्रहण करके सर्व द्रव्य-पर्यायोंके समूहमें एक समय ही व्याप्त होकर प्रवर्तमान ज्ञान वह केवल आत्माके द्वारा ही उत्पन्न होनेसे 'प्रत्यक्ष' के रूपमें जाना जाता है ।

---

१. उपलब्धि = ज्ञानावरणीय कर्मके क्षयोपशमके निमित्तसे उत्पन्न पदार्थोंको जाननेकी शक्ति । (यह 'लब्ध' शक्ति जब 'उपयुक्त' होती है, तभी पदार्थ ज्ञात होता है ।)

२ प्रादुर्भावको प्राप्त = प्रगट, उत्पन्न । ३संस्कार = पूर्व ज्ञात पदार्थकी धारणा ।

४ चक्षुइन्द्रिय द्वारा रूपी पदार्थको देखनेमें प्रकाश भी निमित्तरूप होता है ।

अर्थो तणुं जे ज्ञान परतः थाय तेह परोक्ष छे ।
जीवमात्रथी ज जणाय जो, तो ज्ञान ते प्रत्यक्ष छे ॥ ५८ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यत्तु खलु परद्रव्यभूतादन्तःकरणादिन्द्रियात्परोपदेशादुपलब्धेः संस्कारादालोकादेर्वा निमित्ततामुपगतात् स्वविषयमुपगतस्यार्थस्य परिच्छेदनं तत् परतः प्रादुर्भवत्परोक्षमित्यालक्ष्यते। यत्पुनरन्तःकरणमिन्द्रियं परोपदेशमुपलब्धिसंस्कारमालोकादिकं वा समस्तमपि परद्रव्यमनपेक्ष्यात्मस्वभावमेवैकं कारणत्वेनोपादाय सर्वद्रव्यपर्यायजातमेकपद एवाभिव्याप्य प्रवर्तमानं परिच्छेदनं तत् केवलादेवात्मनः संभूतत्वात् प्रत्यक्षमित्यालक्ष्यते। इह हि सहजसौख्यसाधनीभूतमिदमेव महाप्रत्यक्षमभिप्रेतमिति ॥ ५८ ॥

अथैतदेव प्रत्यक्षं पारमार्थिकसौख्यत्वेनोपक्षिपति –

जादं सयं समंतं णाणमणंतत्थवित्थडं विमलं।
रहिदं तु ओग्गहादिहिं सुहं ति एगंतियं भणिदं ॥ ५९ ॥

जातं स्वयं समंतं ज्ञानमनन्तार्थविस्तृतं विमलम्।
रहितं त्ववग्रहादिभिः सुखमिति ऐकान्तिकं भणितम् ॥ ५९ ॥

इन्द्रियमनःपरोपदेशालोकादिबहिरङ्गनिमित्तभूतात्तथैव च ज्ञानावरणीयक्षयोपशमजनितार्थग्रहणशक्तिरूपाया उपलब्धेरर्थावधारणरूपसंस्काराच्चान्तरङ्गकारणभूतात्सकाशादुत्पद्यते यद्विज्ञानं तत्पराधीनत्वात्परोक्षमित्युच्यते। यदि पुनः पूर्वोक्तसमस्तपरद्रव्यमनपेक्ष्य केवलाच्छुद्धबुद्धैकस्वभावात्परमात्मनः सकाशात्समुत्पद्यते ततोऽक्षनामानमात्मानं प्रतीत्योत्पद्यमानत्वात्प्रत्यक्षं भवतीति सूत्राभिप्रायः ॥ ५८ ॥ एवं हेयभूतेन्द्रियज्ञानकथनमुख्यतया गाथाचतुष्टयेन तृतीयस्थलं गतम्। अथाभेदनयेन पञ्चविशेषणविशिष्टं केवलज्ञानमेव सुखमिति प्रतिपादयति – **जादं** जातं उत्पन्नम्। किं कर्तृ। **णाणं** केवलज्ञानम्। कथं जातम्। **सयं** स्वयमेव। पुनरपि किंविशिष्टम्। **समत्तं** परिपूर्णम्। पुनरपि किंरूपम्।

यहाँ (इस गाथामें) सहज सुखका साधनभूत ऐसा यही महाप्रत्यक्ष ज्ञान इच्छनीय माना गया है – उपादेय माना गया है (ऐसा आशय समझना) ॥ ५८ ॥

अब, इसी प्रत्यक्षज्ञानको पारमार्थिक सुखरूप बतलाते हैं :–

गाथा ५९

अन्वयार्थ :– [**स्वयं जातं**] अपने आप ही उत्पन्न [**समंतं**] समंत (सर्व प्रदेशोंसे जानता हुआ) [**अनन्तार्थविस्तृतं**] अनन्त पदार्थोंमें विस्तृत [**विमलं**] विमल [**तु**] और [**अवग्रहादिभिः रहितं**] अवग्रहादिसे रहित-[**ज्ञानं**] ऐसा ज्ञान [**ऐकान्तिकं सुखं**] ऐकान्तिक सुख है [**इति भणितं**] ऐसा (सर्वज्ञदेवने) कहा है।

स्वयमेव जात, समंत, अर्थ अनन्तमां विस्तृत ने।
अवग्रह-ईहादि रहित, निर्मळ ज्ञान सुख एकान्त छे ॥ ५९ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

स्वयं जातत्वात्, समन्तत्वात्, अनन्तार्थविस्तृतत्वात्, विमलत्वात्, अवग्रहादिरहितत्वाच्च प्रत्यक्षं ज्ञानं सुखमैकान्तिकमिति निश्चीयते, अनाकुलत्वैकलक्षणत्वात्सौख्यस्य। यतो हि परतो जायमानं पराधीनतया, असमंतमितरद्वारावरणेन, कतिपयार्थप्रवृत्तमितरार्थबुभुत्सया, समलमसम्यगवबोधेन, अवग्रहादिसहितं क्रमकृतार्थग्रहणखेदेन परोक्षं ज्ञानमत्यन्तमाकुलं भवति। ततो न तत् परमार्थतः सौख्यम्। इदं तु पुनरनादिज्ञानसामान्यस्वभावस्योपरि महाविकाशेनाभिव्याप्य स्वत एव व्यवस्थितत्वात्स्वयं जायमानमात्माधीनतया, समन्तात्मप्रदेशान् परमसमक्षज्ञानोपयोगीभूताभिव्याप्य व्यवस्थितत्वात्समन्तम् अशेषद्वारापावरणेन, प्रसभं निपीयसमस्तवस्तुज्ञेयाकारं परमं वैश्वरूप्यमभिव्याप्य व्यवस्थितत्वादनंतार्थविस्तृतम् समस्तार्थबुभुत्सया सकलशक्तिप्रतिबंधककर्मसामान्यनिः-

---

अणंतत्थवित्थडं अनन्तार्थविस्तीर्णम्। पुनः कीदृशम्। **विमलं** संशयादिमलरहितम्। पुनरपि कीदृक्। **रहियं तु ओग्गहादिहिं** अवग्रहादिरहितं चेति। एवं पञ्चविशेषणविशिष्टं यत्केवलज्ञानं **सुहं ति एगंतियं भणियं** तत्सुखं भणितम्। कथंभूतम्। ऐकान्तिकं नियमेनेति। तथा हि – परनिरपेक्षत्वेन चिदानन्दैकस्वभावं निजशुद्धात्मानमुपादानकारणं कृत्वा समुत्पद्यमानत्वात्स्वयं जायमानं सत्,

---

टीका :– (१) 'स्वयं उत्पन्न' होनेसे, (२) [१]'समंत' होनेसे, (३) 'अनन्तपदार्थोंमें विस्तृत' होनेसे, (४) 'विमल' होनेसे और (५) 'अवग्रहादि रहित' होनेसे, प्रत्यक्षज्ञान [२]ऐकान्तिक सुख है यह निश्चित होता है, क्योंकि एक मात्र अनाकुलता ही सुखका लक्षण है।

(इसी बातको विस्तारपूर्वक समझाते हैं :–)

(१) 'परके द्वारा उत्पन्न' होता हुआ पराधीनताके कारण (२) [३]'असमंत' होनेसे [४]इतर द्वारोंके आवरणके कारण (३) 'मात्र कुछ पदार्थोंमें प्रवर्तमान' होता हुआ अन्य पदार्थोंको जाननेकी इच्छाके कारण, (४) 'समल' होनेसे असम्यक् अवबोधके कारण (-कर्ममलयुक्त होनेसे संशय-विमोह-विभ्रम सहित जाननेके कारण), और (५) 'अवग्रहादि सहित' होनेसे क्रमशः होनेवाले [५]पदार्थग्रहणके खेदके कारण (-इन कारणोंको लेकर), परोक्ष ज्ञान अत्यन्त आकुल है; इसलिये वह परमार्थसे सुख नहीं है।

---

[१] समन्त=चारों ओर-सर्व भागोंमें वर्तमान; सर्व आत्मप्रदेशोंसे जानता हुआ; समस्त; सम्पूर्ण, अखण्ड।

[२] ऐकान्तिक=परिपूर्ण; अंतिम, अकेला; सर्वथा।

[३] परोक्ष ज्ञान खंडित है अर्थात् वह अमुक प्रदेशोंके द्वारा ही जानता है; जैसे-वर्ण आँख जितने प्रदेशोंके द्वारा ही (इन्द्रियज्ञानसे) ज्ञात होता है; अन्य द्वार बन्द हैं। [४] इतर=दूसरे; अन्य; उसके सिवायके।

[५] पदार्थग्रहण अर्थात् पदार्थका बोध एक ही साथ न होनेपर अवग्रह, ईहा इत्यादि क्रमपूर्वक होनेसे खेद होता है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

क्रान्ततया परिस्पष्टप्रकाशभास्वरं स्वभावमभिव्याप्य व्यवस्थितत्वाद्विमलम् सम्यगवबोधेन, युगपत्समर्पितत्रैसमयिकात्मस्वरूपं लोकालोकमभिव्याप्य व्यवस्थितत्वादवग्रहादिरहितम् क्रमकृतार्थग्रहणखेदाभावेन प्रत्यक्षं ज्ञानमनाकुलं भवति। ततस्तत्पारमार्थिकं खलु सौख्यम् ॥ ५९ ॥

सर्वशुद्धात्मप्रदेशाधारत्वेनोत्पन्नत्वात्समस्तं सर्वज्ञानाविभागपरिच्छेदपरिपूर्णं सत्, समस्तावरणक्षयेनोत्पन्नत्वात्समस्तज्ञेयपदार्थग्राहकत्वेन विस्तीर्णं सत्, संशयविमोहविभ्रमरहितत्वेन सूक्ष्मादिपदार्थपरिच्छित्तिविषयेऽत्यन्तविशदत्वाद्विमलं सत्, क्रमकरणव्यवधानजनितखेदाभावादवग्रहादिरहितं च सत्, यदेवं पञ्चविशेषणविशिष्टं क्षायिकज्ञानं तदनाकुलत्वलक्षणपरमानन्दैकरूपपारमार्थिकसुखात्संज्ञालक्षणप्रयोजनादिभेदेऽपि निश्चयेनाभिन्नत्वात्पारमार्थिकसुखं भण्यते – इत्यभिप्रायः ॥ ५९॥

और यह प्रत्यक्ष ज्ञान तो अनाकुल है, क्योंकि- (१) अनादि ज्ञानसामान्यरूप स्वभाव पर महा विकाससे व्याप्त होकर स्वतः ही रहनेसे 'स्वयं उत्पन्न होता है, इसलिये आत्माधीन है, (और आत्माधीन होनेसे आकुलता नहीं होती) ; (२) समस्त आत्मप्रदेशोंमें परम [1]समक्ष ज्ञानोपयोगरूप होकर, व्याप्त होनेसे 'समंत है', इसलिये अशेष द्वार खुले हुए हैं (और इसप्रकार कोई द्वार बन्द न होनेसे आकुलता नहीं होती) ; (३) समस्त वस्तुओंके ज्ञेयाकारोंको सर्वथा पी जानेसे [2]परम विविधतामें व्याप्त होकर रहनेसे 'अनन्त पदार्थोंमें विस्तृत है,' इसलिये सर्व पदार्थोंको जाननेकी इच्छाका अभाव है (और इसप्रकार किसी पदार्थको जाननेकी इच्छा न होनेसे आकुलता नहीं होती) ; (४) सकल शक्तिको रोकनेवाला कर्मसामान्य (ज्ञानमेंसे) निकल जानेसे (ज्ञान) अत्यन्त स्पष्ट प्रकाशके द्वारा प्रकाशमान (-तेजस्वी) स्वभावमें व्याप्त होकर रहनेसे 'विमल है' इसलिये सम्यक् रूपसे (-बराबर) जानता है (और इसप्रकार संशयादि रहिततासे जाननेके कारण आकुलता नहीं होती) ; तथा (५) जिनने त्रिकालका अपना स्वरूप युगपत् समर्पित किया है (-एकही समय बताया है) ऐसे लोकालोकमें व्याप्त होकर रहनेसे 'अवग्रहादि रहित है' इसलिये क्रमशः होनेवाले पदार्थ ग्रहणके खेदका अभाव है।-इसप्रकार (उपरोक्त पाँच कारणोंसे) प्रत्यक्ष ज्ञान अनाकुल है। इसलिये वास्तवमें वह पारमार्थिक सुख है।

भावार्थ :– क्षायिकज्ञान-केवलज्ञान एकान्त सुखस्वरूप हैं ॥ ५९ ॥

---

[1] समक्ष=प्रत्यक्ष

[2] परमविविधता=समस्त पदार्थसमूह जो कि अनन्त विविधतामय है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ केवलस्यापि परिणामद्वारेण खेदस्य संभवादैकान्तिकसुखत्वं नास्तीति प्रत्याचष्टे –

जं केवलं ति णाणं तं सोक्खं परिणमं च सो चेव ।
खेदो तस्स ण भणिदो जम्हा घादी खयं जादा ॥ ६० ॥

यत्केवलमिति ज्ञानं तत्सौख्यं परिणामश्च स चैव ।
खेदस्तस्य न भणितो यस्मात् घातीनि क्षयं जातानि ॥ ६० ॥

अथानन्तपदार्थपरिच्छेदनात्केवलज्ञानेऽपि खेदोऽस्तीति पूर्वपक्षे सति परिहारमाह – **जं केवलं ति णाणं तं सोक्खं** यत्केवलमिति ज्ञानं तत्सौख्यं भवति, तस्मात् **खेदो तस्स ण भणिदो** तस्य केवलज्ञानस्य खेदो दुःखं न भणितम् । तदपि कस्मात् । **जम्हा घादी खयं जादा** यस्मान्मोहादिघातिकर्माणि क्षयं गतानि । तर्हि तस्यानन्तपदार्थपरिच्छित्तिपरिणामो दुःखकारणं भविष्यति । नैवम् । **परिणमं च सो चेव** तस्य केवलज्ञानस्य संबन्धी परिणामश्च स एव सुखरूप एवेति । इदानीं विस्तरः– ज्ञानदर्शनावरणोदये सति युगपदर्थान् ज्ञातुमशक्यत्वात् क्रमकरणव्यवधानग्रहणे खेदो भवति, आवरणद्वयाभावे

अब, ऐसे अभिप्रायका खंडन करते हैं कि 'केवलज्ञानको भी परिणामके द्वारा [१]खेदका सम्भव होनेसे केवलज्ञान ऐकान्तिक सुख नहीं है :–

गाथा ६०

अन्वयार्थ :– [**यत्**] जो [**केवलं इति ज्ञानं**] 'केवल' नामका ज्ञान है [**तत् सौख्यं**] वह सुख है [**परिणामः च**] परिणाम भी [**सः च एव**] वही है [**तस्य खेदः न भणितः**] उसे खेद नहीं कहा है (अर्थात् केवलज्ञानमें सर्वज्ञदेवने खेद नहीं कहा) [**यस्मात्**] क्योंकि [**घातीनि**] घातिकर्म [**क्षयं जातानि**] क्षयको प्राप्त हुए हैं ।

टीका :– यहाँ (केवलज्ञानके सम्बन्धमें), खेद क्या, (२) परिणाम क्या तथा (३) केवलज्ञान और सुखका व्यतिरेक (-भेद) क्या, कि जिससे केवलज्ञानको ऐकान्तिक सुखत्व न हो ?

(१) खेदके आयतन (-स्थान) घातिकर्म हैं, केवल परिणाममात्र नहीं । घातिकर्म

---

[१] खेद=थकावट; संताप; दुःख ।

जे ज्ञान 'केवल' तेज सुख, परिणाम पण वणी तेज छे ।
भाख्यो न तेमां खेद जेथी घातिकर्म विनिष्ट छे ॥ ६० ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अत्र को हि नाम खेदः, कश्च परिणामः, कश्च केवलसुखयोर्व्यतिरेकः, यतः केवलस्यैकान्तिकसुखत्वं न स्यात्। खेदस्यायतनानि घातिकर्माणि, न नाम केवलं परिणाममात्रम्। घातिकर्माणि हि महामोहोत्पादकत्वादुन्मत्तकवदतस्मिंस्तद्बुद्धिमाधाय परिच्छेद्यमर्थं प्रत्यात्मानं यतः परिणामयन्ति, ततस्तानि तस्य प्रत्यर्थं परिणम्य श्राम्यतः खेदनिदानतां प्रतिपद्यन्ते। तदभावात्कुतो हि नाम केवले खेदस्योद्भेदः। यतश्च त्रिसमयावच्छिन्नसकलपदार्थपरिच्छेद्याकारवैश्वरूप्यप्रकाशनास्पदीभूतं चित्रभित्तिस्थानीयमनन्तस्वरूपं स्वयमेव परिणमत्केवलमेव परिणामः, ततः कुतोऽन्यः परिणामो यद्द्वारेण

सति युगपद्ग्रहणे केवलज्ञानस्य खेदो नास्तीति सुखमेव। तथैव तस्य भगवतो जगत्त्रयकालत्रयवर्तिसमस्तपदार्थयुगपत्परिच्छित्तिसमर्थमखण्डैकरूपं प्रत्यक्षपरिच्छित्तिमयं स्वरूपं परिणमत्सत् केवलज्ञानमेव परिणामो, न च केवलज्ञानाद्भिन्नपरिणामोऽस्ति येन खेदो भविष्यति। अथवा परिणामविषये द्वितीयव्याख्यानं क्रियते – युगपदनन्तपदार्थपरिच्छित्तिपरिणामेऽपि वीर्यान्तरायनिरवशेषक्षयादनन्तवीर्यत्वात् खेदकारणं नास्ति, तथैव च शुद्धात्मसर्वप्रदेशेषु समरसीभावेन परिणममानानां सहजशुद्धानन्दैकलक्षणसुखरसास्वादपरिणतिरूपामात्मनः सकाशादभिन्नामनाकुलतां प्रति खेदो नास्ति।

महा मोहके उत्पादक होनेसे धतूरेकी भाँति [१]अतत्में तत् बुद्धि धारण करवाकर आत्माको ज्ञेयपदार्थके प्रति परिणमन कराते हैं; इसलिये वे घातिकर्म, प्रत्येक पदार्थके प्रति परिणमित हो-होकर थकनेवाले आत्माके लिये खेदके कारण होते हैं। उनका (घातिकर्मोंका) अभाव होनेसे केवलज्ञानमें खेद कहाँसे प्रगट होगा? (२) और तीनकालरूप तीन भेद जिसमें किये जाते हैं ऐसे समस्त पदार्थोंकी ज्ञेयाकाररूप (विविधताको प्रकाशित करनेका स्थानभूत केवलज्ञान, चित्रित् दीवारकी भाँति, स्वयं) ही अनन्तस्वरूप स्वयमेव परिणमित होनेसे केवलज्ञान ही परिणाम है। इसलिये अन्य परिणाम कहाँ हैं कि जिनसे खेदकी उत्पत्ति हो? (३) और, केवलज्ञान समस्त स्वभावप्रतिघातके[२] अभावके कारण निरंकुश अनन्त शक्तिके उल्लसित होनेसे समस्त त्रैकालिक लोकालोकके-आकारमें व्याप्त होकर [३]कूटस्थतया अत्यंत निष्कंप है, इसलिये आत्मासे अभिन्न ऐसा सुख-लक्षणभूत अनाकुलताको धारण करता हुआ केवलज्ञान ही सुख है, इसलिये केवलज्ञान और सुखका व्यतिरेक कहाँ है?

---

[१] अतत्में तत्बुद्धि=वस्तु जिसस्वरूप न होय उसस्वरूप होनेकी मान्यता; जैसे कि – जड़में चेतनबुद्धि (अर्थात् जड़में चेतनकी मान्यता) दुःखमें सुखबुद्धि वगैरह।

[२] प्रतिघात=विघ्न; रुकावट; हनन; घात।

[३] कूटस्थ=सदा एकरूप रहनेवाला; अचल (केवलज्ञान सर्वथा अपरिणामी नहीं है, किन्तु वह एक ज्ञेयसे दूसरे ज्ञेयके प्रति नहीं बदलता – सर्वथा तीनों कालके समस्त ज्ञेयाकारोंको जानता रहता है, इसलिये उसे कूटस्थ कहा है)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

खेदस्यात्मलाभः। यतश्च समस्तस्वभावप्रतिघाताभावात्समुल्लसितनिरकुङ्शानन्त-शक्तितया सकलं त्रैकालिकं लोकालोकाकारमभिव्याप्य कूटस्थत्वेनात्यन्तनिःप्रकम्पं व्यवस्थितत्वादनाकुलतां सौख्यलक्षणभूतामात्मनोऽव्यतिरिक्तां बिभ्राणं केवलमेव सौख्यम्, ततः कुतः केवलसुखयोर्व्यतिरेकः। अतः सर्वथा केवलं सुखमैकान्तिकमनुमोद-नीयम् ॥ ६० ॥

संज्ञालक्षणप्रयोजनादिभेदेऽपि निश्चयेनाभेदरूपेण परिणममानं केवलज्ञानमेव सुखं भण्यते। ततः स्थितमेतत्केवलज्ञानाद्भिन्नं सुखं नास्ति। तत एव केवलज्ञाने खेदो न संभवतीति ॥ ६० ॥ अथ

इससे, यह सर्वथा अनुमोदन करनेयोग्य है (-आनन्दसे संमत करने योग्य है) कि 'केवलज्ञान ऐकान्तिक सुख है'।

भावार्थ :– केवलज्ञानमें भी परिणाम होते रहनेसे वहाँ भी थकान लगेगी और इसलिये दुःख होगा अतः केवलज्ञान ऐकान्तिक सुख कैसे हो सकता है? ऐसी शंकाका समाधान यहाँ किया गया है :–

(१) परिणाम मात्र थकावट या दुःखका कारण नहीं है, किन्तु घातिकर्मोंके निमित्तसे होनेवाला परोन्मुख परिणाम थकावट या दुःखका कारण है, केवलज्ञानमें घातिकर्म अविद्यमान होनेसे वहाँ थकावट या दुःख नहीं है। (२) केवलज्ञान स्वयं ही परिणमनशील है; परिणमन केवलज्ञानका स्वरूप ही है उपाधि नहीं। यदि परिणामका नाश हो जाये तो केवलज्ञानका ही नाश हो जाये। इसप्रकार परिणाम केवलज्ञानका सहज स्वरूप होनेसे केवलज्ञानको परिणामके द्वारा खेद नहीं हो सकता – नहीं होता। (३) केवलज्ञान समस्त त्रैकालिक लोकालोकके आकारको (-समस्त पदार्थोंके त्रैकालिक ज्ञेयाकारसमूहको) सर्वदा अडोलरूपसे जानता हुआ अत्यन्त निष्कंप-स्थिर-अक्षुब्ध-अनाकुल है; और अनाकुल होनेसे सुखी है – सुखस्वरूप – है, क्योंकि अनाकुलता सुखका ही लक्षण है। इसप्रकार केवलज्ञान और अक्षुब्धता – अनाकुलता भिन्न नहीं होनेसे केवल-ज्ञान और सुख भिन्न नहीं हैं।

इसप्रकार (१) घातिकर्मोंके अभावके कारण, (२) परिणमन कोई उपाधि न होनेसे और (३) केवलज्ञान निष्कंप-स्थिर-अनाकुल होनेसे केवलज्ञान सुखस्वरूप ही है ॥ ६० ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ पुनरपि केवलस्य सुखस्वरूपतां निरूपयन्नुपसंहरति –

णाणं अत्थंतगयं लोयालोएसु वित्थडा दिट्ठी ।
णट्ठमणिट्ठं सव्वं इट्ठं पुण जं तु तं लद्धं ॥ ६१ ॥

ज्ञानमर्थान्तिगतं लोकालोकेषु विस्तृता दृष्टिः ।
नष्टमनिष्टं सर्वमिष्टं पुनर्यत्तु तल्लब्धम् ॥ ६१ ॥

पुनरपि केवलज्ञानस्य सुखस्वरूपतां प्रकारान्तरेण दृढयति – **णाणं अत्थंतगयं** ज्ञानं केवलज्ञानमर्थान्तिगतं ज्ञेयान्तप्राप्तं **लोयालोएसु वित्थडा दिट्ठी** लोकालोकयोर्विस्तृता दृष्टिः केवलदर्शनम् । **णट्ठमणिट्ठं सव्वं** अनिष्टं दुःखमज्ञानं च तत्सर्वं नष्टं **इट्ठं पुण जं हि तं लद्धं** इष्टं पुनर्यद् ज्ञानं सुखं च हि स्फुटं तत्सर्वं लब्धमिति । तद्यथा – स्वभावप्रतिघाताभावहेतुकं सुखं भवति । स्वभावो हि केवलज्ञानदर्शनद्वयं,

---

अब, पुनः 'केवल (अर्थात् केवलज्ञान) सुखस्वरूप है' ऐसा निरूपण करते हुए उपसंहार करते हैं :–

गाथा ६१

अन्वयार्थ :– [**ज्ञानं**] ज्ञान [**अर्थान्तिगतं**] पदार्थोंके पारको प्राप्त है [**दृष्टिः**] और दर्शन [**लोकालोकेषु विस्तृताः**] लोकालोकमें विस्तृत है; [**सर्वं अनिष्टं**] सर्व अनिष्ट [**नष्टं**] नष्ट हो चुका है [**पुनः**] और [**यत् तु**] जो [**इष्टं**] इष्ट है [**तत्**] वह सब [**लब्धं**] प्राप्त हुआ है । (इसलिये केवल (अर्थात् केवलज्ञान) सुखस्वरूप है)

टीका :– सुखका कारण स्वभावप्रतिघातका अभाव है । आत्माका स्वभाव दर्शन-ज्ञान है; (केवलदशामें) उनके (-दर्शन-ज्ञानके) प्रतिघातका अभाव है, क्योंकि दर्शन लोकालोकमें विस्तृत होनेसे और ज्ञान पदार्थोंके पारको प्राप्त होनेसे वे (दर्शन-ज्ञान) स्वच्छन्दता पूर्वक (-स्वतंत्रता पूर्वक, बिना अंकुश, किसीसे बिना दबे) विकसित हैं (इसप्रकार दर्शन-ज्ञानरूप स्वभावके प्रतिघातका अभाव है) इसलिये स्वभावके प्रति-घातका अभाव जिसका कारण है ऐसा सुख अभेदविवक्षासे केवलज्ञानका स्वरूप है ।

(प्रकारान्तरसे केवलज्ञानकी सुखस्वरूपता बतलाते हैं :–) और, केवल अर्थात्

अर्थान्तिगत छे ज्ञान, लोकालोकविस्तृत दृष्टि छे ।
छे नष्ट सर्व अनिष्ट ने जे इष्ट ते सौ प्राप्त छे ॥ ६१ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

स्वभावप्रतिघाताभावहेतुकं हि सौख्यम्। आत्मनो हि दृशिज्ञप्ती स्वभावः तयोर्लोकालोकविस्तृतत्वेनार्थान्तिगतत्वेन च स्वच्छन्दविजृम्भितत्वाद्भवति प्रतिघाताभावः। ततस्तद्धेतुकं सौख्यमभेदविवक्षायां केवलस्य स्वरूपम्। किंच केवलं सौख्यमेव; सर्वानिष्टप्रहाणात्, सर्वेष्टोपलम्भाच्च। यतो हि केवलावस्थायां सुखप्रतिपत्तिविपक्षभूतस्य दुःखस्य साधनतामुपगतमज्ञानमखिलमेव प्रणश्यति, सुखस्य साधनीभूतं तु परिपूर्णं ज्ञानमुपजायेत, ततः केवलमेव सौख्यमित्यलं प्रपञ्चेन ॥ ६१ ॥

अथ केवलिनामेव पारमार्थिकसुखमिति श्रद्धापयति –

णो सद्दहंति सोक्खं सुहेसु परमं ति विगदघादीणं।
सुणिदूण ते अभव्वा भव्वा वा तं पडिच्छंति ॥ ६२ ॥

तयोः प्रतिघात आवरणद्वयं, तस्याभावः केवलिनां, ततः कारणात्स्वभावप्रतिघाताभावहेतुकमक्षयानन्तसुखं भवति। यतश्च परमानन्दैकलक्षणसुखप्रतिपक्षभूतमाकुलत्वोत्पादकमनिष्टं दुःखमज्ञानं च नष्टं, यतश्च पूर्वोक्तलक्षणसुखाविनाभूतं त्रैलोक्योदरविवरवर्तिसमस्तपदार्थयुगपत्प्रकाशकमिष्टं ज्ञानं च लब्धं, ततो ज्ञायते केवलिनां ज्ञानमेव सुखमित्यभिप्रायः ॥ ६१ ॥ अथ पारमार्थिकसुखं केवलिनामेव,

---

केवलज्ञान सुख ही है, क्योंकि सर्व अनिष्टोंका नाश हो चुका है और सम्पूर्ण इष्टकी प्राप्ति हो चुकी है। केवल-अवस्थामें, सुखोपलब्धिके विपक्षभूत दुःखोंके साधनभूत अज्ञानका सम्पूर्णतया नाश हो जाता है और सुखका साधनभूत परिपूर्ण ज्ञान उत्पन्न होता है, इसलिये केवल ही सुख है। अधिक विस्तारसे बस होओ ॥ ६१ ॥

अब, ऐसी श्रद्धा कराते हैं कि केवलज्ञानियोंको ही पारमार्थिक सुख होता है

गाथा ६२

अन्वयार्थ :– '[**विगतघातिनां**] जिनके घातिकर्म नष्ट होगये हैं उनका [**सौख्यं**] सुख [**सुखेषु परमं**] (सर्व) सुखोंमें परम अर्थात् उत्कृष्ट है' [**इति श्रुत्वा**] ऐसा वचन सुनकर [**न श्रद्दधति**] जो श्रद्धा नहीं करते [**ते अभव्याः**] वे अभव्य हैं; [**भव्याः वा**] और भव्य [**तत्**] उसे [**प्रतीच्छन्ति**] स्वीकार (-आदर) करते हैं – उसकी श्रद्धा करते हैं।

सूणी 'घातिकर्मविहीननुं सुख सौ सुखे उत्कृष्ट छे'।
श्रद्धे न तेह अभव्य छे, ने भव्य ते संमत करे ॥ ६२ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

न श्रद्दधति सौख्यं सुखेषु परममिति विगतघातिनाम् ।
श्रुत्वा ते अभव्या भव्या वा तत्प्रतीच्छन्ति ।। ६२ ।।

इह खलु स्वभावप्रतिघातादाकुलत्वाच्च मोहनीयादिकर्मजालशालिनां सुखाभासेऽप्यपारमार्थिकी सुखमिति रूढिः । केवलिनां तु भगवतां प्रक्षीणघातिकर्मणां स्वभावप्रतिघाताभावादनाकुलत्वाच्च यथोदितस्य हेतोर्लक्षणस्य च सद्भावात्पारमार्थिकं सुखमिति श्रद्धेयम् । न किलैवं येषां श्रद्धानमस्ति ते खलु मोक्षसुखसुधापानदूरवर्तिनो मृगतृष्णाम्भो-

---

संसारिणां ये मन्यन्ते तेऽभव्या इति निरूपयति – **णो सद्दहंति** नैव श्रद्दधति न मन्यन्ते। किम्। **सोक्खं** निर्विकारपरमाह्लादैकसुखम्। कथंभूतं न मन्यन्ते। **सुहेसु परमं ति** सुखेषु मध्ये तदेव परमसुखम्। केषां संबन्धि यत्सुखम्। **विगदघादीणं** विगतघातिकर्मणां केवलिनाम्। किं कृत्वापि न मन्यन्ते। **सुणिदूण** 'जादं सयं समत्तं' इत्यादिपूर्वोक्तगाथात्रयकथितप्रकारेण श्रुत्वापि। **ते अभव्वा** ते अभव्याः। ते हि जीवा वर्तमानकाले सम्यक्त्वरूपभव्यत्वव्यक्त्यभावादभव्या भण्यन्ते, न पुनः सर्वथा। **भव्वा वा तं पडिच्छंति** ये वर्तमानकाले सम्यक्त्वरूपभव्यत्वव्यक्तिपरिणतास्तिष्ठन्ति ते तदनन्तसुखमिदानीं मन्यन्ते। ये च सम्यक्त्वरूपभव्यत्वव्यक्त्या भाविकाले परिणमिष्यन्ति ते च दूरभव्या अग्रे श्रद्धानं कुर्युरिति। अयमत्रार्थः– मारणार्थं तलवरगृहीततस्करस्य मरणमिव यद्यपीन्द्रियसुखमिष्टं न भवति, तथापि तलवरस्थानीयचारित्रमोहोदयेन मोहितः सन्निरुपरागस्वात्मोत्थसुखमल-

---

टीका :– इस लोकमें मोहनीयआदिकर्मजालवालोंके स्वभावप्रतिघातके कारण और आकुलताके कारण सुखाभास होने पर भी उस सुखाभासको 'सुख' कहनेकी अपारमार्थिक रूढ़ि है; और जिनके घातिकर्म नष्ट हो चुके हैं ऐसे केवलीभगवानके, स्वभावप्रतिघातके अभावके कारण और अनाकुलताके कारण सुखके यथोक्त [१]कारणका और [२]लक्षणका सद्भाव होनेसे पारमार्थिक सुख है – ऐसी श्रद्धा करने योग्य है। जिन्हें ऐसी श्रद्धा नहीं है वे – मोक्षसुखके सुधापानसे दूर रहनेवाले अभव्य – मृगतृष्णाके जलसमूहको ही देखते (-अनुभव करते) हैं; और जो उस वचनको इसीसमय स्वीकार (-श्रद्धा) करते हैं वे शिवश्री के (-मोक्षलक्ष्मी के) भाजन–आसन्नभव्य हैं, और जो आगे जाकर स्वीकार करेंगे वे दूरभव्य हैं।

भावार्थ :– 'केवलीभगवानके ही पारमार्थिक सुख है' ऐसा वचन सुनकर जो कभी इसका स्वीकार – आदर – श्रद्धा नहीं करते वे कभी मोक्ष प्राप्त नहीं करते; जो उपरोक्त वचन सुनकर अंतरंगसे उसकी श्रद्धा करते हैं वे ही मोक्षको प्राप्त करते हैं।

---

[१] सुखका कारण स्वभाव प्रतिघातका अभाव है।

[२] सुखका लक्षण अनाकुलता है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

भारमेवाभव्याः पश्यन्ति। ये पुनरिदमिदानीमेव वचः प्रतीच्छन्ति ते शिवश्रियो भाजनं समासन्नभव्याः भवन्ति। ये तु पुरा प्रतीच्छन्ति ते तु दूरभव्या इति ॥ ६२ ॥

अथ परोक्षज्ञानिनामपारमार्थिकमिन्द्रियसुखं विचारयति –

मणुआसुरामरिंदा अहिद्दुदा इन्दिएहिं सहजेहिं।
असहंता तं दुक्खं रमंति विसएसु रम्मेसु ॥ ६३ ॥

मनुजासुरामरेन्द्राः अभिद्रुता इन्द्रियैः सहजैः।
असहमानास्तद्दुःखं रमन्ते विषयेषु रम्येषु ॥ ६३ ॥

भमानः सन् सरागसम्यग्दृष्टिरात्मनिन्दादिपरिणतो हेयरूपेण तदनुभवति। ये पुनर्वीतरागसम्यग्दृष्टयः शुद्धोपयोगिनस्तेषां, मत्स्यानां स्थलगमनमिवाग्निप्रवेश इव वा, निर्विकारशुद्धात्मसुखाच्च्यवनमपि दुःखं प्रतिभाति। तथा चोक्तम् – "समसुखशीलितमनसां च्यवनमपि द्वेषमेति किमु कामाः। स्थलमपि दहति झषाणां किमङ्गपुनरङ्गमङ्गाराः" ॥ ६२ ॥ एवमभेदनयेन केवलज्ञानमेव सुखं भण्यते इति कथनमुख्यतया गाथाचतुष्टयेन चतुर्थस्थलं गतम्। अथ संसारिणामिन्द्रियज्ञानसाधकमिन्द्रियसुखं विचारयति-

---

जो वर्तमानमें श्रद्धा करते हैं वे आसन्नभव्य हैं और जो भविष्यमें श्रद्धा करेंगे वे दूरभव्य हैं ॥ ६२ ॥

अब, परोक्षज्ञानवालोंके अपारमार्थिक इन्द्रियसुखका विचार करते हैं :–

गाथा ६३

अन्वयार्थ :– [**मनुजासुरामरेन्द्राः**] मनुष्येंद्र (चक्रवर्ती) असुरेन्द्र और सुरेन्द्र [**सहजैः इन्द्रियैः**] स्वाभाविक (परोक्षज्ञानवालोंको जो स्वाभाविक है ऐसी) इन्द्रियोंसे [**अभिद्रुताः**] पीड़ित वर्तते हुए [**तद् दुःखं**] उस दुःखको [**असहमानाः**] सहन न कर सकनेसे [**रम्येषु विषयेषु**] रम्य विषयोंमें [**रमन्ते**] रमण करते हैं।

टीका :– प्रत्यक्ष ज्ञानके अभावके कारण परोक्ष ज्ञानका आश्रय लेनेवाले इन प्राणियोंको उसकी (-परोक्ष ज्ञानकी) सामग्रीरूप इन्द्रियोंके प्रति निजरससे ही (-स्वभावसे ही) मैत्री प्रवर्तती है। अब इन्द्रियोंके प्रति मैत्रीको प्राप्त उन प्राणियोंको उदयप्राप्त महामोहरूपी कालाग्निने ग्रास बना लिया है, इसलिये तप्त लोहेके गोलेकी

सुर-असुर-नरपति पीड़ित वर्ते सहज इन्द्रियो वड़े।
नव सही सके ते दुःख तेथी रम्य विषयोमां रमे ॥ ६३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अमीषां प्राणिनां हि प्रत्यक्षज्ञानाभावात्परोक्षज्ञानमुपसर्पतां तत्सामग्रीभूतेषु स्वरसत एवेन्द्रियेषु मैत्री प्रवर्तते। अथ तेषां तेषु मैत्रीमुपगतानामुदीर्णमहामोहकालानलकवलितानां तप्तायोगोलानामिवात्यन्तमुपात्ततृष्णानां तद्दुःखवेगमसहमानानां व्याधिसात्म्यतामुपगतेषु रम्येषु विषयेषु रतिरुपजायते। ततो व्याधिस्थानीयत्वादिन्द्रियाणां व्याधिसात्म्यसमत्वाद्विषयाणां च न छद्मस्थानां पारमार्थिकं सौख्यम् ॥ ६३ ॥

अथ यावदिन्द्रियाणि तावत्स्वभावादेव दुःखमेवं वितर्कयति –

जेसिं विसएसु रदी तेसिं दुक्खं वियाण सब्भावं।
जइ तं ण हि सब्भावं वावारो णत्थि विसयत्थं ॥ ६४ ॥

येषां विषयेषु रतिस्तेषां दुःखं विजानीहि स्वाभावम्।
यदि तन्न हि स्वभावो व्यापारो नास्ति विषयार्थम् ॥ ६४ ॥

मणुआसुरामरिंदा मनुजासुरामरेन्द्राः। कथंभूताः। **अहिद्दुदा इंदियेहिं सहजेहिं** अभिद्रुताः कदर्थिताः दुःखिताः। कैः। इन्द्रियैः सहजैः। **असहंता तं दुक्खं** तद्दुःखोद्रेकमसहमानाः सन्तः। **रमंते विसएसु रम्मेसु** रमन्ति विषयेषु रम्याभासेषु इति। अथ विस्तरः– मनुजादयो जीवा अमूर्तातींद्रियज्ञानसुखास्वादमलभमानाः सन्तः मूर्तेन्द्रियज्ञानसुखनिमित्तं तन्निमित्तपञ्चेन्द्रियेषु मैत्रीं कुर्वन्ति। ततश्च तप्तलोहगोलकानामुदकाकर्षणमिव विषयेषु तीव्रतृष्णा जायते। तां तृष्णामसहमाना विषयाननुभवन्ति इति। ततो ज्ञायते पञ्चेन्द्रियाणि व्याधिस्थानीयानि, विषयाश्च तत्प्रतीकारौषधस्थानीया इति संसारिणां वास्तवं सुखं नास्ति ॥ ६३ ॥ अथ यावदिन्द्रियव्यापारस्तावद्दुःखमेवेति कथयति – **जेसिं विसयेसु रदी**

भाँति (-जैसे गरम किया हुआ लोहेका गोला पानीको शीघ्र ही सोख लेता है) अत्यन्त तृष्णा उत्पन्न हुई है; उस दुःखके वेगको सहन न कर सकनेसे उन्हें व्याधिके प्रतिकारके समान (-रोगमें थोडासा आराम जैसा अनुभव करानेवाले उपचारके समान) रम्य विषयोंमें रति उत्पन्न होती है। इसलिये इन्द्रियाँ व्याधि समान होनेसे और विषय व्याधिके प्रतिकार समान होनेसे छद्मस्थोंके पारमार्थिक सुख नहीं है ॥ ६३ ॥

अब, जहाँ तक इन्द्रियाँ हैं वहाँ तक स्वभावसे ही दुःख है, ऐसा न्यायसे निश्चित करते हैं :–

गाथा ६४

अन्वयार्थ :– [**येषां**] जिन्हें [**विषयेषु रतिः**] विषयोंमें रति है, [**तेषां**] उन्हें [**दुःखं**]

विषयो विषे रति जेमने दुःख छे स्वाभाविक तेमन।
जो ते न होय स्वभाव तो व्यापार नहि विषयो विषे ॥ ६४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

येषां जीवदवस्थानि हतकानीन्द्रियाणि, न नाम तेषामुपाधिप्रत्ययं दुःखम्, किंतु स्वाभाविकमेव, विषयेषु रतेरवलोकनात्। अवलोक्यते हि तेषां स्तम्बेरमस्य करेणुकुट्टनी-गात्रस्पर्श इव, सफरस्य बडिशामिषस्वाद इव, इन्दिरस्य संकोचसंमुखारविन्दामोद इव, पतङ्गस्य प्रदीपार्चीरूप इव, कुरङ्गस्य मृगयुगेयस्वर इव, दुर्निवारेन्द्रियवेदनावशीकृताना-मासन्ननिपातेष्वपि विषयेष्वभिपातः। यदि पुनर्न तेषां दुःखं स्वाभाविकमभ्युपगम्येत तदोपशांतशीतज्वरस्य संस्वेदनमिव, प्रहीणदाहज्वरस्यारनालपरिषेक इव, निवृत्तनेत्र-संरम्भस्य च वटाचूर्णावचूर्णमिव, विनष्टकर्णशूलस्य बस्तमूत्रपूरणमिव, रूढव्रणस्या-लेपनदानमिव, विषयव्यापारो न दृश्येत। दृश्यते चासौ। ततः स्वभावभूतदुःखयोगिन एव जीवदिन्द्रियाः परोक्षज्ञानिनः ॥ ६४ ॥

येषां निर्विषयातीन्द्रियपरमात्मस्वरूपविपरीतेषु विषयेषु रतिः **तेसिं दुक्खं वियाण सब्भावं** तेषां बहिर्मुख-जीवानां निजशुद्धात्मद्रव्यसंवित्तिसमुत्पन्ननिरुपाधिपारमार्थिकसुखविपरीतं स्वभावेनैव दुःखमस्तीति विजानीहि। कस्मादिति चेत्। पञ्चेन्द्रियविषयेषु रतेरवलोकनात्। **जइ तं ण हि सब्भावं** यदि तद्दुःखं स्वभावे नास्ति हि स्फुटं **वावारो णत्थि विसयत्थं** तर्हि विषयार्थं व्यापारो नास्ति न घटते। व्याधिस्थानामौषधेष्विव विषयार्थं व्यापारो दृश्यते चेत्तत एव ज्ञायते दुःखमस्तीत्यभिप्रायः

दुःख [**स्वाभावं**] स्वाभाविक [**विजानीहि**] जानो; [**हि**] क्योंकि [**यदि**] यदि [**तद्**] वह दुःख [**स्वभावं न**] स्वभाव न हो तो [**विषयार्थं**] विषयार्थमें [**व्यापारः**] व्यापार [**न अस्ति**] न हो।

टीका :— जिनकी हत (निकृष्ट, निंद्य) इन्द्रियाँ जीवित (-विद्यमान) हैं, उन्हें उपाधिके कारण (बाह्य संयोगोंके कारण, औपाधिक) दुःख नहीं है किन्तु स्वाभाविक ही है, क्योंकि उनकी विषयोंमें रति देखी जाती है। जैसे – हाथी हथिनीरूपी कुट्टनीके शरीर-स्पर्शकी ओर, मछली बंसीमें फँसे हुए मांसके स्वादकी ओर, भ्रमर बन्द हो जानेवाले कमलके गंधकी ओर, पतंगा दीपककी ज्योतिके रूपकी ओर और हिरन शिकारीके संगीतके स्वरकी ओर दौड़ते हुए दिखाई देते हैं उसीप्रकार – दुर्निवार इन्द्रियवेदनाके वशीभूत होते हुए वे यद्यपि विषयोंका नाश अति निकट है (अर्थात् विषय क्षणिक हैं) तथापि, विषयोंकी ओर दौड़ते दिखाई देते हैं। और यदि 'उनका दुःख स्वाभाविक है' ऐसा स्वीकार न किया जाये तो जैसे – जिसका शीतज्वर उपशांत होगया है, वह पसीना आनेके लिये उपचार करता तथा जिसका दाह्यज्वर उतर गया है वह काँजीसे शरीरके तापको उतारता तथा जिसकी आँखोंका दुःख दूर होगया है वह वटाचूर्ण (-शंख इत्यादिका चूर्ण) आँजता तथा जिसका कर्णशूल नष्ट होगया हो वह

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ मुक्तात्मसुखप्रसिद्धये शरीरस्य सुखसाधनतां प्रतिहन्ति –

पप्पा इट्ठे विसये फासेहिं समस्सिदे सहावेण ।
परिणममाणो अप्पा सयमेव सुहं ण हवदि देहो ॥ ६५ ॥

प्राप्येष्टान् विषयान् स्पर्शैः समाश्रितान् स्वभावेन ।
परिणममान आत्मा स्वयमेव सुखं न भवति देहः ॥ ६५ ॥

॥ ६४ ॥ एवं परमार्थेनेन्द्रियसुखस्य दुःखस्थापनार्थं गाथाद्वय गतम् । अथ मुक्तात्मनां शरीराभावेऽपि सुखमस्तीति ज्ञापनार्थं शरीरं सुखकारणं न स्यादिति व्यक्तीकरोति – **पप्पा** प्राप्य । कान् । **इट्ठे विषये** इष्टपञ्चेन्द्रियविषयान् । कथंभूतान् । **फासेहिं समस्सिदे** स्पर्शनादीन्द्रियरहितशुद्धात्मतत्त्वविलक्षणैः स्पर्शनादिभिरिन्द्रियैः समाश्रितान् सम्यक् प्राप्यान् ग्राह्यान्, इत्थंभूतान् विषयान् प्राप्य । स कः । **अप्पा** आत्मा कर्ता । किंविशिष्टः । **सहावेण परिणममाणो** अनन्तसुखोपादानभूतशुद्धात्मस्वभावविपरीतेनाशुद्धसुखोपादानभूतेनाशुद्धात्मस्वभावेन परिणममानः इत्थंभूतः सन् **सयमेव सुहं** स्वयमेवेन्द्रियसुखं भवति परिणमति । **ण हवदि देहो** देहः पुनरचेतनत्वात्सुखं न भवतीति । अयमत्रार्थः –

कानमें फिर बकरेका मूत्र डालता दिखाई नहीं देता और जिसका घाव भर जाता है वह फिर लेप करता दिखाई नहीं देता – इसीप्रकार उनके विषय व्यापार देखनेमें नहीं आना चाहिये; किन्तु उनके वह (विषयप्रवृत्ति) तो देखी जाती है । इससे (सिद्ध हुआ कि) जिनके इन्द्रियाँ जीवित हैं ऐसे परोक्षज्ञानियोंके दुःख स्वाभाविक ही है ।

भावार्थ :– परोक्षज्ञानियोंके स्वभावसे ही दुःख है, क्योंकि उनके विषयोंमें रति वर्तती है; कभी-कभी तो वे, असह्य तृष्णाकी दाहसे (-तीव्र इच्छारूपी दुःखके कारण) मरने तककी परवाह न करके क्षणिक इन्द्रियविषयोंमें कूद पड़ते हैं । यदि उन्हें स्वभावसे ही दुःख न हो तो विषयोंमें रति ही न होनी चाहिये । जिसके शरीरका दाहदुःख नष्ट होगया हो वह बाह्य शीतोपचारमें रति क्यों करेगा ? इससे सिद्ध हुआ कि परोक्षज्ञानियोंके दुःख स्वाभाविक ही है ॥ ६४ ॥

अब, मुक्त आत्माके सुखकी प्रसिद्धिके लिये, शरीर सुखका साधन होनेकी बातका खंडन करते हैं । (सिद्ध भगवानके शरीरके बिना भी सुख होता है यह बात स्पष्ट समझानेके लिये, संसारावस्थामें भी शरीर सुखका–इन्द्रियसुखका–साधन नहीं है, ऐसा निश्चित करते हैं) :–

इन्द्रियसमाश्रित इष्ट विषयो पामीने, निज भावथी ।
जीव प्रणमतो स्वयमेव सुखरूप थाय, देह थतो नथी ॥ ६५ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अस्य खल्वात्मनः सशरीरावस्थायामपि न शरीरं सुखसाधनतामापद्यमानं पश्यामः, यतस्तदापि पीतोन्मत्तकरसैरिव प्रकृष्टमोहवशवर्तिभिरिन्द्रियैरिमेऽस्माकमिष्टा इति क्रमेण विषयानभिपतद्भिरसमीचीनवृत्तितामनुभवन्नुपरुद्धशक्तिसारेणापि ज्ञानदर्शनवीर्यात्मकेन निश्चयकारणतामुपागतेन स्वभावेन परिणममानः स्वयमेवायमात्मा सुखतामापद्यते। शरीरं त्वचेतनत्वादेव सुखत्वपरिणतेर्निश्चयकारणतामनुपगच्छन्न जातु सुखतामुपढौकत इति ॥ ६५ ॥

कर्मावृतसंसारिजीवानां यदिन्द्रियसुखं तत्रापि जीव उपादानकारणं, न च देहः। देहकर्मरहितमुक्तात्मनां पुनर्यदनन्तातीन्द्रियसुखं तत्र विशेषेणात्मैव कारणमिति ॥ ६५ ॥ अथ मनुष्यशरीरं मा

गाथा ६५

अन्वयार्थ :– [**स्पर्शैः समाश्रितान्**] स्पर्शनादिक इन्द्रियाँ जिनका आश्रय लेती हैं ऐसे [**इष्टान् विषयान्**] इष्ट विषयोंको [**प्राप्य**] पाकर [**स्वभावेन**] (अपने शुद्ध) स्वभावसे [**परिणममानः**] परिणमन करता हुआ [**आत्मा**] आत्मा [**स्वयमेव**] स्वयं ही [**सुखं**] सुखरूप (-इंद्रियसुखरूप) होता है [**देहः न भवति**] देह सुखरूप नहीं होती।

टीका :– वास्तवमें इस आत्माके लिये सशरीर अवस्थामें भी शरीर सुखका साधन हो ऐसा हमें दिखाई नहीं देता; क्योंकि तब भी, मानों उन्मादजनक मदिराका पान किया हो ऐसी, प्रबल मोहके वश वर्तनेवाली, 'यह (विषय) हमें इष्ट है' इसप्रकार विषयोंकी ओर दौड़ती हुई इन्द्रियोंके द्वारा असमीचीन (अयोग्य) परिणतिका अनुभव करनेसे जिसकी [१]शक्तिकी उत्कृष्टता (-परम शुद्धता) रुक गई है ऐसे भी (अपने) ज्ञान-दर्शन-वीर्यात्मक स्वभावमें – जो कि (सुखके) निश्चयकारणरूप है – परिणमन करता हुआ यह आत्मा स्वयमेव सुखत्वको प्राप्त करता है, (-सुखरूप होता है,) और शरीर तो अचेतन ही होनेसे सुखत्वपरिणतिका निश्चय-कारण न होता हुआ किंचित् मात्र भी सुखत्वको प्राप्त नहीं करता।

भावार्थ :– सशरीर अवस्थामें भी आत्मा ही सुखरूप (-इन्द्रियसुखरूप) परिणतिमें परिणमन करता है, शरीर नहीं; इसलिये सशरीर अवस्थामें भी सुखका निश्चय कारण आत्मा ही है अर्थात् इन्द्रियसुखका भी वास्तविक कारण आत्माका ही अशुद्ध स्वभाव है। अशुद्ध स्वभावमें परिणमित आत्मा ही स्वयमेव इन्द्रियसुखरूप होता

---

[१] इन्द्रियसुखरूप परिणमन करनेवाले आत्माकी ज्ञानदर्शन-वीर्यात्मक स्वभावकी उत्कृष्ट शक्ति रुक गई है, अर्थात् स्वभाव अशुद्ध होगया है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथैतदेव दृढयति –

एगंतेण हि देहो सुहं ण देहिस्स कुणदि सग्गे वा ।
विसयवसेण दु सोक्खं दुक्खं वा हवदि सयमादा ॥ ६६ ॥

एकान्तेन हि देहः सुखं न देहिनः करोति स्वर्गे वा ।
विषयवशेन तु सौख्यं दुःखं वा भवति स्वयमात्मा ॥ ६६ ॥

अयमत्र सिद्धांतो यद्दिव्यवैक्रियिकत्वेऽपि शरीरं न खलु सुखाय कल्प्येतेतीष्टानामनिष्टानां वा विषयाणां वशेन सुखं वा दुःखं वा स्वयमेवात्मा स्यात् ॥ ६६ ॥

भवतु, देवशरीरं दिव्यं तत्किल सुखकारणं भविष्यतीत्याशङ्कां निराकरोति – **एगंतेण हि देहो सुहं ण देहिस्स कुणदि** एकान्तेन हि स्फुटं देहः कर्ता सुखं न करोति । कस्य । देहिनः संसारिजीवस्य । क्व । **सग्गे वा** आस्तां तावन्मनुष्याणां मनुष्यदेहः सुखं न करोति, स्वर्गे वा योऽसौ दिव्यो देवदेहः सोऽप्युपचारं विहाय सुखं न करोति । **विसयवसेण दु सोक्खं दुक्खं वा हवदि सयमादा** किंतु निश्चयेन निर्विषयामूर्तस्वाभाविकसदानन्दैकसुखस्वभावोऽपि व्यवहारेणानादिकर्मबन्धवशाद्विषयाधीनत्वेन परिणम्य सांसारिकसुखं दुःखं वा स्वयमात्मैव भवति, न च देह इत्यभिप्रायः ॥ ६६ ॥ एवं मुक्तात्मनां

है । उसमें शरीर कारण नहीं है; क्योंकि सुखरूप परिणति और शरीर सर्वथा भिन्न होनेके कारण सुख और शरीरमें निश्चयसे किंचित्मात्र भी कार्यकारणता नहीं है ॥६५॥

अब, इसी बातको दृढ़ करते हैं :–

गाथा ६६

अन्वयार्थ :– [**एकान्तेन हि**] एकांतसे अर्थात् नियमसे [**स्वर्गे वा**] स्वर्गमें भी [**देहः**] शरीर [**देहिनः**] शरीरी (-आत्माको) [**सुखं न करोति**] सुख नहीं देता [**विषयवशेन तु**] परन्तु विषयोंके वशसे [**सौख्यं दुःखं वा**] सुख अथवा दुःखरूप [**स्वयं आत्मा भवति**] स्वयं आत्मा होता है ।

टीका :– यहाँ यह सिद्धांत है कि – भले ही दिव्य वैक्रियिकता प्राप्त हो तथापि 'शरीर सुख नहीं दे सकता'; इसलिये, आत्मा स्वयंही इष्ट अथवा अनिष्ट विषयोंके वशसे सुख अथवा दुःखरूप स्वयं ही होता है ।

अेकान्तथी स्वर्गेय देह करे नहीं सुख देहीने ।
पण विषयवश स्वयमेव आत्मा सुख वा दुःख थाय छे ॥ ६६ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथात्मनः स्वयमेव सुखपरिणामशक्तियोगित्वाद्विषयाणामकिंचित्करत्वं द्योतयति –

तिमिरहरा जइ दिट्ठी जणस्स दीवेण णत्थि कायव्वं ।
तह सोक्खं सयमादा विसया किं तत्थ कुव्वंति ॥ ६७ ॥

तिमिरहरा यदि दृष्टिर्जनस्य दीपेन नास्ति कर्तव्यम् ।
तथा सौख्यं स्वयमात्मा विषयाः किं तत्र कुर्वन्ति ॥ ६७ ॥

यथा हि केषांचिन्नक्तंचराणां चक्षुषः स्वयमेव तिमिरविकरणशक्तियोगित्वान्न तदपाकरणप्रवणेन प्रदीपप्रकाशादिना कार्यं, एवमस्यात्मनः संसारे मुक्तौ वा स्वयमेव

देहाभावेऽपि सुखमस्तीति परिज्ञानार्थं संसारिणामपि देहः सुखकारणं न भवतीतिकथनरूपेण गाथाद्वयं गतम् । अथात्मनः स्वयमेव सुखस्वभावत्वान्निश्चयेन यथा देहः सुखकारणं न भवति तथा विषया अपीति प्रतिपादयति– **जइ** यदि **दिट्ठी** नक्तंचरजनस्य दृष्टिः **तिमिरहरा** अन्धकारहरा भवति **जणस्स** जनस्य **दीवेण णत्थि कायव्वं** दीपेन नास्ति कर्तव्यं । तस्य प्रदीपादीनां यथा प्रयोजनं नास्ति **तह**

भावार्थ :– शरीर सुख-दुःख नहीं देता । देवोंका उत्तम वैक्रियिक शरीर सुखका कारण नहीं है और नारकियोंका शरीर दुःखका कारण नहीं है । आत्मा स्वयं ही इष्ट-अनिष्ट विषयोंके वश होकर सुख-दुःखकी कल्पनारूपमें परिणमित होता है ॥ ६६ ॥

अब, आत्मा स्वयं ही सुखपरिणामकी शक्तिवाला होनेसे विषयोंकी अकिंचित्करता बतलाते हैं :–

गाथा ६७

अन्वयार्थ :– [**यदि**] यदि [**जनस्य दृष्टिः**] प्राणीकी दृष्टि [**तिमिरहरा**] तिमिर-नाशक हो तो [**दीपेन नास्ति कर्तव्यं**] दीपकसे कोई प्रयोजन नहीं है, अर्थात् दीपक कुछ नहीं कर सकता, [**तथा**] उसीप्रकार जहाँ [**आत्मा**] आत्मा [**स्वयं**] स्वयं [**सौख्यं**] सुखरूप परिणमन करता है [**तत्र**] वहाँ [**विषयाः**] विषय [**किं कुर्वन्ति**] क्या कर सकते हैं ? ।

टीका :– जैसे किन्हीं निशाचरोंके (उल्लू, बिल्ली, भूत इत्यादि) नेत्र स्वयमेव अन्धकारको नष्ट करनेकी शक्तिवाले होते हैं, इसलिये उन्हें अंधकार नाशक स्वभाव-वाले दीपक-प्रकाशादिसे कोई प्रयोजन नहीं होता, (उन्हें दीपक-प्रकाश कुछ नहीं

जो दृष्टि प्राणीनी तिमिरहर, तो कार्य छे नहि दीपथी ।
ज्यां जीव स्वयं सुख परिणमे, विषयो करे छे शूं तहीं ? ॥ ६७ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

सुखतया परिणममानस्य सुखसाधनधिया अबुधैर्मुधाध्यास्यमाना अपि विषयाः किं हि नाम कुर्युः ॥ ६७ ॥

अथात्मनः सुखस्वभावत्वं दृष्टान्तेन दृढयति –

सयमेव जहादिच्चो तेजो उण्हो य देवदा णभसि ।
सिद्धो वि तहा णाणं सुहं च लोके तहा देवो ॥ ६८ ॥

स्वयमेव यथादित्यस्तेजः उष्णश्च देवता नभसि ।
सिद्धोऽपि तथा ज्ञानं सुखं च लोके तथा देवः ॥ ६८ ॥

सोक्खं सयमादा विसया किं तत्थ कुव्वंति तथा निर्विषयामूर्तसर्वप्रदेशाह्लादकसहजानन्दैकलक्षण-सुखस्वभावो निश्चयेनात्मैव, तत्र मुक्तौ संसारे वा विषयाः किं कुर्वन्ति, न किमपीति भावः ॥ ६७ ॥ अथात्मनः सुखस्वभावत्वं ज्ञानस्वभावत्वं च पुनरपि दृष्टान्तेन दृढयति – **सयमेव जहादिच्चो तेजो उण्हो य देवदा णभसि** कारणान्तरं निरपेक्ष्य स्वयमेव यथादित्यः स्वपरप्रकाशरूपं तेजो भवति, तथैव च स्वयमेवोष्णो भवति, तथा चाज्ञानिजनानां देवता भवति । क्व स्थितः । नभसि आकाशे । **सिद्धो**

करता,) इसीप्रकार – यद्यपि अज्ञानी 'विषय सुखके साधन हैं' ऐसी बुद्धिके द्वारा व्यर्थ ही विषयोंका अध्यास (-आश्रय) करते हैं तथापि – संसारमें या मुक्तिमें स्वयमेव सुख-रूप परिणमित इस आत्माका विषय क्या कर सकते हैं ?

भावार्थ :– संसारमें या मोक्षमें आत्मा अपने आप ही सुखरूप परिणमित होता है; उसमें विषय अकिंचित्कर हैं अर्थात् कुछ नहीं कर सकते । अज्ञानी विषयोंको सुखका कारण मानकर व्यर्थ ही उनका अवलंबन लेते हैं ॥ ६७ ॥

अब, आत्माका सुखस्वभावत्व दृष्टांत देकर दृढ़ करते हैं :–

गाथा ६८

अन्वयार्थ :– [**यथा**] जैसे [**नभसि**] आकाशमें [**आदित्यः**] सूर्य [**स्वयमेव**] अपने आप ही [**तेजः**] तेज, [**उष्णः**] उष्ण [**च**] और [**देवता**] देव है, [**तथा**] उसी-प्रकार [**लोके**] लोकमें [**सिद्धः अपि**] सिद्ध भगवान भी (स्वयमेव) [**ज्ञानं**] ज्ञान [**सुखं च**] सुख [**तथा देवः**] और देव हैं ।

ज्यम आभमां स्वयमेव भास्कर उष्ण, देव, प्रकाश छे ।
स्वयमेव लोके सिद्ध पण त्यम ज्ञान, सुख ने देव छे ॥ ६८ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यथा खलु नभसि कारणान्तरमनपेक्ष्यैव स्वयमेव प्रभाकरः प्रभूतप्रभाभारभास्वर-स्वरूपविकस्वरप्रकाशशालितया तेजः, यथा च कादाचित्कौष्ण्यपरिणतायःपिण्डवन्नित्य-मेवौष्ण्यपरिणामापन्नत्वादुष्णः, यथा च देवगतिनामकर्मोदयानुवृत्तिवशवर्तिस्वभावतया देवः, तथैव लोके कारणान्तरमनपेक्ष्यैव स्वयमेव भगवानात्मापि स्वपरप्रकाशनसमर्थ-र्निवितथानन्तशक्तिसहजसंवेदनतादात्म्यात् ज्ञानं, तथैव चात्मतृप्तिसमुपजातपरिनिर्वृत्ति-प्रवर्ततानाकुलत्वसुस्थितत्वात् सौख्यं, तथैव चासन्नात्मतत्त्वोपलम्भलब्धवर्णजनमानस-शिलास्तम्भोत्कीर्णसमुदीर्णद्युतिस्तुतियोगिदिव्यात्मस्वरूपत्वाद्देवः। अतोऽस्यात्मनः सुख-साधनाभासैर्विषयैः पर्याप्तम् ॥ ६८ ॥ इति आनन्दप्रपञ्चः।

वि तहा णाणं सुहं च सिद्धोऽपि भगवांस्तथैव कारणान्तरं निरपेक्ष्य स्वभावेनैव स्वपरप्रकाशकं केवल-ज्ञानं, तथैव परमतृप्तिरूपमनाकुलत्वलक्षणं सुखम्। क्व। **लोगे** जगति। **तहा देवो** निजशुद्धात्म-सम्यक्श्रद्धानज्ञानानुष्ठानरूपाभेदरत्नत्रयात्मकनिर्विकल्पसमाधिसमुत्पन्नसुन्दरानन्दस्यन्दिसुखामृतपानपिपा-सितानां गणधरदेवादिपरमयोगिनां देवेन्द्रादीनां चासन्नभव्यानां मनसि निरन्तरं परमाराध्यं,

---

टीका :— जैसे आकाशमें अन्य कारणकी अपेक्षा रखे बिना ही सूर्य (१) स्वयमेव अत्यधिक प्रभासमूहसे चमकते हुए स्वरूपके द्वारा विकसित प्रकाशयुक्त होनेसे तेज है, (२) कभी [१]उष्णतारूप परिणमित लोहेके गोलेकी भाँति सदा उष्णता—परिणामको प्राप्त होनेसे उष्ण है, और (३) देवगतिनामकर्मके धारावाहिक उदयके वशवर्ती स्वभावसे देव है; इसीप्रकार लोकमें अन्य कारणकी अपेक्षा रखे बिना ही भगवान आत्मा स्वयमेव ही (१) स्वपरको प्रकाशित करनेमें समर्थ निर्वितथ (—सच्ची) अनन्त शक्तियुक्त सहज संवेदनके साथ तादात्म्य होनेसे ज्ञान है, (२) आत्मतृप्तिसे उत्पन्न होनेवाली जो [२]परिनिर्वृत्ति है; उससे प्रवर्तमान अनाकुलतामें सुस्थितताके कारण सौख्य है, और (३) जिन्हें आत्मतत्वकी उपलब्धि निकट है ऐसे बुध जनोंके मनरूपी [३]शिलास्तम्भमें जिनको अतिशय [४]द्युति स्तुति उत्कीर्ण है ऐसा दिव्य आत्म-

---

[१] जैसे लोहेका गोला कभी उष्णतापरिणामसे परिणमता है वैसे सूर्य सदा ही उष्णतापरिणामसे परिणमा हुआ है।

[२] परिनिर्वृत्ति = मोक्ष ; परिपूर्णता ; अन्तिम सम्पूर्ण सुख (परिनिर्वृत्ति आत्मतृप्तिसे होती है अर्थात् आत्मतृप्तिकी पराकाष्ठा ही परिनिर्वृत्ति है।

[३] शिलास्तंभ = पत्थरका खंभा।

[४] द्युति=दिव्यता ; भव्यता, महिमा (गणधरदेवादि बुध जनोंके मनमें शुद्धात्मस्वरूपकी दिव्यताका स्तुतिगान उत्कीर्ण होगया है।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ शुभपरिणामाधिकारप्रारम्भः ।

अथेन्द्रियसुखस्वरूपविचारमुपक्रममाणस्तत्साधनस्वरूपमुपन्यस्यति –

देवदजदिगुरुपूजासु चेव दाणम्मि वा सुसीलेसु ।
उववासादिसु रत्तो सुहोवओगप्पगो अप्पा ॥ ६९ ॥

देवतायतिगुरुपूजासु चैव दाने वा सुशीलेषु ।
उपवासादिषु रक्तः शुभोपयोगात्मक आत्मा ॥ ६९ ॥

तथैवानन्तज्ञानादिगुणस्तवनेन स्तुत्यं च यद्दिव्यमात्मस्वरूपं तत्स्वभावत्वात्तथैव देवश्चेति । ततो ज्ञायते मुक्तात्मनां विषयैरपि प्रयोजनं नास्तीति ॥ ६८ ॥ एवं स्वभावेनैव सखस्वभावत्वाद्विषया अपि मुक्तात्मनां सुखकारणं न भवन्तीतिकथनरूपेण गाथाद्वयं गतम् ।

अथेदानीं श्रीकुन्दकुन्दाचार्यदेवाः पूर्वोक्तलक्षणानन्तसुखाधारभूतं सर्वज्ञं वस्तुस्तवेन नमस्कुर्वन्ति–

स्वरूपवान होनेसे देव है । इसलिये इस आत्माको सुखसाधनाभास (जो सुखके साधन नहीं हैं परन्तु सुखके साधन होनेका आभासमात्र जिनमें होता है ऐसे) विषयोंसे बस हो ।

भावार्थ :– सिद्ध भगवान किसी बाह्य कारणकी अपेक्षाके बिना अपने आप ही स्वपरप्रकाशक ज्ञानरूप हैं, अनन्त आत्मिक आनन्दरूप हैं और अचिंत्य दिव्यतारूप हैं । सिद्ध भगवान्की भाँति ही सर्व जीवोंका स्वभाव है; इसलिये सुखार्थी जीवोंको विषयालम्बी भाव छोड़कर निरालम्बी परमानन्दस्वभावरूप परिणमन करना चाहिये ।

–: इसप्रकार आनन्द-अधिकार पूर्ण हुआ :–

—० अब, यहाँ शुभ परिणामका अधिकार प्रारम्भ होता है०—

अब, इन्द्रिय-सुखस्वरूप सम्बन्धी विचारको लेकर, उसके (इन्द्रिय सुखके) साधनका (-शुभोपयोगका) स्वरूप कहते हैं :–

गुरु-देव-यतिपूजा विषे, वणी दान ने सुशीलो विषे ।
जीव रक्त उपवासादिके, शुभ-उपयोग स्वरूप छे ॥ ६९ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यदायमात्मा दुःखस्य साधनीभूतां द्वेषरूपामिन्द्रियार्थानुरागरूपां चाशुभोपयोगभूमिकामतिक्रम्य देवगुरुयतिपूजादानशीलोपवासप्रीतिलक्षणं धर्मानुरागमङ्गीकरोति तदेन्द्रियसुखस्य साधनीभूतां शुभोपयोगभूमिकामधिरूढोऽभिलप्येत ॥ ६९ ॥

तेजो दिट्ठी णाणं इड्ढी सोक्खं तहेव ईसरियं।
तिहुवणपहाणदइयं माहप्पं जस्स सो अरिहो ॥ ⋆३ ॥

तेजो दिट्ठी णाणं इड्ढी सोक्खं तहेव ईसरियं तिहुवणपहाणदइयं तेजः प्रभामण्डलं, जगत्त्रयकालत्रयवस्तुगतयुगपत्सामान्यास्तित्वग्राहकं केवलदर्शनं, तथैव समस्तविशेषास्तित्वग्राहकं केवलज्ञानं, ऋद्धिशब्देन समवसरणादिलक्षणा विभूतिः, सुखशब्देनाव्याबाधानन्तसुखं, तत्पदाभिलाषेण इन्द्रादयोऽपि भृत्यत्वं कुर्वन्तीत्येवंलक्षणमैश्वर्यं, त्रिभुवनाधीशानामपि वल्लभत्वं दैवं भण्यते। **माहप्पं जस्स सो अरिहो** इत्थंभूतं माहात्म्यं यस्य सोऽर्हन् भण्यते। इति वस्तुस्तवनरूपेण नमस्कारं कृतवन्तः ॥ ⋆३ ॥ अथ तस्यैव भगवतः सिद्धावस्थायां गुणस्तवनरूपेण नमस्कारं कुर्वन्ति –

तं गुणदो अधिगदरं अविच्छिदं मणुवदेवपदिभावं।
अपुणब्भावणिबद्धं पणमामि पुणो पुणो सिद्धं ॥ ⋆४ ॥

पणमामि नमस्करोमि **पुणो पुणो** पुनः पुनः। कम्। **तं सिद्धं** परमागमप्रसिद्धं सिद्धम्। कथंभूतम्। **गुणदो अधिगदरं** अव्याबाधानन्तसुखादिगुणैरधिकतरं समधिकतरगुणम्। पुनरपि कथंभूतम्। **अविच्छिदं मणुवदेवपदिभावं** यथा पूर्वमर्हदवस्थायां मनुजदेवेन्द्रादयः समवशरणे समागत्य नमस्कुर्वन्ति तेन प्रभुत्वं भवति, तदतिक्रान्तत्वादतिक्रान्तमनुजदेवपतिभावम्। पुनश्च किंविशिष्टम्। **अपुणब्भावणिबद्धं** द्रव्यक्षेत्रादिपञ्चप्रकारभवाद्विलक्षणः शुद्धबुद्धैकस्वभावनिजात्मोपलम्भलक्षणो योऽसौ मोक्षस्तस्याधीनत्वादपुनर्भावनिबद्धमिति भावः ॥ ⋆४ ॥ एवं नमस्कारमुख्यत्वेन गाथाद्वयं गतम्। इति गाथाष्टकेन पञ्चमस्थलं ज्ञातव्यम्। एवमष्टादशगाथाभिः स्थलपञ्चकेन सुखप्रपञ्चनामान्तराधिकारो गतः। इति पूर्वोक्तप्रकारेण 'एस सुरासुर' इत्यादि चतुर्दशगाथाभिः पीठिका गता, तदनन्तरं सप्तगाथाभिः सामान्यसर्वज्ञसिद्धिः, तदनन्तरं त्रयस्त्रिंशद्गाथाभिः ज्ञानप्रपञ्चः, तदनन्तरमष्टादशगाथाभिः सुखप्रपञ्च इति समुदायेन द्वासप्ततिगाथाभिरन्तराधिकारचतुष्टयेन **शुद्धोपयोगाधिकारः**

गाथा ६९

अन्वयार्थ :– [**देवतायतिगुरुपूजासु**] देव, गुरु और यतिकी पूजामें, [**दाने च एव**] दानमें [**सुशीलेषु वा**] एवं सुशीलोंमें [**उपवासादिषु**] और उपवासादिकमें [**रक्तः आत्मा**] लीन आत्मा [**शुभोपयोगात्मकः**] शुभोपयोगात्मक है।

टीका :– जब यह आत्मा दुःखकी साधनभूत ऐसी द्वेषरूप तथा इन्द्रिय विषयकी अनुरागरूप अशुभोपयोग भूमिकाका उल्लंघन करके, देव-गुरु-यतिकी पूजा, दान, शील और उपवासादिकके प्रीतिस्वरूप धर्मानुरागको अंगीकार करता है तब वह इन्द्रियसुखकी साधनभूत शुभोपयोगभूमिकामें आरूढ़ कहलाता है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ शुभोपयोगसाध्यत्वेनेन्द्रियसुखमाख्याति –

समाप्तः ॥ इत ऊर्द्ध्वं पञ्चविंशतिगाथापर्यन्तं ज्ञानकण्डिकाचतुष्टयाभिधानोऽधिकारः प्रारभ्यते। तत्र पञ्चविंशतिगाथामध्ये प्रथमं तावच्छुभाशुभविषये मूढत्वनिराकरणार्थं 'देवदजदिगुरु' इत्यादि दशगाथापर्यन्तं प्रथमज्ञानकण्डिका कथ्यते। तदनन्तरमाप्तात्मस्वरूपपरिज्ञानविषये मूढत्वनिराकरणार्थं 'चत्ता पावारंभं' इत्यादि सप्तगाथापर्यन्तं द्वितीयज्ञानकण्डिका, अथानन्तरं द्रव्यगुणपर्यायपरिज्ञानविषये मूढत्वनिराकरणार्थं 'दव्वादीएसु' इत्यादि गाथाषट्कपर्यन्तं तृतीयज्ञानकण्डिका। तदनन्तरं स्वपरतत्त्वपरिज्ञानविषये मूढत्वनिराकरणार्थं 'णाणप्पगं' इत्यादि गाथाद्वयेन चतुर्थज्ञानकण्डिका। इति ज्ञानकण्डिकाचतुष्टयाभिधानाधिकारे समुदायपातनिका। अथेदानीं प्रथमज्ञानकण्डिकायां स्वतन्त्रव्याख्यानेन गाथाचतुष्टयं, तदनन्तरं पुण्यं जीवस्य विषयतृष्णामुत्पादयतीति कथनरूपेण गाथाचतुष्टयं, तदनन्तरमुपसंहाररूपेण गाथाद्वयं, इति स्थलत्रयपर्यन्तं क्रमेण व्याख्यानं क्रियते। तद्यथा – अथ यद्यपि पूर्वं गाथाषट्केनेन्द्रियसुखस्वरूपं भणितं तथापि पुनरपि तदेव विस्तरेण कथयन् सन् तत्साधकं शुभोपयोगं प्रतिपादयति, अथवा द्वितीयपातनिका – पीठिकायां यच्छुभोपयोगस्वरूपं सूचितं तस्येदानीमिन्द्रियसुखविशेषविचारप्रस्तावे तत्साधकत्वेन विशेषविवरणं करोति – **देवदजदिगुरुपूजासु चेव दाणम्मि वा सुसीलेसु** देवतायतिगुरुपूजासु चैव दाने वा सुशीलेषु **उववासादिसु रत्तो** तथैवोपवासादिषु च रक्त आसक्तः **अप्पा** जीवः **सुहोवओगप्पगो** शुभोपयोगात्मको भण्यते इति। तथा हि – देवता निर्दोषिपरमात्मा, इन्द्रियजयेन शुद्धात्मस्वरूपप्रयत्नपरो यतिः; स्वयं भेदाभेदरत्नत्रयाराधकस्तदर्थिनां भव्यानां जिनदीक्षादायको गुरुः, पूर्वोक्तदेवतायतिगुरूणां तत्प्रतिबिम्बादीनां च यथासंभवं द्रव्यभावरूपा पूजा, आहारादिचतुर्विधदानं च आचारादिकथितशीलव्रतानि तथैवोपवासादिजिनगुणसंपत्त्यादिविधिविशेषाश्च। एतेषु शुभानुष्ठानेषु योऽसौ रतः द्वेषरूपे विषयानुरागरूपे चाशुभानुष्ठाने विरतः, स जीवः शुभोपयोगी भवतीति सूत्रार्थः ॥ ६९ ॥ अथ पूर्वोक्तशुभोपयोगेन साध्यमिन्द्रियसुखं कथयति – **सुहेण जुत्तो आदा** यथा निश्चयरत्नत्रयात्मकशुद्धोपयोगेन युक्तो

भावार्थ :– सर्व दोष रहित परमात्मा वह देव हैं; भेदाभेद रत्नत्रयके स्वयं आराधक तथा उस आराधनाके अर्थी अन्य भव्य जीवोंको जिनदीक्षा देनेवाले वे गुरु हैं; इन्द्रियजय करके शुद्धात्मस्वरूपमें प्रयत्नपरायण वे यति हैं। ऐसे देव-गुरु-यतिकी अथवा उनकी प्रतिमाकी पूजामें, आहारादिक चतुर्विध दानमें, आचारांगादि शास्त्रोंमें कहे हुए शीलव्रतोंमें तथा उपवासादिक तपमें प्रीतिका होना वह धर्मानुराग है। जो आत्मा द्वेषरूप और विषयानुरागरूप अशुभोपयोगको पार करके धर्मानुरागको अंगीकार करता है वह शुभोपयोगी है ॥ ६९ ॥

अब, इन्द्रियसुखको शुभोपयोगके साध्यके रूपमें (अर्थात् शुभोपयोग साधन है और उसका साध्य इन्द्रियसुख है ऐसा) कहते हैं :–

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

जुत्तो सुहेण आदा तिरिओ वा माणुसो व देवो वा ।
भूदो तावदि कालं लहदि सुहं इन्दियं विविहं ॥ ७० ॥

युक्तः शुभेन आत्मा तिर्यग्वा मानुषो वा देवो वा ।
भूतस्तावत्कालं लभते सुखमैन्द्रियं विविधं ॥ ७० ॥

अयमात्मेन्द्रियसुखसाधनीभूतस्य शुभोपयोगस्य सामर्थ्यात्तदधिष्ठानभूतानां तिर्यग्मानुषदेवत्वभूमिकानामन्यतमां भूमिकामवाप्य यावत्कालमवतिष्ठते, तावत्कालमनेकप्रकारमिन्द्रियसुखं समासादयतीति ॥ ७० ॥

अथैवमिन्द्रियसुखमुत्क्षिप्य दुःखत्वे प्रक्षिपति –

सोक्खं सहावसिद्धं णत्थि सुराणं पि सिद्धमुवदेसे ।
ते देहवेदणट्ठा रमंति विसएसु रम्मेसु ॥ ७१ ॥

मुक्तो भूत्वाऽयं जीवोऽनन्तकालमतीन्द्रियसुखं लभते, तथा पूर्वसूत्रोक्तलक्षणशुभोपयोगेन युक्तः परिणतोऽयमात्मा **तिरियो वा माणुसो व देवो वा भूदो** तिर्यग्मनुष्यदेवरूपो भूत्वा **तावदि कालं** तावत्कालं स्वकीयायुःपर्यन्तं **लहदि सुहं इंदियं विविहं** इन्द्रियजं विविधं सुखं लभते, इति सूत्राभिप्रायः ॥ ७० ॥ अथ पूर्वोक्तमिन्द्रियसुखं निश्चयनयेन दुःखमेवेत्युपदिशति – **सोक्खं सहावसिद्धं** रागाद्युपाधिरहितं

गाथा ७०

अन्वयार्थ :– [**शुभेन युक्तः**] शुभोपयोगयुक्त [**आत्मा**] आत्मा [**तिर्यक् वा**] तिर्यंच, [**मानुषः वा**] मनुष्य [**देवः वा**] अथवा देव [**भूतः**] होकर, [**तावत्कालं**] उतने समय तक [**विविधं**] विविध [**ऐन्द्रियं सुखं**] इन्द्रियसुख [**लभते**] प्राप्त करता है ।

टीका :– यह आत्मा इन्द्रियसुखके साधनभूत शुभोपयोगकी सामर्थ्यसे उसके अधिष्ठानभूत (-इन्द्रियसुखके स्थानभूत-आधारभूत ऐसी) तिर्यंच, मनुष्य और देवत्वकी भूमिकाओंमेंसे किसी एक भूमिकाको प्राप्त करके जितने समय तक (उसमें) रहता है, उतने समय तक अनेक प्रकारका इन्द्रियसुख प्राप्त करता है ॥ ७० ॥

इसप्रकार इन्द्रियसुखकी बात उठाकर अब इन्द्रियसुखको दुःखपनेमें डालते हैं :–

शुभयुक्त आत्मा देव वा तिर्यंच वा मानव बने ।
ते पर्यये तावत्समय इन्द्रियसुख विधविध लहे ॥ ७० ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

सौख्यं स्वभावसिद्धं नास्ति सुराणामपि सिद्धमुपदेशे ।
ते देहवेदनार्ता रमन्ते विषयेषु रम्येषु ।। ७१ ।।

इन्द्रियसुखभाजनेषु हि प्रधाना दिवौकसः । तेषामपि स्वाभाविकं न खलु सुखमस्ति, प्रत्युत तेषां स्वाभाविकं दुःखमेवावलोक्यते, यतस्ते पञ्चेन्द्रियात्मकशरीरपिशाचपीडया परवशा भृगुप्रपातस्थानीयान्मनोज्ञविषयानभिपतन्ति ।। ७१ ।।

चिदानन्दैकस्वभावेनोपादानकारणभूतेन सिद्धमुत्पन्नं यत्स्वाभाविकसुखं तत्स्वभावसिद्धं भण्यते। **तच्च णत्थि सुराणं पि** आस्तां मनुष्यादीनां सुखं देवेन्द्रादीनामपि नास्ति **सिद्धमुवदेसे** इति सिद्धमुपदिष्टमुपदेशे परमागमे। **ते देहवेदणट्टा रमंति विसएसु रम्मेसु** तथाभूतसुखाभावात्ते देवादयो देहवेदनार्ताः पीडिताः कदर्थिताः सन्तो रमन्ते विषयेषु रम्याभासेष्विति। अथ विस्तरः– अधोभागे सप्तनरकस्थानीयमहाऽजगरप्रसारितमुखे, कोणचतुष्के तु क्रोधमानमायालोभस्थानीयसर्पचतुष्कप्रसारितवदने देहस्थानीयमहान्धकूपे पतितः सन् कश्चित् पुरुषविशेषः, संसारस्थानीयमहारण्ये मिथ्यात्वादिकुमार्गे नष्टः सन् मृत्युस्थानीयहस्तिभयेनायुष्कर्मस्थानीये साटकविशेषे शुक्लकृष्णपक्षस्थानीयशुक्लकृष्णमूषकद्वयच्छेद्यमानमूले व्याधिस्थानीयमधुमक्षिकावेष्टिते लग्नस्तेनैव हस्तिना हन्यमाने सति विषयसुखस्थानीय मधुबिन्दुसुस्वादेन यथा सुखं मन्यते, तथा संसारसुखम्। पूर्वोक्तमोक्षसुखं तु तद्विपरीतमिति तात्पर्यम् ।। ७१ ।। अथ पूर्वोक्तप्रकारेण शुभोपयोगसाध्यस्येन्द्रियसुखस्य

गाथा ७१

अन्वयार्थ :– [**उपदेशे सिद्धं**] (जिनेन्द्रदेवके) उपदेशसे सिद्ध है कि [**सुराणाम् अपि**] देवोंके भी [**स्वभावसिद्धं**] स्वभावसिद्ध [**सौख्यं**] सुख [**नास्ति**] नहीं है; [**ते**] वे [**देहवेदनार्ता**] (पंचेन्द्रियमय) देहकी वेदनासे पीड़ित होनेसे [**रम्येषु विषयेषु**] रम्य विषयोंमें [**रमन्ते**] रमते हैं ।

टीका :– इन्द्रियसुखके भाजनोंमें प्रधान देव हैं; उनके भी वास्तवमें स्वाभाविक सुख नहीं है, उलटा उनके स्वाभाविक दुःख ही देखा जाता है; क्योंकि वे पंचेन्द्रियात्मक शरीररूपी पिशाचकी पीड़ासे परवश होनेसे [1]भृगुप्रपातके समान मनोज्ञ विषयोंकी ओर दौड़ते हैं ।। ७१ ।।

---

[1] भृगुप्रपात=अत्यंत दुःखसे घबराकर आत्मघात करनेके लिये पर्वतकें निराधार उच्च शिखरसे गिरना। (भृगु = पर्वतका निराधार उच्चस्थान – शिखर ; प्रपात=गिरना)

सुरनेय सौख्य स्वभावसिद्ध न–सिद्ध छे आगमविषे ।
ते देहवेदनथी पीड़ित रमणीय विषयोमां रमे ।। ७१ ।।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथैवमिन्द्रियसुखस्य दुःखतायां युक्त्यावतारितायामिन्द्रियसुखसाधनीभूतपुण्य-निर्वर्तकशुभोपयोगस्य दुःखसाधनीभूतपापनिर्वर्तकाशुभोपयोगविशेषादविशेषत्वमवतारयति –

णरणारयतिरियसुरा भजन्ति जदि देहसंभवं दुक्खं ।
किह सो सुहो व असुहो उवओगो हवदि जीवाणं ॥ ७२ ॥

नरनारकतिर्यक्सुरा भजन्ति यदि देहसंभवं दुःखं ।
कथं स शुभो वाऽशुभ उपयोगो भवति जीवानाम् ॥ ७२ ॥

निश्चयेन दुःखत्वं ज्ञात्वा तत्साधकशुभोपयोगस्याप्यशुभोपयोगेन सह समानत्वं व्यवस्थापयति – **णरणारयतिरियसुरा भजंति जदि देहसंभवं दुक्खं** सहजातीन्द्रियामूर्तसदानन्दैकलक्षणं वास्तवसुखमल-भमानाः सन्तो नरनारकतिर्यक्सुरा यदि चेदविशेषेण पूर्वोक्तपरमार्थसुखाद्विलक्षणं पञ्चेन्द्रियात्मक-शरीरोत्पन्नं निश्चयनयेन दुःखमेव भजन्ते सेवन्ते, **किह सो सुहो व असुहो उवओगो हवदि जीवाणं**

इसप्रकार युक्तिपूर्वक इन्द्रियसुखको दुःखरूप प्रगट करके, अब इन्द्रियसुखके साधन-भूत पुण्यको उत्पन्न करनेवाले शुभोपयोगकी, दुःखके साधनभूत पापको उत्पन्न करनेवाले अशुभोपयोगसे अविशेषता प्रगट करते हैं :–

गाथा ७२

अन्वयार्थ : [**नरनारकतिर्यक्सुराः**] मनुष्य, नारकी, तिर्यंच और देव (-सभी) [**यदि**] यदि [**देहसंभवं**] देहोत्पन्न [**दुःखं**] दुःखको [**भजंति**] अनुभव करते हैं, [**जीवानां**] तो जीवों का [**सः उपयोगः**] वह (शुद्धोपयोगसे विलक्षण-अशुद्ध) उपयोग [**शुभः वा अशुभः**] शुभ और अशुभ – दो प्रकारका [**कथं भवति**] कैसे है ? (अर्थात् नहीं है)

टीका :– यदि शुभोपयोगजन्य उदयगत पुण्यकी सम्पत्तिवाले देवादिक (अर्थात् शुभोपयोगजन्य पुण्यके उदयसे प्राप्त होनेवाली ऋद्धिवाले देव इत्यादि) और अशुभोपयोग-जन्य उदयगत पापकी अपादानवाले नारकादिक – यह दोनों स्वाभाविक सुखके अभावके कारण अविशेषरूपसे (-बिना अन्तरके) पंचेन्द्रियात्मक शरीर सम्बंधी दुःखका ही अनुभव करते हैं, तब फिर परमार्थसे शुभ और अशुभ उपयोगकी पृथक्त्वव्यवस्था नहीं रहती ।

तिर्यंच–नारक-सुर-नरो जो देहगत दुख अनुभवे ।
तो जीवनो उपयोग अे शुभ ने अशुभ कई रीत छे ? ॥ ७२ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यदि शुभोपयोगजन्यसमुदीर्णपुण्यसंपदस्त्रिदशादयोऽशुभोपयोगजन्यपर्यागतपातकापदो वा नारकादयश्च, उभयेऽपि स्वाभाविकसुखाभावादविशेषेण पञ्चेन्द्रियात्मकशरीरप्रत्ययं दुःखमेवानुभवन्ति। ततः परमार्थतः शुभाशुभोपयोगयोः पृथक्त्वव्यवस्थानावतिष्ठते ॥ ७२ ॥

अथ शुभोपयोगजन्यं फलवत्पुण्यं विशेषेण दूषणार्थमभ्युपगम्योत्थापयति –

कुलिसाउहचक्कधरा सुहोवओगप्पगेहिं भोगेहिं।
देहादीणं विद्धिं करेंति सुहिदा इवाभिरदा ॥ ७३ ॥

कुलिशायुधचक्रधराः शुभोपयोगात्मकैः भोगैः।
देहादीनां वृद्धिं कुर्वन्ति सुखिता इवाभिरताः ॥ ७३ ॥

व्यवहारेण विशेषेऽपि निश्चयेन सः प्रसिद्धः शुद्धोपयोगाद्विलक्षणः शुभाशुभोपयोगः कथं भिन्नत्वं लभते, न कथमपीति भावः ॥ ७२ ॥ एवं स्वतन्त्रगाथाचतुष्टयेन प्रथमस्थलं गतम्। अथ पुण्यानि देवेन्द्रचक्रवर्त्यादिपदं प्रयच्छन्ति इति पूर्वं प्रशंसां करोति। किमर्थम्। तत्फलाधारेणाग्रे तृष्णोत्पत्तिरूपदुःखदर्शनार्थं। **कुलिसाउहचक्कधरा** देवेन्द्राश्चक्रवर्तिनश्च कर्तारः। **सुहोवओगप्पगेहिं भोगेहिं** शुभोपयोगजन्यभोगैः कृत्वा **देहादीणं विद्धिं करेंति** विकुर्वणारूपेण देहपरिवारादीनां वृद्धिं कुर्वन्ति। कथंभूताः सन्तः। **सुहिदा इवाभिरदा** सुखिता इवाभिरता आसक्ता इति। अयमत्रार्थः– यत्परमातिशय-

---

भावार्थ :–शुभोपयोगजन्य पुण्यके फलरूपमें देवादिककी सम्पदायें मिलती हैं, और अशुभोपयोगजन्य पापके फलरूपमें नारकादिककी आपदायें मिलती हैं। किन्तु वे देवादिक तथा नारकादिक दोनों परमार्थसे दुःखी ही हैं। इसप्रकार दोनोंका फल समान होनेसे शुभोपयोग और अशुभोपयोग दोनों परमार्थसे समान ही हैं अर्थात् उपयोगमें अशुद्धोपयोगमें – शुभ और अशुभ नामक भेद परमार्थसे घटित नहीं होते ॥ ७२ ॥

(जैसे इन्द्रियसुखको दुःखरूप और शुभोपयोगको अशुभोपयोगके समान बताया है इसीप्रकार) अब, शुभोपयोगजन्य फलवाला जो पुण्य है उसे विशेषतः दूषण देनेके लिये (अर्थात् उसमें दोष दिखानेके लिये) उस पुण्यको (-उसके अस्तित्वको) स्वीकार करके उसकी (पुण्यकी) बातका खंडन करते हैं :–

चक्री अने देवेन्द्र शुभ-उपयोगमूलक भोगथी।
पुष्टि करे देहादिनी, सुखी सम दीसे अभिरत रही ॥ ७३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यतो हि शक्राश्चक्रिणश्च स्वेच्छोपगतैर्भोगैः शरीरादीन् पुष्णन्तस्तेषु दृष्टशोणित इव जलौकसोऽत्यन्तमासक्ताः सुखिता इव प्रतिभासन्ते, ततः शुभोपयोगजन्यानि फलवन्ति पुण्यान्यवलोक्यन्ते ॥ ७३ ॥

अथैवमभ्युपगतानां पुण्यानां दुःखबीजहेतुत्वमुद्भावयति –

जदि संति हि पुण्णाणि य परिणामसमुब्भवाणि विविहाणि ।
जणयंति विसयतण्हं जीवाणं देवदंताणं ॥ ७४ ॥

यदि सन्ति हि पुण्यानि च परिणामसमुद्भवानि विविधानि ।
जनयन्ति विषयतृष्णां जीवानां देवतान्तानाम् ॥ ७४ ॥

तृप्तिसमुत्पादकं विषयतृष्णाविच्छित्तिकारकं च स्वाभाविकसुखं तदलभमाना दुष्टशोणिते जलयूका इवासक्ताः सुखाभासेन देहादीनां वृद्धिं कुर्वन्ति । ततो ज्ञायते तेषां स्वाभाविकं सुखं नास्तीति ॥ ७३ ॥ अथ पुण्यानि जीवस्य विषयतृष्णामुत्पादयन्तीति प्रतिपादयति – **जदि संति हि पुण्णाणि य** यदि चेन्निश्चयेन पुण्यपापरहितपरमात्मनो विपरीतानि पुण्यानि सन्ति । पुनरपि किंविशिष्टानि । **परिणाम-समुब्भवाणि** निर्विकारस्वसंवित्तिविलक्षणशुभपरिणामसमुद्भवानि **विविहाणि** स्वकीयानन्तभेदेन बहुविधानि । तदा तानि किं कुर्वन्ति । **जणयंति विसयतण्हं** जनयन्ति । **काम्** । विषयतृष्णाम् ।

गाथा ७३

अन्वयार्थ :– [**कुलिशायुधचक्रधराः**] वज्रधर और चक्रधर (-इन्द्र और चक्रवर्ती) [**शुभोपयोगात्मकैः भोगैः**] शुभोपयोगमूलक (पुण्योंके फलरूप) भोगोंके द्वारा [**देहादीनां**] देहादिकी [**वृद्धिं कुर्वन्ति**] पुष्टि करते हैं और [**अभिरताः**] (इसप्रकार) भोगोंमें रत वर्तते हुए [**सुखिताः इव**] सुखी जैसे भासित होते हैं । (इसलिये पुण्य विद्यमान अवश्य है)

टीका :– शक्रेन्द्र और चक्रवर्ती अपनी इच्छानुसार प्राप्त भोगोंके द्वारा शरीरादिको पुष्ट करते हुए – जैसे गोंच (जोंक) दूषित रक्तमें अत्यन्त आसक्त वर्तती हुई सुखी जैसी भासित होती है, उसीप्रकार – उन भोगोंमें अत्यन्त आसक्त वर्तते हुए सुखी जैसे भासित होते हैं; इसलिये शुभोपयोगजन्य फलवाले पुण्य दिखाई देते हैं (अर्थात् शुभोपयोगजन्य फलवाले पुण्योंका अस्तित्व दिखाई देता है)

परिणामजन्य अनेक विध जो पुण्यनुं अस्तित्व छे ।
तो पुण्य ओ देवान्त जीवने विषयतृष्णोद्भव करे ॥ ७४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यदि नामैवं शुभोपयोगपरिणामकृतसमुत्पत्तीन्यनेकप्रकाराणि पुण्यानि विद्यंत इत्यभ्युपगम्यते, तदा तानि सुधाशनानप्यर्वाध कृत्वा समस्तसंसारिणां विषयतृष्णामवश्यमेव समुत्पादयन्ति। न खलु तृष्णामन्तरेण दुष्टशोणित इव जलूकानां समस्तसंसारिणां विषयेषु प्रवृत्तिरवलोक्यते। अवलोक्यते च सा। ततोऽस्तु पुण्यानां तृष्णायतनत्वमबाधितमेव ॥ ७४ ॥

केषाम्। **जीवाणं देवदंताणं** दृष्टश्रुतानुभूतभोगाकाङ्क्षारूपनिदानबन्धप्रभृतिनानामनोरथहयरूपविकल्पजालरहितपरमसमाधिसमुत्पन्नसुखामृतरूपां सर्वात्मप्रदेशेषु परमाह्लादोत्पत्तिभूतामेकाकारपरमसमरसीभावरूपां विषयाकाङ्क्षाग्निजनितपरमदाहविनाशिकां स्वरूपतृप्तिमलभमानानां देवेन्द्रप्रभृतिबहिर्मुखसंसारिजीवानामिति। इदमत्र तात्पर्यम्—यदि तथाविधा विषयतृष्णा नास्ति तर्हि दुष्टशोणिते जलयूका इव कथं ते विषयेषु प्रवृत्तिं कुर्वन्ति। कुर्वन्ति चेत् पुण्यानि तृष्णोत्पादकत्वेन दुःखकारणानि इति ज्ञायन्ते ॥ ७४ ॥ अथ पुण्यानि दुःखकारणानीति पूर्वोक्तमेवार्थं विशेषेण समर्थयति—

भावार्थ :— जो भोगोंमें आसक्त वर्तते हुए इन्द्र इत्यादि गोंच (जोंक) की भाँति सुखी जैसे मालूम होते हैं; वे भोग पुण्यके फल हैं; इसलिये पुण्यका अस्तित्व अवश्य है। (इसप्रकार इस गाथा में पुण्यकी विद्यमानता स्वीकार करके आगेकी गाथाओंमें पुण्यको दुःखका कारणरूप बतायेंगे) ॥ ७३ ॥

अब, इसप्रकार स्वीकार किये गये पुण्य दुःखके बीजके कारण हैं, अर्थात् तृष्णाके कारण हैं) इसप्रकार न्यायसे प्रगट करते हैं :—

अन्वयार्थ :— [**यदि हि**] (पूर्वोक्त प्रकारसे) यदि [**परिणामसमुद्भवानि**] (शुभोपयोगरूप) परिणामसे उत्पन्न होनेवाले [**विविधानि पुण्यानि च**] विविध पुण्य [**संति**] विद्यमान हैं, [**देवतान्तानां जीवानां**] तो वे देवों तकके जीवोंको [**विषयतृष्णां**] विषयतृष्णा [**जनयन्ति**] उत्पन्न करते हैं।

टीका :—यदि इसप्रकार शुभोपयोगपरिणामसे उत्पन्न होनेवाले अनेक प्रकारके पुण्य विद्यमान हैं, ऐसा स्वीकार किया है, तो वे (-पुण्य) देवों तकके समस्त संसारियोंके विषयतृष्णा अवश्यमेव उत्पन्न करते हैं (ऐसा भी स्वीकार करना पड़ता है) वास्तवमें तृष्णाके बिना, जैसे जोंक (गोंच) को दूषित रक्तमें उसीप्रकार समस्त संसारियोंको विषयोंमें प्रवृत्ति दिखाई न दे; किन्तु वह तो दिखाई देती है। इसलिये पुण्योंकी तृष्णायतनता अबाधित ही है (अर्थात् पुण्य तृष्णाके घर हैं, ऐसा अविरोधरूपसे सिद्ध होता है)।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ पुण्यस्य दुःखबीजविजयमाघोषयति –

ते पुण उदिण्णतण्हा दुहिदा तण्हाहिं विसयसोक्खाणि ।
इच्छंति अणुभवंति य आमरणं दुक्खसंतत्ता ॥ ७५ ॥

ते पुनरुदीर्णतृष्णाः दुःखितास्तृष्णाभिर्विषयसौख्यानि ।
इच्छन्त्यनुभवन्ति च आमरणं दुःखसंतप्ताः ॥ ७५ ॥

ते पुण उदिण्णतण्हा सहजशुद्धात्मतृप्तेरभावात्ते निखिलसंसारिजीवाः पुनरुदीर्णतृष्णाः सन्तः **दुहिदा तण्हाहिं** स्वसंवित्तिसमुत्पन्नपारमार्थिकसुखाभावात्पूर्वोक्ततृष्णाभिर्दुःखिताः सन्तः । किं कुर्वन्ति । **विसयसोक्खाणि इच्छंति** निर्विषयपरमात्मसुखाद्विलक्षणानि विषयसुखानि इच्छन्ति । न केवलमिच्छन्ति, **अणुभवंति य** अनुभवन्ति च । किंपर्यन्तम् । **आमरणं** मरणपर्यन्तम् । कथंभूताः । **दुक्खसंतत्ता** दुःखसंतप्ता

भावार्थ – जैसा कि ७३ वीं गाथा में कहा गया है उसप्रकार अनेक तरहके पुण्य विद्यमान हैं, सो भले रहें । वे सुख के साधन नहीं किन्तु दुःखके बीजरूप तृष्णाके ही साधन हैं ॥ ७४ ॥

अब, पुण्यमें दुःखके बीजकी विजय घोषित करते हैं । (अर्थात् पुण्यमें तृष्णाबीज दुःखवृक्षरूपसे वृद्धिको प्राप्त होता है – फैलता है ऐसा घोषित करते हैं) :–

गाथा ७५

अन्वयार्थ :– [**पुनः**] और, [**उदीर्णतृष्णाः ते**] जिनकी तृष्णा उदित है ऐसे वे जीव [**तृष्णाभिः दुःखिताः**] तृष्णाओंके द्वारा दुःखी होते हुए, [**आमरणं**] मरणपर्यंत [**विषयसौख्यानि इच्छन्ति**] विषयसुखोंको चाहते हैं [**च**] और [**दुःखसन्तप्ताः**] दुःखों से संतप्त होते हुए (-दुःखदाहको सहन न करते हुए) [**अनुभवंति**] उन्हें भोगते हैं ।

टीका :– जिनके तृष्णा उदित है ऐसे देवपर्यंत समस्त संसारी, तृष्णा दुःखका बीज होनेसे पुण्यजनित तृष्णाओं के द्वारा भी अत्यन्त दुःखी होते हुए [१]मृगतृष्णामेंसे जलकी भाँति विषयोंमेंसे सुख चाहते हैं और उस [२]दुःखसंतापके वेगको सहन न कर

---

[१] जैसे मृगजलमेंसे जल नहीं मिलता वैसे ही इन्द्रियविषयोंमेंसे सुख प्राप्त नहीं होता ।

[२] दुःखसंताप=दुःखदाह; दुःखकी जलन – पीड़ा ।

ते उदिततृष्ण जीवो, दुःखित तृष्णाथी, विषयिक सुखने ।
इच्छे अने आमरण दुःखसंतप्त तेने भोगवे ॥ ७५ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ ते पुनस्त्रिदशावसानाः कृत्स्नसंसारिणः समुदीर्णतृष्णाः पुण्यनिर्वर्तिताभिरपि तृष्णाभिर्दुःखबीजतयाऽत्यन्तदुःखिताः सन्तो मृगतृष्णाभ्य इवाम्भांसि विषयेभ्यः सौख्यान्यभिलषन्ति। तद्दुःखसंतापवेगमसहमाना अनुभवन्ति च विषयान् जलायुका इव, तावद्यावत् क्षयं यान्ति। यथा हि जलायुकास्तृष्णाबीजेन विजयमानेन दुःखाङ्कुरेण क्रमतः समाक्रम्यमाणा दुष्टकीलालमभिलषन्त्यस्तदेवानुभवन्त्यश्चाप्रलयात् क्लिश्यन्ते, एवममी अपि पुण्यशालिनः पापशालिन इव तृष्णाबीजेन विजयमानेन दुःखाङ्कुरेण क्रमतः समाक्रम्यमाणा विषयानभिलषन्तस्तानेवानुभवन्तश्चाप्रलयात् क्लिश्यन्ते। अतः पुण्यानि सुखाभासस्य दुःखस्यैव साधनानि स्युः ॥ ७५ ॥

इति। अयमत्रार्थः– यथा तृष्णोद्रेकेण प्रेरिताः जलौकसः कीलालमभिलषन्त्यस्तदेवानुभवन्त्यश्चामरणं दुःखिता भवन्ति, तथा निजशुद्धात्मसंवित्तिपराङ्मुखा जीवा अपि मृगतृष्णाभ्योऽम्भांसीव विषयानभिलषन्तस्तथैवानुभवन्तश्चामरणं दुःखिता भवन्ति। तत एतदायातं तृष्णातङ्कोत्पादकत्वेन पुण्यानि वस्तुतो दुःखकारणानि इति ॥ ७५ ॥ अथ पुनरपि पुण्योत्पन्नस्येन्द्रियसुखस्य

सकनेसे विषयोंको तबतक भोगते हैं, जबतक कि विनाश को [मरणको] प्राप्त नहीं होते। जैसे जोंक (गोंच) तृष्णा जिसका बीज है ऐसे विजयको प्राप्त होती हुई दुःखांकुरसे क्रमशः आक्रान्त होनेसे दूषित रक्तको चाहती और उसीको भोगती हुई मरणपर्यंत क्लेशको पाती है, उसीप्रकार यह पुण्यशाली जीव भी, पापशाली जीवोंकी भाँति, तृष्णा जिसका बीज है ऐसे विजय प्राप्त दुःखांकुरोंके द्वारा क्रमशः आक्रांत होनेसे, विषयोंको चाहते हुए और उन्हींको भोगते हुए विनाशपर्यंत (-मरणपर्यंत) क्लेश पाते हैं।

इससे पुण्य सुखाभास ऐसे दुःखका ही साधन है।

भावार्थ :– जिन्हें समस्तविकल्पजाल रहित परमसमाधिसे उत्पन्न सुखामृतरूप सर्व आत्मप्रदेशोंमें परमआह्लादभूत स्वरूपतृप्ति नहीं वर्तती ऐसे समस्त संसारी जीवोंके निरन्तर विषयतृष्णा व्यक्त या अव्यक्तरूपसे अवश्य वर्तती है। वे तृष्णारूपी बीज क्रमशः अंकुररूप होकर दुःखवृक्षरूपसे वृद्धिको प्राप्त होकर, इसप्रकार दुःखदाहका वेग असह्य होनेपर, वे जीव विषयोंमें प्रवृत्त होते हैं। इसलिये जिनकी विषयोंमें प्रवृत्ति देखी जाती है ऐसे देवों तकके समस्त संसारी जीव दुःखी ही हैं।

इसप्रकार दुःखभाव ही पुण्योंका – पुण्यजनित सामग्रीका – आलम्बन करता है इसलिये पुण्य सुखाभास ऐसे दुःखका ही अवलम्बन – साधन है ॥ ७५ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ पुनरपि पुण्यजन्यस्येन्द्रियसुखस्य बहुधा दुःखत्वमुद्योतयति –

सपरं बाधासहिदं विच्छिण्णं बंधकारणं विसमं।
जं इंदिएहिं लद्धं तं सोक्खं दुक्खमेव तहा ॥ ७६ ॥

सपरं बाधासहितं विच्छिन्नं बन्धकारणं विषमम्।
यदिन्द्रियैर्लब्धं तत्सौख्यं दुःखमेव तथा ॥ ७६ ॥

बहुधा दुःखत्वं प्रकाशयति – **सपरं** सह परद्रव्यापेक्षया वर्तते सपरं भवतीन्द्रियसुखं, पारमार्थिकसुखं तु परद्रव्यनिरपेक्षत्वादात्माधीनं भवति। **बाधासहियं** तीव्रक्षुधातृष्णाद्यनेकबाधासहितत्वाद्बाधासहितमिन्द्रियसुखं, निजात्मसुखं तु पूर्वोक्तसमस्तबाधारहितत्वादव्याबाधम्। **विच्छिण्णं** प्रतिपक्षभूतासातोदयेन सहितत्वाद्विच्छिन्नं सान्तरितं भवतीन्द्रियसुखं, अतीन्द्रियसुखं तु प्रतिपक्षभूतासातोदयाभावान्निरन्तरम्। **बंधकारणं** दृष्टश्रुतानुभूतभोगाकाङ्क्षाप्रभृत्यनेकापध्यानवशेन भाविनरकादिदुःखोत्पादककर्मबन्धोत्पादकत्वाद्बन्धकारणमिन्द्रियसुखं, अतीन्द्रियसुखं तु सर्वापध्यानरहितत्वादबन्धकारणम्।

अब, पुनः पुण्यजन्य इन्द्रियसुखको अनेक प्रकारसे दुःखरूप प्रकाशित करते हैं :–

गाथा ७६

अन्वयार्थ :–[**यत्**] जो [**इंद्रियैः लब्धं**] इंद्रियोंसे प्राप्त होता है [**तत् सौख्यं**] वह सुख [**सपरं**] परसम्बन्धयुक्त, [**बाधासहितं**] बाधासहित [**विच्छिन्नं**] विच्छिन्न [**बंधकारणं**] बंधका कारण [**विषमं**] और विषम है; [**तथा**] इसप्रकार [**दुःखम् एव**] वह दुःख ही है।

टीका :– परसम्बन्धयुक्त होनेसे, बाधा सहित होनेसे, विच्छिन्न होनेसे, बन्धका कारण होनेसे- और विषम होनेसे, इन्द्रियसुख – पुण्यजन्य होनेपर भी – दुःख ही है।

इन्द्रियसुख (१) 'परके सम्बन्धवाला' होता हुआ पराश्रयताके कारण पराधीन है, (२) 'बाधासहित' होता हुआ खाने, पीने और मैथुनकी इच्छा इत्यादि तृष्णाकी व्यक्तियोंसे (तृष्णाकी प्रगटताओंसे) युक्त होनेसे अत्यन्त आकुल है, (३) 'विच्छिन्न' होता हुआ असातावेदनीयका उदय जिसे [1]च्युत कर देता है ऐसे सातावेदनीयके उदयसे

---

[1] च्युत करना=हटा देना; पदभ्रष्ट करना; (सातावेदनीयका उदय उसकी स्थिति अनुसार रहकर हट जाता है और असाता वेदनीयका उदय आता है)

परयुक्त, बाधासहित, खंडित, बंधकारण, विषम जे।
जे इन्द्रियोथी लब्ध ते सुख अे रीते दुःख ज खरे ॥ ७६ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

सपरत्वात् बाधासहितत्वात् विच्छिन्नत्वात् बंधकारणत्वात् विषमत्वाच्च पुण्यजन्यमपीन्द्रियसुखं दुःखमेव स्यात् । सपरं हि सत् परप्रत्ययत्वात् पराधीनतया, बाधासहितं हि सदशनायोदन्यावृषस्यादिभिस्तृष्णाव्यक्तिभिरुपेतत्वात् अत्यन्ताकुलतया, विच्छिन्नं हि सदसद्वेद्योदयप्रच्यावितसद्वेद्योदयप्रवृत्ततयाऽनुभवत्वादुद्भूतविपक्षतया, बंधकारणं हि सद्विषयोपभोगमार्गानुलग्नरागादिदोषसेनानुसारसंगच्छमानघनकर्मपांसुपटलत्वादुदर्कदुःसहतया, विषमं हि सदभिवृद्धिपरिहाणिपरिणतत्वादत्यन्तविसंष्ठुलतया च दुःखमेव भवति । अथैवं पुण्यमपि पापवद्दुःखसाधनमायातम् ॥ ७६ ॥

अथ पुण्यपापयोरविशेषत्वं निश्चिन्वन्नुपसंहरति –

ण हि मण्णदि जो एवं णत्थि विसेसो त्ति पुण्णपावाणं ।
हिंडदि घोरमपारं संसारं मोहसंछण्णो ॥ ७७ ॥

विसमं विगतः शमः परमोपशमो यत्र तद्विषममतृप्तिकरं हानिवृद्धिसहितत्वाद्वा विषमं, अतीन्द्रियसुखं तु परमतृप्तिकरं हानिवृद्धिरहितम् । **जं इंदियेहिं लद्धं त सोक्खं दुक्खमेव तहा** यदिन्द्रियैर्लब्धं संसारसुखं तत्सुखं यथा पूर्वोक्तपञ्चविशेषणविशिष्टं भवति तथैव दुःखमेवेत्यभिप्रायः ॥ ७६ ॥ एवं

प्रवर्तमान होता हुआ अनुभवमें आता है, इसलिये विपक्षकी उत्पत्तिवाला है, (४) 'बन्धका कारण' होता हुआ विषयोपभोगके मार्गमें लगी हुई रागादि दोषोंकी सेनाके अनुसार कर्मरजके [1]घन पटलका सम्बन्ध होनेके कारण परिणामसे दुःसह है, और (५) 'विषम' होता हुआ हानि-वृद्धिमें परिणमित होनेसे अत्यन्त अस्थिर है; इसलिये वह (इन्द्रियसुख) दुःख ही है ।

जब कि ऐसा है (इन्द्रियसुख दुःख ही है) तो पुण्य भी, पापकी भाँति, दुःखका साधन है ऐसा फलित हुआ ।

भावार्थ—इन्द्रियसुख दुःख ही है, क्योंकि वह पराधीन है, अत्यन्त आकुल है, विपक्षकी (-विरोधकी) उत्पत्तिवाला है, परिणामसे दुःस्सह है, और अत्यन्त अस्थिर है । इससे यह सिद्ध हुआ कि पुण्य भी दुःखका ही साधन है ॥ ७६ ॥

अब, पुण्य और पापकी अविशेषताका निश्चय करते हुए (इस विषयका) उपसंहार करते हैं :–

---

[1] घन पटल=सघन (गाढ़) पर्त, बड़ा झुण्ड ।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

न हि मन्यते य एवं नास्ति विशेष इति पुण्यपापयोः ।
हिण्डति घोरमपारं संसारं मोहसंछन्नः ॥ ७७ ॥

एवमुक्तक्रमेण शुभाशुभोपयोगद्वैतमिव सुखदुःखद्वैतमिव च न खलु परमार्थतः पुण्यपापद्वैतमवतिष्ठते, उभयत्राप्यनात्मधर्मत्वाविशेषत्वात् । यस्तु पुनरनयोः कल्याण-

---

पुण्यानि जीवस्य तृष्णोत्पादकत्वेन दुःखकारणानि भवन्तीति कथनरूपेण द्वितीयस्थले गाथाचतुष्टयं गतम् । अथ निश्चयेन पुण्यपापयोर्विशेषो नास्तीति कथयन् पुण्यपापयोर्व्याख्यानमुपसंहरति – **ण हि मण्णदि जो एवं न** हि मन्यते य एवम् । किम् । **णत्थि विसेसो त्ति पुण्णपावाणं** पुण्यपापयोर्निश्चयेन विशेषो नास्ति । स किं करोति । **हिंडदि घोरमपारं संसारं** हिण्डति भ्रमति । कम् । संसारम् । कथंभूतम् । घोरम् अपारं चाभव्यापेक्षया । कथंभूतः । **मोहसंछण्णो** मोहप्रच्छादित इति । तथा हि –

गाथा ७७

अन्वयार्थ :– [**एवं**] इसप्रकार [**पुण्यपापयोः**] पुण्य और पापमें [**विशेषः नास्ति**] अन्तर नहीं है [**इति**] ऐसा [**यः**] जो [**न हि मन्यते**] नहीं मानता, [**मोहसंछन्नः**] वह मोहाच्छादित होता हुआ [**घोरं अपारं संसारं**] घोर अपार संसारमें [**हिण्डति**] परिभ्रमण करता है ।

टीका :– यों पूर्वोक्त प्रकारसे, शुभाशुभ उपयोगके द्वैतकी भाँति और सुखदुःखके द्वैतकी भाँति परमार्थसे पुण्यपापका द्वैत नहीं टिकता – नहीं रहता, क्योंकि दोनोंमें अनात्मधर्मत्व अविशेष अर्थात् समान है । (परमार्थसे जैसे शुभोपयोग और अशुभोपयोग-रूप द्वैत विद्यमान नहीं है, जैसे [१]सुख और दुःखरूप द्वैत विद्यमान नहीं है, उसीप्रकार पुण्य और पापरूप द्वैतका भी अस्तित्व नहीं है; क्योंकि पुण्य और पाप दोनों आत्माके धर्म न होनेसे निश्चयसे समान ही हैं ।) ऐसा होने पर भी, जो जीव उन दोनोंमें – सुवर्ण और लोहेकी बेड़ीकी भाँति – [२]अहंकारिक अन्तर मानता हुआ, अहमिन्द्रपदादि-सम्पदाओंके कारणभूत धर्मानुराग पर अत्यन्त निर्भररूपसे (-गाढ़रूपसे) अवलम्बित है, वह जीव वास्तवमें चित्तभूमिके उपरक्त होनेसे (-चित्तकी भूमि कर्मोपाधिके निमित्तसे रंगी हुई – मलिन विकृत होनेसे) जिसने शुद्धोपयोग शक्तिका तिरस्कार किया है, ऐसा

---

[१] सुख = इन्द्रियसुख [२] पुण्य और पापमें अन्तर होनेका मत अहंकारजन्य (अविद्याजन्य, अज्ञानजन्य है ।

नहि मानतो—अे रीत पुण्ये पापमां न विशेष छे ।
ते मोहथी आच्छन्न घोर अपार संसारे भमे ॥ ७७ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

कालायसनिगडयोरिवाहङ्कारिकं विशेषमभिमन्यमानोऽहमिन्द्रपदादिसंपदां निदानमिति निर्भरतरं धर्मानुरागमवलम्बते स खलूपरक्तचित्तभित्तितया तिरस्कृतशुद्धोपयोगशक्तिरासंसारं शारीरं दुःखमेवानुभवति ॥ ७७ ॥

अथैवमवधारितशुभाशुभोपयोगाविशेषः समस्तमपि रागद्वेषद्वैतमपहासयन्नशेषदुःखक्षयाय सुनिश्चितमनाः शुद्धोपयोगमधिवसति –

एवं विदिदत्थो जो दव्वेसु ण रागमेदि दोसं वा ।
उवओगविसुद्धो सो खवेदि देहुब्भवं दुक्खं ॥ ७८ ॥

एवं विदितार्थो यो द्रव्येषु न रागमेति द्वेषं वा ।
उपयोगविशुद्धः स क्षपयति देहोद्भवं दुःखम् ॥ ७८ ॥

५ सकल=पूर्ण, समस्त, निरवशेष (आत्मा कोई कालको बाकी रखे बिना संपूर्ण तीनों काल ध्रुव रहता ऐसा द्रव्य है।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यतोऽमीष्वेकापवरकप्रबोधितानेकदीपप्रकाशेष्विव संभूयावस्थितेष्वपि मच्चैतन्यं स्वरूपाद-प्रच्युतमेव मां पृथगवगमयति। एवमस्य निश्चितस्वपरविवेकस्यात्मनो न खलु विकार-कारिणो मोहाङ्कुरस्य प्रादुर्भूतिः स्यात् ॥ ९० ॥

अथ जिनोदितार्थश्राद्धनमन्तरेण धर्मलाभो न भवतीति प्रतर्कयति –

सत्तासंबद्धेदे सविसेसे जो हि णेव सामण्णे।
सद्दहदि ण सो समणो सत्तो धम्मो ण संभवदि ॥ ९१ ॥

सत्तासंबद्धानेतान् सविशेषान् यो हि नैव श्रामण्ये।
श्रद्दधाति न स श्रमणः ततो धर्मो न संभवति ॥ ९१ ॥

पररूपेण जानामि, ततः कारणादेकापवरकप्रबोधितानेकप्रदीपप्रकाशेष्विव संभूयावस्थितेष्वपि सर्व-द्रव्येषु मम सहजशुद्धचिदानन्दैकस्वभावस्य केनापि सह मोहो नास्तीत्यभिप्रायः ॥ ९० ॥ एवं स्वपर-परिज्ञानविषये मूढत्वनिरासार्थं गाथाद्वयेन चतुर्थज्ञानकण्डिका गता। इति पञ्चविंशतिगाथाभिर्ज्ञान-कण्डिकाचतुष्टयाभिधानो द्वितीयोऽधिकारः समाप्तः। अथ निर्दोषिपरमात्मप्रणीतपदार्थश्रद्धानमन्तरेण

धारक द्रव्य जानता हूं। इसप्रकार पृथक्रूपसे वर्तमान स्वलक्षणोंके द्वारा—जो अन्य द्रव्यको छोड़कर उसी द्रव्यमें वर्तते हैं उनके द्वारा—आकाश, धर्म, अधर्म, काल, पुद्गल और अन्य आत्माको सकल त्रिकालमें ध्रुवत्व धारक द्रव्यके रूपमें निश्चित करता हूं (जैसे चैतन्य लक्षणके द्वारा आत्माको ध्रुव द्रव्यके रूपमें जाना, उसीप्रकार अवगाह-हेतुत्व, गतिहेतुत्व इत्यादि लक्षणोंसे—जो कि स्व-लक्ष्यभूत द्रव्यके अतिरिक्त अन्य द्रव्योंमें नहीं पाये जाते उनके द्वारा—आकाश, धर्मास्तिकाय इत्यादिको भिन्न-भिन्न ध्रुव द्रव्योंके रूपमें जानता हूँ) इसलिये मैं आकाश नहीं हूं, धर्म नहीं हूं, अधर्म नहीं हूं, काल नहीं हूं, पुद्गल नहीं हूं और आत्मान्तर नहीं हूँ; क्योंकि—मकानके [1]एक कमरेमें जलाये गये अनेक दीपकोंके प्रकाशोंकी भाँति यह द्रव्य इकट्ठे होकर रहते हुए भी मेरा चैतन्य निजस्वरूपसे अच्युत ही रहता हुआ मुझे पृथक् बतलाता है।

---

[1] जैसे किसी एक कमरेमें अनेक दीपक जलाये जायें तो स्थूलदृष्टिसे देखने पर उनका प्रकाश एक दूसरेमें मिला हुआ मालूम होता है, किन्तु सूक्ष्मदृष्टिसे विचारपूर्वक देखने पर वे सब प्रकाश भिन्न-भिन्न ही हैं; (क्योंकि उनमेंसे एक दीपक बुझ जाने पर उसी दीपकका प्रकाश नष्ट होता है; अन्य दीपकोंके प्रकाश नष्ट नहीं होते) उसीप्रकार जीवादिक अनेक द्रव्य एक ही क्षेत्रमें रहते हैं फिर भी सूक्ष्म दृष्टिसे देखने पर वे सब भिन्न-भिन्न ही हैं, एकमेक नहीं होते।

श्रामण्यमां सत्तामयी सविशेष आ द्रव्यो तणी।
श्रद्धा नहि, ते श्रमण ना; तेमांथी धर्मोद्भव नहीं ॥ ९१ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यो हि नामैतानि सादृश्यास्तित्वेन सामान्यमनुव्रजन्त्यपि स्वरूपास्तित्वेनाश्लिष्टविशेषाणि द्रव्याणि स्वपरावच्छेदेनापरिच्छिन्दन्नश्रद्दधानो वा एवमेव श्रामण्येनात्मानं दमयति स खलु न नाम श्रमणः। यतस्ततोऽपरिच्छिन्नरेणुकनककणिकाविशेषाद्धूलिधावकात्कनकलाभ इव निरुपरागात्मतत्त्वोपलम्भलक्षणो धर्मोपलम्भो न संभूतिमनुभवति ॥ ९१ ॥

श्रमणो न भवति, तस्माच्छुद्धोपयोगलक्षणधर्मोऽपि न संभवतीति निश्चिनोति – **सत्तासंबद्धे** महासत्तासंबन्धेन सहितान् **एदे** एतान् पूर्वोक्तशुद्धजीवादिपदार्थान्। पुनरपि किंविशिष्टान्। **सविसेसे** विशेषसत्तावान्तरसत्ता स्वकीयस्वकीयस्वरूपसत्ता तया सहितान् **जो हि णेव सामण्णे सद्दहदि** यः कर्ता द्रव्यश्रामण्ये स्थितोऽपि न श्रद्धत्ते हि स्फुटं **ण सो समणो** निजशुद्धात्मरुचिरूपनिश्चयसम्यक्त्वपूर्वकपरमसामायिकसंयमलक्षणश्रामण्याभावात्स श्रमणो न भवति। इत्थंभूतभावश्रामण्याभावात् **तत्तो धम्मो ण संभवदि** तस्मात्पूर्वोक्तद्रव्यश्रमणात्सकाशान्निरुपरागशुद्धात्मानुभूतिलक्षणधर्मोऽपि न संभवतीति सूत्रार्थः ॥ ९१ ॥ अथ 'उवसंपयामि सम्मं' इत्यादि नमस्कारगाथायां यत्प्रतिज्ञातं, तदनन्तरं

इसप्रकार जिसने स्व-परका विवेक निश्चित किया है ऐसे इस आत्माको विकारकारी मोहांकुरका प्रादुर्भाव नहीं होता।

भावार्थ :– स्व-परके विवेकसे मोहका नाश किया जा सकता है। वह स्व-परका विवेक, जिनागमके द्वारा स्व-परके लक्षणोंको यथार्थतया जानकर किया जा सकता है ॥ ९० ॥

अब, न्यायपूर्वक ऐसा विचार करते हैं कि – जिनेन्द्रोक्त अर्थोंके श्रद्धान बिना धर्म लाभ (शुद्धात्मअनुभवरूप धर्मप्राप्ति) नहीं होता –

गाथा ९१

अन्वयार्थ :– [**यः हि**] जो (जीव) [**श्रामण्ये**] श्रमणावस्थामें [**एतान् सत्तासंबद्धान् सविशेषान्**] इन [१]सत्तासंयुक्त [२]सविशेष पदार्थोंकी [**न एव श्रद्दधाति**] श्रद्धा नहीं करता, [**सः**] वह [**श्रमणः न**] श्रमण नहीं है; [**ततः धर्मः न संभवति**] उससे धर्मका उद्भव नहीं होता (अर्थात् उस श्रमणाभासके धर्म नहीं होता।)

---

[१] सत्तासंयुक्त=अस्तित्ववाले।

[२] सविशेष=विशेषसहित; भेदवाले; भिन्न-भिन्न।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ 'उवसंपयामि सम्मं जत्तो णिव्वाणसंपत्ती' इति प्रतिज्ञाय 'चारित्तं खलु धम्मो धम्मो जो सो समो त्ति णिद्दिट्ठो' इति साम्यस्य धर्मत्वं निश्चित्य 'परिणमदि जेण दव्वं

'चारित्तं खलु धम्मो' इत्यादिसूत्रेण चारित्रस्य धर्मत्वं व्यवस्थापितम्। अथ 'परिणमदि जेण दव्वं' इत्यादिसूत्रेणात्मनो धर्मत्वं भणितमित्यादि। तत्सर्वं शुद्धोपयोगप्रसादात्प्रसाध्येदानीं निश्चयरत्नत्रय-परिणत आत्मैव धर्म इत्यवतिष्ठते। अथवा द्वितीयपातनिका – सम्यक्त्वाभावे श्रमणो न भवति, तस्मात्

टीका :–जो (जीव) इन द्रव्योंको – कि जो (द्रव्य) [१]सादृश्य-अस्तित्वके द्वारा समानताको धारण करते हुए स्वरूप – अस्तित्वके द्वारा विशेषयुक्त हैं उन्हें – स्व-परके भेदपूर्वक न जानता हुआ और श्रद्धा न करता हुआ यों ही (ज्ञान-श्रद्धाके बिना) मात्र श्रमणतासे (द्रव्यमुनित्वसे) आत्माका दमन करता है वह वास्तवमें श्रमण नहीं है, इसलिये, जैसे जिसे रेती और स्वर्णकणोंका अन्तर ज्ञात नहीं है, उसे धूलके धोनेसे – उसमेंसे स्वर्णलाभ नहीं होता, इसीप्रकार उसमेंसे (-श्रमणाभासमेंसे) [२]निरुपराग आत्मतत्वकी उपलब्धि (प्राप्ति) लक्षणवाले धर्मलाभका उद्भव नहीं होता।

भावार्थ :– जो जीव द्रव्यमुनित्वका पालन करता हुआ भी स्व-परके भेद सहित पदार्थोंकी श्रद्धा नहीं करता, वह निश्चय-सम्यक्त्वपूर्वक परमसामायिकसंयमरूप मुनित्वके अभावके कारण मुनि नहीं है; इसलिये, जैसे जिसे रेती और स्वर्णकणका विवेक नहीं है ऐसे धूलको धोनेवालेको, चाहे जितना परिश्रम करने पर भी, स्वर्णकी प्राप्ति नहीं होती, उसीप्रकार जिसे स्व और परका विवेक नहीं है ऐसे उस द्रव्यमुनिको, चाहे जितनी द्रव्यमुनित्वकी क्रियाओंका कष्ट उठानेपर भी, धर्मकी प्राप्ति नहीं होती ॥ ९१ ॥

[३]'उवसंपयामि सम्मं जत्तो णिव्वाणसंपत्ती' इसप्रकार (पाँचवीं गाथामें) प्रतिज्ञा करके, [४]'चारित्तं खलु धम्मो धम्मो जो सो समो त्ति णिद्दिट्ठो' इसप्रकार (७ वीं गाथामें) साम्यका धर्मत्व (साम्य ही धर्म है) निश्चित करके [५]'परिणमदि जेण दव्वं

---

[१] अस्तित्व दो प्रकारका है :– सादृश्य - अस्तित्व और स्वरूप - अस्तित्व। सादृश्य-अस्तित्वकी अपेक्षासे सर्व द्रव्योंमें समानता है, और स्वरूप-अस्तित्वकी अपेक्षासे समस्त द्रव्योंमें विशेषता है।

[२] निरुपराग=उपराग (-मलिनता, विकार) रहित।

[३] अर्थ – मैं साम्यको प्राप्त करता हूँ, जिससे निर्वाणकी प्राप्ति होती है।

[४] अर्थ – चारित्र वास्तवमें धर्म है जो धर्म है वह साम्य है ऐसा (शास्त्रों में) कहा है।

[५] अर्थ – द्रव्य जिसकालमें जिसभावरूप परिणमित होता है उस कालमें उस-मय है ऐसा (जिनेंद्रदेवने) कहा है; इसलिये धर्मपरिणत आत्माको धर्म जानना चाहिये।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

तक्कालं तम्मयं त्ति पण्णत्तं, तम्हा धम्मपरिणदो आदा धम्मो मुणेयव्वो' इति यदात्मनो धर्मत्वमासूत्रयितुमुपक्रान्तं, यत्प्रसिद्धये च 'धम्मेण परिणदप्पा अप्पा जदि सुद्धसंपओगजुदो पावदि णिव्वाणसुहं' इति निर्वाणसुखसाधनशुद्धोपयोगोऽधिकर्तुमारब्धः, शुभाशुभोपयोगौ च विरोधिनौ निर्ध्वस्तौ, शुद्धोपयोगस्वरूपं चोपवर्णितं, तत्प्रसादजौ चात्मनो ज्ञानानन्दौ सहजौ समुद्योतयता संवेदनस्वरूपं सुखस्वरूपं च प्रपञ्चितम्, तदधुना कथं कथमपि शुद्धोपयोगप्रसादेन प्रसाध्य परमनिस्पृहामात्मतृप्तां पारमेश्वरीप्रवृत्तिमभ्युपगतः कृतकृत्यतामवाप्य नितान्तमनाकुलो भूत्वा प्रलीनभेदवासनोन्मेष स्वयं साक्षाद्धर्म एवास्मीत्यवतिष्ठते —

श्रमणाद्धर्मोऽपि न भवति। तर्हि कथं श्रमणो भवति, इति पृष्टे प्रत्युत्तरं प्रयच्छन् ज्ञानाधिकारमुप-

---

तत्कालं तम्मयं ति पण्णत्तं, तम्हा धम्मपरिणदो आदा धम्मो मुणेयव्वो' इसप्रकार (८ वीं गाथामें) जो आत्माका धर्मत्व कहना प्रारम्भ किया और [१]जिसकी सिद्धिके लिये '[२]धम्मेण परिणदप्पा अप्पा जदि सुद्धसंपओगजुदो, पावदि णिव्वाणसुहं' इसप्रकार (११ वीं गाथामें) निर्वाणसुखके साधनभूत शुद्धोपयोगका अधिकार प्रारम्भ किया, विरोधी शुभाशुभ उपयोगको नष्ट किया (-हेय बताया), शुद्धोपयोगका स्वरूप वर्णन किया, शुद्धोपयोगके प्रसादसे उत्पन्न होनेवाले ऐसे आत्माके सहज ज्ञान और आनन्दको समझाते हुये ज्ञानके स्वरूपका और सुखके स्वरूपका विस्तार किया, उसे (-आत्माके धर्मत्वको) अब किसी भी प्रकार शुद्धोपयोगके प्रसादसे [३]सिद्ध करके, [४]परम निस्पृह, आत्मतृप्त (ऐसी) पारमेश्वरी प्रवृत्तिको प्राप्त होते हुये, कृतकृत्यताको प्राप्त करके अत्यन्त अनाकुल होकर, जिनके [५]भेदवासनाकी प्रगटताका प्रलय हुआ है, ऐसे होते हुये, (आचार्य भगवान) 'मैं स्वयं साक्षात् धर्म ही हूँ' इस प्रकार रहते हैं, (-ऐसे भावमें निश्चल स्थित होते हैं) :—

---

[१] जिसकी सिद्धिके लिये=आत्मा को धर्मरूप बनवाने का जो कार्य साधना के लिए।

[२] अर्थ — धर्मपरिणत स्वरूपवाला आत्मा यदि शुद्ध उपयोगमें युक्त हो तो मोक्षके सुखको पाता है।

[३] सिद्ध करके — साधकर। आत्माको धर्मरूप रचने का जो कार्य साधना था उस कार्य को महापुरुषार्थ करके शुद्धोपयोग द्वारा आचार्य भगवान ने सिद्ध किया।)

[४] परकी स्पृहासे रहित और आत्मामें ही तृप्त, निश्चयरत्नत्रयमें लीनतारूप प्रवृत्ति।

[५] भेदवासना — भेदरूप वृत्ति; विकल्प-परिणाम।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

जो णिहदमोहदिट्ठी आगमकुसलो विरागचरियम्हि ।
अब्भुट्ठिदो महप्पा धम्मो त्ति विसेसिदो समणो ॥ ९२ ॥

यो निहतमोहदृष्टिरागमकुशलो विरागचरिते ।
अभ्युत्थितो महात्मा धर्म इति विशेषितः श्रमणः ॥ ९२ ॥

यदयं स्वयमात्मा धर्मो भवति स खलु मनोरथ एव । तस्य त्वेका बहिर्मोहदृष्टिरेव विहन्त्री । सा चागमकौशलेनात्मज्ञानेन च निहता, नात्र मम पुनर्भावमापत्स्यते । ततो वीतरागचारित्रसूत्रितावतारो ममायमात्मा स्वयं धर्मो भूत्वा निरस्तसमस्तप्रत्यूहतया नित्यमेव निष्कम्प एवावतिष्ठते । अलमतिविस्तरेण । स्वस्ति स्याद्वादमुद्रिताय जैनेन्द्राय

संहरति – **जो णिहदमोहदिट्ठी** तत्त्वार्थश्रद्धानलक्षणव्यवहारसम्यक्त्वोत्पन्नेन निजशुद्धात्मरुचिरूपेण निश्चयसम्यक्त्वेन परिणतत्वान्निहतमोहदृष्टिर्विध्वंसितदर्शनमोहो यः । पुनश्च किंरूपः । **आगमकुसलो** निर्दोषिपरमात्मप्रणीतरपरमागमाभ्यासेन निरुपाधिस्वसंवेदनज्ञानकुशलत्वादागमकुशल आगमप्रवीणः । पुनश्च किंरूप । **विरागचरियम्हि अब्भुट्ठिदो** व्रतसमितिगुप्त्यादिबहिरङ्गचारित्रानुष्ठानवशेन स्वशुद्धात्मनिश्चलपरिणतिरूपवीतरागचारित्रपरिणतत्वात् परमवीतरागचारित्रे सम्यगभ्युत्थितः

गाथा ९२

अन्वयार्थ :– [**यः आगमकुशलः**] जो आगममें कुशल हैं, [**निहतमोहदृष्टिः**] जिसकी मोहदृष्टि हत हो गई है और [**विरागचरिते अभ्युत्थितः**] जो वीतरागचारित्रमें आरूढ़ है, [**महात्मा श्रमणः**] उस महात्मा श्रमणको [**धर्मः इति विशेषितः**] (शास्त्रमें) 'धर्म' कहा है ।

टीका :– यह आत्मा स्वयं धर्म हो, यह वास्तवमें मनोरथ है । उसमें विघ्न डालनेवाली एक [१]बहिर्मोहदृष्टि ही है । और वह (बहिर्मोहदृष्टि) तो [२]आगम-कौशल्य तथा आत्मज्ञानसे नष्ट हो जानेके कारण अब मुझमें पुनः उत्पन्न नहीं होगी ।

---

[१] बहिर्मोहदृष्टि = बहिर्मुख ऐसी मोहदृष्टि । (आत्माको धर्मरूप होनेमें विघ्न डालनेवाली एक बहिर्मोह-दृष्टि ही है ।)

[२] आगमकौशल्य = आगममें कुशलता – प्रवीणता ।

आगम विषे कौशल्य छे ने मोहदृष्टि विनष्ट छे ।
वीतराग – चरितारूढ़ छे, ते मुनि-महात्मा 'धर्म' छे ॥ ९२ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

शब्दब्रह्मणे। स्वस्ति तन्मूलायात्मतत्त्वोपलम्भाय च, यत्प्रसादादुद्ग्रन्थितो झगित्येवासंसारबद्धो मोहग्रन्थिः। स्वस्ति च परमवीतरागचारित्रात्मने शुद्धोपयोगाय, यत्प्रसादादयमात्मा स्वयमेव धर्मो भूतः ॥ ९२ ॥

❀ मन्दाक्रांता छन्द ❀

आत्मा धर्मः स्वयमिति भवन् प्राप्य शुद्धोपयोगं
नित्यानन्दप्रसरसरसे ज्ञानतत्त्वे निलीय।

उद्यतः। पुनरपि कथंभूतः। महप्पा मोक्षलक्षणमहार्थसाधकत्वेन महात्मा **धम्मो त्ति विसेसिदो समणो** जीवितमरणलाभालाभादिसमताभावनापरिणतात्मा स श्रमण एवाभेदनयेन धर्म इति विशेषितो मोहक्षोभविहीनात्मपरिणामरूपो निश्चयधर्मो भणित इत्यर्थः ॥ ९२ ॥ अथैवंभूतनिश्चयरत्नत्रयपरिणतमहातपोधनस्य योऽसौ भक्तिं करोति तस्य फलं दर्शयति –

जो तं दिट्ठा तुट्ठो अब्भुट्ठित्ता करेदि सक्कारं।
वंदणणमंसणादिहिं तत्तो सो धम्ममादियदि ॥ ❀८ ॥

जो तं दिट्ठा तुट्ठो यो भव्यवरपुण्डरीको निरुपरागशुद्धात्मोपलम्भलक्षणनिश्चयधर्मपरिणतं पूर्वसूत्रोक्तं मुनीश्वरं दृष्ट्वा तुष्टो निर्भरगुणानुरागेण संतुष्टः सन्। किं करोति। **अब्भुट्ठित्ता करेदि सक्कारं** अभ्युत्थानं कृत्वा मोक्षसाधकसम्यक्त्वादिगुणानां सत्कारं प्रशंसां करोति **वंदणणमंसणादिहिं तत्तो सो धम्ममादियदि** 'तवसिद्धे णयसिद्धे' इत्यादि वन्दना भण्यते, नमोऽस्त्विति नमस्कारो भण्यते, तत्प्रभृतिभक्तिविशेषैः तस्माद्यतिवरात्स भव्यः पुण्यमादत्ते पुण्यं गृह्णाति इत्यर्थः ॥ ❀८ ॥ अथ तेन पुण्येन भवान्तरे किं फलं भवतीति प्रतिपादयति –

तेण णरा व तिरिच्छा देविं वा माणुसिं गदिं पप्पा।
विहविस्सरियेहिं सया संपुण्णमणोरहा होंति ॥ ❀९ ॥

इसलिये वीतरागचारित्ररूपसे प्रगटताको प्राप्त (-वीतरागचारित्ररूप पर्यायमें परिणत) मेरा यह आत्मा स्वयं धर्म होकर, समस्त विघ्नोंका नाश हो जानेसे सदा निष्कंप ही रहता है। अधिक विस्तारसे बस होओ! जयवंत वर्तो [1]स्याद्वादमुद्रित जैनेन्द्र शब्दब्रह्म; जयवंत वर्तो [2]शब्दब्रह्ममूलक आत्मतत्त्वोपलब्धि – कि जिसके प्रसादसे, अनादि संसारसे बंधी हुई मोहग्रंथि तत्काल ही छूट गई है, और जयवंत वर्तो परम वीतरागचारित्रस्वरूप शुद्धोपयोग कि जिसके प्रसादसे यह आत्मा स्वयमेव धर्म हुआ है ॥ ९२ ॥

---

[1] स्याद्वादमुद्रित जैनेन्द्र शब्दब्रह्म – स्याद्वादकी छापवाला जिनेन्द्रका द्रव्यश्रुत।

[2] शब्दब्रह्ममूलक – शब्दब्रह्म जिसका मूल कारण है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

प्राप्स्यत्युच्चैरविचलतया निष्प्रकम्पप्रकाशां
स्फूर्जज्ज्योतिः सहजविलसद्रत्नदीपस्य लक्ष्मीम् ॥ ५ ॥

निश्चित्यात्मन्यधिकृतमिति ज्ञानतत्त्वं यथावत्
तत्सिद्धयर्थं प्रशमविषयं ज्ञेयतत्त्वं बुभुत्सुः ।
सर्वानर्थान् कलयति गुणद्रव्यपर्याययुक्त्या
प्रादुर्भूतिर्न भवति यथा जातु मोहांकुरस्य ॥ ६ ॥

तेण णरा व तिरिच्छा तेन पूर्वोक्तपुण्येनात्र वर्तमानभवे नरा वा तिर्यञ्चो वा **देविं वा माणुसिं गदिं पप्पा** भवान्तरे दैवीं वा मानुषीं वा गतिं प्राप्य **विहविस्सरियेहिं सया संपुण्णमणोरहा होंति** राजाधिराजरूपलावण्यसौभाग्यपुत्रकलत्रादिपरिपूर्णविभूतिर्विभवो भण्यते, आज्ञाफलमैश्वर्यं भण्यते, ताभ्यां विभवैश्वर्याभ्यां संपूर्णमनोरथा भवन्तीति। तदेव पुण्यं भोगादिनिदानरहितत्वेन यदि सम्यक्त्वपूर्वकं भवति तर्हि तेन परंपरया मोक्षं च लभन्ते इति भावार्थः ॥ ❀९ ॥

[अब श्लोक द्वारा ज्ञानतत्त्व – प्रज्ञापन अधिकारकी पूर्णाहुति की जाती है ।]

अर्थ :– इसप्रकार शुद्धोपयोगको प्राप्त करके आत्मा स्वयं धर्म होता हुआ अर्थात् स्वयं धर्मरूप परिणमित होता हुआ नित्य आनन्दके प्रसारसे सरस (अर्थात् जो शाश्वत आनन्दके प्रसारसे रसयुक्त) ऐसे ज्ञानतत्वमें लीन होकर, अत्यन्त अविचलताके कारण, दैदीप्यमान ज्योतिमय और सहजरूपसे विलसित (-स्वभावसे ही प्रकाशित) रत्न-दीपककी निष्कंप-प्रकाशमय शोभाको पाता है। (अर्थात् रत्नदीपककी भाँति स्वभावसे ही निष्कंपतया अत्यन्त प्रकाशित होता—जानता—रहता है)।

[अब श्लोक द्वारा ज्ञानतत्व-प्रज्ञापन नामक प्रथम अधिकारकी और ज्ञेयतत्व-प्रज्ञापन नामक दूसरे अधिकारकी संधि बतायी जाती है ।]

अर्थ :–आत्मारूपी अधिकरणमें रहनेवाले अर्थात् आत्माके आश्रित रहनेवाले ज्ञानतत्वका इसप्रकार यथार्थतया निश्चय करके, उसकी सिद्धिके लिये (–केवलज्ञान प्रगट करनेके लिये) प्रशमके लक्षसे (–उपशम प्राप्त करने के हेतुसे) ज्ञेयतत्वको जाननेका इच्छुक (जीव) सर्व पदार्थोंको द्रव्य-गुण-पर्याय सहित जानता है, जिससे कभी मोहांकुरकी किंचित् मात्र भी उत्पत्ति न हो ।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

इति प्रवचनसारवृत्तौ तत्त्वदीपिकायां **श्रीमदमृतचन्द्रसूरिविरचितायां ज्ञानतत्त्व-प्रज्ञापनो** नाम प्रथमः श्रुतस्कन्धः समाप्तः ॥

इति **श्री जयसेनाचार्यकृतायां** तात्पर्यवृत्तौ पूर्वोक्तप्रकारेण 'एस सुरासुरमणुसिंदवंदियं' इतोमां गाथामादिं कृत्वा द्वासप्ततिगाथाभिः शुद्धोपयोगाधिकारः, तदनन्तरं 'देवदजदिगुरुपूजासु' इत्यादि पञ्चविंशतिगाथाभिर्ज्ञानकण्डिकाचतुष्टयाभिधानो द्वितीयोऽधिकारः ततश्च 'सत्तासंबद्धेदे' इत्यादि सम्यक्त्वकथनरूपेण प्रथमा गाथा, रत्नत्रयाधारपुरुषस्य धर्मः संभवतीति 'जो णिहदमोहदिट्ठी' इत्यादि द्वितीया चेति स्वतन्त्रगाथाद्वयम्, तस्य निश्चयधर्मसंज्ञतपोधनस्य योऽसौ भक्तिं करोति तत्फलकथनेन 'जो तं दिट्ठा' इत्यादि गाथाद्वयम्। इत्यधिकारद्वयेन पृथग्भूतगाथाचतुष्टयसहितेनैकोत्तरशतगाथाभिः **ज्ञानतत्त्वप्रतिपादकनामा** प्रथमो महाधिकारः समाप्तः ॥ १ ॥

इस प्रकार (श्रीमद्भगवत्कुन्दकुन्दाचार्यदेवप्रणीत) श्रीप्रवचनसार शास्त्रकी श्रीमद्अमृतचंद्राचार्यदेवविरचित तत्त्वदीपिका नामक टीकामें **ज्ञानतत्त्व – प्रज्ञापन** नामक प्रथम श्रुतस्कन्ध समाप्त हुआ ।

■

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

ज्ञेयतत्त्व-प्रज्ञापन

■

अथ ज्ञेयतत्त्वप्रज्ञापनं, तत्र पदार्थस्य सम्यग्द्रव्यगुणपर्यायस्वरूपमुपवर्णयति –

अत्थो खलु दव्वमओ दव्वाणि गुणप्पगाणि भणिदाणि ।
तेहिं पुणो पज्जाया पज्जयमूढा हि परसमया ॥ ९३ ॥

अर्थः खलु द्रव्यमयो द्रव्याणि गुणात्मकानि भणितानि ।
तैस्तु पुनः पर्यायाः पर्ययमूढा हि परसमयाः ॥९३॥

इतः ऊर्ध्वं 'सत्तासंबद्धेदे' इत्यादिगाथासूत्रेण पूर्वं संक्षेपेण यद्व्याख्यातं सम्यग्दर्शनं तस्येदानीं विषयभूतपदार्थव्याख्यानद्वारेण त्रयोदशाधिकशतप्रमितगाथापर्यन्तं विस्तरव्याख्यानं करोति। अथवा द्वितीयपातनिका-पूर्वं यद्व्याख्यातं ज्ञानं तस्य ज्ञेयभूतपदार्थान् कथयति। तत्र त्रयोदशाधिकशतगाथासु मध्ये प्रथमतस्तावत् 'तम्हा तस्स णमाइं' इमां गाथामादिं कृत्वा पाठक्रमेण पञ्चत्रिंशद्गाथापर्यन्तं सामान्यज्ञेयव्याख्यानं, तदनन्तरं 'दव्वं जीवमजीवं' इत्याद्येकोनविंशतिगाथापर्यन्तं विशेषज्ञेयव्याख्यानं, अथानन्तरं 'सपदेसेहिं समग्गो लोगो' इत्यादिगाथाष्टकपर्यन्तं सामान्यभेदभावना, ततश्च 'अत्थित्त-णिच्छिदस्स हि' इत्याद्येकपञ्चाशद्गाथापर्यन्तं विशेषभेदभावना चेति द्वितीयमहाधिकारे समुदायपात-

---

ज्ञेयतत्त्व--प्रज्ञापन

अब, ज्ञेयतत्त्वका प्रज्ञापन करते हैं अर्थात् ज्ञेयतत्त्व बतलाते हैं। उसमें (प्रथम) पदार्थका सम्यक् (–यथार्थ) द्रव्यगुणपर्यायस्वरूप वर्णन करते हैं :–

छे अर्थ द्रव्यस्वरूप, गुण-आत्मक कह्यां छे द्रव्यने ।
वली द्रव्य-गुणथी पर्ययो ; पर्यायमूढ़ परसमय छे ॥ ९३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

इह किल यः कश्चन परिच्छिद्यमानः पदार्थः स सर्व एव विस्तारायतसामान्यसमुदायात्मना द्रव्येणाभिनिर्वृत्तत्वाद्द्रव्यमयः। द्रव्याणि तु पुनरेकाश्रयविस्तारविशेषात्मकैर्गुणैरभिनिर्वृत्तत्वाद्गुणात्मकानि। पर्यायास्तु पुनरायतविशेषात्मका उक्तलक्षणैर्द्रव्यैरपि गुणैरप्यभिनिवृत्तत्वाद्द्रव्यात्मका अपि गुणात्मका अपि। तत्रानेकद्रव्यात्मकैक्यप्रतिपत्तिनिबन्धनो द्रव्यपर्यायः। स द्विविधः, समानजातीयोऽसमानजातीयश्च। तत्र समानजातीयो नाम यथा अनेकपुद्गलात्मको द्व्यणुकस्त्र्यणुक इत्यादि, असमानजातीयो नाम यथा जीवपुद्गलात्मको देवो मनुष्य इत्यादि। गुणद्वारेणायतानैक्यप्रतिपत्तिननिबन्धनो गुणपर्यायः। सोऽपि द्विविधः स्वभावपर्यायो विभावपर्यायश्च। तत्र स्वभावपर्यायो नाम समस्तद्रव्याणामात्मीयात्मीयागुरुलघुगुणद्वारेण प्रतिसमयसमुदीयमानषट्स्थानपतितवृद्धिहानिनानात्वानुभूतिः, विभावपर्यायो नाम रूपादीनां ज्ञानादीनां वा स्वपरप्रत्ययवर्तमानपूर्वोत्तरावस्थावतीर्णतारतम्योपदर्शितस्वभावविशेषानेकत्वापत्तिः। अथेदं दृष्टान्तेन द्रढयति—यथैव हि सर्व एव पटोऽवस्थायिना विस्तारसामान्यसमुदायेनाभिधावताऽऽयतसामान्यसमुदायेन चाभिनिर्वर्त्यमानस्तन्मय एव, तथैव हि सर्व एव पदार्थोऽवस्थायिना विस्तारसामान्यसमुदायेनाभिधावताऽऽयतसामान्यसमुदायेन च द्रव्यनाम्नाभिनिर्वर्त्यमानो द्रव्यमय एव यथैव च पटेऽवस्थायी विस्तारसामान्यसमुदायोऽभिधावन्नायतसामान्यसमुदायो वा गुणैरभिनिर्वर्त्यमानो

निका। अथेदानीं सामान्यज्ञेयव्याख्यानमध्ये प्रथमा नमस्कारगाथा, द्वितीया द्रव्यगुणपर्यायव्याख्यानगाथा, तृतीया स्वसमयपरसमयनिरूपणगाथा, चतुर्थी द्रव्यस्य सत्तादिलक्षणत्रयसूचनगाथा चेति पीठिकाभिधाने प्रथमस्थले स्वतन्त्रगाथाचतुष्टयम्। तदनन्तरं 'सब्भावो हि सहावो' इत्यादिगाथाचतुष्टयपर्यन्तं सत्तालक्षणव्याख्यानमुख्यत्वं, तदनन्तरं 'ण भवो भंगविहीणो' इत्यादिगाथात्रयपर्यन्तमुत्पादव्ययध्रौव्यलक्षणकथनमुख्यता, ततश्च 'पाडुब्भवदि य अण्णो' इत्यादिगाथाद्वयेन द्रव्यपर्यायगुणपर्यायनिरूपणमुख्यता। अथानन्तरं 'ण हवदि जदि सद्दव्वं' इत्यादिगाथाचतुष्टयेन सत्ताद्रव्ययोर भेदविषये युक्तिं कथयति, तदनन्तरं 'जो खलु दव्वसहावो' इत्यादि सत्ताद्रव्ययोर्गुणगुणिकथनेन प्रथमगाथा, द्रव्येण सह गुणपर्याययोरभेदमुख्यत्वेन 'णत्थि गुणो त्ति व कोई' इत्यादि द्वितीया चेति स्वतन्त्रगाथाद्वयं, तदनन्तरं द्रव्यस्य द्रव्यार्थिकनयेन सदुत्पादो भवति पर्यायार्थिकनयेनासदित्यादिकथन-

---

गाथा ९३

अन्वयार्थ :– [**अर्थः खलु**] पदार्थ [**द्रव्यमयः**] द्रव्यस्वरूप है; [**द्रव्याणि**] द्रव्य [**गुणात्मकानि**] गुणात्मक [**भणितानि**] कहे गये हैं; [**तैः तु पुनः**] और द्रव्य तथा गुणोंसे [**पर्यायाः**] पर्यायें होती हैं। [**पर्ययमूढ़ाः हि**] पर्यायमूढ़ जीव [**परसमयाः**] परसमय (अर्थात् मिथ्यादृष्टि) हैं।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

गुणेभ्यः पृथगनुपलम्भाद्गुणात्मक एव, तथैव च पदार्थेष्ववस्थायी विस्तारसामान्य-समुदायोऽभिधावन्नायतसामान्यसमुदायो वा द्रव्यनामा गुणैरभिनिर्वर्त्यमानो गुणेभ्यः पृथगनुपलम्भाद्गुणात्मक एव। यथैव चानेकपटात्मको द्विपटिका त्रिपटिकेति समान-जातीयो द्रव्यपर्यायः, तथैव चानेकपुद्गलात्मको द्व्यणुकस्त्र्यणुक इति समानजातीयो द्रव्यपर्यायः। तथैव चानेककौशेयककार्पासमयपटात्मको द्विपटिकात्रिपटिकेत्यसमानजातीयो

रूपेण 'एवंविहं' इतिप्रभृति गाथाचतुष्टयं, ततश्च 'अत्थि त्ति य' इत्याद्येकसूत्रेण नयसप्तभङ्गीव्याख्या-नमिति समुदायेन चतुर्विंशतिगाथाभिरष्टभिः स्थलैर्द्रव्यनिर्णयं करोति। तद्यथा–अथ सम्यक्त्वं कथयति—

तम्हा तस्स णमाइं किच्चा णिच्चं पि तम्मणो होज्ज।
वोच्छामि संगहादो परमट्ठविणिच्छयाधिगमं ॥ ❀१० ॥

तम्हा तस्स णमाइं किच्चा यस्मात्सम्यक्त्वं विना श्रमणो न भवति तस्मात्कारणात्तस्य सम्यक्-चारित्रयुक्तस्य पूर्वोक्ततपोधनस्य नमस्यां नमस्क्रिया नमस्कारं कृत्वा **णिच्चं पि तम्मणो होज्ज** नित्यमपि तद्गतमना भूत्वा **वोच्छामि** वक्ष्याम्यहं कर्ता **संगहादो** संग्रहात्संक्षेपात् सकाशात्। किम्। **परमट्ठ-विणिच्छयाधिगमं** परमार्थविनिश्चयाधिगमं सम्यक्त्वमिति। परमार्थविनिश्चयाधिगमशब्देन सम्यक्त्वं कथं भण्यत इति चेत्–परमोऽर्थः परमार्थः शुद्धबुद्धैकस्वभावः परमात्मा, परमार्थस्य विशेषेण संशयादि-रहितत्वेन निश्चयः परमार्थविनिश्चयरूपोऽधिगमः शङ्काद्यष्टदोषरहितश्च यः परमार्थतोऽर्थावबोधो

टीका :– इस विश्वमें जो कोई जाननेमें आनेवाला पदार्थ है वह समस्त ही [१]विस्तारसामान्यसमुदायात्मक और [२]आयतसामान्यसमुदायात्मक द्रव्यसे रचित होनेसे द्रव्यमय (-द्रव्यस्वरूप) है। और [३]द्रव्य एक जिनका आश्रय है ऐसे विस्तारविशेषस्वरूप गुणोंसे रचित (-गुणोंसे बने हुवे) होनेसे गुणात्मक है। और पर्यायें – जो कि आयत-विशेषस्वरूप हैं वे – जिनके लक्षण (ऊपर) कहे गये हैं ऐसे द्रव्योंसे तथा गुणोंसे रचित

---

[१] विस्तारसामान्य समुदाय – विस्तारसामान्यरूप समुदाय। विस्तारका अर्थ है चौड़ाई। द्रव्यकी चौड़ाईकी अपेक्षाके (एकसाथ रहनेवाले, सहभावी) भेदोंको (विस्तारविशेषोंको) गुण कहा जाता है; जैसे ज्ञान, दर्शन, चारित्र इत्यादि जीवद्रव्यके विस्तारविशेष अर्थात् गुण हैं। उन विस्तारविशेषोंमें रहनेवाले विशेषत्वको गौण करें तो इन सबमें एक आत्मस्वरूप सामान्यत्व भासित होता है। यह विस्तारसामान्य (अथवा विस्तारसामान्यसमुदाय) वह द्रव्य है।

[२] आयतसामान्यसमुदाय – आयतसामान्यरूप समुदाय। आयतका अर्थ है लम्बाई अर्थात् कालापेक्षितप्रवाह। द्रव्यके लम्बाईकी अपेक्षाके (एकके बाद एक प्रवर्तमान, क्रमभावी, कालापेक्षित) भेदोंको (आयत विशेषोंको) पर्याय कहा जाता है। उन क्रमभावी पर्यायोंमें प्रवर्तमान विशेषत्वको गौण करें तो एक द्रव्यत्वरूप सामान्यत्व ही भासित होता है। यह आयतसामान्य (अथवा आयतसामान्य समुदाय) वह द्रव्य है।

[३] अनन्तगुणोंका आश्रय एक द्रव्य है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

द्रव्यपर्यायः, तथैव चानेकजीवपुद्गलात्मको देवो मनुष्य इत्यसमानजातीयो द्रव्यपर्यायः। यथैव च क्वचित्पटे स्थूलात्मीयागुरुलघुगुणद्वारेण कालक्रमप्रवृत्तेन नानाविधेन परिणमन्नानात्वप्रतिपत्तिर्गुणात्मकः स्वभावपर्यायः, तथैव च समस्तेष्वपि द्रव्येषु सूक्ष्मात्मीयात्मीयागुरुलघुगुणद्वारेण प्रतिसमयसमुदीयमानषट्स्थानपतितवृद्धिहानिनानात्वानुभूतिः गुणात्मकः स्वभावपर्यायः। यथैव च पटे रूपादीनां स्वपरप्रत्ययप्रवर्तमानपूर्वोत्तरावस्थावतीर्णतारतम्योपदर्शितस्वभावविशेषानेकत्वापत्तिर्गुणात्मको विभावपर्यायः; तथैव च समस्तेष्वपि

यस्मात्सम्यक्त्वात्तत् परमार्थविनिश्चयाधिगमम्। अथवा परमार्थविनिश्चयोऽनेकान्तात्मकपदार्थसमूहस्तस्याधिगमो यस्मादिति ॥ ❀१० ॥ अथ पदार्थस्य द्रव्यगुणपर्यायस्वरूपं निरूपयति–**अत्थो खलु दव्वमओ** अर्थो ज्ञानविषयभूतः पदार्थः खलु स्फुटं द्रव्यमयो भवति। कस्मात्। तिर्यक्सामान्योर्ध्वतासामान्यलक्षणेन द्रव्येण निष्पन्नत्वात्। तिर्यक्सामान्योर्ध्वतासामान्यलक्षणं कथ्यते–एककाले नानाव्यक्तिगतोऽन्वयस्तिर्यक्सामान्यं भण्यते। तत्र दृष्टान्तो यथा–नानासिद्धजीवेषु सिद्धोऽयं सिद्धोऽयमित्यनुगताकारः सिद्धजातिप्रत्ययः। नानाकालेष्वेकव्यक्तिगतोन्वय ऊर्ध्वतासामान्यं भण्यते। तत्र दृष्टान्तः यथा–य एव केवलज्ञानोत्पत्तिक्षणे मुक्तात्मा द्वितीयादिक्षणेष्वपि स एवेति प्रतीतिः। अथवा नानागोशरीरेषु गौरयं गौरयमिति गोजातिप्रतीतिस्तिर्यक्सामान्यम्। यथैव चैकस्मिन् पुरुषे बालकुमाराद्यवस्थासु स एवायं देवदत्त इति प्रत्यय ऊर्ध्वतासामान्यम्। **दव्वाणि गुणप्पगाणि भणिदाणि** द्रव्याणि गुणात्मकानि भणितानि। अन्वयिनो गुणा अथवा सहभुवो गुणा इति गुणलक्षणम्। यथा अनन्तज्ञानसुखादिविशेषगुणेभ्यस्तथैवागुरुलघुकादिसामान्यगुणेभ्यश्चाभिन्नत्वाद्गुणात्मकं भवति सिद्धजीवद्रव्यं, तथैव स्वकीयस्वकीयविशेषसामान्यगुणेभ्यः सकाशादभिन्नत्वात् सर्वद्रव्याणि गुणात्मकानि भवन्ति। **तेहिं पुणो पज्जाया** तैः पूर्वोक्तलक्षणैर्द्रव्यैर्गुणैश्च पर्याया भवन्ति। व्यतिरेकिणः पर्याया अथवा क्रमभुवः पर्याया इति पर्यायलक्षणम्। यथैकस्मिन् मुक्तात्मद्रव्ये किंचिदूनचरमशरीराकारगतिमार्गणाविलक्षणः सिद्धगतिपर्यायः तथाऽगुरुलघुकगुणषड्वृद्धिहानिरूपाः साधारणस्वभावगुणपर्यायाश्च, तथा सर्वद्रव्येषु स्वभावद्रव्यपर्यायाः स्वजातीयविजातीयविभावद्रव्यपर्यायाश्च, तथैव

होनेसे द्रव्यात्मक भी हैं गुणात्मक भी हैं। उसमें, अनेक द्रव्यात्मक एकताकी [1]प्रतिपत्तिकी कारणभूत द्रव्यपर्याय है। वह दो प्रकार है। (१) समानजातीय और (२) असमानजातीय। उसमें (१) समानजातीय वह है– जैसे कि अनेकपुद्गलात्मक [2]द्विअणुक, त्रिअणुक इत्यादि; (२) असमानजातीय वह है – जैसे कि जीवपुद्गलात्मक देव, मनुष्य इत्यादि। गुण द्वारा आयतकी अनेकताकी प्रतिपत्तिकी कारणभूत गुणपर्याय है। वह भी दो प्रकार है। (१) स्वभावपर्याय और (२) विभावपर्याय। उसमें समस्त द्रव्योंके अपने-अपने अगुरुलघुगुण द्वारा प्रतिसमय प्रगट होनेवाली षट्स्थानपतित हानि-

---

[1] प्रतिपत्ति = प्राप्ति; ज्ञान; स्वीकार।

[2] द्विअणुक = दो अणुओंसे बना हुआ स्कंध।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

द्रव्येषु रूपादीनां ज्ञानादीनां वा स्वपरप्रत्ययप्रवर्तमानपूर्वोत्तरावस्थावतीर्णतारतम्योपदर्शितस्वभावविशेषानेकत्वापत्तिर्गुणात्मको विभावपर्यायः। इयं हि सर्वपदार्थानां द्रव्यगुणपर्यायस्वभावप्रकाशिका पारमेश्वरी व्यवस्था साधीयसी, न पुनरितरा। यतो हि बहवोऽपि पर्यायमात्रमेवावलम्ब्य तत्त्वाप्रतिपत्तिलक्षणं मोहमुपगच्छन्तः परसमया भवन्ति ॥ ९३ ॥

स्वभावविभावगुणपर्यायाश्च 'जेसिं अत्थि सहाओ' इत्यादिगाथायां, तथैव 'भावा जीवादीया' इत्यादिगाथायां च **पञ्चास्तिकाये** पूर्वं कथितक्रमेण यथासंभवं ज्ञातव्याः। **पज्जयमूढा हि परसमया** यस्मादित्थंभूतद्रव्यगुणपर्यायपरिज्ञानमूढा अथवा नारकादिपर्यायरूपो न भवाम्यहमिति भेदविज्ञानमूढाश्च परसमया मिथ्यादृष्टयो भवन्तीति। तस्मादियं पारमेश्वरी द्रव्यगुणपर्यायव्याख्या समीचीना भद्रा भवतीत्यभि-

---

वृद्धिरूप अनेकत्वकी अनुभूति वह स्वभावपर्याय है, (२) रूपादिके या ज्ञानादिके [१]स्व-परके कारण प्रवर्तमान [२]पूर्वोत्तर अवस्थामें होनेवाले तारतम्यके कारण देखनेमें आनेवाले स्वभावविशेषरूप अनेकत्वकी [३]आपत्ति विभावपर्याय है।

अब यह (पूर्वोक्त कथन) दृष्टान्तसे दृढ़ करते हैं :—

जैसे सम्पूर्ण [४]पट, अवस्थायी (-स्थिर) विस्तारसामान्यसमुदायसे और दौड़ते (-बहते, प्रवाहरूप) हुये ऐसे आयतसामान्यसमुदायसे रचित होता हुआ तन्मय ही है, उसीप्रकार सम्पूर्ण पदार्थ 'द्रव्य' नामक अवस्थायी विस्तारसामान्यसमुदायसे और दौड़ते हुये आयतसामान्यसमुदायसे रचित होता हुआ द्रव्यमय ही है। और जैसे पटमें, अवस्थायी विस्तारसामान्यसमुदाय या दौड़ते हुये आयतसामान्यसमुदाय गुणोंसे रचित होता हुआ गुणोंसे पृथक् अप्राप्त होनेसे गुणात्मक ही है, उसीप्रकार पदार्थोंमें; अवस्थायी विस्तारसामान्यसमुदाय या दौड़ता हुआ आयतसामान्यसमुदाय – जिसका नाम 'द्रव्य' है वह – गुणोंसे रचित होता हुआ गुणोंसे पृथक् अप्राप्य होनेसे गुणात्मक ही है। और जैसे अनेकपटात्मक (-एकसे अधिक वस्त्रोंसे निर्मित) द्विपटिक, त्रिपटिक ऐसे समानजातीय द्रव्यपर्याय है, उसीप्रकार अनेक पुद्गलात्मक द्वि-अणुक, त्रिअणुक ऐसी समानजातीय द्रव्यपर्याय है; और जैसे अनेक रेशमी और सूती पटोंके बने हुए द्विपटिक, त्रिपटिक ऐसी असमानजातीय द्रव्यपर्याय है, उसीप्रकार अनेक जीव-

---

[१] स्व उपादान और पर निमित्त है। [२] पूर्वोत्तर = पहले की और बाद की। [३] आपत्ति = आपतित, आपड़ना।
[४] पट = वस्त्र। [५] द्विपटिक = दो थानोंको जोड़कर (सीकर) बनाया गया एक वस्त्र [यदि दोनों थान एक ही जातिके हों तो समानजातीय द्रव्यपर्याय कहलाता है, और यदि दो थान भिन्न जातिके हों (जैसे एक रेशमी और दूसरा सूती) तो असमानजातीय द्रव्यपर्याय कहलात है।]

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथानुषङ्गिकीमिमामेव स्वसमयपरसमयव्यवस्थां प्रतिष्ठाप्योपसंहरति –

जो पज्जएसु णिरदा जीवा परसमइग त्ति णिद्दिट्ठा ।
आदसहावम्हि ठिदा ते सगसमया मुणेदव्वा ॥ ९४ ॥

प्रायः ॥ ९३ ॥ अथ प्रसंगायातां परसमयस्वसमयव्यवस्थां कथयति-**जे पज्जयेसु णिरदा जीवा** ये पर्यायेषु निरताः जीवाः **परसमयिग त्ति णिद्दिट्ठा** ते परसमया इति निर्दिष्टाः कथिताः । तथा हि—

पुद्गलात्मक देव, मनुष्य ऐसी असमानजातीय द्रव्यपर्याय है । और जैसे कभी पटमें अपने स्थूल अगुरुलघुगुणद्वारा कालक्रमसे प्रवर्तमान अनेक प्रकाररूपसे परिणमित होनेके कारण अनेकत्वकी प्रतिपत्ति गुणात्मक स्वभावपर्याय है, उसीप्रकार समस्त द्रव्योंमें अपने-अपने सूक्ष्म अगुरुलघुगुण द्वारा प्रतिसमय प्रगट होनेवाली षट्स्थानपतित हानिवृद्धिरूप अनेकत्वकी अनुभूति वह गुणात्मक स्वभावपर्याय है; और जैसे पटमें, रूपादिकके स्व-परके कारण प्रवर्तमान पूर्वोत्तर अवस्थामें होनेवाले तारतम्यके कारण देखनेमें आनेवाले स्वभावविशेषरूप अनेकत्वकी आपत्ति वह गुणात्मक विभावपर्याय है, उसीप्रकार समस्त द्रव्योंमें, रूपादिके या ज्ञानादिके स्व-परके कारण प्रवर्तमान पूर्वोत्तर अवस्थामें होनेवाले तारतम्यके कारण देखनेमें आनेवाले स्वभावविशेषरूप अनेकत्वकी आपत्ति वह गुणात्मक विभावपर्याय है ।

वास्तवमें यह, सर्व पदार्थोंके द्रव्यगुणपर्यायस्वभावकी प्रकाशक [1]पारमेश्वरी व्यवस्था भली-उत्तम-पूर्ण-योग्य है, दूसरी कोई नहीं; क्योंकि बहुतसे (जीव) पर्यायमात्रका ही अवलम्बन करके, तत्त्वकी अप्रतिपत्ति जिसका लक्षण है ऐसे मोहको प्राप्त होते हुये परसमय होते हैं ।

भावार्थ :–पदार्थ द्रव्यस्वरूप है । द्रव्य अनन्तगुणमय है । द्रव्यों और गुणोंसे पर्यायें होती हैं । पर्यायके दो प्रकार हैं :– १–द्रव्यपर्याय, २–गुणपर्याय । इनमेंसे द्रव्य-पर्यायके दो भेद हैं :– १–समानजातीय – जैसे द्वि-अणुक, त्रि-अणुक इत्यादि स्कन्ध ; २–असमानजातीय – जैसे मनुष्य देव इत्यादि । गुणपर्यायके दो भेद हैं – १–स्वभाव-पर्याय – जैसे सिद्धके गुणपर्याय २–विभावपर्याय – जैसे स्वपरहेतुक मतिज्ञानपर्याय ।

---

[1] परमेश्वरकी कही हुई ।

पर्यायमां रत जीव जे ते 'परसमय' निर्दिष्ट छे ।
आत्मस्वभावे स्थित जे ते 'स्वक-समय' ज्ञातव्य छे ॥ ९४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

ये पर्यायेषु निरता जीवाः परसमयिका इति निर्दिष्टाः ।
आत्मस्वभावे स्थितास्ते स्वकसमया ज्ञातव्याः ॥ ९४ ॥

ये खलु जीवपुद्गलात्मकमसमानजातीयद्रव्यपर्यायं सकलाविद्यानामेकमूलमुपगता यथोदितात्मस्वभावसंभावनक्लीवास्तस्मिन्नेवाशक्तिमुपव्रजन्ति, ते खलूच्छलितनिरर्गलैकान्तदृष्टयो मनुष्य एवाहमेष ममैवैतन्मनुष्यशरीरमित्यहङ्कारममकाराभ्यां विप्रलभ्यमाना अविचलितचेतनाविलासमात्रादात्मव्यवहारात् प्रच्युत्य क्रोडीकृतसमस्तक्रियाकुटुम्बकं मनुष्यव्यवहारमाश्रित्य रज्यन्तो द्विषन्तश्च परद्रव्येण कर्मणा संगतत्वात्परसमया जायन्ते । ये तु पुनरसंकीर्णद्रव्यगुणपर्यायसुस्थितं भगवंतमात्मनः स्वभावं सकलविद्यानामेकमूलमुपगम्य यथोदितात्मस्वभावसंभावनसमर्थतया पर्यायमात्राशक्तिमत्यस्यात्मनः स्वभाव एव स्थिति-

---

मनुष्यादिपर्यायरूपोऽहमित्यहङ्कारो भण्यते, मनुष्यादिशरीरं तच्छरीराधारोत्पन्नपञ्चेन्द्रियविषयसुखस्वरूपं च ममेति ममकारो भण्यते, ताभ्यां परिणताः ममकाराहङ्काररहितपरमचैतन्यचमत्कारपरिण-

---

ऐसा जिनेन्द्र भगवान्‌की वाणीसे कथित सर्व पदार्थोंका द्रव्य-गुण-पर्यायस्वरूप ही यथार्थ है । जो जीव द्रव्य-गुणको न जानते हुए मात्र पर्यायका ही आलम्बन लेते हैं वे निज स्वभावको न जानते हुये परसमय हैं ॥ ९३ ॥

अब [१]आनुषंगिक ऐसी यह ही स्वसमय-परसमयकी व्यवस्था (अर्थात् स्वसमय और परसमयका भेद) निश्चित करके (उसका) उपसंहार करते हैं :—

गाथा ९४

अन्वयार्थ :— [**ये जीवाः**] जो जीव [**पर्यायेषु निरताः**] पर्यायोंमें लीन हैं [**परसमयिकाः इति निर्दिष्टाः**] उन्हें परसमय कहा गया है [**आत्मस्वभावे स्थिताः**] जो जीव आत्मस्वभावमें स्थित हैं [**ते**] वे [**स्वकसमयाः ज्ञातव्याः**] स्वसमय जानने ।

टीका :— जो जीवपुद्गलात्मक असमानजातीय द्रव्यपर्यायका — जो कि सकल अविद्याओंका एक मूल है उसका — आश्रय करते हुए [२]यथोक्त आत्मस्वभावकी [३]संभावना करनेमें नपुंसक होनेसे उसीमें बल धारण करते हैं (अर्थात् उन असमानजातीय द्रव्य-पर्यायोंके प्रति ही बलवान हैं), वे — जिनकी [४]निरर्गल एकान्तदृष्टि उछलती

---

[१] आनुषंगिक = पूर्व गाथाके कथनके साथ संबन्धवाली । [२] यथोक्त = पूर्व गाथा में कहा जैसा ।
[३] संभावना = संचेतन; अनुभव; मान्यता; आदर ।
[४] निरर्गल = अंकुश बिना की; बेहद (जो मनुष्यादि पर्यायमें लीन हैं, वे बेहद एकांतदृष्टिरूप हैं ।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

मासूत्रयन्ति, ते खलु सहजविजृम्भितानेकान्तदृष्टिप्रक्षपितसमस्तैकान्तदृष्टिपरिग्रहग्रहा मनुष्यादिगतिषु तद्विग्रहेषु चाविहिताहङ्कारममकारा अनेकापवरकसंचारितरत्नप्रदीपमिवैकरूपमेवात्मानमुपलभमाना अविचलितचेतनाविलासमात्रमात्मव्यवहारमुररीकृत्य क्रीडीकृतसमस्तक्रियाकुटुम्बकं मनुष्य व्यवहारमनाश्रयन्तो विश्रान्तरागद्वेषोन्मेषतया परममौदा-

---

तेश्च्युता ये ते कर्मोदयजनितपरपर्यायनिरतत्वात्परसमया मिथ्यादृष्टयो भण्यन्ते। **आदसहावम्मि ठिदा** ये पुनरात्मस्वरूपे स्थितास्ते **सगसमया मुणेदव्वा** स्वसमया मन्तव्या ज्ञातव्या इति। तद्यथा–

है ऐसे – 'यह मैं मनुष्य ही हूँ, मेरा ही यह मनुष्य शरीर है' इस प्रकार 'अहंकार-ममकारसे ठगाये जाते हुये, अविचलितचेतनाविलासमात्र [१]आत्मव्यवहारसे च्युत होकर, जिसमें समस्त क्रियाकलापको छातीसे लगाया जाता है ऐसे [२]मनुष्यव्यवहारका आश्रय करके रागी-द्वेषी होते हुए पर द्रव्यरूप कर्मके साथ संगतताके कारण (-परद्रव्यरूप कर्मके साथ युक्त होजानेसे) वास्तवमें [३]परसमय होते हैं अर्थात् परसमयरूप परिणमित होते हैं।

और जो [४]असंकीर्ण द्रव्य गुण-पर्यायोंसे सुस्थित भगवान आत्माके स्वभावका – जो कि सकल विद्याओंका एक मूल है उसका – आश्रय करके यथोक्त आत्मस्वभावकी संभावनामें समर्थ होनेसे पर्यायमात्र प्रतिके बलको दूर करके आत्माके स्वभावमें ही स्थिति करते हैं (-लीन होते हैं), वे – जिन्होंने सहज-विकसित अनेकान्त दृष्टिसे समस्त एकान्तदृष्टिके [५]परिग्रहके आग्रह प्रक्षीण कर दिये हैं, ऐसे – मनुष्यादि गतियोंमें और उन गतियोंके शरीरोंमें अहंकार-ममकार न करके अनेक कक्षों (कमरों) में [६]संचारित रत्नदीपककी भाँति एकरूप ही आत्माको उपलब्ध (अनुभव) करते हुये, अविचलित-

---

[१] आत्मव्यवहार=आत्मारूप वर्तन, आत्मारूप कार्य, आत्मारूप व्यापार।

[२] मनुष्यव्यवहार=मनुष्यरूप वर्तन (मैं मनुष्य ही हूँ। ऐसी मान्यतापूर्वक वर्तन)।

[३] जो जीव परके साथ एकत्वकी मान्यतापूर्वक युक्त होता है, उसे परसमय कहते हैं।

[४] असंकीर्ण = एकमेव नहीं ऐसे; स्पष्टतया भिन्न [भगवान् आत्मस्वभाव स्पष्ट भिन्न-परके साथ एकमेव नहीं ऐसे-द्रव्यगुणपर्यायोंसे सुस्थित है]।

[५] परिग्रह=स्वीकार; अंगीकार।

[६] संचारित=लेजाये गये। (जैसे भिन्न-भिन्न कमरोंमें लेजाया गया। रत्नदीपक एकरूप ही है, वह किंचित्मात्र भी कमरेके रूपमें नहीं होता, और न कमरेकी क्रिया करता है, उसीप्रकार भिन्न-भिन्न शरीरमें प्रविष्ट होनेवाला आत्मा एकरूप ही है, वह किंचित्मात्र भी शरीररूप नहीं होता और न शरीरकी क्रिया करता है – इसप्रकार ज्ञानी जानता है।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

सीन्यमवलंबमाना निरस्तसमस्तपरद्रव्यसंगतितया स्वद्रव्येणैव केवलेन संगतत्वात्स्वसमया जायन्ते । अतः स्वसमय एवात्मनस्तत्त्वम् ॥ ९४ ॥

अथ द्रव्यलक्षणमुपलक्षयति –

अपरिच्चत्तसहावेणुप्पादव्वयधुवत्तसंबद्धं ।
गुणवं च सपज्जायं जं तं दव्वं ति वुच्चंति ॥ ९५ ॥

अनेकापवरकसंचारितैकरत्नप्रदीप इवानेकशरीरेष्वप्येकोऽहमिति दृढसंस्कारेण निजशुद्धात्मनि स्थिता ये ते कर्मोदयजनितपर्यायपरिणतिरहितत्वात्स्वसमया भवन्तीत्यर्थः ॥ ९४ ॥ अथ द्रव्यस्य सत्तादि-

---

चेतनाविलासमात्र आत्मव्यवहारको अंगीकार करके, जिसमें समस्त क्रियाकलापसे भेंट की जाती है ऐसे मनुष्यव्यवहारका आश्रय नहीं करते हुवे, रागद्वेषका उन्मेष (प्राकट्य) रुक जानेसे परम उदासीनताका आलंबन लेते हुये, समस्त परद्रव्योंकी संगति दूर करदेनेसे मात्र स्वद्रव्यके साथ ही संगतता होनेसे वास्तवमें [१] स्वसमय होते हैं अर्थात् स्वसमयरूप परिणमित होते हैं ।

इसलिये स्वसमय ही आत्माका तत्त्व है ।

भावार्थ :– 'मैं मनुष्य हूँ, शरीरादिकी समस्त क्रियाओंको मैं करता हूँ, स्त्री-पुत्र-धनादिके ग्रहण-त्यागका मैं स्वामी हूँ' इत्यादि मानना सो मनुष्यव्यवहार (मनुष्यरूप प्रवृत्ति) है; 'मात्र अचलित चेतना वह ही मैं हूँ' ऐसा मानना–परिणमित होना सो आत्मव्यवहार (आत्मारूप प्रवृत्ति) है ।

जो मनुष्यादिपर्यायमें लीन हैं, वे एकान्तदृष्टिवाले लोग मनुष्यव्यवहारका आश्रय करते हैं, इसलिये रागी-द्वेषी होते हैं और इसप्रकार परद्रव्यरूप कर्मके साथ सम्बन्ध करते होनेसे वे परसमय हैं; और जो भगवान् आत्मस्वभावमें ही स्थित हैं वे अनेकान्तदृष्टिवाले लोग मनुष्यव्यवहारका आश्रय नहीं करके आत्मव्यवहारका आश्रय करते हैं, इसलिये रागी-द्वेषी नहीं होते अर्थात् परम उदासीन रहते हैं और इसप्रकार परद्रव्यरूप कर्मके साथ सम्बन्ध न करके मात्र स्वद्रव्यके साथ ही सम्बन्ध करते हैं, इसलिये वे स्वसमय हैं ॥ ९४ ॥

अब द्रव्यका लक्षण बतलाते हैं :–

---

[१] जो जीव स्वके साथ एकत्वकी मान्यतापूर्वक (स्व के साथ) युक्त होता है उसे स्व-समय कहा जाता है ।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अपरित्यक्तस्वभावेनोत्पादव्ययध्रुवत्वसंबद्धम् ।
गुणवच्च सपर्यायं यत्तद्द्रव्यमिति ब्रुवन्ति ।। ९५ ।।

इह खलु यदनारब्धस्वभावभेदमुत्पादव्ययध्रौव्यत्रयेण गुणपर्यायद्वयेन च यल्लक्ष्यते तद्द्रव्यम् । तत्र हि द्रव्यस्य स्वभावोऽस्तित्वसामान्यान्वयः, अस्तित्वं हि वक्ष्यति द्विविधं, स्वरूपास्तित्वं सादृश्यास्तित्वं चेति । तत्रोत्पादः प्रादुर्भावः, व्ययः प्रच्यवनं, ध्रौव्यमवस्थितिः । गुणा विस्तारविशेषाः, ते द्विविधाः सामान्यविशेषात्मकत्वात् । तत्रास्तित्वं नास्तित्वमेकत्वमन्यत्वं द्रव्यत्वं पर्यायत्वं सर्वगतत्वमसर्वगतत्वं सप्रदेशत्वमप्रदेशत्वं मूर्तत्वममूर्तत्वं सक्रियत्वमक्रियत्वं चेतनत्वमचेतनत्वं कर्तृत्वमकर्तृत्वं भोक्तृत्वमभोक्तृत्वमगुरुलघुत्वं चेत्यादयः सामान्यगुणाः । अवगाहहेतुत्वं गतिनिमित्तता स्थितिकारणत्वं वर्तनायतनत्वं रूपादिमत्ता चेतनत्वमित्यादयो विशेषगुणाः । पर्याया आयतविशेषाः, ते

लक्षणत्रयं सूचयति–**अपरिच्चत्तसहावेण** अपरित्यक्तस्वभावमस्तित्वेन सहाभिन्नं **उप्पादव्वयधुवत्तसंजुत्तं** उत्पादव्ययध्रौव्यैः सह संयुक्तं **गुणवं च सपज्जायं** गुणवत्पर्यायसहितं च **जं** यदित्थंभूतं सत्तादिलक्षणत्रयसंयुक्तं **तं दव्वं ति वुच्चंति** तद्द्रव्यमिति ब्रुवन्ति सर्वज्ञाः । इदं द्रव्यमुत्पादव्ययध्रौव्यैर्गुणपर्यायैश्च

गाथा ९५

अन्वयार्थ :– [**अपरित्यक्तस्वभावेन**] स्वभावको छोड़े बिना [**यत्**] जो [**उत्पादव्ययध्रुवत्वसंबद्धम्**] उत्पाद-व्यय-ध्रौव्यसंयुक्त है [**च**] तथा [**गुणवत् सपर्यायं**] गुणयुक्त और पर्यायसहित है, [**तत्**] उसे [**द्रव्यम् इति**] 'द्रव्य' [**ब्रुवन्ति**] कहते हैं ।

टीका :–यहाँ (इस विश्वमें) जो, स्वभावभेद किये बिना, [१]उत्पाद-व्यय-ध्रौव्यत्रयसे और [२]गुणपर्यायद्वयसे [३]लक्षित होता है, वह द्रव्य है । इनमेंसे (स्वभाव, उत्पाद, व्यय, ध्रौव्य, गुण और पर्यायमेंसे) द्रव्यका स्वभाव वह [४]अस्तित्वसामान्यरूप

---

[१] उत्पाद-व्यय-ध्रौव्यत्रय = उत्पाद, व्यय और ध्रौव्य – यह त्रिपुटी (तीनोंका समूह) ।

[२] गुणपर्यायद्वय = गुण और पर्याय – यह युगल (दोनोंका समूह) ।

[३] लक्षित होता है = लक्ष्यरूप होता है, पहिचाना जाता है । [(१ उत्पाद-व्यय-ध्रौव्य तथा (२) गुणपर्याय वे लक्षण हैं और द्रव्य वह लक्ष्य है ।]

[४] अस्तित्वसामान्यरूप अन्वय = 'है, है, है' ऐसा एकरूप भाव द्रव्यका स्वभाव है। (अन्वय=एकरूपता सादृश्यभाव ।)

छोड्या विना ज स्वभावने उत्पाद-व्यय-ध्रुव युक्त छे ।
वळी गुण ने पर्यय सहित जे, 'द्रव्य' भाख्युं तेहने ।। ९५ ।।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

पूर्वमेवोक्ताश्चतुर्विधाः। न च तैरुत्पादादिभिर्गुणपर्यायैर्वा सह द्रव्यं लक्ष्यलक्षणभेदेऽपि स्वरूपभेदमुपव्रजति, स्वरूपत एव द्रव्यस्य तथाविधत्वादुत्तरीयवत्। यथा खलूत्तरीयमु-

---

सह लक्ष्यलक्षणभेदे अपि सति सत्ताभेदं न गच्छति। तर्हि किं करोति। स्वरूपतयैव तथाविधत्वमवलम्बते। तथाविधत्वमवलम्बते कोऽर्थः। उत्पादव्ययध्रौव्यस्वरूपं गुणपर्यायस्वरूपं च परिणमति शुद्धात्मवदेव। तथा हि—केवलज्ञानोत्पत्तिप्रस्तावे शुद्धात्मरुचिपरिच्छित्तिनिश्चलानुभूतिरूपकारणसमयसारपर्यायस्य विनाशे सति शुद्धात्मोपलम्भव्यक्तिरूपकार्यसमयसारस्योत्पादः कारणसमयसारस्य व्ययस्तदुभयाधारभूतपरमात्मद्रव्यत्वेन ध्रौव्यं च। तथानन्तज्ञानादिगुणाः, गतिमार्गणाविपक्षभूतसिद्धगतिः, इन्द्रियमार्गणाविपक्षभूतातीन्द्रियत्वादिलक्षणाः शुद्धपर्यायाश्च भवन्तीति। यथा शुद्धसत्तया सहाभिन्नं परमात्मद्रव्यं पूर्वोक्तोत्पादव्ययध्रौव्यैर्गुणपर्यायैश्च सह संज्ञालक्षणप्रयोजनादिभेदेऽपि सति

अन्वय है; अस्तित्व दो प्रकारका कहेंगे :—१—स्वरूप-अस्तित्व। २—सादृश्य-अस्तित्व। उत्पाद वह प्रादुर्भाव (प्रगट होना — उत्पन्न होना) है; व्यय वह प्रच्युति (अर्थात् भ्रष्ट, -नष्ट होना) है; ध्रौव्य वह अवस्थिति (ठिकाना) है; गुण वह विस्तारविशेष हैं। वे सामान्यविशेषात्मक होनेसे दो प्रकारके हैं। इनमें, अस्तित्व, नास्तित्व, एकत्व, अन्यत्व, द्रव्यत्व, पर्यायत्व, सर्वगतत्व, असर्वगतत्व, सप्रदेशत्व, अप्रदेशत्व, मूर्तत्व, अमूर्तत्व, सक्रियत्व, अक्रियत्व, चेतनत्व, अचेतनत्व, कर्तृत्व, अकर्तृत्व, भोक्तृत्व, अभोक्तृत्व, अगुरुलघुत्व, इत्यादि सामान्यगुण हैं; अवगाहहेतुत्व, गतिनिमित्तता, स्थितिकारणत्व, वर्तनायतनत्व, रूपादिमत्व, चेतनत्व इत्यादि विशेष गुण हैं। पर्याय आयतविशेष हैं। वे पूर्व ही (९३ वीं गाथाकी टीकामें) कथित चार प्रकारकी हैं।

द्रव्यका उन उत्पादादिके साथ अथवा गुणपर्यायोंके साथ लक्ष्य-लक्षण भेद होने पर भी स्वरूपभेद नहीं है। स्वरूपसे ही द्रव्य वैसा (उत्पादादि अथवा गुणपर्यायवाला) है—वस्त्रके समान।

जैसे मलिन अवस्थाको प्राप्त वस्त्र, धोनेपर निर्मल अवस्थासे (निर्मल अवस्थारूप, निर्मल अवस्थाकी अपेक्षासे) उत्पन्न होता हुआ उस उत्पादसे लक्षित होता है; किन्तु उसका उस उत्पादके साथ स्वरूप भेद नहीं है, स्वरूपसे ही वैसा है (अर्थात् स्वय उत्पादरूपसे ही परिणत है); उसीप्रकार जिसने पूर्व अवस्था प्राप्त की है ऐसा द्रव्य भी—जो कि उचित बहिरंग साधनोंके सान्निध्य (निकटता; हाज़री) के सद्भावमें अनेक प्रकारकी बहुतसी अवस्थायें करता है वह — [१]अन्तरंगसाधनभूत

---

[१] द्रव्यमें निजमें ही स्वरूपकर्ता और स्वरूपकरण होनेकी सामर्थ्य है। यह सामर्थ्यस्वरूप स्वभाव ही अपने परिणमनमें (अवस्थांतर करनेमें) अन्तरंग साधन है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

पात्तमलिनावस्थं प्रक्षालितममलावस्थयोत्पद्यमानं तेनोत्पादेन लक्ष्यते। न च तेन सह स्वरूपभेदमुपव्रजति, स्वरूपत एव तथाविधत्वमवलम्बते। तथा द्रव्यमपि समुपात्तप्राक्तनावस्थं समुचितबहिरङ्गसाधनसन्निधिसद्भावे विचित्रबहुतरावस्थानं स्वरूपकर्तृकरणसामर्थ्यस्वभावेनांतरङ्गसाधनतामुपागतेनानुग्रहीतमुत्तरावस्थयोत्पद्यमानं तेनोत्पादेन लक्ष्यते। न च तेन सह स्वरूपभेदमुपव्रजति, स्वरूपत एव तथाविधत्वमवलम्बते। यथा च तदेवोत्तरीयममलावस्थयोत्पद्यमानं मलिनावस्थया व्ययमानं तेन व्ययेन लक्ष्यते। न च तेन सह स्वरूपभेदमुपव्रजति, स्वरूपत एव तथाविधत्वमवलम्बते। तथा तदेव द्रव्यमप्युत्तरावस्थयोत्पद्यमानं प्राक्तनावस्थया व्ययमानं तेन व्ययेन लक्ष्यते। न च तेन सह स्वरूपभेदमुपव्रजति, स्वरूपत एव तथाविधत्वमवलम्बते। यथैव च तदेवोत्तरीयमेककालमलावस्थयोत्पद्यमानं मलिनावस्थया व्ययमानमवस्थायिन्योत्तरीयत्वावस्थया ध्रौव्यमालम्बमानं ध्रौव्येण लक्ष्यते। न च तेन सह स्वरूपभेदमुपव्रजति, स्वरूपत एव तथाविधत्वम-

---

तैः सह सत्ताभेदं न करोति, स्वरूपत एव तथाविधत्वमवलम्बते। तथाविधत्वं कोऽर्थः। उत्पादव्ययध्रौव्यगुणपर्यायस्वरूपेण परिणमति। तथा सर्वद्रव्याणि स्वकीयस्वकीययथोचितोत्पादव्ययध्रौव्यैस्तथैव गुणपर्यायैश्च सह यद्यपि संज्ञालक्षणप्रयोजनादिभिर्भेदं कुर्वन्ति तथापि सत्तास्वरूपेण भेदं न कुर्वन्ति, स्वभावत एव तथाविधत्वमवलम्बन्ते। तथाविधत्वं कोऽर्थः। उत्पादव्ययादिस्वरूपेण परिणमन्ति।

स्वरूपकर्ता और स्वरूपकरणके सामर्थ्यरूप स्वभावसे अनुगृहीत होने पर, उत्तर अवस्थासे उत्पन्न होता हुआ वह उत्पादसे लक्षित होता है; किन्तु उसका उस उत्पादके साथ स्वरूपभेद नहीं है, स्वरूपसे ही वैसा है। और जैसे वही वस्त्र निर्मल अवस्थासे उत्पन्न होता हुआ और मलिन अवस्थासे व्ययको प्राप्त होता हुआ उस व्ययसे लक्षित होता है, परन्तु उसका उस व्ययके साथ स्वरूपभेद नहीं है, स्वरूपसे ही वैसा है; उसीप्रकार वही द्रव्य भी उत्तर अवस्थासे उत्पन्न होता हुआ और पूर्व अवस्थासे व्ययको प्राप्त होता हुआ उस व्ययसे लक्षित होता है; परन्तु उसका उस व्ययके साथ स्वरूपभेद नहीं है, वह स्वरूपसे ही वैसा है। और जैसे वही वस्त्र एक ही समयमें निर्मल अवस्थासे उत्पन्न होता हुआ, मलिन अवस्थासे व्ययको प्राप्त होता हुआ और टिकनेवाली ऐसी वस्त्रत्व-अवस्थासे ध्रुव रहता हुआ ध्रौव्यसे लक्षित होता है; परन्तु उसका उस ध्रौव्यके साथ स्वरूपभेद नहीं है, स्वरूपसे ही वैसा है; इसीप्रकार वही द्रव्य भी एक ही समय उत्तर अवस्थासे उत्पन्न होता हुआ, पूर्व अवस्थासे व्यय होता हुआ, और टिकनेवाली ऐसी द्रव्यत्वअवस्थासे ध्रुव रहता हुआ ध्रौव्यसे लक्षित होता है। किन्तु उसका उस ध्रौव्यके साथ स्वरूपभेद नहीं है, वह स्वरूपसे ही वैसा है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

वलम्बते। तथैव तदेव द्रव्यमप्येककालमुत्तरावस्थयोत्पद्यमानं प्राक्तनावस्थया व्ययमानमवस्थायिन्या द्रव्यत्वावस्थया ध्रौव्यमालम्बमानं ध्रौव्येण लक्ष्यते न च तेन सह स्वरूपभेदमुपव्रजति, स्वरूपत एव तथाविधत्वमवलम्बते। यथैव च तदेवोत्तरीयं विस्तारविशेषात्मकैर्गुणैर्लक्ष्यते। न च तैः सह स्वरूपभेदमुपव्रजति, स्वरूपत एव तथाविधत्वमवलम्बते। तथैव तदेव द्रव्यमपि विस्तारविशेषात्मकैर्गुणैर्लक्ष्यते। न च तैः सह स्वरूपभेदमुपव्रजति, स्वरूपत एव तथाविधत्वमवलम्बते। यथैव च तदेवोत्तरोयमायतविशेषात्मकैः पर्यायवर्तिभिस्तन्तुभिर्लक्ष्यते। न च तैः सह स्वरूपभेदमुपव्रजति, स्वरूपत एव तथाविधत्वमवलम्बते। तथैव तदेव द्रव्यमप्यायतविशेषात्मकैः पर्यायैर्लक्ष्यते। न च तैः सह स्वरूपभेदमुपव्रजति, स्वरूपत एव तथाविधत्वमवलम्बते ॥ ९५ ॥

अथ क्रमेणास्तित्वं द्विविधमभिदधाति स्वरूपास्तित्वं सादृश्यास्तित्वं चेति तत्रेदं स्वरूपास्तित्वाभिधानम् –

अथवा यथा वस्त्रं निर्मलपर्यायेणोत्पन्नं मलिनपर्यायेण विनष्टं तदुभयाधारभूतवस्त्ररूपेण ध्रुवमविनश्वरं, तथैव शुक्लवर्णादिगुणनवजीर्णादिपर्यायसहितं च सत् तैरुत्पादव्ययध्रौव्यैस्तथैव च स्वकीयगुणपर्यायैः सह संज्ञादिभेदेऽपि सति सत्तारूपेण भेदं न करोति। तर्हि किं करोति। स्वरूपत एवोत्पादादिरूपेण परिणमति, तथा सर्वद्रव्याणीत्यभिप्रायः ॥ ९५ ॥ एवं नमस्कारगाथा, द्रव्यगुणपर्यायकथनगाथा, स्वसमयपरसमयनिरूपणगाथा, सत्तादिलक्षणत्रयसूचनगाथा चेति स्वतन्त्रगाथाचतुष्टयेन **पीठिका**भिधानं प्रथमस्थलं गतम्। अथ प्रथमं तावत्स्वरूपास्तित्वं प्रतिपादयति—**सहावो हि** स्वभावः स्वरूपं भवति हि स्फुटम्। कः कर्ता। **सब्भावो** सद्भावः शुद्धसत्ता शुद्धास्तित्वम्। कस्य

और जैसे वही वस्त्र विस्तारविशेषस्वरूप (शुक्लत्वादि) गुणोंसे लक्षित होता है; किन्तु उसका उन गुणोंके साथ स्वरूपभेद नहीं है, स्वरूपसे ही वह वैसा है; इसीप्रकार वही द्रव्य भी विस्तारविशेषस्वरूप गुणोंसे लक्षित होता है; किन्तु उसका उन गुणोंके साथ स्वरूपभेद नहीं है, वह स्वरूपसे ही वैसा है। और जैसे वही वस्त्र आयतविशेषस्वरूप पर्यायवर्ती (-पर्यायस्थानीय) तंतुओंसे लक्षित होता है; किन्तु उसका उन तंतुओंके साथ स्वरूपभेद नहीं है, वह स्वरूपसे ही वैसा है उसीप्रकार वही द्रव्य भी आयतविशेषस्वरूप पर्यायोंसे लक्षित होता है, परन्तु उसका उन पर्यायोंके साथ स्वरूपभेद नहीं है, वह स्वरूपसे ही वैसा है ॥ ९५ ॥

अब अनुक्रमसे दो प्रकारका अस्तित्व कहते हैं। स्वरूप-अस्तित्व और सादृश्य-अस्तित्व। इनमेंसे यह स्वरूपास्तित्वका कथन है :–

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

सब्भावो हि सहावो गुणेहिं सगपज्जएहिं चित्तेहिं ।
दव्वस्स सव्वकालं उप्पादव्वयधुवत्तेहिं ॥ ९६ ॥

सद्भावो हि स्वभावो गुणैः स्वकपर्ययैश्चित्रैः ।
द्रव्यस्य सर्वकालमुत्पादव्ययध्रुवत्वैः ॥ ९६ ॥

स्वभावो भवति । **दव्वस्स** मुक्तात्मद्रव्यस्य । तच्च स्वरूपास्तित्वं यथा मुक्तात्मनः सकाशात्पृथग्भूतानां पुद्गलादिपञ्चद्रव्याणां शेषजीवानां च भिन्नं भवति, न च तथा । कैः सह । **गुणेहिं सगपज्जएहिं** केवलज्ञानादिगुणैः किञ्चिदूनचरमशरीराकारादिस्वकपर्यायैश्च सह । कथंभूतैः । **चित्तेहिं** सिद्धगतित्व-मतीन्द्रियत्वकायत्वमयोगत्वमवेदत्वमित्यादिबहुभेदभिन्नैः । न केवलं गुणपर्यायैः सह भिन्नं न भवति । **उप्पादव्वयधुवत्तेहिं** शुद्धात्मप्राप्तिरूपमोक्षपर्यायस्योत्पादो रागादिविकल्परहितपरमसमाधिरूपमोक्ष-मार्गपर्यायस्य व्ययस्तथा मोक्षमोक्षमार्गाधारभूतान्वयद्रव्यत्वलक्षणं ध्रौव्यं चेत्युक्तलक्षणोत्पादव्यय-ध्रौव्यैश्च सह भिन्नं न भवति । कथम् । **सव्वकालं** सर्वकालपर्यन्तं यथा भवति । कस्मात्तैः सह भिन्नं न भवतीति चेत् । यतः कारणाद्गुणपर्यायास्तित्वेनोत्पादव्ययध्रौव्यास्तित्वेन च कर्तृभूतेन शुद्धात्मद्रव्यास्तित्वं साध्यते, शुद्धात्मद्रव्यास्तित्वेन च गुणपर्यायोत्पादव्ययध्रौव्यास्तित्वं साध्यत इति । तद्यथा—यथा स्वकीयद्रव्यक्षेत्रकालभावैः सुवर्णादभिन्नानां पीतत्वादिगुणकुण्डलादिपर्यायाणां संबन्धि यदस्तित्वं स एव सुवर्णस्य सद्भावः, तथा स्वकीयद्रव्यक्षेत्रकालभावैः परमात्मद्रव्यादभिन्नानां केवलज्ञानादिगुणकिंचिदूनचरमशरीराकारादिपर्यायाणां संबन्धि यदस्तित्वं स एव मुक्तात्मद्रव्यस्य सद्भावः । यथा स्वकीयद्रव्यक्षेत्रकालभावैः पीतत्वादिगुणकुण्डलादिपर्यायेभ्यः सकाशादभिन्नस्य सुवर्णस्य

गाथा ९६

अन्वयार्थ :–[**सर्वकालं**] सर्वकालमें [**गुणैः**] गुण तथा [**चित्रैः स्वकपर्यायैः**] अनेक प्रकारकी अपनी पर्यायोंसे [**उत्पादव्ययध्रुवत्वैः**] और उत्पाद-व्यय-ध्रौव्यसे [**द्रव्यस्य सद्भावः**] द्रव्यका जो अस्तित्व है, [**हि**] वह वास्तवमें [**स्वभावः**] स्वभाव है ।

टीका :–अस्तित्व वास्तवमें द्रव्यका स्वभाव है; और वह (अस्तित्व) अन्य साधनसे [१]निरपेक्ष होनेके कारण अनादि–अनन्त होनेसे तथा [२]अहेतुक, एकरूप [३]वृत्तिसे

---

[१] अस्तित्व अन्य साधनकी अपेक्षासे रहित–स्वयंसिद्ध है इसलिये अनादि-अनन्त है ।

[२] अहेतुक = अकारण, जिसका कोई कारण नहीं है ऐसी ।

[३] वृत्ति = वर्तन; वर्तना वह; परिणति । (अकारणिक एकरूप परिणतिसे सदाकाल परिणमता होनेसे अस्तित्व विभावधर्मसे भिन्न लक्षणवाला है ।)

उत्पाद-ध्रौव्य-विनाशथी, गुण ने विविध पर्यायथी ।
अस्तित्व द्रव्यनुं सर्वदा जे, तेह द्रव्यस्वभाव छे ॥ ९६ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अस्तित्वं हि किल द्रव्यस्य स्वभावः, तत्पुनरन्यसाधननिरपेक्षत्वादनाद्यनन्ततयाहेतुकयैकरूपया वृत्त्या नित्यप्रवृत्तत्वाद्विभावधर्मवैलक्षण्याच्च भावभाववद्भावान्नानात्वेऽपि प्रदेशभेदाभावाद्द्रव्येण सहैकत्वमवलम्बमानं द्रव्यस्य स्वभाव एव कथं न भवेत्। तत्तु द्रव्यान्तराणामिव द्रव्यगुणपर्यायाणां न प्रत्येकं परिसमाप्यते। यतो हि परस्परसाधितसिद्धियुक्तत्वात्तेषामस्तित्वमेकमेव, कार्तस्वरवत्। यथा हि द्रव्येण वा क्षेत्रेण वा कालेन वा भावेन वा कार्तस्वरात् पृथगनुपलभ्यमानैः कर्तृकरणाधिकरणरूपेण पीततादिगुणानां

सम्बन्धि यदस्तित्वं स एव पीतत्वादिगुणकुण्डलादिपर्यायाणां स्वभावो भवति, तथा स्वकीयद्रव्यक्षेत्रकालभावैः केवलज्ञानादिगुणकिंचिदूनचरमशरीराकारपर्यायेभ्यः सकाशादभिन्नस्य मुक्तात्मद्रव्यस्य संबन्धि यदस्तित्वं स एव केवलज्ञानादिगुणकिंचिदूनचरमशरीराकारपर्यायाणां स्वभावो ज्ञातव्यः। अथेदानीमुत्पादव्ययध्रौव्याणामपि द्रव्येण सहाभिन्नास्तित्वं कथ्यते। यथा स्वकीयद्रव्यादिचतुष्टयेन सुवर्णादिभिन्नानां कटकपर्यायोत्पादकङ्कणपर्यायविनाशसुवर्णत्वलक्षणध्रौव्याणां संबन्धि यदस्तित्वं स एव सुवर्णसद्भावः, तथा स्वद्रव्यादिचतुष्टयेन परमात्मद्रव्यादभिन्नानां मोक्षपर्यायोत्पादमोक्षमार्गपर्यायव्ययतदुभयाधारभूतपरमात्मद्रव्यत्वलक्षणध्रौव्याणां संबन्धि यदस्तित्वं स एव मुक्तात्मद्रव्यसद्भावः। यथा स्वद्रव्यादिचतुष्टयेन कटकपर्यायोत्पादकङ्कणपर्यायव्ययसुवर्णत्वलक्षणध्रौव्येभ्यः

सदा ही प्रवर्तता होनेके कारण विभावधर्मसे विलक्षण होनेसे, भाव और [१]भाववानताके कारण अनेकत्व होने पर भी प्रदेशभेद न होनेसे द्रव्यके साथ एकत्वको धारण करता हुआ, द्रव्यका स्वभाव ही क्यों न हो? (अवश्य होवे।) वह अस्तित्व – जैसे भिन्न-भिन्न द्रव्योंमें प्रत्येकमें समाप्त हो जाता है उसीप्रकार–द्रव्य-गुण-पर्यायमें प्रत्येकमें समाप्त नहीं होजाता, क्योंकि उनकी सिद्धि परस्पर होती है, इसलिये (अर्थात् द्रव्य-गुण और पर्याय एक दूसरेसे परस्पर सिद्ध होते हैं इसलिये – यदि एक न हो तो दूसरे दो भी सिद्ध नहीं होते इसलिये) उनका अस्तित्व एक ही है; – सुवर्णकी भाँति।

जैसे द्रव्य, क्षेत्र, काल या भावसे [२]सुवर्णसे जो पृथक् दिखाई नहीं देते; कर्ता-करण-अधिकरणरूपसे पीतत्वादिगुणोंके और कुण्डलादिपर्यायोंके स्वरूपको धारण करके प्रवर्तमान सुवर्णके अस्तित्वसे जिनकी उत्पत्ति होती है, – ऐसे पीतत्वादिगुणों और कुण्डलादि पर्यायोंसे जो सुवर्णका अस्तित्व है, वह सुवर्णका स्वभाव है; उसीप्रकार द्रव्यसे, क्षेत्रसे, कालसे या भावसे जो द्रव्यसे पृथक् दिखाई नहीं देते, कर्ता-करण-[३]अधिकरण-

---

[१] अस्तित्व तो (द्रव्यका) भाव है और द्रव्य भाववान् है।

[२] पीतत्वादि गुण और कुण्डलादि पर्यायें।

[३] द्रव्य ही गुण-पर्यायोंका कर्ता (करनेवाला), उनका करण (साधन) और उनका अधिकरण (आधार) है; इसलिये द्रव्य ही गुण-पर्यायका स्वरूप धारण करता है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

कुण्डलादिपर्यायाणां च स्वरूपमुपादाय प्रवर्तमानप्रवृत्तियुक्तस्य कार्तस्वरास्तित्वेन निष्पादितनिष्पत्तियुक्तैः पीतत्वादिगुणैः कुण्डलादिपर्यायैश्च यदस्तित्वं कार्तस्वरस्य स स्वभावः, तथा हि द्रव्येण वा क्षेत्रेण वा कालेन वा भावेन वा द्रव्यात्पृथगनुपलभ्यमानैः कर्तृकरणाधिकरणरूपेण गुणानां पर्यायाणां च स्वरूपमुपादाय प्रवर्तमानप्रवृत्तियुक्तस्य द्रव्यास्तित्वेन निष्पादितनिष्पत्तियुक्तैर्गुणैः पर्यायैश्च यदस्तित्वं द्रव्यस्य स स्वभावः। यथा वा द्रव्येण वा क्षेत्रेण वा कालेन वा भावेन वा पीतत्वादिगुणेभ्यः कुण्डलादिपर्यायेभ्यश्च पृथगनुपलभ्यमानस्य कर्तृकरणाधिकरणरूपेण कार्तस्वरस्वरूपमुपादाय प्रवर्तमानप्रवृत्तियुक्तैः पीतत्वादिगुणैः

सकाशादभिन्नस्य सुवर्णस्य संबन्धि यदस्तित्वं स एव कटकपर्यायोत्पादकङ्कणपर्यायव्ययतदुभयाधारभूतसुवर्णत्वलक्षणध्रौव्याणां स्वभावः, तथा स्वद्रव्यादिचतुष्टयेन मोक्षपर्यायोत्पादमोक्षमार्गपर्यायव्य-

---

रूपसे गुणोंके और पर्यायोंके स्वरूपको धारण करके प्रवर्तमान द्रव्यके अस्तित्वसे जिनकी उत्पत्ति होती है,—ऐसे गुणों और पर्यायोंसे जो द्रव्यका अस्तित्व है, वह स्वभाव है। (द्रव्यसे, क्षेत्रसे, कालसे या भावसे सुवर्णसे भिन्न न दिखाई देनेवाले पीतत्वादिक और कुण्डलादिकका अस्तित्व वह सुवर्णका ही अस्तित्व है, क्योंकि पीतत्वादिकके और कुण्डलादिकके स्वरूपको सुवर्ण ही धारण करता है, इसलिये सुवर्णके अस्तित्वसे ही पीतत्वादिककी और कुण्डलादिककी निष्पत्ति—सिद्धि होती है; सुवर्ण न हो तो पीतत्वादिक और कुण्डलादिक भी न हों, इसीप्रकार द्रव्यसे, क्षेत्रसे, कालसे या भावसे द्रव्यसे भिन्न नहीं दिखाई देनेवाले गुणों और पर्यायोंका अस्तित्व वह द्रव्यका ही अस्तित्व है, क्योंकि गुणों और पर्यायोंके स्वरूपको द्रव्य ही धारण करता है, इसलिये द्रव्यके अस्तित्वसे ही गुणोंकी और पर्यायोंकी निष्पत्ति होती है, द्रव्य न हो तो गुण और पर्यायें भी न हों। ऐसा अस्तित्व वह द्रव्यका स्वभाव है।)

अथवा, जैसे द्रव्यसे, क्षेत्रसे, कालसे या भावसे [१]जो पीतत्वादि गुणोंसे और कुण्डलादि पर्यायोंसे पृथक् नहीं दिखाई देता, कर्ता-करण-अधिकरणरूपसे सुवर्णके स्वरूपको धारण करके प्रवर्तमान पीतत्वादिगुणों और कुण्डलादिपर्यायोंसे जिसकी निष्पत्ति होती है,—ऐसे सुवर्णका, मूलसाधनपनेसे [२]उनसे निष्पन्न होता हुआ, जो अस्तित्व है, वह स्वभाव है; उसीप्रकार द्रव्यसे, क्षेत्रसे, कालसे या भावसे गुणोंसे

---

[१] जो = जो सुवर्ण।

[२] उनसे = पीतत्वादि गुणों और कुण्डलादि पर्यायोंसे। (सुवर्णका अस्तित्व निष्पन्न होनेमें, उपजनेमें या सिद्ध होनेमें मूलसाधन पीतत्वादि गुण और कुण्डलादि पर्यायें हैं।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

कुण्डलादिपर्यायैश्च निष्पादितनिष्पत्तियुक्तस्य कार्तस्वरस्य मूलसाधनतया तैर्निष्पादितं यदस्तित्वं स स्वभावः, तथा द्रव्येण वा क्षेत्रेण वा कालेन वा भावेन वा गुणेभ्यः पर्यायेभ्यश्च पृथगनुपलभ्यमानस्य कर्तृकरणाधिकरणरूपेण द्रव्यस्वरूपमुपादाय प्रवर्तमानप्रवृत्तियुक्तैर्गुणैः पर्यायैश्च निष्पादितनिष्पत्तियुक्तस्य द्रव्यस्य मूलसाधनतया तैर्निष्पादितं यदस्तित्वं स स्वभावः। किंच – यथा हि द्रव्येण वा क्षेत्रेण वा कालेन वा भावेन वा कार्तस्वरात्पृथगनुपलभ्यमानैः कर्तृकरणाधिकरणरूपेण कुंडलाङ्गदपीतताद्युत्पादव्ययध्रौव्याणां स्वरूप-

---

यतदुभयाधारभूतमुक्तात्मद्रव्यत्वलक्षणध्रौव्येभ्यः सकाशादभिन्नस्य परमात्मद्रव्यस्य संबन्धि यदस्तित्वं स एव मोक्षपर्यायोत्पादमोक्षमार्गपर्यायव्ययतदुभयाधारभूतमुक्तात्मद्रव्यत्वलक्षणध्रौव्याणां स्वभाव

और पर्यायोंसे जो पृथक् नहीं दिखाई देता, कर्ता-करण – [1]अधिकरणरूपसे द्रव्यके स्वरूपको धारण करके प्रवर्तमान गुणों और पर्यायोंसे जिसकी निष्पत्ति होती है, – ऐसे द्रव्यका- मूलसाधनपनेसे उनसे निष्पन्न होता हुआ जो अस्तित्व है, वह स्वभाव है। (पीतत्वादिकसे और कुण्डलादिकसे भिन्न न दिखाई देनेवाले सुवर्णका अस्तित्व वह पीतत्वादिक और कुण्डलादिकका ही अस्तित्व है, क्योंकि सुवर्णके स्वरूपको पीतत्वादिक और कुण्डलादिक ही धारण करते हैं, इसलिये पीतत्वादिक और कुण्डलादिकके अस्तित्वसे ही सुवर्णकी निष्पत्ति होती है, पीतत्वादिक और कुण्डलादिक न हों तो सुवर्ण भी न हो; इसीप्रकार गुणोंसे और पर्यायोंसे भिन्न न दिखाई देनेवाले द्रव्यका अस्तित्व वह गुणों और पर्यायोंका ही अस्तित्व है, क्योंकि द्रव्यके स्वरूपको गुणों और पर्यायें ही धारण करती हैं इसलिये गुणों और पर्यायोंके अस्तित्वसे ही द्रव्यकी निष्पत्ति होती है। यदि गुणों और पर्यायें न हो तो द्रव्य भी न हो। ऐसा अस्तित्व वह द्रव्यका स्वभाव है।)

(जिसप्रकार द्रव्यका और गुण-पर्यायका एक ही अस्तित्व है ऐसा सुवर्णके दृष्टान्त पूर्वक समझाया, उसीप्रकार अब सुवर्णके दृष्टान्त पूर्वक ऐसा बताया जा रहा है कि द्रव्यका और उत्पाद-व्यय-ध्रौव्यका भी एक ही अस्तित्व है।)

जैसे द्रव्यसे, क्षेत्रसे, कालसे या भावसे, सुवर्णसे [2]जो पृथक् नहीं दिखाई देते, कर्ता-करण – [3]अधिकरणरूपसे कुण्डलादि उत्पादोंके, बाजूबंधादिव्ययोंके और पीतत्वादि

---

[1] गुण-पर्यायें ही द्रव्यकी कर्ता, करण और अधिकरण हैं; इसलिये गुण – पर्यायें ही द्रव्यका स्वरूप धारण करती हैं। [2] जो = जो कुण्डलादि उत्पाद, बाजूबंधादि व्यय और पीतादि ध्रौव्य।

[3] सुवर्ण ही कुण्डलादि-उत्पाद, बाजूबंधादि-व्यय और पीतत्वादि ध्रौव्यका कर्ता, करण तथा अधिकरण है; इसलिये सुवर्ण ही उनका स्वरूप धारण करता है। (सुवर्ण ही कुण्डलादिरूपसे उत्पन्न होता है, बाजूबंधादि-रूपसे नष्ट होता है और पीतत्वादिरूपसे अवस्थित रहता है।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

मुपादाय प्रवर्तमानप्रवृत्तियुक्तस्य कार्तस्वरास्तित्वेन निष्पादितनिष्पत्तियुक्तैः कुण्डलाङ्गदपीतताद्युत्पादव्ययध्रौव्यैर्यदस्तित्वं कार्तस्वरस्य स स्वभावः, तथा हि द्रव्येण वा क्षेत्रेण वा कालेन वा भावेन वा द्रव्यात्पृथगनुपलभ्यमानैः कर्तृकरणाधिकरणरूपेणोत्पादव्ययध्रौव्याणां स्वरूपमुपादाय प्रवर्तमानप्रवृत्तियुक्तस्य द्रव्यास्तित्वेन निष्पादितनिष्पत्तियुक्तैरुत्पादव्ययध्रौव्यैर्यदस्तित्वं द्रव्यस्य स स्वभावः। यथा वा द्रव्येण वा क्षेत्रेण वा कालेन वा भावेन

इति। एवं यथा मुक्तात्मद्रव्यस्य स्वकीयगुणपर्यायोत्पादव्ययध्रौव्यैः सह स्वरूपास्तित्वाभिधानमवान्त-

---

ध्रौव्योंके स्वरूपको धारण करके प्रवर्तमान सुवर्णके अस्तित्वसे जिनकी निष्पत्ति होती है,—ऐसे कुण्डलादि – उत्पाद, बाजूबंधादिव्यय और पीतत्वादि ध्रौव्योंसे जो सुवर्णका अस्तित्व है, वह (सुवर्णका) स्वभाव है; उसीप्रकार द्रव्यसे, क्षेत्रसे, कालसे या भावसे जो द्रव्यसे पृथक् दिखाई नहीं देते, कर्ता-करण-अधिकरणरूपसे उत्पाद-व्यय-ध्रौव्योंके स्वरूपको धारण करके प्रवर्तमान द्रव्यके अस्तित्वसे जिनकी निष्पत्ति होती है,—ऐसे उत्पाद-व्यय-ध्रौव्योंसे जो द्रव्यका अस्तित्व है वह स्वभाव है। (द्रव्यसे, क्षेत्रसे, कालसे या भावसे द्रव्यसे भिन्न दिखाई न देनेवाले उत्पाद, व्यय और ध्रौव्योंका अस्तित्व है वह द्रव्यका ही अस्तित्व है; क्योंकि उत्पाद, व्यय और ध्रौव्योंके स्वरूपको द्रव्य ही धारण करता है, इसलिये द्रव्यके अस्तित्वसे ही उत्पाद, व्यय और ध्रौव्योंकी निष्पत्ति होती है। यदि द्रव्य न हो तो उत्पाद, व्यय और ध्रौव्य भी न हों। ऐसा अस्तित्व वह द्रव्यका स्वभाव है।)

अथवा जैसे द्रव्यसे, क्षेत्रसे, कालसे या भावसे कुण्डलादि-उत्पादोंसे बाजूबंधादि-व्ययोंसे और पीतत्वादिध्रौव्योंसे जो पृथक् नहीं दिखाई देता; कर्ता-करणअधिकरणरूपसे सुवर्णके स्वरूपको धारण करके प्रवर्तमान कुण्डलादि-उत्पादों, बाजूबंधादिव्ययों और पीतत्वादिध्रौव्योंसे जिसकी निष्पत्ति होती है,—ऐसे सुवर्णका, मूलसाधनपनेसे उनसे निष्पन्न होता हुआ, जो अस्तित्व है, वह स्वभाव है। उसीप्रकार द्रव्यसे, क्षेत्रसे, कालसे या भावसे उत्पाद-व्यय-ध्रौव्योंसे जो पृथक् दिखाई नहीं देता, कर्ता-करण – [1]अधिकरण-रूपसे द्रव्यके स्वरूपको धारण करके प्रवर्तमान उत्पाद-व्यय-ध्रौव्योंसे जिसकी निष्पत्ति होती है,—ऐसे द्रव्यका मूलसाधनपनेसे उनसे निष्पन्न होता हुआ जो अस्तित्व है, वह

---

[1] उत्पाद-व्यय-ध्रौव्य ही द्रव्यके कर्ता, करण और अधिकरण हैं, इसलिये उत्पाद-व्यय-ध्रौव्य ही द्रव्यके स्वरूपको धारण करते हैं।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

वा कुण्डलाङ्गदपीतताद्युत्पादव्ययध्रौव्येभ्यः पृथगनुपलभ्यमानस्य कर्तृकरणाधिकरणरूपेण कार्तस्वरस्वरूपमुपादाय प्रवर्तमानप्रवृत्तियुक्तैः कुण्डलाङ्गदपीतताद्युत्पादव्ययध्रौव्यैर्निष्पादितनिष्पत्तियुक्तस्य कार्तस्वरस्य मूलसाधनतया तैर्निष्पादितं यदस्तित्वं स स्वभावः, तथा द्रव्येण वा क्षेत्रेण वा कालेन वा भावेन वोत्पादव्ययध्रौव्येभ्यः पृथगनुपलभ्यमानस्य कर्तृकरणाधिकरणरूपेण द्रव्यस्वरूपमुपादाय प्रवर्तमानप्रवृत्तियुक्तैरुत्पादव्ययध्रौव्यैर्निष्पादितनिष्पत्तियुक्तस्य द्रव्यस्य मूलसाधनतया तैर्निष्पादितं यदस्तित्वं स स्वभावः ॥ ९६ ॥

इदं तु सादृश्यास्तित्वाभिधानमस्तीति कथयति –

रास्तित्वमभिन्नं व्यवस्थापितं तथैव समस्तशेषद्रव्याणामपि व्यवस्थापनीयमित्यर्थः ॥ ९६ ॥
अथ सादृश्यास्तित्वशब्दाभिधेयां महासत्तां प्रज्ञापयति—**इह विविहलक्खणाणं** इह लोके प्रत्येकसत्ता-

---

स्वभाव है। (उत्पादोंसे, व्ययोंसे और ध्रौव्योंसे भिन्न न दिखाई देनेवाले द्रव्यका अस्तित्व वह उत्पादों, व्ययों और ध्रौव्योंका ही अस्तित्व है; क्योंकि द्रव्यके स्वरूपको उत्पाद, व्यय और ध्रौव्य ही धारण करते हैं, इसलिये उत्पाद-व्यय और ध्रौव्योंके अस्तित्वसे ही द्रव्यकी निष्पत्ति होती है। यदि उत्पाद-व्यय-ध्रौव्य न हों तो द्रव्य भी न हो। ऐसा अस्तित्व वह द्रव्यका स्वभाव है।)

भावार्थ :– अस्तित्व के और द्रव्यके प्रदेशभेद नहीं है; और वह अस्तित्व अनादि-अनन्त है तथा अहेतुक एकरूप परिणतिसे सदा परिणमित होता है, इसलिये विभाव-धर्मसे भी भिन्न प्रकारका है, ऐसा होनेसे अस्तित्व द्रव्यका स्वभाव ही है।

गुण-पर्यायोंका और द्रव्यका अस्तित्व भिन्न नहीं है; एक ही है; क्योंकि गुण-पर्यायें द्रव्यसे ही निष्पन्न होती हैं, और द्रव्य गुण-पर्यायोंसे ही निष्पन्न होता है। और इसीप्रकार उत्पाद-व्यय-ध्रौव्यका और द्रव्यका अस्तित्व भी एक ही है; क्योंकि उत्पाद-व्यय-ध्रौव्य द्रव्यसे ही उत्पन्न होते हैं, और द्रव्य उत्पाद-व्यय-ध्रौव्योंसे ही उत्पन्न होता है।

इसप्रकार स्वरूपा-स्तित्वका निरूपण हुआ ॥ ९६ ॥

अब यह (नीचे अनुसार) सादृश्य-अस्तित्वका कथन है :–

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

इह विविहलक्खणाणं लक्खणमेगं सदित्ति सव्वगयं ।
उवदिसदा खलु धम्मं जिणवरवसहेण पण्णत्तं ॥ ९७ ॥

इह विविधलक्षणानां लक्षणमेकं सदिति सर्वगतम् ।
उपदिशता खलु धर्मं जिनवरवृषभेण प्रज्ञप्तम् ॥ ९७ ॥

भिधानेन स्वरूपास्तित्वेन विविधलक्षणानां भिन्नलक्षणानां चेतनाचेतनमूर्तामूर्तपदार्थानां **लक्खणमेगं तु** एकमखण्डलक्षणं भवति । किं कर्तृ । **सदिति** सर्वं सदिति महासत्तारूपम् । किंविशिष्टम् । **सव्वगयं** संकरव्यतिकरपरिहाररूपस्वजात्यविरोधेन शुद्धसंग्रहनयेन सर्वगतं सर्वपदार्थव्यापकम् । इदं केनोक्तम् ।

गाथा ९७

अन्वयार्थ :– [**धर्मं**] धर्मका [**खलु**] वास्तवमें [**उपदिशता**] उपदेश करते हुए [**जिनवरवृषभेण**] [१]जिनवरवृषभने [**इह**] इस विश्वमें [**विविधलक्षणानां**] विविध लक्षणवाले (भिन्न भिन्न स्वरूपास्तित्ववाले सर्व) द्रव्योंका [**सत् इति**] 'सत्' ऐसा [**सर्वगतं**] [२]सर्वगत [**लक्षणं**] लक्षण (सादृश्यास्तित्व) [**एकं**] एक [**प्रज्ञप्तम्**] कहा है ।

टीका :–इस विश्वमें, विचित्रताको विस्तारित करते हुए (विविधताअनेकताको दिखाते हुए), अन्य द्रव्योंसे [३]व्यावृत्त रहकर प्रवर्तमान, और प्रत्येक द्रव्यकी सीमाको बाँधते हुए ऐसे विशेषलक्षणभूत स्वरूपास्तित्वसे (समस्त द्रव्य) लक्षित होते हैं फिर भी सर्व द्रव्योंका, विचित्रताके विस्तारको अस्त करता हुआ, सर्व द्रव्यों में प्रवृत्त होकर रहनेवाला, और प्रत्येक द्रव्यकी बँधी हुई सीमाकी अवगणना करता हुआ, 'सत्' ऐसा जो सर्वगत सामान्यलक्षणभूत सादृश्यास्तित्व है वह वास्तवमें एक ही जानना चाहिये । इसप्रकार 'सत्' ऐसा कथन और 'सत्' ऐसा ज्ञान सर्व पदार्थोंका [४]परामर्श करनेवाला है । यदि वह ऐसा (सर्वपदार्थपरामर्शी) न हो तो कोई पदार्थ सत्, (अस्तित्ववाला) कोई असत् (अस्तित्व रहित), कोई सत् तथा असत् और कोई अवाच्य होना चाहिये; किन्तु वह तो विरुद्ध ही है, और यह ('सत्' ऐसा कथन और ज्ञानके सर्वपदार्थपरामर्शी होनेकी बात) तो सिद्ध हो सकती है, वृक्षकी भाँति ।

---

[१] जिनवरवृषभ = जिनवरोंमें श्रेष्ठ; तीर्थंकर ।
[२] सर्वगत = सबमें व्यापनेवाला ।
[३] व्यावृत्त = पृथक्; अलग; भिन्न ।
[४] परामर्श = स्पर्श; विचार; लक्ष; स्मरण ।

विधविधलक्षणीनुं सरव-गत 'सत्व' लक्षण अेक छे ।
अे धर्मने उपदेशता जिनवरवृषभ निर्दिष्ट छे ॥ ९७ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

इह किल प्रपञ्चितवैचित्र्येण द्रव्यान्तरेभ्यो व्यावृत्य वृत्तेन प्रतिद्रव्यं सीमानमासूत्रयता विशेषलक्षणभूतेन च स्वरूपास्तित्वेन लक्ष्यमाणानामपि सर्वद्रव्याणामस्तमितवैचित्र्यप्रपञ्चं प्रवृत्य वृत्तं प्रतिद्रव्यमासूत्रितं सीमानं भिन्दत्सदिति सर्वगतं सामान्यलक्षणभूतं सादृश्यास्तित्वमेकं खल्ववबोधव्यम्। एवं सदित्यभिधानं सदिति परिच्छेदनं च सर्वार्थपरामर्शि स्यात्। यदि पुनरिदमेव न स्यात्तदा किंचित्सदिति किंचिदसदिति किंचित्सच्चासच्चेति किंचिदवाच्यमिति च स्यात्। तत्तु विप्रतिषिद्धमेव प्रसाध्यं चैतदनोकहवत्। यथा हि

उवदिसदा खलु धम्मं जिणवरवसहेण पण्णत्तं धर्मं वस्तुस्वभावसंग्रहमुपदिशता खलु स्फुटं जिनवरवृषभेण प्रज्ञप्तमिति। तद्यथा—यथा सर्वे मुक्तात्मनः सन्तीत्युक्ते सति परमानन्दैकलक्षणसुखामृतरसास्वादभरितावस्थलोकाकाशप्रमितशुद्धासंख्येयात्मप्रदेशैस्तथा किंचिदूनचरमशरीराकारादिपर्यायैश्च संकरव्यतिकरपरिहाररूपजातिभेदेन भिन्नानामपि सर्वेषां सिद्धजीवानां ग्रहणं भवति, तथा 'सर्वं सत्'

जैसे बहुतसे, अनेक प्रकारके वृक्षोंको अपने अपने विशेषलक्षणभूत स्वरूपास्तित्वके अवलम्बनसे उत्पन्न होनेवाले अनेकत्वको, सामान्य लक्षणभूत [१]सादृश्यदर्शक वृक्षत्वसे उत्पन्न होनेवाला एकत्व [२]तिरोहित (अदृश्य) कर देता है, इसीप्रकार बहुतसे, अनेकप्रकारके द्रव्योंको अपने-अपने विशेष लक्षणभूत स्वरूपास्तित्वके अवलम्बनसे उत्पन्न होनेवाले अनेकत्वको, सामान्यलक्षणभूत सादृश्यदर्शक 'सत्' पनेसे ('सत्' ऐसे भावसे, अस्तित्वसे, 'है' पनेसे) उत्पन्न होनेवाला एकत्व तिरोहित कर देता है। और जैसे उन वृक्षोंके विषयमें सामान्यलक्षणभूत सादृश्यदर्शक वृक्षत्वसे उत्पन्न होनेवाले एकत्वसे तिरोहित होनेपर भी (अपने-अपने) विशेषलक्षणभूत स्वरूपास्तित्वके अवलम्बनसे उत्पन्न होनेवाला अनेकत्व स्पष्टतया प्रकाशमान रहता है, (बना रहता है, नष्ट नहीं होता); उसीप्रकार सर्व द्रव्योंके विषयमें भी सामान्यलक्षणभूत सादृश्यदर्शक 'सत्' पनेसे उत्पन्न होनेवाले एकत्वसे तिरोहित होने पर भी (अपने-अपने) विशेषलक्षणभूत स्वरूपास्तित्वके अवलम्बनसे उत्पन्न होनेवाला अनेकत्व स्पष्टतया प्रकाशमान रहता है।

[बहुतसे (संख्यापेक्षासे अनेक) और अनेकप्रकारके (अर्थात् आम्र, अशोकादि) वृक्षोंका अपना-अपना स्वरूपास्तित्व भिन्न-भिन्न है, इसलिये स्वरूपास्तित्वकी अपेक्षासे उनमें अनेकत्व है, परन्तु वृक्षत्व जो कि सर्व वृक्षोंका सामान्यलक्षण है और जो सर्व वृक्षोंमें सादृश्य बतलाता है, उसकी अपेक्षासे सर्व वृक्षोंमें एकत्व है। जब इस एकत्वको मुख्य करते हैं तब अनेकत्व गौण हो जाता है; इसीप्रकार बहुतसे (अनन्त)

---

[१] सादृश्य=समानत्व। [२] तिरोहित=तिरोभूत; आच्छादित; अदृश्य।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

बहूनां बहुविधानामनोकहानामात्मीयस्यात्मीयस्य विशेषलक्षणभूतस्य स्वरूपास्तित्वस्यावष्टम्भेनोत्तिष्ठन्नानात्वं, सामान्यलक्षणभूतेन सादृश्योद्भासिनानोकहत्वेनोत्थापितमेकत्वं तिरियति । तथा बहूनां बहुविधानां द्रव्याणामात्मीयात्मीयस्य विशेषलक्षणभूतस्य स्वरूपास्तित्वस्यावष्टम्भेनोत्तिष्ठन्नानात्वं सामान्यलक्षणभूतेन सादृश्योद्भासिना सदित्यस्य भावेनोत्थापितमेकत्वं तिरियति । यथा च तेषामनोकहानां सामान्यलक्षणभूतेन सादृश्योद्भासिनानोकहत्वेनोत्थापितेनैकत्वेन तिरोहितमपि विशेषलक्षणभूतस्य स्वरूपास्तित्वावष्टम्भेनोत्तिष्ठन्नानात्वमुच्चवाकास्ति, तथा सर्वद्रव्याणामपि सामान्यलक्षणभूतेन सादृश्योद्भासिना सदित्यस्य भावेनोत्थापितेनैकत्वेन तिरोहितमपि विशेषलक्षणभूतस्य स्वरूपास्तित्वस्यावष्टम्भेनोत्तिष्ठन्नानात्वमुच्चकास्ति ।। ९७ ।।

इत्युक्ते संग्रहनयेन सर्वपदार्थानां ग्रहणं भवति । अथवा सेनेयं वनमिदमित्युक्ते अश्वहस्त्यादिपदार्थानां निम्बाम्रादिवृक्षाणां स्वकीयस्वकीयजातिभेदभिन्नानां युगपद्ग्रहणं भवति, तथा सर्वं सदित्युक्ते सति सादृश्यसत्ताभिधानेन महासत्तारूपेण शुद्धसंग्रहनयेन सर्वपदार्थानां स्वजात्यविरोधेन ग्रहणं भवती-

---

और अनेक (छह) प्रकारके द्रव्योंका अपना-अपना स्वरूपास्तित्व भिन्न-भिन्न है इसलिये स्वरूपास्तित्वकी अपेक्षासे उनमें अनेकत्व है, परन्तु सत्पना (अस्तित्वपना, 'है' ऐसा भाव) जो कि सर्वद्रव्योंका सामान्य लक्षण है और जो सर्वद्रव्योंमें सादृश्य बतलाता है उसकी अपेक्षासे सर्वद्रव्योंमें एकत्व है। जब इस एकत्वको मुख्य करते हैं तब अनेकत्व गौण हो जाता है। और इसप्रकार जब सामान्य सत्पनेकी मुख्यतासे लक्षमें लेने पर सर्वद्रव्योंके एकत्वकी मुख्यता होनेसे अनेकत्व गौण हो जाता है, तब भी वह (समस्त द्रव्योंका स्वरूप-अस्तित्व संबंधी) अनेकत्व स्पष्टतया प्रकाशमान ही रहता है।]

(इसप्रकार सादृश्य अस्तित्वका निरूपण हुआ) ।। ९७ ।।

अब, द्रव्योंसे द्रव्यान्तरकी उत्पत्ति होनेका और द्रव्यसे सत्ताका [१]अर्थान्तरत्व होनेका खण्डन करते हैं। (अर्थात् ऐसा निश्चित करते हैं कि किसी द्रव्यसे अन्य द्रव्यकी उत्पत्ति नहीं होती और द्रव्यसे अस्तित्व कोई पृथक् पदार्थ नहीं है) :—

गाथा ९८

अन्वयार्थ :— [**द्रव्यं**] द्रव्य [**स्वभावसिद्धं**] स्वभावसे सिद्ध और [**सत् इति**] (स्वभावसे ही) 'सत्' है, ऐसा [**जिनाः**] जिनेन्द्रदेवने [**तत्त्वतः**] यथार्थतः [**समाख्यात—**

---

[१] अर्थान्तरत्व=अन्यपदार्थपना।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ द्रव्यैर्द्रव्यान्तरस्यारम्भं द्रव्यादर्थान्तरत्वं च सत्तायाः प्रतिहन्ति –

दव्वं सहावसिद्धं सदिति जिणा तच्चदो समक्खादा ।
सिद्धं तध आगमदो णेच्छदि जो सो ही परसमओ ॥ ९८ ॥

द्रव्यं स्वभावसिद्धं सदिति जिनास्तत्त्वतः समाख्यातवन्तः ।
सिद्धं तथा आगमतो नेच्छति यः स हि परसमयः ॥ ९८ ॥

त्यर्थः ॥ ९७ ॥ अथ यथा द्रव्यं स्वभावसिद्धं तथा तत्सदपि स्वभावत एवेत्याख्याति—**दव्वं सहावसिद्धं** द्रव्यं परमात्मद्रव्यं स्वभावसिद्धं भवति । कस्मात् । अनाद्यनन्तेन परहेतुनिरपेक्षेण स्वतः सिद्धेन केवलज्ञानादिगुणाधारभूतेन सदानन्दैकरूपसुखसुधारसपरमसमरसीभावपरिणतसर्वशुद्धात्मप्रदेशभरितावस्थेन शुद्धोपादानभूतेन स्वकीयस्वभावेन निष्पन्नत्वात् । यच्च स्वभावसिद्धं न भवति तद्द्रव्यमपि न भवति । द्व्यणुकादिपुद्गलस्कन्धपर्यायवत् मनुष्यादिजीवपर्यायवच्च । **सदिति** यथा स्वभावतः सिद्धं तद्द्रव्यं तथा सदिति सत्तालक्षणमपि स्वभावत एव भवति, न च भिन्नसत्तासमवायात् । अथवा यथा द्रव्यं स्वभावतः सिद्धं तथा तस्य योऽसौ सत्तागुणः सोऽपि स्वभावसिद्ध एव । कस्मादिति चेत् । सत्ताद्रव्ययोः संज्ञालक्षणप्रयोजनादिभेदेऽपि दण्डदण्डिवद्भिन्नप्रदेशाभावात् । इदं के कथितवन्तः । **जिणा तच्चदो समक्खादा** जिनाः कर्तारः तत्त्वतः सम्यगाख्यातवन्तः कथितवन्तः **सिद्धं तह आगमदो**

वन्तः] कहा है; [**तथा**] इसप्रकार [**आगमतः**] आगमसे [**सिद्धं**] सिद्ध है; [**यः**] जो [**न इच्छति**] इसे नहीं मानता [**सः**] वह [**हि**] वास्तवमें [**परसमयः**] परसमय है ।

टीका :– वास्तवमें द्रव्योंसे द्रव्यान्तरोंकी उत्पत्ति नहीं होती, क्योंकि सर्व द्रव्य स्वभावसिद्ध हैं । (उनकी) स्वभावसिद्धता तो उनकी अनादिनिधनतासे है; क्योंकि [१]अनादिनिधन साधनान्तरकी अपेक्षा नहीं रखता । वह गुणपर्यायात्मक ऐसे अपने स्वभावको ही–जो कि मूल साधन है उसे–धारण करके स्वयमेव सिद्ध हुआ वर्तता है ।

जो द्रव्योंसे उत्पन्न होता है वह तो द्रव्यान्तर नहीं है, [२]कादाचित्कपने के कारण

---

[१] अनादिनिधन=आदि और अन्तसे रहित । (जो अनादिअनन्त हो उसकी सिद्धिके लिये अन्य साधनकी आवश्यकता नहीं है ।)

[२] कादाचित्क = कदाचित् – किसीसमय हो ऐसा ; अनित्य ।

द्रव्यो स्वभावे सिद्ध ने 'सत्'–तत्त्वतः श्री जिनो कहे ;
अे सिद्ध छे आगम थकी, माने न ते परसमय छे ॥ ९८ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

न खलु द्रव्यैर्द्रव्यान्तराणामारम्भः, सर्वद्रव्याणां स्वभावसिद्धत्वात्। स्वभावसिद्धत्वं तु तेषामनादिनिधनत्वात्। अनादिनिधनं हि न साधनान्तरमपेक्षते। गुणपर्यायात्मानमात्मनः स्वभावमेव मूलसाधनमुपादाय स्वयमेव सिद्धसिद्धिमद्भूतं वर्तते। यत्तु द्रव्यैरारभ्यते न तद्द्रव्यान्तरं कादाचित्कत्वात् स पर्यायः। द्व्यणुकादिवन्मनुष्यादिवच्च। द्रव्यं पुनरनवधि त्रिसमयावस्थायि न तथा स्यात्। अथैवं यथा सिद्धं स्वभावत एव द्रव्यं तथा सदित्यपि तत्स्वभावत एव सिद्धमित्यवधार्यताम्। सत्तात्मनात्मनः स्वभावेन निष्पन्ननिष्पत्तिमद्भावयुक्तत्वात्। न च द्रव्यादर्थान्तरभूता सत्तोपपत्तिमभिप्रपद्यते, यतस्तत्समवायात्तत्सदिति स्यात्। सतः सत्तायाश्च न तावद्युतसिद्धत्वेनार्थान्तरत्वं, तयोर्दण्डदण्डिवद्युतसिद्धस्यादर्शनात् अयुतसिद्धत्वेनापि न तदुपपद्यते। इहेदमितिप्रतीतेरुत्पद्यत इति चेत्

सन्तानापेक्षया द्रव्यार्थिकनयेनानादिनिधनागमादपि तथा सिद्धं **णेच्छदि जो सो हि परसमओ** नेच्छति न मन्यते य इदं वस्तुस्वरूपं स हि स्फुटं परसमयो मिथ्यादृष्टिर्भवति। एवं यथा परमात्मद्रव्यं

पर्याय है; जैसे—द्विअणुक इत्यादि तथा मनुष्य इत्यादि। द्रव्य तो अनवधि मर्यादा रहित) त्रिसमय—अवस्थायी (त्रिकालस्थायी) होनेसे उत्पन्न नहीं होता।

अब इसप्रकार—जैसे द्रव्य स्वभावसे ही सिद्ध है उसीप्रकार '(वह) सत् है' ऐसा भी उसके स्वभावसे ही सिद्ध है, ऐसा निर्णय हो; क्योंकि सत्तात्मक ऐसे अपने स्वभावसे निष्पन्न हुए भाववाला है (—द्रव्यका 'सत् है' ऐसा भाव द्रव्यके सत्तास्वरूप स्वभावका ही बना हुआ है)।

द्रव्यसे अर्थान्तरभूत सत्ता उत्पन्न नहीं है (नहीं बन सकती, योग्य नहीं है) कि जिसके समवायसे वह (द्रव्य) 'सत्' हो। (इसीको स्पष्ट समझाते हैं) :—

प्रथम तो [१]सत्से [२]सत्ताकी [३]युतसिद्धतासे अर्थान्तरत्व नहीं है, क्योंकि दण्ड और दण्डीकी भाँति उनके सम्बन्धमें युतसिद्धता दिखाई नहीं देती। (दूसरे) अयुतसिद्धतासे भी वह (अर्थान्तरत्व) नहीं बनता। 'इसमें यह है (अर्थात द्रव्यमें सत्ता है)' ऐसी

---

[१] सत्=अस्तित्ववान् अर्थात् द्रव्य।

[२] सत्ता=अस्तित्व (गुण)

[३] युतसिद्ध = जुड़कर सिद्ध हुआ; समवायसे - संयोगसे सिद्ध हुआ। [जैसे लाठी और मनुष्यके भिन्न होने पर भी लाठीके योगसे मनुष्य 'लाठीवाला होता है, इसीप्रकार सत्ता और द्रव्यके अलग होनेपर भी सत्ताके योगसे द्रव्य 'सत्तावाला' ('सत्') हुआ है ऐसा नहीं है। लाठी और मनुष्यकी भाँति सत्ता और द्रव्य अलग दिखाई ही नहीं देते। इसप्रकार 'लाठी' और 'लाठीवाले' की भाँति 'सत्ता' और 'सत्'के संबंधमें युतसिद्धता नहीं है।]

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

किंनिबन्धना हीदमिति प्रतीतिः। भेदनिबन्धनेति चेत् को नाम भेदः। प्रादेशिक अताद्भाविको वा। न तावत्प्रादेशिकः, पूर्वमेव युतसिद्धत्वस्यापसारणात्। अताद्भाविकश्चेत् उपपन्न एव यद्द्रव्यं तन्न गुण इति वचनात्। अयं तु न खल्वेकान्तेनेहेदमितिप्रतीतेर्निबन्धनं, स्वयमेवोन्मग्ननिमग्नत्वात्। तथाहि—यदैव पर्यायेणार्प्यते द्रव्यं तदैव गुणवदिदं द्रव्यमयमस्य गुणः, शुभ्रमिदमुत्तरीयमयमस्य शुभ्रो गुण इत्यादिवदताद्भाविको भेद उन्मज्जति। यदा तु द्रव्येणार्प्यते द्रव्यं तदास्तमितसमस्तगुणवासनोन्मेषस्य तथाविधं द्रव्यमेव

स्वभावतः सिद्धमवबोद्धव्यं तथा सर्वद्रव्याणीति। अत्र द्रव्यं केनापि पुरुषेण न क्रियते। सत्तागुणोऽपि

प्रतीति होती है इसलिये वह बन सकता है,— ऐसा कहा जाय तो (पूछते हैं कि) 'इसमें यह है' ऐसी प्रतीति किसके आश्रय (-कारण) से होती है? यदि ऐसा कहा जाय कि भेदके आश्रयसे (अर्थात् द्रव्य और सत्तामें भेद होनेसे) होती है तो, वह कौनसा भेद है? प्रादेशिक या अताद्भाविक? [१]प्रादेशिक तो है नहीं, क्योंकि युतसिद्धत्व पहले ही रद्द (नष्ट, निरर्थक) कर दिया गया है, और यदि [२]अताद्भाविक कहा जाय तो वह उपपन्न ही (ठीक ही) है, क्योंकि ऐसा (शास्त्रका) वचन है कि 'जो द्रव्य है वह गुण नहीं है।' परन्तु (यहाँ भी यह ध्यानमें रखना कि) यह अताद्भाविक भेद 'एकान्तसे इसमें यह है' ऐसी प्रतीतिका आश्रय (कारण) नहीं है, क्योंकि वह (अताद्भाविक भेद) स्वयमेव [३]उन्मग्न और [४]निमग्न होता है। वह इसप्रकार है :— जब द्रव्यको पर्याय प्राप्त कराई जाय (अर्थात् जब द्रव्यको पर्याय प्राप्त करती है — पहुंचती है इसप्रकार पर्यायार्थिकनयसे देखा जाय) तब ही — 'शुक्ल यह वस्त्र है, यह इसका शुक्लत्व गुण है' इत्यादिकी भाँति 'गुणवाला यह द्रव्य है, यह इसका गुण है, इसप्रकार अताद्भाविक भेद उन्मग्न होता है; परन्तु जब द्रव्यको प्राप्त कराया जाय (अर्थात् द्रव्यको द्रव्य प्राप्त करता है; — पहुंचता है इसप्रकार द्रव्यार्थिकनयसे देखा जाय), तब जिसके समस्त [५]गुण-

---

१ द्रव्य और सत्तामें प्रदेशभेद नहीं है; क्योंकि प्रदेशभेद हो तो युक्तसिद्धत्व आये, जिसको पहले ही रद्द करके बताया है।

२ द्रव्य वह गुण नहीं है और गुण वह द्रव्य नहीं है,— ऐसे द्रव्य-गुणके भेदको (गुण-गुणी-भेदको) अताद्भाविक (तद्रूप न होनेरूप) भेद कहते हैं। यदि द्रव्य और सत्तामें ऐसा भेद कहा जाय तो वह योग्य ही है।

3 उन्मग्न होना = ऊपर आना; तैर आना; प्रगट होना (मुख्य होना)।

४ निमग्न होना = डूब जाना (गौण होना)।

५ गुणवासनाके उन्मेष = द्रव्यमें अनेक गुण होनेके अभिप्रायकी प्रगटता; गुणभेद होनेरूप मनोवृत्तिके (अभिप्रायके) अंकुर।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

शुभ्रमुत्तरीयमित्यादिवत्प्रपश्यतः समूल एवाताद्भाविको भेदो निमज्जति। एवं हि भेदे निमज्जति तत्प्रत्यया प्रतीतिर्निमज्जति। तस्यां निमज्जत्यामयुतसिद्धत्वोत्थमर्थान्तरत्वं निमज्जति। ततः समस्तमपि द्रव्यमेवैकं भूत्वावतिष्ठते। यदा तु भेद उन्मज्जति, तस्मिन्नुन्मज्जति तत्प्रत्यया प्रतीतिरुन्मज्जति। तस्यामुन्मज्जत्यामयुतसिद्धत्वोत्थमर्थान्तरत्वमुन्मज्जति। तदापि तत्पर्यायत्वेनोन्मज्जज्जलराशेर्जलकल्लोल इव द्रव्यान्न व्यतिरिक्तं स्यात्। एवं सति स्वयमेव सद्द्रव्यं भवति। यस्त्वेवं नेच्छति स खलु परसमय एव द्रष्टव्यः ॥ ९८ ॥

अथोत्पादव्ययध्रौव्यात्मकत्वेऽपि सद्द्रव्यं भवतीति विभावयति –

सदवट्ठिदं सहावे दव्वं दव्वस्स जो हि परिणामो।
अत्थेसु सो सहावो ठिदिसंभवणाससंबद्धो ॥ ९९ ॥

सदवस्थितं स्वभावे द्रव्यं द्रव्यस्य यो हि परिणामः।
अर्थेषु स स्वभावः स्थितिसंभवनाशसंबद्धः ॥ ९९ ॥

द्रव्याद्भिन्नो नास्तीत्यभिप्रायः ॥ ९८ ॥ अथोत्पादव्ययध्रौव्यत्वे सति सत्तैव द्रव्यं भवतीति प्रज्ञापयति – **सदवट्ठिदं सहावे दव्वं** द्रव्यं मुक्तात्मद्रव्यं भवति। किं कर्तृ। सदिति शुद्धचेतनान्वयरूपमस्तित्वम्। किंविशिष्टम्। अवस्थितम्। क्व। स्वभावे। स्वभावं कथयति – **दव्वस्स जो हि**

वासनाके उन्मेष अस्त हो गये हैं ऐसे उस जीवको – 'शुक्लवस्त्र ही है' इत्यादिकी भाँति – 'ऐसा द्रव्य ही है' इसप्रकार देखने पर समूल ही अताद्भाविक भेद निमग्न होता है। इसप्रकार भेदके निमग्न होने पर उसके आश्रयसे (कारणसे) होती हुई प्रतीति निमग्न होती है। उसके निमग्न होने पर अयुतसिद्धत्वजनित अर्थान्तरपना निमग्न होता है, इसलिये समस्त ही एक द्रव्य ही होकर रहता है। और जब भेद उन्मग्न होता है, वह उन्मग्न होनेपर उसके आश्रय (कारण) से होती हुई प्रतीति उन्मग्न होती है, उसके उन्मग्न होनेपर अयुतसिद्धत्वजनित अर्थान्तरपना उन्मग्न होता है, तब भी (वह) द्रव्यके पर्यायरूपसे उन्मग्न होनेसे, – जैसे जलराशिसे जलतरंगें व्यतिरिक्त नहीं हैं (अर्थात् समुद्रसे तरंगें अलग नहीं हैं) उसीप्रकार – द्रव्यसे व्यतिरिक्त नहीं होता।

द्रव्यो स्वभाव विषे अवस्थित, तेथी 'सत्' सौ द्रव्य छे।
उत्पाद-ध्रौव्य-विनाशयुत परिणाम द्रव्यस्वभाव छे ॥ ९९ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

इह हि स्वभावे नित्यमवतिष्ठमानत्वात्सदिति द्रव्यम् । स्वभावस्तु द्रव्यस्य ध्रौव्योत्पादोच्छेदैक्यात्मकपरिणामः । यथैव हि द्रव्यवास्तुनः सामस्त्येनैकस्यापि विष्कम्भक्रमप्रवृत्तिवर्तिनः सूक्ष्मांशाः प्रदेशाः, तथैव हि द्रव्यवृत्तेः सामस्त्येनैकस्यापि प्रवाहक्रमप्रवृत्तिवर्तिनः सूक्ष्मांशाः परिणामाः । यथा च प्रदेशानां परस्परव्यतिरेकनिबन्धनो विष्कम्भक्रमः, तथा परिणामानां परस्परव्यतिरेकनिबन्धनः प्रवाहक्रमः । यथैव च ते प्रदेशाः स्वस्थाने स्वरूपपूर्वरूपाभ्यामुत्पन्नोच्छन्नत्वात्सर्वत्र परस्परानुस्यूतिसूत्रितैकवास्तुतयानुत्पन्नप्रलीनत्वाच्च संभूतिसंहारध्रौव्यात्मकमात्मान धारयन्ति, तथैव ते परिणामाः स्वावसरे स्वरूपपूर्व-

---

परिणामो तस्य परमात्मद्रव्यस्य संबन्धी हि स्फुटं यः परिणामः। केषु विषयेषु। **अत्थेसु** परमात्मपदार्थस्य धर्मत्वादभेदनयेनार्था भण्यन्ते। के ते। केवलज्ञानादिगुणाः सिद्धत्वादिपर्यायाश्च, तेष्वर्थेषु विषयेषु योऽसौ परिणामः। **सो सहावो** केवलज्ञानादिगुणसिद्धत्वादिपर्यायरूपस्तस्य परमात्मद्रव्यस्य

ऐसा होनेसे (यह निश्चित हुआ कि) द्रव्य स्वयमेव सत् है। जो ऐसा नहीं मानता वह वास्तवमें 'परसमय' मिथ्यादृष्टि) ही मानना ॥ ९८ ॥

अब, यह बतलाते हैं कि उत्पाद-व्यय-ध्रौव्यात्मक होनेपर भी द्रव्य 'सत्' है :—

गाथा ९९

अन्वयार्थ :—[**स्वभावे**] स्वभावमें [**अवस्थितं**] अवस्थित (होनेसे) [**द्रव्यं**] द्रव्य [**सत्**] 'सत्' है; [**द्रव्यस्य**] द्रव्यका [**यः हि**] जो [**स्थितिसंभवनाशसंबद्धः**] उत्पादव्ययध्रौव्य सहित [**परिणामः**] परिणाम है [**सः**] वह [**अर्थेषु स्वभावः**] पदार्थोंका स्वभाव है।

टीका :—यहां (विश्वमें) स्वभावमें नित्य अवस्थित होनेसे द्रव्य 'सत्' है। स्वभाव द्रव्यका ध्रौव्य-उत्पाद-विनाशकी एकतास्वरूप परिणाम है।

जैसे [१]द्रव्यका वास्तु समग्रपने द्वारा (अखण्डता द्वारा) एक होनेपर भी, विस्तारक्रममें प्रवर्तमान उसके जो सूक्ष्म अंश हैं वे प्रदेश हैं, इसीप्रकार द्रव्यकी [२]वृत्ति समग्रपने द्वारा एक होनेपर भी, प्रवाहक्रममें प्रवर्तमान उसके जो सूक्ष्म अंश हैं वे परिणाम

---

[१] द्रव्यका वास्तु = द्रव्यका स्व-विस्तार, द्रव्यका स्व-क्षेत्र, द्रव्यका स्व-आकार, द्रव्यका स्व-दल। (वास्तु = घर, निवासस्थान, आश्रय, भूमि।)

[२] वृत्ति = वर्तना वह; होना वह; अस्तित्व।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

रूपाभ्यामुत्पन्नोच्छन्नत्वात्सर्वत्र परस्परानुस्यूतिसूत्रितैकप्रवाहतयानुत्पन्नप्रलीनत्वाच्च संभूतिसंहारध्रौव्यात्मकमात्मानं धारयन्ति। यथैव च य एव हि पूर्वप्रदेशोच्छेदनात्मको वास्तुसीमान्तः, स एव हि तदुत्तरोत्पादात्मकः, स एव च परस्परानुस्यूतिसूत्रितैकवास्तुतयातदुभयात्मक इति। तथैव य एव हि पूर्वपरिणामोच्छेदात्मकः प्रवाहसीमान्तः, स एव हि तदुत्तरोत्पादात्मकः, स एव च परस्परानुस्यूतिसूत्रितैकप्रवाहतयातदुभयात्मक इति एवमस्य स्वभावत एव त्रिलक्षणायां परिणामपद्धतौ दुर्ललितस्य स्वभावानतिक्रमात्त्रिलक्षणमेव सत्त्वमनुमोदनीयम्; मुक्ताफलदामवत्। यथैव हि परिगृहीतद्राघिम्नि प्रलम्बमाने मुक्ताफलदामनि समस्तेष्वपि स्वधामसूच्चकासत्सु मुक्ताफलेषूत्तरोत्तरेषु धामसूत्तरोत्तरमुक्ताफलानामुदयनात्पूर्वपूर्वमुक्ताफलानामनुदयनात् सर्वत्रापि परस्परानुस्यूतिसूत्रकस्य

स्वभावो भवति। स च कथंभूतः। **ठिदिसंभवणाससंबद्धो** स्वात्मप्राप्तिरूपमोक्षपर्यायस्य संभवस्तस्मिन्नेव क्षणे परमागमभाषयैकत्ववितर्कावीचारद्वितीयशुक्लध्यानसंज्ञस्य शुद्धोपादानभूतस्य समस्तरागादिविकल्पोपाधिरहितस्वसंवेदनज्ञानपर्यायस्य नाशस्तस्मिन्नेव समये तदुभयाधारभूतपरमात्मद्रव्यस्य स्थितिरित्युक्तलक्षणोत्पादव्ययध्रौव्यत्रयेण संबन्धो भवतीति। एवमुत्पादव्ययध्रौव्यत्रयेणैकसमये यद्यपि

हैं। जैसे विस्तारक्रमका कारण प्रदेशोंका परस्पर व्यतिरेक है, उसीप्रकार प्रवाहक्रमका कारण परिणामोंका परस्पर [१]व्यतिरेक है।

जैसे वे प्रदेश अपने स्थानमें स्व-रूपसे उत्पन्न और पूर्व-रूपसे विनष्ट होनेसे तथा सर्वत्र परस्पर [२]अनुस्यूतिसे रचित एकवास्तुपने द्वारा अनुत्पन्न-अविनष्ट होनेसे उत्पत्ति-संहार-ध्रौव्यात्मक हैं, उसीप्रकार वे परिणाम अपने अवसरमें स्व-रूपसे उत्पन्न और पूर्व-रूपसे विनष्ट होनेसे तथा सर्वत्र परस्पर अनुस्यूतिसे रचित एकप्रवाहपने द्वारा अनुत्पन्न-अविनष्ट होनेसे उत्पत्ति-संहार-ध्रौव्यात्मक हैं। और जैसे वास्तुका जो छोटेसे छोटा अंश पूर्वप्रदेशके विनाशस्वरूप है वही (अंश) उसके बादके प्रदेशका उत्पादस्वरूप है तथा वही परस्पर अनुस्यूतिसे रचित एक वास्तुपने द्वारा अनुभय स्वरूप है (अर्थात् दोमेंसे एक भी स्वरूप नहीं है), इसीप्रकार प्रवाहका जो छोटेसे छोटा अंश पूर्वपरिणामके विनाशस्वरूप है वही उसके बादके परिणामके उत्पादस्वरूप है, तथा वही परस्पर अनुस्यूतिसे रचित एकप्रवाहपने द्वारा अनुभयस्वरूप है।

इसप्रकार स्वभावसे ही त्रिलक्षण परिणामपद्धतिमें (परिणामोंकी परम्परामें)

---

[१] व्यतिरेक भेद; (एकका दूसरेमें) अभाव, (एक परिणाम दूसरे परिणामरूप नहीं है, इसलिये द्रव्यके प्रवाहमें क्रम है)।

[२] अनुस्यूति = अन्वयपूर्वक जुड़ान। [सर्व परिणाम परस्पर अन्वयपूर्वक (सादृश्य सहित) गुंथित (जुड़े) होनेसे, वे सब परिणाम एक प्रवाहरूपसे हैं, इसीलिये वे उत्पन्न या विनष्ट नहीं हैं।]

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

सूत्रकस्यावस्थानात्त्रैलक्षण्यं प्रसिद्धिमवतरति, तथैव हि परिगृहीतनित्यवृत्तिनिवर्तमाने द्रव्ये समस्तेष्वपि स्वावसरेषूच्चकासत्सु परिणामेषूत्तरोत्तरेष्ववसरेषूत्तरोत्तरपरिणामानामुदयनात्पूर्वपूर्वपरिणामानामनुदयनात् सर्वत्रापि परस्परानुस्यूतिसूत्रकस्य प्रवाहस्यावस्थानात्त्रैलक्षण्यं प्रसिद्धिमवतरति ॥ ९९ ॥

पर्यायार्थिकनयेन परमात्मद्रव्यं परिणतं, तथापि द्रव्यार्थिकनयेन सत्तालक्षणमेव भवति। त्रिलक्षणमपि सत्सत्तालक्षणं कथं भण्यत इति चेत् "उत्पादव्ययध्रौव्ययुक्तं सत्" इति वचनात्। यथेदं परमात्मद्रव्यमेकसमयेनोत्पादव्ययध्रौव्यैः परिणतमेव सत्तालक्षणं भण्यते तथा सर्वद्रव्याणीत्यर्थः ॥ ९९ ॥ एवं

प्रवर्तमान द्रव्य स्वभावका [१]अतिक्रम नहीं करता इसलिये [२]सत्त्वको [३]त्रिलक्षण ही [४]अनुमोदना चाहिये – मोतियोंके हारकी भाँति।

जैसे – जिसने (अमुक) लम्बाई ग्रहण की है ऐसे लटकते हुए मोतियोंके हारमें, अपने-अपने स्थानोंमें प्रकाशित होते हुये समस्त मोतियोंमें, पीछे-पीछेके स्थानोंमें पीछे-पीछेके मोती प्रगट होते हैं इसलिये, और पहले-पहलेके मोती प्रगट नहीं होते इसलिये, तथा सर्वत्र परस्पर अनुस्यूतिका रचयिता सूत्र अवस्थित होनेसे त्रिलक्षणत्व प्रसिद्धिको प्राप्त होता है। इसीप्रकार जिसने [५]नित्यवृत्ति ग्रहण की है ऐसे रचित (परिणमित) द्रव्यमें, अपने अपने अवसरोंमें प्रकाशित (प्रगट) होते हुए समस्त परिणामोंमें पीछे पीछेके अवसरों पर पीछे पीछेके परिणाम प्रगट होते हैं इसलिये, और पहले-पहलेके परिणाम नहीं प्रगट होते हैं इसलिये, तथा सर्वत्र परस्पर अनुस्यूति रचनेवाला प्रवाह अवस्थित होनेसे त्रिलक्षणपना प्रसिद्धिको प्राप्त होता है।

भावार्थ :– प्रत्येक द्रव्य सदा स्वभावमें रहता है इसलिये 'सत्' है। वह स्वभाव उत्पाद-व्यय-ध्रौव्यस्वरूप परिणाम है। जैसे द्रव्यके विस्तारका छोटेसे छोटा अंश वह प्रदेश है, उसीप्रकार द्रव्यके प्रवाहका छोटेसे छोटा अंश वह परिणाम है। प्रत्येक परिणाम स्व-कालमें अपने रूपसे उत्पन्न होता है, पूर्वरूपसे नष्ट होता है और सर्व परिणामोंमें एकप्रवाहपना होनेसे प्रत्येक परिणाम उत्पाद-विनाशसे रहित एकरूप – ध्रुव रहता है। और उत्पाद-व्यय-ध्रौव्यमें समयभेद नहीं है, तीनों ही एक ही समयमें हैं। ऐसे उत्पाद-व्यय-ध्रौव्यात्मक परिणामोंकी परम्परामें द्रव्य स्वभावसे ही सदा रहता है, इसलिये द्रव्य स्वयं भी, मोतियोंके हारकी भाँति, उत्पाद-व्यय-ध्रौव्यात्मक है ॥ ९९ ॥

---

[१] अतिक्रम = उल्लंघन; त्याग। [२] सत्त्व = सत्पना; (अभेदनयसे) द्रव्य। [३] त्रिलक्षण = उत्पाद, व्यय और ध्रौव्य ये तीनों लक्षणवाला; त्रिरूप; त्रयात्मक। [४] अनुमोदना = आनंदसे सम्मत करना।

[५] नित्यवृत्ति = नित्यस्थायित्व; नित्य अस्तित्व; सदा वर्तना।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथोत्पादव्ययध्रौव्याणां परस्परविनाभावं दृढ़यति –

ण भवो भंगविहीणो भंगो वा णत्थि संभवविहीणो ।
उप्पादो वि य भंगो ण विणा धोव्वेण अत्थेण ॥ १०० ॥

न भवो भङ्गविहीनो भङ्गो वा नास्ति संभवविहीनः ।
उत्पादोऽपि च भङ्गो न विना ध्रौव्येणार्थेन ॥ १०० ॥

स्वरूपसत्तारूपेण प्रथमगाथा, महासत्तारूपेण द्वितीया, यथा द्रव्यं स्वतःसिद्धं तथा सत्तागुणोऽपीति कथनेन तृतीया, उत्पादव्ययध्रौव्यत्वेऽपि सत्तैव द्रव्यं भण्यत इति कथनेन चतुर्थीति गाथाचतुष्टयेन सत्तालक्षणविवरणमुख्यतया द्वितीयस्थलं गतम् । अथोत्पादव्ययध्रौव्याणां परस्परसापेक्षत्वं दर्शयति – **ण भवो भंगविहीणो** निर्दोषपरमात्मरुचिरूपसम्यक्त्वपर्यायस्य भव उत्पादः तद्विपरीतमिथ्यात्वपर्यायस्य भङ्गं विना न भवति । कस्मात् । उपादानकारणाभावात्, मृत्पिण्डभङ्गाभावे घटोत्पाद इव । द्वितीयं

अब, उत्पाद, व्यय और ध्रौव्यका परस्पर [१]अविनाभाव दृढ़ करते हैं :–

गाथा १००

अन्वयार्थ :– [**भवः**] उत्पाद [**भङ्गविहीनः**] [२]भंग रहित [**न**] नहीं होता, [**वा**] और [**भङ्गः**] भंग [**संभवविहीनः**] विना उत्पादके [**नास्ति**] नहीं होता; [**उत्पादः**] उत्पाद [**अपि च**] तथा [**भङ्गः**] भंग [**ध्रौव्येण अर्थेन विना**] ध्रौव्य पदार्थके बिना [**न**] नहीं होते ।

टीका :– वास्तवमें [३]सर्ग [४]संहारके बिना नहीं होता और संहार सर्गके बिना नहीं होता; [५]सृष्टि और संहार [६]स्थिति (ध्रौव्य) के बिना नहीं होते, स्थिति सर्ग और संहार के बिना नहीं होती ।

जो सर्ग है वही संहार है, जो संहार है वही सर्ग है; जो सर्ग और संहार है वही

---

१ अविनाभाव = एकके बिना दूसरे का नहीं होना वह; एक-दूसरे बिना हो ही नहीं सके ऐसा भाव ।
२ भंग = व्यय; नाश ।
३ सर्ग = उत्पाद, उत्पत्ति ।
४ संहार = व्यय, नाश ।
५ सृष्टि = उत्पत्ति ।
६ स्थिति = स्थित रहना; ध्रुव रहना; ध्रौव्य ।

उत्पाद भंग विना नहीं, संहार सर्ग विना नहीं ।
उत्पाद तेम ज भंग, ध्रौव्य-पदार्थ विण वर्ते नहीं ॥ १०० ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

न खलु सर्गः संहारमन्तरेण, न संहारो वा सर्गमन्तरेण, न सृष्टिसंहारौ स्थितिमन्तरेण, न स्थितिः सर्गसंहारमन्तरेण। य एव हि सर्गः स एव संहारः, य एव संहारः स एव सर्गः, यावेव सर्गसंहारौ सैव स्थितिः, यैव स्थितिस्तावेव सर्गसंहाराविति। तथाहि— य एव कुम्भस्य सर्गः स एव मृत्पिण्डस्य संहारः, भावस्य भावान्तराभावस्वभावेनावभासनात्। य एव च मृत्पिण्डस्य संहारः, स एव कुम्भस्य सर्गः, अभावस्य भावान्तरभावस्वभावेनावभासनात्। यौ च कुम्भपिण्डयोः सर्गसंहारौ सैव मृत्तिकायाः स्थितिः, *व्यतिरेकमुखेनैवान्वयस्य प्रकाशनात्। यैव च मृत्तिकायाः स्थितिस्तावेव कुम्भपिण्डयोः

च कारणं मिथ्यात्वपर्यायभङ्गस्य सम्यक्त्वपर्यायरूपेण प्रतिभासनात्। तदपि कस्मात्। "भावान्तरस्वभावरूपो भवत्यभाव" इति वचनात्। घटोत्पादरूपेण मृत्पिण्डभङ्ग इव। यदि पुनर्मिथ्यात्वपर्यायभङ्गस्य सम्यक्त्वोपादानकारणभूतस्याभावेऽपि शुद्धात्मानुभूतिरुचिरूपसम्यक्त्वस्योत्पादो भवति, तर्ह्युपादानकारणरहितानां खपुष्पादीनामप्युत्पादो भवतु। न च तथा। **भंगो वा णत्थि संभवविहीणो** परद्रव्योपादेयरुचिरूपमिथ्यात्वस्य भङ्गो नास्ति। कथंभूतः। पूर्वोक्तसम्यक्त्वपर्यायसंभवरहितः।

स्थिति है; जो स्थिति है वही सर्ग और संहार है। वह इसप्रकार :—जो कुम्भका सर्ग है वह [१]मृत्तिकापिण्डका संहार है; क्योंकि भावका भावान्तरके अभावस्वभावसे अवभासन है। (अर्थात् भाव अन्यभावके अभावरूप स्वभावसे प्रकाशित है — दिखाई देता है।) और जो मृत्तिकापिण्डका संहार है वही कुम्भका सर्ग है, क्योंकि अभावका भावान्तरके भावस्वभावसे अवभासन है; (अर्थात् नाश अन्यभावके उत्पादरूप स्वभावसे प्रकाशित है।)

और जो कुम्भका सर्ग और पिण्डका संहार है वही मृत्तिकाकी स्थिति है, क्योंकि [२]व्यतिरेक अन्वयका अतिक्रमण (उल्लंघन) नहीं करते, और जो मृत्तिकाकी स्थिति है वही कुम्भका सर्ग और पिण्डका संहार है, क्योंकि व्यतिरेकोंके द्वारा ही [३]अन्वय प्रकाशित होता है। और यदि ऐसा ही (ऊपर समझाया तदनुसार) न माना जाय तो ऐसा सिद्ध होगा कि 'सर्ग अन्य है, संहार अन्य है, स्थिति अन्य है।' (अर्थात् तीनों पृथक् हैं ऐसा माननेका प्रसंग आजायगा।) ऐसा होने पर (क्या दोष आता है, सो समझाते हैं) :—

* 'व्यतिरेकमुखेन''''क्रमणात्' के स्थान पर निम्न प्रकार पाठ चाहिये ऐसा लगता है, "व्यतिरेकाणामन्वयानतिक्रमणात्। यैव च मृत्तिकायाः स्थितिस्तावेव कुम्भपिण्डयोः सर्गसंहारौ; व्यतिरेकमुखेनैवान्वयस्य प्रकाशनात्।" हिन्दी अनुवाद इस संशोधित पाठानुसार किया है।

१ मृत्तिकापिण्ड = मिट्टीका पिण्ड।

२ व्यतिरेक=भेद; एकका दूसररूप न होना वह; 'यह वह नहीं है' ऐसे ज्ञानका निमित्तभूत भिन्नरूपत्व।

३ अन्वय=एकरूपता; सादृश्यता; 'यह वही है' ऐसे ज्ञानका कारणभूत एकरूपत्व।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

सर्गसंहारौ, व्यतिरेकाणामन्वयानतिक्रमणात्। यदि पुनर्नेदमेवमिष्येत तदान्यः सर्गोऽन्यः संहारः अन्या स्थितिरित्यायाति। तथा सति हि केवलं सर्गं मृगयमाणस्य कुम्भस्योत्पादन कारणाभावादभवनिरेव भवेत्, असदुत्पाद एव वा। तत्र कुम्भस्याभवनौ सर्वेषामेव भावानामभवनिरेव भवेत्। असदुत्पादे वा व्योमप्रसवादीनामप्युत्पादः स्यात्। तथा केवलं संहारमारभमाणस्य मृत्पिण्डस्य संहारकारणाभावादसंहरणिरेव भवेत्, सदुच्छेद एव वा। तत्र मृत्पिण्डस्यासंहरणौ सर्वेषामेव भावानामसंहरणिरेव भवेत्। सदुच्छेदे वा

कस्मादिति चेत्। भङ्गकारणाभावात्, घटोत्पादाभावे मृत्पिण्डस्येव। द्वितीयं च कारणं सम्यक्त्व-पर्यायोत्पादस्य मिथ्यात्वपर्यायाभावरूपेण दर्शनात्। तदपि कस्मात्। पर्यायस्य पर्यायान्तराभाव-रूपत्वात्, घटपर्यायस्य मृत्पिण्डाभावरूपेणेव। यदि पुनः सम्यक्त्वोत्पादनिरपेक्षो भवति मिथ्यात्व-

---

केवल सर्ग-शोधक कुम्भकी (-व्यय और ध्रौव्यसे भिन्न मात्र उत्पाद करनेको जानेवाले कुम्भकी) [१]उत्पादन कारणका अभाव होनेसे उत्पत्ति ही नहीं होगी; अथवा तो असत्का ही उत्पाद होगा। और वहाँ, (१) यदि कुम्भकी उत्पत्ति न होगी तो समस्त ही भावोंकी उत्पत्ति ही नहीं होगी। (अर्थात् जैसे कुम्भकी उत्पत्ति नहीं होगी उसीप्रकार विश्वके किसी भी द्रव्यमें किसी भी भावका उत्पाद ही नहीं होगा, – यह दोष आयगा); अथवा (२) यदि असत्का उत्पाद हो तो [२]व्योम-पुष्प इत्यादिका भी उत्पाद होगा, (अर्थात् शून्यमेंसे भी पदार्थ उत्पन्न होने लगेंगे,– यह दोष आयगा।)

और केवल व्ययारम्भक (उत्पाद और ध्रौव्यसे रहित केवल व्यय करनेको उद्यत मृत्तिकापिण्डका) संहारकारणका अभाव होनेसे संहार ही नहीं होगा; अथवा तो सत्का ही उच्छेद होगा। वहाँ, (१) यदि मृत्तिकापिण्डका व्यय न होगा तो समस्त ही भावोंका संहार ही न होगा, (अर्थात् जैसे मृत्तिकापिण्डका संहार नहीं होगा उसीप्रकार विश्वके किसी भी द्रव्यमें किसी भावका संहार ही नहीं होगा, – यह दोष आयगा); अथवा (२) यदि सत्का उच्छेद होगा तो चैतन्य इत्यादिका भी उच्छेद हो जायगा, (अर्थात् समस्त द्रव्योंका सम्पूर्ण विनाश हो जायगा;– यह दोष आयगा।)

और [३]केवल स्थिति प्राप्त करने को जानेवाली मृत्तिकाकी, व्यतिरेकों सहित

---

[१] उत्पादनकारण=उत्पत्तिका कारण।

[२] व्योमपुष्प=आकाशके फूल।

[३] केवल स्थिति=(उत्पाद और व्यय रहित) अकेला ध्रुवपना, केवल स्थितिपना; अकेला अवस्थान। [अन्वय व्यतिरेकों सहित ही होता है, इसलिये ध्रौव्य उत्पाद-व्ययसहित ही होगा, अकेला नहीं हो सकता। जैसे उत्पाद (या व्यय) द्रव्यका अंश है – समग्र द्रव्य नहीं, इसप्रकार ध्रौव्य भी द्रव्यका अंश है, – समग्र द्रव्य नहीं।]

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

संविदादीनामप्युच्छेदः स्यात्। तथा केवलां स्थितिमुपगच्छन्त्या मृत्तिकाया व्यतिरेकाक्रान्तस्थित्यन्वयाभावादस्थानिरेव भवेत्, क्षणिकनित्यत्वमेव वा। तत्र मृत्तिकाया अस्थानौ सर्वेषामेव भावानामस्थानिरेव भवेत्। क्षणिकनित्यत्वे वा चित्तक्षणानामपि नित्यत्वं स्यात्। तत उत्तरोत्तरव्यतिरेकाणां सर्गेण पूर्वपूर्वव्यतिरेकाणां संहारेणान्वयस्यावस्थानेनाविनाभूतमुद्योतमाननिर्विघ्नत्रैलक्षण्यलाञ्छनं द्रव्यमवश्यमनुमन्तव्यम् ॥ १०० ॥

अथोत्पादादीनां द्रव्यादर्थान्तरत्वं संहरति –

उप्पादट्ठिदिभंगा विज्जंते पज्जएसु पज्जाया।
दव्वे हि संति णियदं तम्हा दव्वं हवदि सव्वं ॥ १०१ ॥

उत्पादस्थितिभङ्गा विद्यन्ते पर्यायेषु पर्यायाः।
द्रव्ये हि सन्ति नियतं तस्माद्द्रव्यं भवति सर्वम् ॥ १०१ ॥

पर्यायाभावस्तर्ह्यभाव एव न स्यात्। कस्मात्। अभावकारणाभावादिति, घटोत्पादाभावे मृत्पिण्डाभावस्य इव। **उप्पादो वि य भंगो ण विणा दव्वेण अत्थेण** परमात्मरुचिरूपसम्यक्त्वस्योत्पादस्तद्विपरीतमिथ्यात्वस्य भङ्गो व नास्ति। कं विना। तदुभयाधारभूतपरमात्मरूपद्रव्यपदार्थं विना। कस्मात्। द्रव्याभावे व्ययोत्पादाभावान्मृत्तिकाद्रव्याभावे घटोत्पादमृत्पिण्डभङ्गाभाववदिति। यथा सम्यक्त्वमिथ्यात्वपर्यायद्वये परस्परसापेक्षमुत्पादादित्रयं दर्शितं तथा सर्वद्रव्यपर्यायेषु द्रष्टव्य-

---

स्थितिका – अन्वयका – उसके अभाव होनेसे, स्थिति ही नहीं होगी; अथवा तो क्षणिकको ही नित्यत्व आजायगा। वहाँ (१) यदि मृत्तिकाकी स्थिति न हो तो समस्त ही भावोंकी स्थिति नहीं होगी, (अर्थात् यदि मिट्टी ध्रुव न रहे तो मिट्टीकी ही भाँति विश्वका कोई भी द्रव्य ध्रुव ही नहीं रहेगा, – टिकेगा ही नहीं यह दोष आयगा।) अथवा (२) यदि क्षणिकका नित्यत्व हो तो चित्तके क्षणिक-भावोंका भी नित्यत्व होगा; (अर्थात् मनका प्रत्येक विकल्प भी त्रैकालिक ध्रुव हो जाय, – यह दोष आयगा।)

इसलिये द्रव्यको [1]उत्तर उत्तर व्यतिरेकोंके सर्गके साथ, पूर्व पूर्वके व्यतिरेकोंके संहारके साथ और अन्वयके अवस्थान (ध्रौव्य) के साथ अविनाभाववाला, जिसको निर्विघ्न (अबाधित) त्रिलक्षणतारूप [2]लांछन प्रकाशमान है ऐसा अवश्य सम्मत करना ॥ १०० ॥

---

[1] उत्तर उत्तर=बाद बादके।

[2] लांछन=चिह्न।

उत्पाद तेम ज ध्रौव्य ने संहार वर्ते पर्यये।
ने पर्ययो द्रव्ये नियमथी, सर्व तेथी द्रव्य छे ॥ १०१ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

उत्पादव्ययध्रौव्याणि हि पर्यायानालम्बन्ते, ते पुनः पर्याया द्रव्यमालम्बन्ते। ततः समस्तमप्येतदेकमेव द्रव्यं न पुनर्द्रव्यान्तरम्। द्रव्यं हि तावत्पर्यायैरालम्ब्यते। समुदायिनः समुदायात्मकत्वात् पादपवत्। यथा हि समुदायी पादपः स्कन्धमूलशाखासमुदायात्मकः स्कन्धमूलशाखाभिरालम्बित एव प्रतिभाति, तथा समुदायि द्रव्यं पर्यायसमुदायात्मकं पर्यायैरालम्बितमेव प्रतिभाति। पर्यायास्तूत्पादव्ययध्रौव्यैरालम्ब्यन्ते उत्पादव्ययध्रौव्या-

---

मित्यर्थः ॥ १०० ॥ अथोत्पादव्ययध्रौव्याणि द्रव्येण सह परस्पराधाराधेयभावत्वादन्वयद्रव्यार्थिकनयेन द्रव्यमेव भवतीत्युपदिशति – **उप्पादट्ठिदिभंगा** विशुद्धज्ञानदर्शनस्वभावात्मतत्त्वनिर्विकारस्वसंवेदनज्ञानरूपेणोत्पादस्तस्मिन्नेव क्षणे स्वसंवेदनज्ञानविलक्षणाज्ञानपर्यायरूपेण भङ्गः, तदुभयाधारात्मद्रव्यत्वावस्थारूपेण स्थितिरित्युक्तलक्षणास्त्रयो भङ्गाः कर्तारः। **विज्जंते** विद्यन्ते तिष्ठन्ति। केषु। **पज्जएसु** सम्यक्त्वपूर्वकनिर्विकारस्वसंवेदनज्ञानपर्याये तावदुत्पादस्तिष्ठति स्वसंवेदनज्ञानविलक्षणाज्ञानपर्यायरूपेण भङ्गस्तदुभयाधारात्मद्रव्यत्वावस्थारूपपर्यायेण ध्रौव्यं चेत्युक्तलक्षणस्वकीयस्वकीयपर्यायेषु। **पज्जाया दव्वं हि संति** ते चोक्तलक्षणज्ञानाज्ञानतदुभयाधारात्मद्रव्यत्वावस्थारूपपर्याया हि स्फुटं द्रव्यं सन्ति। **णियदं** निश्चितं प्रदेशाभेदेऽपि स्वकीयस्वकीयसंज्ञालक्षणप्रयोजना-

---

अब, उत्पादादिका द्रव्यसे अर्थान्तरत्वको नष्ट करते हैं; (अर्थात् यह सिद्ध करते हैं कि उत्पाद-व्यय-ध्रौव्य द्रव्यसे पृथक् पदार्थ नहीं हैं) :–

गाथा १०१

अन्वयार्थ :– [**उत्पादस्थितिभङ्गाः**] उत्पाद, ध्रौव्य और व्यय [**पर्यायेषु**] पर्यायोंमें [**विद्यन्ते**] वर्तते हैं; [**पर्यायाः**] पर्यायें [**नियतं**] नियमसे [**द्रव्ये हि सन्ति**] द्रव्यमें होती हैं, [**तस्मात्**] इसलिये [**सर्वं**] वह सब [**द्रव्यं भवति**] द्रव्य है।

टीका :– उत्पाद, व्यय और ध्रौव्य वास्तवमें पर्यायोंका अवलम्बन करते हैं, और वे पर्यायें द्रव्यका आलम्बन करती हैं, अर्थात् उत्पाद-व्यय-ध्रौव्य पर्यायोंके आश्रयसे हैं और पर्यायें द्रव्यके आश्रयसे हैं) ; इसलिये यह सब एक ही द्रव्य है, द्रव्यांतर नहीं।

प्रथम तो द्रव्य पर्यायोंके द्वारा अवलम्बित है (अर्थात् पर्यायें द्रव्याश्रित हैं), क्योंकि [1]समुदायी समुदायस्वरूप होता है; वृक्षकी भाँति। जैसे समुदायी वृक्ष स्कंध, मूल और शाखाओंका समुदायस्वरूप होनेसे स्कंध, मूल और शाखाओंसे आलम्बित ही भासित (दिखाई) देता है, इसीप्रकार समुदायी द्रव्य पर्यायोंका समुदायस्वरूप होनेसे पर्यायोंके द्वारा आलम्बित ही भासित होता है। (अर्थात् जैसे स्कंध, मूल) शाखायें

---

[1] समुदायी=समुदायवान समुदाय (समूह) का बना हुआ। (द्रव्य समुदायी है क्योंकि पर्यायोंके समुदायस्वरूप है।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

णामंशधर्मत्वात् बीजाङ्कुरपादपत्ववत्। यथा किलांशिनः पादपस्य बीजाङ्कुरपादपत्व-लक्षणास्त्रयोंऽशा भङ्गोत्पादध्रौव्यलक्षणैरात्मधर्मैरालम्बिताः सममेव प्रतिभान्ति, तथांशिनो द्रव्यस्योच्छिद्यमानोत्पद्यमानावतिष्ठमानभावलक्षणास्त्रयोंऽशा भङ्गोत्पादध्रौव्यलक्षणै-रात्मधर्मैरालम्बिताः सममेव प्रतिभान्ति। यदि पुनर्भङ्गोत्पादध्रौव्याणि द्रव्यस्यैवेष्यन्ते

दिभेदेन। **यम्हा दव्वं हवदि सव्वं** येतो निश्चयाधाराधेयभावेन तिष्ठन्त्युत्पादादयस्तस्मात्कारणा-दुत्पादादित्रयं स्वसंवेदनज्ञानादिपर्यायत्रयं चान्वयद्रव्यार्थिकनयेन सर्वं द्रव्यं भवति। पूर्वोक्तोत्पादा-दित्रयस्य तथैव स्वसंवेदनज्ञानादिपर्यायत्रयस्य चानुगताकारेणान्वयरूपेण यदाधारभूतं तदन्वयद्रव्यं

वृक्षाश्रित ही हैं – वृक्षसे भिन्न पदार्थरूप नहीं हैं, उसीप्रकार पर्यायें द्रव्याश्रित ही हैं, – द्रव्यसे भिन्न पदार्थरूप नहीं हैं।)

और पर्यायें उत्पाद-व्यय-ध्रौव्यके द्वारा आलम्बित हैं (अर्थात् उत्पाद-व्यय-ध्रौव्य पर्यायाश्रित हैं) क्योंकि उत्पाद-व्यय-ध्रौव्य अंशोंके धर्म हैं ([1]अंशीके नहीं); बीज, अंकुर और वृक्षत्वकी भाँति। जैसे अंशीवृक्षके बीज अंकुर-वृक्षत्वस्वरूप तीन अंश, व्यय-उत्पाद-ध्रौव्यस्वरूप निज धर्मोंसे आलम्बित एक साथ ही भासित होते हैं, उसीप्रकार अंशी-द्रव्यके नष्ट होता हुआ भाव, उत्पन्न होता हुआ भाव, और अवस्थित रहनेवाला भाव; – यह तीनों अंश व्यय-उत्पाद-ध्रौव्यस्वरूप निजधर्मोंके द्वारा आलम्बित एक साथ ही भासित होते हैं। किन्तु यदि (१) भंग, (२) उत्पाद और (३) ध्रौव्यको (अंशीका न मानकर) द्रव्यका ही माना जाय तो सारा [2]विप्लवको प्राप्त होगा। यथा – (१) पहले, यदि द्रव्यका ही भंग माना जाय तो [3]क्षणभंगसे लक्षित समस्त द्रव्योंका एक क्षणमें ही संहार हो जानेसे द्रव्यशून्यता आ जायगी, अथवा सत्का उच्छेद हो जायगा। (२) यदि द्रव्यका ही उत्पाद माना जाय तो समय-समय पर होनेवाले उत्पादके द्वारा चिह्नित ऐसे द्रव्योंको प्रत्येकको अनन्तता आजायगी। (अर्थात् समय-समय पर होने वाला उत्पाद जिसका चिह्न हो ऐसा प्रत्येक द्रव्य अनन्त द्रव्यत्वको प्राप्त होजायगा) अथवा असत्का उत्पाद होजायगा; (३) यदि द्रव्यका ही ध्रौव्य माना जाय तो क्रमशः होनेवाले भावोंके अभावके कारण द्रव्यका अभाव हो आयगा; अथवा क्षणिकपना होगा।

---

[1] अंशी=अंशोंवाला; अंशोंका बना हुआ। (द्रव्य अंशी है।)

[2] विप्लव=अंधाधुंधी, = उथलपुथल; घोटाला; विरोध।

[3] क्षण=विनाश जिनका लक्षण हो ऐसे।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

तथा समग्रमेव विप्लवते। तथाहि भंगे तावत् क्षणभङ्गकटाक्षितानामेकक्षण एव सर्वद्रव्याणां संहरणाद्द्रव्यशून्यतावतारः सदुच्छेदो वा। उत्पादे तु प्रतिसमयोत्पादमुद्रितानां प्रत्येकं द्रव्याणामानन्त्यमसदुत्पादो वा। ध्रौव्ये तु क्रमभुवां भावानामभावाद्द्रव्यस्याभावः क्षणिकत्वं वा। अत उत्पादव्ययध्रौव्यैरालम्ब्यन्तां पर्यायाः पर्यायैश्च द्रव्यमालम्ब्यतां, येन समस्तमप्येतदेकमेव द्रव्यं भवति ॥ १०१ ॥

अथोत्पादादीनां क्षणभेदमुदस्य द्रव्यत्वं द्योतयति –

समवेदं खलु दव्वं संभवठिदिणाससण्णिदट्ठेहिं।
एक्कम्मि चेव समये तम्हा दव्वं खु तत्तिदयं ॥ १०२ ॥

समवेतं खलु द्रव्यं संभवस्थितिनाशसंज्ञितार्थैः।
एकस्मिन् चैव समये तस्माद्द्रव्यं खलु तत्त्रितयम् ॥ १०२ ॥

भण्यते, तद्विषयो यस्य स भवत्यन्वयद्रव्यार्थिकनयः। यथेदं ज्ञानाज्ञानपर्यायद्वये भङ्गत्रयं व्याख्यातं तथापि सर्वद्रव्यपर्यायेषु यथासंभवं ज्ञातव्यमित्यभिप्रायः ॥ १०१ ॥ अथोत्पादादीनां पुनरपि

इसलिये उत्पाद-व्यय-ध्रौव्यके द्वारा पर्यायें आलम्बित हों, और पर्यायोंके द्वारा द्रव्य आलम्बित हो, कि जिससे यह सब एक ही द्रव्य है।

भावार्थ :– बीज, अंकुर और वृक्षत्व, यह वृक्षके अंश हैं। बीजका नाश, अंकुरका उत्पाद और वृक्षत्वका ध्रौव्य – तीनों एक ही साथ होते हैं। इसप्रकार नाश बीजके आश्रित है, उत्पाद अंकुरके आश्रित है, और ध्रौव्य वृक्षत्वके आश्रित है; नाश, उत्पाद और ध्रौव्य बीज अंकुर और वृक्षत्वसे भिन्न पदार्थरूप नहीं है। तथा बीज, अंकुर और वृक्षत्व भी वृक्षसे भिन्न पदार्थरूप नहीं हैं। इसलिये यह सब एक वृक्ष ही हैं। इसीप्रकार नष्ट होता हुआ भाव, उत्पन्न होता हुआ भाव और ध्रौव्य भाव सब द्रव्यके अंश हैं। नष्ट होते हुए भावका नाश, उत्पन्न होते हुए भावका उत्पाद और स्थायी भावका ध्रौव्य एक ही साथ है। इसप्रकार नाश नष्ट होते भावके आश्रित है, उत्पाद उत्पन्न होते भावके आश्रित है और ध्रौव्य स्थायी भावके आश्रित है। नाश, उत्पाद और ध्रौव्य उन भावोंसे भिन्न पदार्थरूप नहीं हैं। और वे भाव भी द्रव्यसे भिन्न पदार्थरूप नहीं हैं। इसलिये यह सब, एक ही द्रव्य हैं ॥ १०१ ॥

उत्पाद–ध्रौव्य–विनाशसंज्ञित अर्थ सह समवेत छे।
एक ज समयमां द्रव्य निश्चय, तेथी अे त्रिक द्रव्य छे ॥ १०२ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

इह हि यो नाम वस्तुनो जन्मक्षणः स जन्मनैव व्याप्तत्वात् स्थितिक्षणो नाशक्षणश्च न भवति। यंश्च स्थितिक्षणः स खलूभयोरन्तरालदुर्ललितत्वाज्जन्मक्षणो नाशक्षणश्च न भवति। यश्च नाशक्षणः स तूत्पद्यावस्थाय च नश्यतो जन्मक्षणः स्थितिक्षणश्च न भवति।

प्रकारान्तरेण द्रव्येण सहाभेदं समर्थयति समयभेदं च निराकरोति – **समवेदं खलु दव्वं** समवेतमेकीभूतमभिन्नं भवति खलु स्फुटम्। किम्। आत्मद्रव्यम्। कैः सह। **संभवठिदिणाससण्णिदट्ठेहि** सम्यक्त्वज्ञानपूर्वकनिश्चलनिर्विकारनिजात्मानुभूतिलक्षणवीतरागचारित्रपर्यायेणोत्पादः तथैव रागादिपरद्रव्यैकत्वपरिणतिरूपचारित्रपर्यायेण नाशस्तदुभयाधारात्मद्रव्यत्वावस्थारूपपर्यायेण स्थितिरित्युक्तलक्षणसंज्ञित्वोत्पादव्ययध्रौव्यैः सह। तर्हि किं बौद्धमतवद्भिन्नभिन्नसमये त्रयं भविष्यति। नैवम्। **एक्कम्मि चेव समये** अङ्गुलिद्रव्यस्य वक्रपर्यायवत्संसारिजीवस्य मरणकाले ऋजुगतिवत् क्षीणकषायचरमसमये केवलज्ञानोत्पत्तिवदयोगिचरमसमये मोक्षवच्चेत्येकस्मिन्समय एव। **तम्हा दव्वं खु तत्तिदयं** यस्मात्पूर्वोक्तप्रकारेणैकसमये भङ्गत्रयेण परिणमति तस्मात्संज्ञालक्षणप्रयोजनादिभेदेऽपि

अब, उत्पादादिका क्षणभेद [१]निरस्त करके वे द्रव्य हैं यह समझाते हैं :–

गाथा १०२

अन्वयार्थ :– [**द्रव्यं**] द्रव्य [**एकस्मिन् च एव समये**] एक ही समयमें [**संभवस्थितिनाशसंज्ञितार्थैः**] उत्पाद, स्थिति और नाश नामक [२]अर्थोंके साथ [**खलु**] वास्तवमें [**समवेतं**] [३]समवेत (एकमेक) है ; [**तस्मात्**] इसलिये [**तत् त्रियंत**] यह [४]त्रितय [**खलु**] वास्तवमें [**द्रव्यं**] द्रव्य है।

टीका :–(प्रथम शंका उपस्थित की जाती है :–) यहाँ, (विश्वमें) वस्तुका जो जन्मक्षण है वह जन्मसे ही व्याप्त होनेसे स्थितिक्षण और नाशक्षण नहीं है, (वह पृथक् ही होता है) ; जो स्थितिक्षण हो वह दोनोंके अन्तरालमें (उत्पादक्षण और नाशक्षणके बीच) दृढ़तया रहता है, इसलिये (वह) जन्मक्षण और नाशक्षण नहीं है, और जो नाशक्षण है वह, – वस्तु उत्पन्न होकर और स्थिर रहकर फिर नाशको प्राप्त होती है इसलिये, – जन्मक्षण और स्थितिक्षण नहीं है, – इस प्रकार तर्कपूर्वक विचार करने पर उत्पादादिका क्षणभेद हृदयभूमिमें उतरता है (अर्थात् उत्पाद, व्यय और ध्रौव्यका समय भिन्न-भिन्न होता है, एक नहीं होता, – ऐसी बात हृदयमें जमती है।)

---

[१] निरस्त करके = दूर करके ; नष्ट करके ; खण्डित करके ; निराकृत करके।

[२] अर्थ = पदार्थ (८७ वीं गाथामें समझाया गया है, तदनुसार पर्याय भी अर्थ है।)

[३] समवेत=समवायवाला, तादात्म्यसहित जुड़ा हुवा, एकमेक।

[४] त्रितय = तीनका समुदाय। (उत्पाद, व्यय और ध्रौव्य, इन तीनोंका समुदाय वास्तवमें द्रव्य ही है)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

इत्युत्पादादीनां वितर्क्यमाणः क्षणभेदो हृदयभूमिमवतरति। अवतरत्येवं यदि द्रव्यमात्मनैवोत्पद्यते आत्मनैवावतिष्ठते आत्मनैव नश्यतीत्यभ्युपगम्यते। तत्तु नाभ्युपगतम्। पर्यायाणामेवोत्पादादयः कुतः क्षणभेदः। तथाहि – यथा कुलालदण्डचक्रचीवरारोप्यमाणसंस्कारसन्निधौ य एव वर्धमानस्य जन्मक्षणः स एव मृत्पिण्डस्य नाशक्षणः स एव च कोटिद्वयाधिरूढ़स्य मृत्तिकात्वस्य स्थितिक्षणः। तथा अन्तरङ्गबहिरङ्गसाधनारोप्यमाणसंस्कारसन्निधौ य एवोत्तरपर्यायस्य जन्मक्षणः स एव प्राक्तनपर्यायस्य नाशक्षणः स एव च कोटिद्वयाधिरूढ़स्य द्रव्यत्वस्य स्थितिक्षणः। यथा च वर्धमानमृत्पिण्डमृत्तिकात्वेषु प्रत्येकवर्तीन्यप्युत्पादव्ययध्रौव्याणि त्रिस्वभावस्पर्शिन्यां मृत्तिकायां सामस्त्येनैकसमय एवावलोक्यन्ते, तथा उत्तरप्राक्तनपर्यायद्रव्यत्वेषु प्रत्येकवर्तीन्यप्युत्पादव्ययध्रौव्याणि त्रिस्वभावस्पर्शिनि द्रव्ये सामस्त्येनैकसमय एवावलोक्यन्ते। यथैव च वर्धमानपिण्डमृत्तिकात्ववर्तीन्युत्पादव्ययध्रौव्याणि मृत्तिकैव न वस्त्वन्तरं, तथैवोत्तरप्राक्तनपर्यायद्रव्यत्ववर्तीन्यत्युत्पादव्ययध्रौव्याणि द्रव्यमेव न खल्वर्थान्तरम् ॥ १०२ ॥

प्रदेशानामभेदात्त्रयमपि खु स्फुटं द्रव्यं भवति। यथेदं चारित्राचारित्रपर्यायद्वये भङ्गत्रयमभेदेन दर्शितं तथा सर्वद्रव्यपर्यायेष्ववबोद्धव्यमित्यर्थः ॥ १०२ ॥ एवमुत्पादव्ययध्रौव्यरूपलक्षणव्याख्यान-

---

(यहाँ उपरोक्त शंकाका समाधान किया जाता है :–) इसप्रकार उत्पादादिका क्षणभेद हृदयभूमिमें तभी उतर सकता है जब यह माना जाय कि 'द्रव्य स्वयं ही उत्पन्न होता है, स्वयं ही ध्रुव रहता है और स्वयंको ही नाशको प्राप्त होता है !' किन्तु ऐसा तो माना नहीं गया है; (क्योंकि यह स्वीकार और सिद्ध किया गया है कि) पर्यायोंके ही उत्पादादि हैं; (तब फिर) वहाँ क्षणभेद-कहाँसे हो सकता है ? यह समझाते हैं :–

जैसे कुम्हार, दण्ड, चक्र और डोरी द्वारा आरोपित किये जानेवाले संस्कारकी उपस्थितिमें जो रामपात्रका जन्मक्षण होता है वही मृतिकापिण्डका नाशक्षण होता है, और वही दोनों [1]कोटियोंमें रहनेवाले मिट्टीपनका स्थितिक्षण होता है; इसीप्रकार अन्तरंग और बहिरंग साधनों द्वारा किये जानेवाले संस्कारोंकी उपस्थितिमें, जो उत्तर-पर्यायका जन्मक्षण होता है वही पूर्व पर्यायका नाशक्षण होता है, और वही दोनों कोटियोंमें रहनेवाले द्रव्यत्वका स्थितिक्षण होता है।

और जैसे रामपात्रमें, मृत्तिकापिण्डमें और मिट्टीपनमें उत्पाद, व्यय और ध्रौव्य प्रत्येक रूपमें (प्रत्येक पृथक् पृथक्) वर्तते होनेपर भी त्रिस्वभावस्पर्शी मृत्तिकामें वे

---

[1] कोटि=प्रकार (मिट्टीपन तो पिंडरूप तथा रामपात्ररूप – दोनों प्रकारोंमें विद्यमान है।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ द्रव्यस्योत्पादव्ययध्रौव्याण्यनेकद्रव्यपर्यायद्वारेण चिन्तयति –

पाडुब्भवदि य अण्णो पज्जाओ पज्जओ वयदि अण्णो ।
दव्वस्स तं पि दव्वं णेव पणट्ठं ण उप्पण्णं ॥ १०३ ॥

प्रादुर्भवति चान्यः पर्यायः पर्यायो व्येति अन्यः ।
द्रव्यस्य तदपि द्रव्यं नैव प्रणष्टं नोत्पन्नम् ॥ १०३ ॥

मुख्यतया गाथात्रयेण तृतीयस्थलं गतम् । अथ द्रव्यपर्यायेणोत्पादव्ययध्रौव्याणि दर्शयति – **पाडुब्भवदि य** प्रादुर्भवति च जायते । **अण्णो** अन्यः कश्चिदपूर्वानन्तज्ञानसुखादिगुणास्पदभूतः शाश्वतिकः । स कः । **पज्जाओ** परमात्मावाप्तिरूपः स्वभावद्रव्यपर्यायः । **पज्जओ वयदि अण्णो** पर्यायो व्येति विनश्यति । कथंभूतः । अन्यः पूर्वोक्तमोक्षपर्यायाद्भिन्नो निश्चयरत्नत्रयात्मकनिर्विकल्पसमाधिरूपस्यैव मोक्षपर्याय-

सम्पूर्णतया (सभी एकसाथ) एक समयमें ही देखे जाते हैं; इसीप्रकार उत्तर पर्यायमें, पूर्वपर्यायमें और द्रव्यत्वमें उत्पाद, व्यय और ध्रौव्य प्रत्येकतया (एक-एक) प्रवर्तमान होनेपर भी [1]त्रिस्वभावस्पर्शी द्रव्यमें वे सम्पूर्णतया (तीनों एकसाथ) एक समयमें ही देखे जाते हैं ।

और जैसे रामपात्र, मृत्तिकापिण्ड तथा मिट्टीपनमें प्रवर्तमान उत्पाद, व्यय और ध्रौव्य मिट्टी ही हैं, अन्य वस्तु नहीं; उसीप्रकार उत्तर पर्याय, पूर्व पर्याय, और द्रव्यत्वमें प्रवर्तमान उत्पाद, व्यय और ध्रौव्य द्रव्य ही हैं, अन्य पदार्थ नहीं ॥ १०२ ॥

अब, द्रव्यके उत्पाद-व्यय-ध्रौव्यको [2]अनेकद्रव्यपर्याय द्वारा विचारते हैं :-

गाथा १०३

अन्वयार्थ :– [**द्रव्यस्य**] द्रव्यकी [**अन्यः पर्यायः**] अन्य पर्याय [**प्रादुर्भवति**] उत्पन्न होती है [**च**] और [**अन्यः पर्यायः**] कोई अन्य पर्याय [**व्येति**] नष्ट होती है; [**तदपि**] फिर भी [**द्रव्यं**] द्रव्य [**प्रणष्टं न एव**] न तो नष्ट है, [**उत्पन्नं न**] न उत्पन्न है (-वह ध्रुव है ।)

[1] त्रिस्वभावस्पर्शी=तीनों स्वभावोंको स्पर्श करनेवाला । (द्रव्य उत्पाद, व्यय और ध्रौव्य – इन तीनों स्वभावोंको धारण करता है ।)

[2] अनेकद्रव्यपर्याय=एकसे अधिक द्रव्योंके संयोगसे होनेवाली पर्याय ।

उपजे दरवनो अन्य पर्यय, अन्य को विणसे वली ।
पण द्रव्य तो नथी नष्ट के उत्पन्न द्रव्य नथी तहीं ॥ १०३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

इह हि यथा किलैकस्त्र्यणुकः समानजातीयोऽनेकद्रव्यपर्यायोविनश्यत्यन्यश्चतुरणुकः प्रजायते, ते तु त्रयश्चत्वारो वा पुद्गला अविनष्टानुत्पन्ना एवावतिष्ठन्ते। तथा सर्वेऽपि समानजातीया द्रव्यपर्याया विनश्यन्ति प्रजायन्ते च समानजातीनि द्रव्याणि त्वविनष्टानुत्पन्नान्येवावतिष्ठन्ते। यथा चैको मनुष्यत्वलक्षणोऽसमानजातीयो द्रव्यपर्यायो विनश्यत्यन्यस्त्रिदशत्वलक्षणः प्रजायते तौ च जीवपुद्गलौ अविनष्टानुत्पन्नावेवावतिष्ठेते, तथा सर्वेऽप्यसमानजातीया द्रव्यपर्याया विनश्यन्ति प्रजायन्ते च असमानजातीनि द्रव्याणि त्वविनष्टानुत्पन्नान्यवावतिष्ठन्ते। एवमात्मना ध्रुवाणि द्रव्यपर्यायद्वारेणोत्पादव्ययीभूता-

---

स्योपादानकारणभूतः। कस्य संबन्धी पर्यायः। **दव्वस्स** परमात्मद्रव्यस्य। **तं पि दव्वं** तदपि परमात्मद्रव्यं **णेव पणट्ठं ण उप्पण्णं** शुद्धद्रव्यार्थिकनयेन नैव नष्टं न चोत्पन्नम्। अथवा संसारिजीवापेक्षया देवादिरूपो विभावद्रव्यपर्यायो जायते मनुष्यादिरूपो विनश्यति तदेव जीवद्रव्यं निश्चयेन न चोत्पन्नं न च विनष्टं, पुद्गलद्रव्यं वा द्व्यणुकादिस्कन्धरूपस्वजातीयविभावद्रव्यपर्यायाणां विनाशोत्पादेऽपि निश्चयेन न चोत्पन्नं न च विनष्टमिति। ततः स्थितं यतः कारणादुत्पादव्ययध्रौव्यरूपेण द्रव्यपर्यायाणां विनाशोत्पादेऽपि द्रव्यस्य विनाशो नास्ति, ततः कारणाद्द्रव्यपर्याया अपि

टीका :– यहाँ (विश्वमें) जैसे एक त्रि-अणुक समानजातीय अनेक द्रव्यपर्याय विनष्ट होती है और दूसरी [1]चतुरणुक (समानजातीय अनेक द्रव्यपर्याय) उत्पन्न होती है; परन्तु वे तीन या चार पुद्गल (परमाणु) तो अविनष्ट और अनुत्पन्न ही रहते हैं (– ध्रुव हैं); इसीप्रकार सभी समानजातीय द्रव्यपर्यायें विनष्ट होती हैं और उत्पन्न होती हैं, किन्तु समानजातीय द्रव्य तो अविनष्ट और अनुत्पन्न ही रहते हैं (-ध्रुव हैं)।

और, जैसे एक मनुष्यत्वस्वरूप असमानजातीय द्रव्य-पर्याय विनष्ट होती है और दूसरी देवत्वस्वरूप (असमानजातीय द्रव्यपर्याय) उत्पन्न होती है, परन्तु वह जीव और पुद्गल तो अविनष्ट और अनुत्पन्न ही रहते हैं, इसीप्रकार सभी असमानजातीय द्रव्य-पर्यायें विनष्ट हो जाती हैं और उत्पन्न होती हैं, परन्तु असमानजातीय द्रव्य तो अविनष्ट और अनुत्पन्न ही रहते हैं।

इसप्रकार अपनेसे ([2]द्रव्यरूपसे) ध्रुव और द्रव्यपर्यायों द्वारा उत्पाद-व्ययरूप

---

[1] चतुरणुक = चार अणुओंका (परमाणुओंका) बना हुआ स्कंध।

[2] 'द्रव्य' शब्द मुख्यतया दो अर्थोंमें प्रयुक्त होता है : (१) एक तो सामान्य – विशेषके पिण्डको अर्थात् वस्तुको द्रव्य कहा जाता है; जैसे – 'द्रव्य उत्पाद-व्यय-ध्रौव्यस्वरूप है; (२) दूसरे – वस्तुके सामान्य अंशको भी द्रव्य कहा जाता है; जैसे – 'द्रव्यार्थिक नय' अर्थात् सामान्यांशग्राही नय। जहाँ जो अर्थ घटित होता हो वहाँ वह अर्थ समझना चाहिये।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

न्युत्पादव्ययध्रौव्याणि द्रव्याणि भवन्ति ॥ १०३ ॥

अथ द्रव्यस्योत्पादव्ययध्रौव्याण्येकद्रव्यपर्यायद्वारेण चिन्तयति –

परिणमदि सयं दव्वं गुणदो य गुणंतरं सदविसिट्ठं।
तम्हा गुणपज्जाया भणिया पुण दव्वमेव त्ति ॥ १०४॥

परिणमति स्वयं द्रव्यं गुणतश्च गुणान्तरं सदविशिष्टम्।
तस्माद् गुणपर्याया भणिताः पुनः द्रव्यमेवेति ॥ १०४ ॥

द्रव्यलक्षणं भवन्तीत्यभिप्रायः ॥ १०३ ॥ अथ द्रव्यस्योत्पादव्ययध्रौव्याणि गुणपर्यायमुख्यत्वेन प्रतिपादयति – **परिणमदि सयं दव्वं** परिणमति स्वयं स्वयमेवोपादानकारणभूतं जीवद्रव्यं कर्तृ।

ऐसे द्रव्य उत्पाद-व्यय-ध्रौव्य हैं ॥ १०३ ॥

अब, द्रव्यके उत्पाद-व्यय-ध्रौव्य एकद्रव्यपर्याय द्वारा विचारते हैं :–

गाथा १०४

अन्वयार्थ :–[**सदविशिष्टं**] सत्तापेक्षासे अविशिष्टरूपसे, [**द्रव्यं स्वयं**] द्रव्य स्वयं ही [**गुणतः च गुणान्तरं**] गुणसे गुणान्तररूप [**परिणमते**] परिणमित होता है, (अर्थात् द्रव्य स्वयं ही एक गुणपर्यायमेंसे अन्य गुणपर्यायरूप परिणमित होता है, और उसकी सत्ता गुणपर्यायोंकी सत्ताके साथ अविशिष्ट–अभिन्न – एक ही रहती है), [**तस्मात् पुनः**] और उससे [**गुणपर्यायाः**] गुणपर्यायें [**द्रव्यम् एव इति भणिताः**] द्रव्य ही कही गई हैं।

टीका :–गुणपर्यायें एकद्रव्यपर्यायें हैं, क्योंकि गुणपर्यायोंको एक द्रव्यपना है, (अर्थात् गुणपर्यायें एकद्रव्यकी पर्यायें हैं, क्योंकि वे एक ही द्रव्य हैं–भिन्न-भिन्न द्रव्य नहीं।) उनका एकद्रव्यत्व आम्रफलकी भाँति है। जैसे–आम्रफल स्वयं ही हरितभाव-मेंसे पीतभावरूप परिणमित होता हुआ, प्रथम और पश्चात् प्रवर्तमान हरितभाव और पीतभावके द्वारा अपनी सत्ताका अनुभव करता है, इसलिये हरितभाव और पीतभावके साथ [1]अविशिष्ट सत्तावाला होनेसे एक ही वस्तु है, अन्य वस्तु नहीं; इसीप्रकार द्रव्य

[1] अविशिष्ट सत्तावाला = अभिन्न सत्तावाला; एक सत्तावाला; (आम की सत्ता हरे और पीले भावकी सत्तासे अभिन्न है, इसलिये आम और हरितभाव तथा पीतभाव एक ही वस्तु हैं, भिन्न नहीं।)

अविशिष्टसत्त्व स्वयं दरव गुणथी गुणांतर परिणमे।
तेथी वळी द्रव्य ज कह्या छे सर्वगुणपर्यायने ॥ १०४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

एकद्रव्यपर्याया हि गुणपर्यायाः, गुणपर्यायाणामेकद्रव्यत्वात्। एकद्रव्यत्वं हि तेषां सहकारफलवत्। यथा किल सहकारफलं स्वयमेव हरितभावात् पाण्डुभावं परिणमत्पूर्वोत्तरप्रवृत्तहरितपाण्डुभावाभ्यामनुभूतात्मसत्ताकं हरितपाण्डुभावाभ्यां सममविशिष्टसत्ताकतयैकमेव वस्तु न वस्त्वन्तरं, तथा द्रव्यं स्वयमेव पूर्वावस्थावस्थितगुणादुत्तरावस्थावस्थितगुणं परिणमत्पूर्वोत्तरावस्थावस्थितगुणाभ्यां ताभ्यामनुभूतात्मसत्ताकं पूर्वोत्तरावस्थावस्थितगुणाभ्यां सममविशिष्टसत्ताकतयैकमेव द्रव्यं न द्रव्यान्तरम्। यथैव चोत्पद्यमानं पाण्डुभावेन, व्ययमानं हरितभावेनावतिष्ठमानं सहकारफलत्वेनोत्पादव्ययध्रौव्याण्येकवस्तुपर्यायद्वारेण सहकारफलं तथैवोत्पद्यमानमुत्तरावस्थावस्थितगुणेन, व्ययमानं पूर्वावस्थावस्थितगुणेनावतिष्ठमानं द्रव्यत्वगुणेनोत्पादव्ययध्रौव्याण्येकद्रव्यपर्यायद्वारेण द्रव्यं भवति ॥ १०४ ॥

कं परिणमति। **गुणदो य गुणंतरं** निरुपरागस्वसंवेदनज्ञानगुणात् केवलज्ञानोत्पत्तिबीजभूतात्सकाशात्सकलविमलकेवलज्ञानगुणान्तरम्। कथंभूतं सत्परिणमति। **सदविसिट्ठं** स्वकीयस्वरूपत्वाच्चिद्रूपास्तित्वादविशिष्टमभिन्नम्। **तम्हा गुणपज्जाया भणिया पुण दव्वमेव त्ति** तस्मात् कारणान्न केवलं पूर्वसूत्रोदिताः द्रव्यपर्यायाः द्रव्यं भवन्ति, गुणरूपपर्याया गुणपर्याया भण्यन्ते तेऽपि द्रव्यमेव भवन्ति। अथवा संसारिजीवद्रव्यं मतिस्मृत्यादिविभावगुणं त्यक्त्वा श्रुतज्ञानादिविभावगुणान्तरं परिणमति, पुद्गलद्रव्यं वा पूर्वोक्तशुक्लवर्णादिगुणं त्यक्त्वा रक्तादिगुणान्तरं परिणमति, हरितगुणं त्यक्त्वा पाण्डुरगुणान्तरमाम्रफलमिवेति भावार्थः ॥ १०४ ॥ एवं स्वभावविभावरूपा द्रव्यपर्याया गुणपर्यायाश्च

स्वयं ही पूर्व अवस्थामें अवस्थित गुणमेंसे उत्तर अवस्थामें अवस्थित गुणरूप परिणमित होता हुआ, पूर्व और उत्तर अवस्थामें अवस्थित उन गुणोंके द्वारा अपनी सत्ताका अनुभव करता है, इसलिये पूर्व और उत्तर अवस्थामें अवस्थित गुणोंके साथ अविशिष्ट सत्तावाला होनेसे एक ही द्रव्य है- द्रव्यान्तर नहीं।

(आमके दृष्टान्तकी भाँति, द्रव्य स्वयं ही गुणकी पूर्व पर्यायमेंसे उत्तरपर्यायरूप परिणमित होता हुआ, पूर्व और उत्तर गुणपर्यायोंके द्वारा अपने अस्तित्वका अनुभव करता है, इसलिये पूर्व और उत्तर गुणपर्यायोंके साथ अभिन्न अस्तित्व होनेसे एक ही द्रव्य है, द्रव्यान्तर नहीं; अर्थात् वे वे गुणपर्यायें और द्रव्य एक ही द्रव्यरूप हैं, भिन्न-भिन्न द्रव्य नहीं हैं।)

और, जैसे पीतभावसे उत्पन्न होता हरितभावसे नष्ट होता और आम्रफलरूपसे स्थिर रहता होनेसे आम्रफल एक वस्तुकी पर्यायों द्वारा उत्पाद-व्यय-ध्रौव्य है, उसीप्रकार उत्तर अवस्थामें अवस्थित गुणसे उत्पन्न, पूर्व अवस्थामें अवस्थित गुणसे नष्ट और

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ सत्ताद्रव्ययोरनर्थान्तरत्वे युक्तिमुपन्यस्यति –

ण हवदि जदि सद्दव्वं असद्धुव्वं हवदि तं कहं दव्वं ।
हवदि पुणो अण्णं वा तम्हा दव्वं सयं सत्ता ॥१०५॥

न भवति यदि सद्द्रव्यमसद्ध्रुवं भवति तत्कथं द्रव्यम् ।
भवति पुनरन्यद्वा तस्माद्द्रव्यं स्वयं सत्ता ॥ १०५ ॥

नयविभागेन द्रव्यलक्षणं भवन्ति इति कथनमुख्यतया गाथाद्वयेन चतुर्थस्थलं गतम् । अथ सत्ताद्रव्ययोरभेदविषये पुनरपि प्रकारान्तरेण युक्तिं दर्शयति – **ण हवदि तदि सद्दव्वं** परमचैतन्यप्रकाशरूपेण स्वरूपेण स्वरूपसत्तास्तित्वगुणेन यदि चेत् सन्न भवति । किं कर्तृ । परमात्मद्रव्यं । तदा **असद्धुवं होदि** असदविद्यमानं भवति ध्रुवं निश्चितम् । अविद्यमानं सत् **तं कहं दव्वं** तत्परमात्मद्रव्यं कथं भवति, किंतु नैव । स च प्रत्यक्षविरोधः । कस्मात् । स्वसंवेदनज्ञानेन गम्यमानत्वात् । अथाविचारितरमणीयन्यायेन सत्तागुणाभावेऽप्यस्तीति चेत्, तत्र विचार्यते – यदि केवलज्ञानदर्शनगुणाविनाभूतस्वकीयस्वरूपास्तित्वात्पृथग्भूता तिष्ठति तदा स्वरूपास्तित्वं नास्ति, स्वरूपास्तित्वाभावे द्रव्यमपि नास्ति । अथवा स्वकीयस्वरूपास्तित्वात्संज्ञालक्षणप्रयोजनादिभेदेऽपि प्रदेशरूपेणाभिन्नं तिष्ठति

द्रव्यत्व गुणसे स्थिर होनेसे, द्रव्य एकद्रव्यपर्यायके द्वारा उत्पाद-व्यय-ध्रौव्य है ।

भावार्थ :– इससे पूर्वकी गाथामें द्रव्यपर्यायके द्वारा (अनेक द्रव्यपर्यायोंके द्वारा) द्रव्यके उत्पाद-व्यय-ध्रौव्य बताये गये थे । इस गाथामें गुणपर्यायके द्वारा (एकद्रव्यपर्यायके द्वारा) द्रव्यके उत्पाद-व्यय-ध्रौव्य बताये गये हैं ॥ १०४ ॥

अब, सत्ता और द्रव्य अर्थान्तर (भिन्न पदार्थ, अन्य पदार्थ) नहीं होनेके सम्बन्धमें युक्ति उपस्थित करते हैं :–

गाथा १०५

अन्वयार्थ :– [**यदि**] यदि [**द्रव्यं**] द्रव्य [**सत् न भवति**] (स्वरूपमें ही) सत् न हो तो – (१) [**ध्रुवं असत् भवति**] निश्चयसे वह असत् होगा; [**तत् कथं द्रव्यं**] (जो असत् होगा) वह द्रव्य कैसे हो सकता है ? [**पुनः वा**] अथवा (यदि असत् न हो) तो (२) [**अन्यत् भवति**] वह सत्तासे अन्य (पृथक्) हो ! (सो भी कैसे हो सकता है ?) [**तस्मात्**] इसलिये [**द्रव्यं स्वयं**] द्रव्य स्वयं ही [**सत्ता**] हैं ।

जो द्रव्य होय न सत्, ठरे ज असत् बने क्यम द्रव्य अे ?
वा भिन्न ठरतुं सत्त्वथी ! तेथी स्वयं ते सत्त्व छे ॥ १०५ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यदि हि द्रव्यं स्वरूपत एव सन्न स्यात्तदा द्वितयी गतिः असद्वा भवति, सत्तातः पृथग्वा भवति। तत्रासद्भूवद्ध्रौव्यस्यासंभवादात्मानमधारयद्द्रव्यमेवास्तं गच्छेत्। सत्तातः पृथग्भवत् सत्तामन्तरेणात्मानं धारयत्तावन्मात्रप्रयोजनां सत्तामेवास्तं गमयेत्। स्वरूपतस्तु सद्भूवद्ध्रौव्यस्य संभवादात्मानं धारयद्द्रव्यमुद्गच्छेत्। सत्तातोऽपृथग्भूत्वा चात्मानं धारयत्तावन्मात्रप्रयोजनां सत्तामुद्गमयेत्। ततः स्वयमेव द्रव्यं सत्त्वेनाभ्युपगन्तव्यं, भावभाववतोरपृथक्त्वेनान्यत्वात्॥ १०५॥

तदा संमतमेव। अत्रावसरे सौगतमतानुसारी कश्चिदाह – सिद्धपर्यायसत्तारूपेण शुद्धात्मद्रव्यमुपचारेणास्ति, न च मुख्यवृत्त्येति। परिहारमाह – सिद्धपर्यायोपादानकारणभूतपरमात्मद्रव्याभावे सिद्धपर्यायसत्तैव न संभवति, वृक्षाभावे फलमिव। अत्र प्रस्तावे नैयायिकमतानुसारी कश्चिदाह – **हवदि पुणो अण्णं वा** तत्परमात्मद्रव्यं भवति पुनः किंतु सत्तायाः सकाशादन्यद्भिन्नं भवति पश्चात्सत्ता समवायात्सद्भवति। आचार्याः परिहारमाहुः– सत्तासमवायात्पूर्वं द्रव्यं सदसद्वा, यदि सत्तदा सत्तासमवायो वृथा, पूर्वमेवास्तित्वं तिष्ठति; अथासत्तर्हि खपुष्पवदविद्यमानद्रव्येण सह कथं सत्ता समवायं करोति, करोतीति चेत्तर्हि खपुष्पेणापि सह सत्ता कर्तृ समवायं करोतु, न च तथा। **तम्हा दव्वं सयं सत्ता** तस्मादभेदनयेन शुद्धचैतन्यस्वरूपसत्तैव परमात्मद्रव्यं भवतीति। यथेदं परमात्मद्रव्येण सह शुद्धचेतनासत्ताया अभेदव्याख्यानं कृतं तथा सर्वेषां चेतनाचेतनद्रव्याणां स्वकीयस्वकीयसत्तया सहाभेदव्याख्यानं कर्तव्यमित्यभिप्रायः॥ १०५॥

टीका :– यदि द्रव्य स्वरूपसे ही [१]सत् न हो तो दूसरी गति यह हो कि वह (१) [२]असत् होगा, अथवा (२) सत्तासे पृथक् होगा। वहाँ, (१) यदि वह असत् होगा तो, ध्रौव्यके असंभवके कारण स्वयं स्थिर न होता हुआ द्रव्यका ही [३]अस्त हो जायगा; और (२) यदि सत्तासे पृथक् हो तो सत्ताके बिना भी स्वयं रहता हुआ, इतना ही मात्र जिसका प्रयोजन है ऐसी [४]सत्ताको ही अस्त कर देगा।

किन्तु यदि द्रव्य स्वरूपसे ही सत् हो तो – (१) ध्रौव्यके सद्भावके कारण स्वयं स्थिर रहता हुआ, द्रव्य उदित होता है, (अर्थात् सिद्ध होता है); और (२) सत्तासे अपृथक् रहकर स्वयं स्थिर (-विद्यमान) रहता हुआ, इतना ही मात्र जिसका प्रयोजन है ऐसी सत्ताको उदित (सिद्ध) करता है।

---

[१] सत् = मौजूद।

[२] असत् = नहीं मौजूद ऐसा।

[३] अस्त = नष्ट। [जो असत् हो उसका टिकना – मौजूद रहना कैसा? इसलिए द्रव्यको असत् माननेसे, द्रव्यके अभावका प्रसंग आता है अर्थात् द्रव्य ही सिद्ध नहीं होता।]

[४] सत्ताका कार्य इतना ही है कि वह द्रव्यको विद्यमान रखे। यदि द्रव्य सत्तासे भिन्न रहकर भी स्थिर रहे तो फिर सत्ताका प्रयोजन ही नहीं रहता, अर्थात् सत्ताके अभावका प्रसंग आजायगा।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ पृथक्त्वान्यत्वलक्षणमुन्मुद्रयति –

पविभत्तपदेसत्तं पुधत्तमिदि सासणं हि वीरस्स ।
अण्णत्तमतब्भावो ण तब्भवं होदि कधमेगं ॥ १०६ ॥

प्रविभक्तप्रदेशत्वं पृथक्त्वमिति शासनं हि वीरस्य ।
अन्यत्वमतद्भावो न तद्भवत् भवति कथमेकम् ॥ १०६ ॥

अथ पृथक्त्वलक्षणं किमन्यत्वलक्षणं च किमिति पृष्टे प्रत्युत्तरं ददाति – **पविभत्तपदेसत्तं पुधत्तं** पृथक्त्वं भवति पृथक्त्वाभिधानो भेदो भवति। किंविशिष्टम्। प्रकर्षेण विभक्तप्रदेशत्वं भिन्न-प्रदेशत्वम्। किंवत्। दण्डदण्डिवत्। इत्थंभूतं पृथक्त्वं शुद्धात्मद्रव्यशुद्धसत्तागुणयोर्न घटते।

इसलिये द्रव्य स्वयं ही सत्त्व (सत्ता) है ऐसा स्वीकार करना चाहिये, क्योंकि भाव और [1]भाववान्का अपृथक्त्व द्वारा अनन्यत्व है ॥ १०५ ॥

अब, पृथक्त्वका और अन्यत्वका लक्षण स्पष्ट करते हैं :–

गाथा १०६

अन्वयार्थ :–[**प्रविभक्तप्रदेशत्वं**] विभक्तप्रदेशत्व वह [**पृथक्त्वं**] पृथक्त्व है, [**इति हि**] ऐसा [**वीरस्य शासनं**] वीरका उपदेश है। [**अतद्भावः**] अतद्भाव (उस-रूप न होना) वह [**अन्यत्व**] अन्यत्व है। [**न तत् भवत्**] जो उसरूप न हो [**कथं एकम् भवति**] वह एक कैसे हो सकता है ? (कथंचित् सत्ता द्रव्यरूप नहीं है और द्रव्य सत्तारूप नहीं है, इसलिये वे एक नहीं हैं।)

टीका :–विभक्त प्रदेशत्व (भिन्न प्रदेशत्व) पृथक्त्वका लक्षण है। वह तो सत्ता और द्रव्यमें सम्भव नहीं है, क्योंकि गुण और गुणीमें विभक्तप्रदेशत्वका अभाव होता है– शुक्लत्व और वस्त्रकी भाँति। वह इसप्रकार है कि जैसे–जो शुक्लत्वके–गुणके–प्रदेश हैं वे ही वस्त्रके–गुणीके–हैं, इसलिये उनमें प्रदेशभेद नहीं है; इसीप्रकार जो सत्ताके–गुणके–प्रदेश हैं वे ही द्रव्यके–गुणीके–हैं, इसलिये उनमें प्रदेशभेद नहीं है।

---

[1] भाववान् = भाववाला। [द्रव्य भाववाला है और सत्ता उसका भाव है। वे अपृथक् हैं, इस अपेक्षासे अनन्य हैं। पृथक्त्व और अन्यत्वका भेद जिस अपेक्षासे है उस अपेक्षाको लेकर उनके विशेषार्थ आगामी गाथामें कहेंगे, उन्हें यहाँ नहीं लगाना चाहिये, किन्तु यहाँ अनन्यत्वको अपृथक्त्वके अर्थमें ही समझना चाहिये।

जिन वीरनो उपदेश एम–पृथक्त्व भिन्नप्रदेशता।
अन्यत्व जाण अतत्पणुं; नहि ते–पणे ते एक क्यां ? ॥ १०६ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

प्रविभक्तप्रदेशत्वं हि पृथक्त्वस्य लक्षणम्। तत्तु सत्ताद्रव्ययोर्न संभाव्यते, गुणगुणिनोः प्रविभक्तप्रदेशत्वाभावात् शुक्लोत्तरीयवत्। तथाहि—यथा य एव शुक्लस्य गुणस्य प्रदेशास्त एवोत्तरीयस्य गुणिन इति तयोर्न प्रदेशविभागः, तथा य एव सत्ताया

कस्माद्धेतोः। भिन्नप्रदेशाभावात्। कयोरिव। शुक्लवस्त्रशुक्लगुणयोरिव। **इदि सासणं हि वीरस्स** इति शासनमुपदेश आज्ञेति। कस्य। वीरस्य वीराभिधानान्तिमतीर्थकरपरमदेवस्य। **अण्णत्तं** तथापि

ऐसा होनेपर भी उनमें (-सत्ता और द्रव्यमें) अन्यत्व है, क्योंकि (उनमें) अन्यत्वके लक्षणका सद्भाव है। [१]अतद्भाव अन्यत्वका लक्षण है। वह तो सत्ता और द्रव्यके है ही, क्योंकि गुण और गुणीके [२]तद्भावका अभाव होता है—शुक्लत्व और वस्त्रकी भाँति। वह इसप्रकार है कि:—जैसे एक चक्षुइन्द्रियके विषयमें आनेवाला और अन्य सब इन्द्रियोंके समूहको गोचर न होनेवाला शुक्लत्व गुण है वह समस्त इन्द्रिय-समूहको गोचर होनेवाला ऐसा वस्त्र नहीं है; और जो समस्त इन्द्रियसमूहको गोचर होनेवाला वस्त्र है वह एक चक्षुइन्द्रियके विषयमें आनेवाला तथा अन्य समस्त इन्द्रियोंके समूहको गोचर न होनेवाला ऐसा शुक्लत्व गुण नहीं है, इसलिये उनके तद्भावका अभाव है; इसीप्रकार, [३]किसीके आश्रय रहनेवाली, [४]निर्गुण, एक गुणकी बनी हुई, [५]विशेषण [६]विधायक और [७]वृत्तिस्वरूप जो सत्ता है वह किसीके आश्रयके बिना रहने-

---

[१] अतद्भाव = (कथंचित्) उसका न होना; (कथंचित्) उसरूप न होना (कथंचित्) अतद्रूपता। द्रव्य कथंचित् सत्तारूपसे नहीं है और सत्ता कथंचित् द्रव्यरूपसे नहीं है, इसलिये उनके अतद्भाव है।

[२] तद्भाव = उसका होना, उसरूप होना, तद्रूपता।

[३] सत्ता द्रव्यके आश्रयसे रहती है, द्रव्यको किसीका आश्रय नहीं है। [जैसे घड़ेमें घी रहता हैं, उसीप्रकार द्रव्यमें सत्ता नहीं रहती (क्योंकि घड़ेमें और घीमें तो प्रदेशभेद है) किन्तु जैसे आममें वर्ण गंधादि हैं उसीप्रकार द्रव्यमें सत्ता है।]

[४] निर्गुण = गुणरहित [सत्ता निर्गुण है, द्रव्य गुणवाला है। जैसे आम वर्ण, गंध, स्पर्शादि गुणयुक्त है, किन्तु वर्णगुण कहीं गंध, स्पर्श या अन्य किसी गुणवाला नहीं है, क्योंकि न तो वर्ण सूंघा जाता है और न स्पर्श किया जाता है। और जैसे आत्मा ज्ञानगुणवाला, वीर्यगुणवाला इत्यादि है, परन्तु ज्ञानगुण कहीं वीर्यगुणवाला या अन्य किसी गुणवाला नहीं है; इसीप्रकार द्रव्य अनन्त गुणोंवाला है, परन्तु सत्ता गुणवाली नहीं है। (यहाँ, जैसे दण्डी दण्डवाला है उसीप्रकार द्रव्यको गुणवाला नहीं समझना चाहिये; क्योंकि दण्डी और दण्डमें प्रदेशभेद है, किन्तु द्रव्य और गुण अभिन्नप्रदेशी हैं।]

[५] विशेषण=विशेषता; लक्षण; भेदक धर्म।

[६] विधायक=विधान करनेवाला; रचयिता।

[७] वृत्ति=होना, अस्तित्व उत्पादव्यय-ध्रौव्य।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

गुणस्य प्रदेशास्त एव द्रव्यस्य गुणिन इति तयोर्न प्रदेशविभागः। एवमपि तयोरन्यत्व-मस्ति तल्लक्षणसद्भावात्। अतद्भावो ह्यन्यत्वस्य लक्षणं, तत्तु सत्ताद्रव्ययोर्विद्यत एव गुणगुणिनोस्तद्भावस्याभावात् शुक्लोत्तरीयवदेव। तथाहि—यथा यः किलैकचक्षुरिन्द्रिय-

---

प्रदेशाभेदेऽपि मुक्तात्मद्रव्यशुद्धसत्तागुणयोरन्यत्वं भिन्नत्वं भवति। कथंभूतम्। **अतद्भावो** अतद्भावरूपं संज्ञालक्षणप्रयोजनादिभेदस्वभावम्। यथा प्रदेशरूपेणाभेदस्तथा संज्ञादिलक्षणरूपेणाप्यभेदो भवतु, को

वाला, गुणवाला, अनेक गुणोंसे निर्मित, [१]विशेष्य, [२]विधीयमान और [३]वृत्तिमानस्वरूप ऐसा द्रव्य नहीं है, तथा जो किसीके आश्रयके बिना रहनेवाला, गुणवाला, अनेक गुणोंसे निर्मित, विशेष्य, विधीयमान और वृत्तिमानस्वरूप द्रव्य है वह किसीके आश्रित रहने-वाली निर्गुण, एक गुणसे निर्मित, विशेषण, विधायक और वृत्तिस्वरूप ऐसी सत्ता नहीं है, इसलिये उनके तद्भावका अभाव है। ऐसा होनेसे ही, यद्यपि सत्ता और द्रव्यके कथंचित् अनर्थान्तरत्व (-अभिन्नपदार्थत्व, अनन्यपदार्थत्व) है तथापि, उनके सर्वथा एकत्व होगा ऐसी शंका नहीं करनी चाहिये; क्योंकि तद्भाव एकत्वका लक्षण है। जो उसरूप ज्ञात नहीं होता वह (सर्वथा) एक कैसे हो सकता है? नहीं हो सकता; परन्तु गुण-गुणी-रूपसे अनेक ही है, ऐसा अर्थ है।

भावार्थ :— भिन्नप्रदेशत्व वह पृथक्त्वका लक्षण है, और अतद्भाव वह अन्यत्वका लक्षण है। द्रव्यमें और गुणमें पृथक्त्व नहीं है फिर भी अन्यत्व है।

प्रश्न :— जो अपृथक् होते हैं उनमें अन्यत्व कैसे हो सकता है?

उत्तर :— उनमें वस्त्र और शुभ्रता (सफेदी) की भाँति अन्यत्व हो सकता है। वस्त्रके और उसकी शुभ्रताके प्रदेश भिन्न नहीं हैं, इसलिये उनमें पृथक्त्व नहीं है।

---

[१] विशेष्य = विशेषताको धारण करनेवाला पदार्थ; लक्ष्य; भेद्य पदार्थ — धर्मी। [जैसे मिठास, सफेदी, सचिक्कणता आदि मिश्रीके विशेष गुण हैं, और मिश्री इन विशेष गुणोंसे विशेषित होती हुई अर्थात् उन विशेषताओंसे ज्ञात होती हुई, उन भेदोंसे भेदित होती हुई एक पदार्थ है; और जैसे ज्ञान, दर्शन, चारित्र, वीर्य इत्यादि आत्माके विशेषण हैं और आत्मा उन विशेषणोंसे विशेषित होता हुआ (लक्षित, भेदित, पहचाना जाता हुआ) पदार्थ है, उसीप्रकार सत्ता विशेषण है और द्रव्य विशेष्य है। (यहाँ यह नहीं भूलना चाहिये कि विशेष्य और विशेषणोंके प्रदेशभेद नहीं हैं।)

[२] विधीयमान = रचित होनेवाला। (सत्ता इत्यादि गुण द्रव्यके रचयिता हैं और द्रव्य उनके द्वारा रचा जानेवाला पदार्थ है।)

[३] वृत्तिमान = वृत्तिवाला, अस्तित्ववाला, स्थिर रहनेवाला (सत्ता वृत्तिस्वरूप अर्थात् अस्तिस्वरूप है और द्रव्य अस्तित्व रहनेस्वरूप है।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

विषयमापद्यमानः समस्तेतरेन्द्रियग्रामगोचरमतिक्रान्तः शुक्लो गुणो भवति, न खलु तदखिलेन्द्रियग्रामगोचरीभूतमुत्तरीयं भवति, यच्च किलाखिलेन्द्रियग्रामगोचरीभूतमुत्तरीयं भवति, न खलु स एकचक्षुरिंद्रियविषयमापद्यमानः समस्तेतरेन्द्रियग्रामगोचरमतिक्रान्तः शुक्लो गुणो भवतीति तयोस्तद्भावस्याभावः। तथा या किलाश्रित्य वर्तिनी निर्गुणैक-गुणसमुदिता विशेषणं विधायिका वृत्तिस्वरूपा च सत्ता भवति, न खलु तदनाश्रित्य वर्ति गुणवदनेकगुणसमुदितं विशेष्यं विधीयमानं वृत्तिमत्स्वरूपं च द्रव्यं भवति यत्तु किलाना-श्रित्य वर्ति गुणवदनेकगुणसमुदितं विशेष्यं विधीयमानं वृत्तिमत्स्वरूपं च द्रव्यं भवति, न खलु साश्रित्य वर्तिनी निर्गुणैकगुणसमुदिता विशेषणं विधायिका वृत्तिस्वरूपा च सत्ता भवतीति तयोस्तद्भावस्याभावः। अत एव च सत्ताद्रव्ययोः कथंचिदनर्थान्तरत्वेऽपि सर्व-थैकत्वं न शङ्कनीयं, तद्भावो ह्येकत्वस्य लक्षणम्। यत्तु न तद्भवद्विभाव्यते तत्कथमेकं स्यात्। अपि तु गुणगुणिरूपेणानेकमेवेत्यर्थः ॥ १०६ ॥

दोष इति चेत्। नैवम्। **ण तब्भवं होदि** तन्मुक्तात्मद्रव्यं शुद्धात्मसत्तागुणेन सह प्रदेशाभेदेऽपि संज्ञादिरूपेण तन्मयं न भवति। **कधमेगं** तन्मयत्वं हि किलैकत्वलक्षणं। संज्ञादिरूपेण तन्मयत्वाभावे कथमेकत्वं, किंतु नानात्वमेव। यथेदं मुक्तात्मद्रव्ये प्रदेशाभेदेऽपि संज्ञादिरूपेण नानात्वं कथितं तथैव सर्वद्रव्याणां स्वकीयस्वकीयस्वरूपास्तित्वगुणेन सह ज्ञातव्यमित्यर्थः ॥ १०६ ॥ अथातद्भावं

ऐसा होनेपर भी शुभ्रता तो मात्र आँखोंसे ही दिखाई देती है, जीभ, नाक आदि शेष चार इन्द्रियोंसे ज्ञात नहीं होती। और वस्त्र पाँचों इन्द्रियोंसे ज्ञात होता है। इसलिये (कथंचित्) वस्त्र वह शुभ्रता नहीं है और शुभ्रता वह वस्त्र नहीं है। यदि ऐसा न हो तो वस्त्रकी भाँति शुभ्रता भी जीभ, नाक इत्यादि सर्व इन्द्रियोंसे ज्ञात होना चाहिये। किन्तु ऐसा नहीं होता। इसलिये वस्त्र और शुभ्रतामें अपृथक्त्व होने पर भी अन्यत्व है यह सिद्ध होता है।

इसीप्रकार द्रव्यमें और सत्तादि गुणोंमें अपृथक्त्व होने पर भी अन्यत्व है, क्योंकि द्रव्यके और गुणके प्रदेश अभिन्न होने पर भी द्रव्यमें और गुणमें संज्ञा-संख्या-लक्षणादि भेद होनेसे (कथंचित्) द्रव्य गुणरूप नहीं है और गुण वह द्रव्यरूप नहीं है ॥ १०६ ॥

अब, अतद्भावको उदाहरण द्वारा स्पष्ट रूपसे बतलाते हैं :—

गाथा १०७

अन्वयार्थ :— [**सत् द्रव्यं**] 'सत् द्रव्य' [**सत् च गुणः**] 'सत् गुण' [**च**] और

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथातद्भावमुदाहृत्य प्रथयति –

सद्दव्वं सच्च गुणो सच्चेव य पज्जओ त्ति वित्थारो ।
जो खलु तस्स अभावो सो तद्भावो अतब्भावो ॥ १०७ ॥

सद्द्रव्यं संश्च गुणः संश्चैव च पर्याय इति विस्तारः ।
यः खलु तस्याभावः स तदभावोऽतद्भावः ॥ १०७ ॥

विशेषेण विस्तार्य कथयति – **सद्दव्वं सच्च गुणो सच्चेव य पज्जओ त्ति वित्थारो** सद्द्रव्यं संश्च गुणः संश्चैव पर्याय इति सत्तागुणस्य द्रव्यगुणपर्यायेषु विस्तारः। तथा हि – यथा मुक्ताफलहारे सत्तागुण-स्थानीयो योऽसौ शुक्लगुणः स प्रदेशाभेदेन किं किं भण्यते। शुक्लो हार इति शुक्लं सूत्रमिति शुक्लं मुक्ताफलमिति भण्यते, यश्च हारः सूत्रं मुक्ताफलं वा तैस्त्रिभिः प्रदेशाभेदेन शुक्लो गुणो भण्यत इति तद्भावस्य लक्षणमिदम्। तद्भावस्येति कोऽर्थः। हारसूत्रमुक्ताफलानां शुक्लगुणेन सह तन्मयत्वं प्रदेशाभिन्नत्वमिति। तथा मुक्तात्मपदार्थे योऽसौ शुद्धसत्तागुणः स प्रदेशाभेदेन किं किं भण्यते। सत्तालक्षणः परमात्मपदार्थ इति सत्तालक्षणः केवलज्ञानादिगुण इति सत्तालक्षणः सिद्धपर्याय

[**सत् च एव पर्यायः**] 'सत् पर्याय' – [**इति**] इस प्रकार [**विस्तारः**] (सत्तागुणका) विस्तार है। [**यः खलु**] (उनमें परस्पर) जो [**तस्य अभावः**] 'उसका अभाव' अर्थात् 'उसरूप होनेका अभाव' है [**सः**] वह [**तदभावः**]'तद्-अभाव' [**अतद्भावः**] अर्थात् अतद्भाव है।

टीका :– जैसे एक [1]मोतियोंकी माला 'हार' के रूपमें, 'सूत्र' (धागा) के रूपमें और 'मोती' के रूपमें – (त्रिधा) तीन प्रकारसे विस्तारित की जाती है, उसीप्रकार एक 'द्रव्य', द्रव्यके रूपमें, 'गुण' के रूपमें और 'पर्याय' के रूपमें – तीन प्रकारसे विस्तारित किया जाता है।

और जैसे एक मोतियोंकी मालाका शुक्लत्व गुण, 'शुक्ल हार,' 'शुक्ल धागा,' और 'शुक्ल मोती' – ऐसे तीन प्रकारसे विस्तारित किया जाता है, उसीप्रकार एक द्रव्यका सत्तागुण 'सत् द्रव्य,' 'सत्गुण', और 'सत्पर्याय', – ऐसे तीन प्रकारसे विस्तारित किया जाता है।

---

[1] मोतियोंकी माला = मोती का हार, मौक्तिकमाला।

'सत् द्रव्य' 'सत् पर्याय', 'सत् गुण'-सत्वनो विस्तार छे ।
नथी ते-पणे अन्योन्य तेह अतत्पणुं ज्ञातव्य छे ॥ १०७ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यथा खल्वेकं मुक्ताफलस्रग्दाम, हार इति सूत्रमिति मुक्ताफलमिति त्रेधा विस्तार्यते, तथैकं द्रव्यं द्रव्यमिति गुण इति पर्याय इति त्रेधा विस्तार्यते। यथा चैकस्य मुक्ताफलस्रग्दाम्नः शुक्लो गुणः शुक्लो हारः शुक्लं सूत्रं शुक्लं मुक्ताफलमिति त्रेधा विस्तार्यते, तथैकस्य द्रव्यस्य सत्तागुणः सद्द्रव्यं सद्गुणः सत्पर्याय इति त्रेधा विस्तार्यते।

इति भण्यते। यश्च परमात्मपदार्थः केवलज्ञानादिगुणः सिद्धत्वपर्याय इति तैश्च त्रिभिः (प्रदेशाभेदेन ?) शुद्धसत्तागुणो भण्यत इति तद्भावस्य लक्षणमिदम्। तद्भावस्येति कोऽर्थः। परमात्मपदार्थकेवलज्ञानादिगुणसिद्धत्वपर्यायाणां शुद्धसत्तागुणेन सह संज्ञादिभेदेऽपि प्रदेशैस्तन्मयत्वमिति। **जो खलु तस्स अभावो** यस्तस्य पूर्वोक्तलक्षणतद्भावस्य खलु स्फुटं संज्ञादिभेदविवक्षायामभावः **सो तदभावो** स पूर्वोक्तलक्षणस्तद्भावो भण्यते। स च तदभावः किं भण्यते। **अतब्भावो** न तद्भावस्तन्मयत्वम् किंच अतद्भावः संज्ञालक्षणप्रयोजनादिभेदः इत्यर्थः। तद्यथा – यथा मुक्ताफलहारे योऽसौ शुक्लगुणस्तद्वाचकेन शुक्लमित्यक्षरद्वयेन हारो वाच्यो न भवति सूत्रं वा मुक्ताफलं वा, हारसूत्रमुक्ताफलशब्दैश्च शुक्लगुणो वाच्यो न भवति। एवं परस्परं प्रदेशाभेदेऽपि योऽसौ संज्ञादिभेदः स तस्य पूर्वोक्तलक्षणतद्भावस्याभावस्तदभावो भण्यते। स च तदभावः पुनरपि किं भण्यते। अतद्भावः संज्ञालक्षणप्रयोजनादिभेद इति। तथा मुक्तजीवे योऽसौ शुद्धसत्तागुणस्तद्वाचकेन सत्ताशब्देन मुक्तजीवो वाच्यो न भवति केवलज्ञानादिगुणो वा सिद्धपर्यायो वा, मुक्तजीवकेवलज्ञानादिगुणसिद्धपर्यायशब्दैश्च शुद्धसत्ता-

---

और जिसप्रकार एक मोतियोंकी मालामें जो शुक्लत्वगुण है वह हार नहीं है, धागा नहीं है या मोती नहीं है, और जो हार, धागा या मोती है वह शुक्लत्व गुण नहीं है; – इसप्रकार एक-दूसरेमें जो 'उसका अभाव' अर्थात् 'तद्रूप होनेका अभाव' है वह 'तद्-अभाव' लक्षण 'अतद्भाव' है, जो कि अन्यत्वका कारण है। इसीप्रकार एक द्रव्यमें जो सत्तागुण है वह द्रव्य नहीं है, [१]अन्यगुण नहीं है, या पर्याय नहीं है; और जो द्रव्य अन्य गुण या पर्याय है वह सत्तागुण नहीं है, – इसप्रकार एक-दूसरेमें जो 'उसका अभाव' अर्थात् 'तद्रूप होनेका अभाव' है वह [२]'तद्-अभाव' लक्षण 'अतद्भाव' है जो कि अन्यत्वका कारण है।

भावार्थ :– एक आत्माका विस्तारकथनमें 'आत्मद्रव्य'के रूपमें 'ज्ञानादिगुण' के रूपमें और 'सिद्धत्वादि पर्याय' के रूपमें – तीन प्रकारसे वर्णन किया जाता है। इसीप्रकार सर्व द्रव्योंके सम्बन्धमें समझना चाहिये।

---

[१] अन्यगुण = सत्ताके अतिरिक्त दूसरा कोई भी गुण।

[२] तद्-अभाव = उसका अभाव; (तद्-अभाव = तस्य अभावः) तद्भाव अतद्भावका लक्षण (स्वरूप) है; अतद्भाव अन्यत्वका कारण है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यथा चैकस्मिन् मुक्ताफलस्रग्दाम्नि यः शुक्लो गुणः स न हारो न सूत्रं न मुक्ताफलं यश्च हारः सूत्रं मुक्ताफलं वा स न शुक्लो गुण इतीतरेतरस्य यस्तस्याभावः स तदभावलक्षणोऽतद्भावोऽन्यत्वनिबन्धनभूतः। तथैकस्मिन् द्रव्ये यः सत्तागुणस्तन्न द्रव्यं नान्यो गुणो न पर्यायो यच्च द्रव्यमन्यो गुणः पर्यायो वा स न सत्तागुण इतीतरेतरस्य यस्तस्याभावः स तदभावलक्षणोऽतद्भावोऽन्यत्वनिबन्धनभूतः ॥ १०७ ॥

अथ सर्वथाऽभावलक्षणत्वमतद्भावस्य निषेधयति –

गुणो वाच्यो न भवति। इत्येवं परस्परं प्रदेशाभेदेऽपि योऽसौ संज्ञादिभेदः स तस्य पूर्वोक्तलक्षणतद्भावस्याभावस्तदभावो भण्यते। स च तदभावः पुनरपि किं भण्यते। अतद्भावः संज्ञालक्षणप्रयोजनादिभेद इत्यर्थः। यथात्र शुद्धात्मनि शुद्धसत्तागुणेन सहाभेदः स्थापितस्तथा यथासंभवं सर्वद्रव्येषु ज्ञातव्य

और एक आत्माके अस्तित्व गुणको 'सत् आत्मद्रव्यं', 'सत् ज्ञानादिगुण' और 'सत् सिद्धत्वादि पर्याय' – ऐसे तीन प्रकारसे विस्तारित किया जाता है; इसीप्रकार सभी द्रव्योंके सम्बन्धमें समझना चाहिये।

और एक आत्माका जो अस्तित्व गुण है वह आत्मद्रव्य नहीं है, (सत्ता गुणके बिना) ज्ञानादिगुण नहीं है, या सिद्धत्वादि पर्याय नहीं है; और जो आत्मद्रव्य है, (अस्तित्वके सिवाय) ज्ञानादिगुण है या सिद्धत्वादि पर्याय है वह अस्तित्व गुण नहीं है – इसप्रकार उनमें परस्पर अतद्भाव है, जिनके कारण उनमें अन्यत्व है। इसीप्रकार सभी द्रव्योंके सम्बन्धमें समझना चाहिये।

इसप्रकार इस गाथामें सत्ताका उदाहरण देकर अतद्भावको स्पष्टतया समझाया है।

(यहाँ इतना विशेष है कि जो सत्ता गुणके सम्बन्धमें कहा है, वह अन्य गुणोंके विषयमें भी भलीभाँति समझ लेना चाहिये। जैसेकि :–सत्ता गुणकी भाँति एक आत्माके पुरुषार्थ गुणको 'पुरुषार्थी आत्मद्रव्य' 'पुरुषार्थी ज्ञानादिगुण' और 'पुरुषार्थी सिद्धत्वादि पर्याय' – इसप्रकार विस्तारित कर सकते हैं। अभिन्नप्रदेश होनेसे इसप्रकार विस्तार किया जाता है, फिर भी संज्ञा-लक्षण-प्रयोजनादि भेद होनेसे पुरुषार्थगुणको तथा आत्मद्रव्यको, ज्ञानादि अन्य गुण और सिद्धत्वादि पर्यायको अतद्भाव है, जो कि उनमें अन्यत्वका कारण है ॥ १०७ ..

अब, सर्वथा अभाव वह अतद्भावका लक्षण है, इसका निषेध करते हैं :–

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

जं दव्वं तं ण गुणो जो वि गुणो सो ण तच्चमत्थादो ।
एसो हि अतब्भावो णेव अभावो त्ति णिद्दिट्ठो ॥ १०८ ॥

यद्द्रव्यं तन्न गुणो योऽपि गुणः स न तत्त्वमर्थात् ।
एष ह्यतद्भावो नैव अभाव इति निर्दिष्टः ॥ १०८ ॥

इत्यभिप्रायः ॥ १०७ ॥ अथ गुणगुणिनोः प्रदेशभेदनिषेधेन तमेव संज्ञादिभेदरूपतद्भावं दृढयति – **जं दव्वं तण्ण गुणो** यद्द्रव्यं स न गुणः, यन्मुक्तजीवद्रव्यं स शुद्धः सन् गुणो न भवति । मुक्तजीव-द्रव्यशब्देन शुद्धसत्तागुणो वाच्यो न भवतीत्यर्थः । **जो वि गुणो सो ण तच्चमत्थादो** योऽपि गुणः स न तत्त्वं द्रव्यमर्थतः परमार्थतः, यः शुद्धसत्तागुणः स मुक्तात्मद्रव्यं न भवति । शुद्धसत्ताशब्देन मुक्तात्मद्रव्यं वाच्यं न भवतीत्यर्थः । **एसो हि अतब्भावो** एष उक्तलक्षणो हि स्फुटमतद्भावः । उक्तलक्षण इति कोऽर्थः । गुणगुणिनोः संज्ञादिभेदेऽपि प्रदेशभेदाभावः । **णेव अभावो त्ति णिद्दिट्ठो** नैवाभाव इति निर्दिष्टः । नैव अभाव इति कोऽर्थः । यथा सत्तावाचकशब्देन मुक्तात्मद्रव्यं वाच्यं न भवति तथा यदि

गाथा १०८

अन्वयार्थ :– [**अर्थात्**] स्वरूप अपेक्षासे [**यद् द्रव्यं**] जो द्रव्य है [**तत् न गुणः**] वह गुण नहीं है, [**यः अपिः गुणः**] और जो गुण है [**सः न तत्त्वं**] यह द्रव्य नहीं है । [**एषः हि अतद्भावः**] यह अतद्भाव है; [**न एव अभावः**] सर्वथा अभाव वह अतद्-भाव नहीं है; [**इति निर्दिष्टः**] ऐसा (जिनेन्द्रदेव द्वारा) दरशाया गया है ।

टीका :– एक द्रव्यमें, जो द्रव्य है वह गुण नहीं है, जो गुण है वह द्रव्य नहीं है;– इसप्रकार जो द्रव्य गुणरूपसे अभवन (न होना) अथवा गुणका द्रव्यरूपसे अभवन वह अतद्भाव है; क्योंकि इतनेसे ही अन्यत्व्यवहार (अन्यत्वरूप व्यवहार) सिद्ध होता है । परन्तु द्रव्यका अभाव गुण है, गुणका अभाव द्रव्य है; ऐसे लक्षणवाला अभाव वह अतद्भाव नहीं है । यदि ऐसा हो तो (१) एक द्रव्यको अनेकत्व आ जायगा, (२) उभयशून्यता (दोनोंका अभाव) हो जायगी, अथवा (३) अपोहरूपता आजायगी । इसी को समझाते हैं :–

(द्रव्यका अभाव वह गुण है और गुणका अभाव वह द्रव्य; वह ऐसा मानने पर प्रथम दोष इसप्रकार आयगा :–)

स्वरूपे नथी जे द्रव्य ते गुण, गुण ते नहि द्रव्य छे ।
–आने अतत्पणुं जाणवुं, न अभावने; भाख्युं जिने ॥ १०८ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

एकस्मिन्द्रव्ये यद्द्रव्यं गुणो न तद्भवति, यो गुणः स द्रव्यं न भवतीत्येवं यद्द्रव्यस्य गुणरूपेण गुणस्य वा द्रव्यरूपेण तेनाभवनं सोऽतद्भावः। एतावतैवान्यत्वव्यवहारसिद्धेर्न पुनर्द्रव्यस्याभावो गुणो गुणस्याभावो द्रव्यमित्येवंलक्षणोऽभावोऽतद्भाव, एवं सत्येकद्रव्यस्यानेकत्वमुभयशून्यत्वमपोहरूपत्वं वा स्यात्। तथाहि – यथा खलु चेतनद्रव्यस्याभावोऽचेतनद्रव्यमचेतनद्रव्यस्याभावश्चेतनद्रव्यमिति तयोरनेकत्वं, तथा द्रव्यस्याभावो गुणो गुणस्याभावो द्रव्यमित्येकस्यापि द्रव्यस्यानेकत्वं स्यात्। यथा सुवर्णस्याभावे

सत्ताप्रदेशैरपि सत्तागुणात्सकाशाद्भिन्नं भवति तदा यथा जीवप्रदेशेभ्यः पुद्गलद्रव्यं भिन्नं सद्द्रव्यान्तरं भवति तथा सत्तागुणप्रदेशेभ्यो मुक्तजीवद्रव्यं सत्तागुणाद्भिन्नं सत्पृथग्द्रव्यान्तरं प्राप्नोति। एवं किं सिद्धम्। सत्तागुणरूपं पृथग्द्रव्यं मुक्तात्मद्रव्यं च पृथगिति द्रव्यद्वयं जातं, न च तथा। द्वितीयं च दूषणं प्राप्नोति – यथा सुवर्णत्वगुणप्रदेशेभ्यो भिन्नस्य सुवर्णस्याभावस्तथैव सुवर्णप्रदेशेभ्यो भिन्नस्य

---

(१) जैसे चेतनद्रव्यका अभाव वह अचेतन द्रव्य है, अचेतनद्रव्यका अभाव वह चेतन द्रव्य है, – इसप्रकार उनके अनेकत्व (द्वित्व) है, उसीप्रकार द्रव्यका अभाव वह गुण, गुणका अभाव वह द्रव्य – इसप्रकार एक द्रव्यके भी अनेकत्व आजायगा। (अर्थात् द्रव्यके एक होनेपर भी उसके अनेकत्वका प्रसंग आजायगा।)

(अथवा उभयशून्यत्वरूप दूसरा दोष इसप्रकार आता है :–

(२) जैसे सुवर्णका अभाव होने पर सुवर्णत्वका अभाव हो जाता है और सुवर्णत्वका अभाव होनेपर सुवर्णका अभाव हो जाता है, – इसप्रकार उभयशून्यत्व–दोनों का अभाव हो जाता है, उसीप्रकार द्रव्यका अभाव होनेपर गुणका अभाव और गुणका अभाव होनेपर द्रव्यका अभाव होजायगा; – इसप्रकार उभयशून्यता होजायगी। (अर्थात् द्रव्य तथा गुण दोनोंके अभावका प्रसंग आजायगा।)

(अथवा अपोहरूपता नामक तीसरा दोष इसप्रकार आता है:–)

(३) जैसे पटाभावमात्र ही घट है, घटाभावमात्र ही पट है, (अर्थात् वस्त्रके केवल अभाव जितना ही घट है, और घटके केवल अभाव जितना ही वस्त्र है) – इसप्रकार दोनोंके अपोहरूपता है, उसीप्रकार द्रव्याभावमात्र ही गुण और गुणाभावमात्र ही

---

[१] अपोहरूपता=सर्वथा नकारात्मकता; सर्वथा भिन्नता। द्रव्य और गुणमें एक-दूसरेका केवल नकार ही हो तो 'द्रव्य गुणवाला है' 'यह गुण इस द्रव्यका है' – इत्यादि कथनसे सूचित किसीप्रकारका संबन्ध ही द्रव्य और गुणके नहीं बनेगा।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

सुवर्णत्वस्याभावः सुवर्णत्वस्याभावे सुवर्णस्याभाव इत्युभयशून्यत्वं, तथा द्रव्यस्याभावे गुणस्याभावो गुणस्याभावे द्रव्यस्याभाव इत्युभयशून्यत्वं स्यात्। यथा पटाभावमात्र एव घटो घटाभावमात्र एव पट इत्युभयोरपोहरूपत्वं तथा द्रव्याभावमात्र एव गुणो गुणाभावमात्र एव द्रव्यमित्यत्राप्यपोहरूपत्वं स्यात्। ततो द्रव्यगुणयोरेकत्वमशून्यत्वमनपोहत्वं चेच्छता यथोदित एवातद्भावोऽभ्युपगन्तव्यः ॥ १०८ ॥

अथ सत्ताद्रव्ययोर्गुणगुणिभावं साधयति –

जो खलु दव्वसहावो परिणामो सो गुणो सदविसिट्ठो।
सदवट्ठिदं सहावे दव्वं ति जिणोवदेसोयं ॥१०९॥

यः खलु द्रव्यस्वभावः परिणामः स गुणः सदविशिष्टः।
सदवस्थितं स्वभावे द्रव्यमिति जिनोपदेशोऽयम् ॥ १०९ ॥

सुवर्णत्वगुणस्याप्यभावः। तथा सत्तागुणप्रदेशेभ्यो भिन्नस्य मुक्तजीवद्रव्यस्याभावस्तथैव मुक्तजीवद्रव्यप्रदेशेभ्यो भिन्नस्य सत्तागुणस्याप्यभावः इत्युभयशून्यत्वं प्राप्नोति। यथेदं मुक्तजीवद्रव्ये संज्ञादिभेदभिन्नस्यातद्भावस्तस्य सत्तागुणेन सह प्रदेशाभेदव्याख्यानं कृतं तथा सर्वद्रव्येषु यथासंभवं ज्ञातव्यमित्यर्थः ॥ १०८ ॥ एवं द्रव्यस्यास्तित्वकथनरूपेण प्रथमगाथा, पृथक्त्वलक्षणातद्भावाभिधानान्यत्वलक्षणयोः कथनेन द्वितीया, संज्ञालक्षणप्रयोजनादिभेदरूपस्यातद्भावस्य विवरणरूपेण तृतीया, तस्यैव

द्रव्य होगा, – इसप्रकार इसमें भी (द्रव्य-गुणमें भी) [1]अपोहरूपता आजायगी, (अर्थात् केवल नकाररूपताका प्रसङ्ग आजायगा।)

इसलिये द्रव्य और गुणका एकत्व, अशून्यत्व और [1]अनपोहत्व चाहनेवालेको यथोक्त ही (जैसा कहा वैसा ही) अतद्भाव मानना चाहिये ॥ १०८ ॥

अब, सत्ता और द्रव्यका गुण – गुणीपना सिद्ध करते हैं :–

गाथा १०९

अन्वयार्थ :– [**यः खलु**] जो, [**द्रव्यस्वभावः परिणामः**] द्रव्यका स्वभावभूत उत्पादव्ययध्रौव्यात्मक) परिणाम है [**सः**] वह (परिणाम) [**सदविशिष्टः गुणः**] 'सत्' से अविशिष्ट (सत्तासे अभिन्न है ऐसा) गुण है। [**स्वभावे अवस्थितं**] 'स्वभावमें

---

[1] अनपोहत्व=अपोहरूपताका न होना; केवल नकारात्मकताका न होना।

परिणाम द्रव्यस्वभाव जे, ते गुण 'सत्' अविशिष्ट छे।
'द्रव्यो स्वभावे स्थित सत् छे'–अे ज आ उपदेश छे ॥ १०९ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

द्रव्यं हि स्वभावे नित्यमवतिष्ठमानत्वात्सदिति प्राक् प्रतिपादितम्। स्वभावस्तु द्रव्यस्य परिणामोऽभिहितः। य एव द्रव्यस्य स्वभावभूतः परिणामः, स एव सदविशिष्टो गुण इतीह साध्यते। यदेव हि द्रव्यस्वरूपवृत्तिभूतमस्तित्वं द्रव्यप्रधाननिर्देशात्सदिति संशब्द्यते तदविशिष्टगुणभूत एव द्रव्यस्य स्वभावभूतः परिणामः द्रव्यवृत्तेर्हि त्रिकोटि-समयस्पर्शिन्याः प्रतिक्षणं तेन तेन स्वभावेन परिणमनाद्द्रव्यस्वभावभूत एव तावत्प-

---

दृढीकरणार्थं च चतुर्थीति द्रव्यगुणयोरभेदविषये युक्तिकथनमुख्यतया गाथाचतुष्टयेन पञ्चमस्थलं गतम्। अथ सत्ता गुणो भवति, द्रव्यं च गुणी भवतीति प्रतिपादयति – **जो खलु दव्वसहावो परिणामो** यः खलु स्फुटं द्रव्यस्य स्वभावभूतः परिणामः पञ्चेन्द्रियविषयानुभवरूपमनोव्यापारोत्पन्नसमस्त-मनोरथरूपविकल्पजालाभावे सति यश्चिदानन्दैकानुभूतिरूपः स्वस्थभावस्तस्योत्पादः, पूर्वोक्तविकल्प-जालविनाशो व्ययः, तदुभयाधारभूतजीवत्वं ध्रौव्यमित्युक्तलक्षणोत्पादव्ययध्रौव्यात्मकजीवद्रव्यस्य स्वभावभूतो योऽसौ परिणामः **सो गुणो** स गुणो भवति। स परिणामः कथंभूतः सन्गुणो भवति। **सदविसिट्ठो** सतोऽस्तित्वादविशिष्टोऽभिन्नस्तदुत्पादादित्रयं तिष्ठत्यस्तित्वं चैकं तिष्ठत्यस्तित्वेन सह कथमभिन्नो भवतीति चेत्। "उत्पादव्ययध्रौव्ययुक्तं सत्" इति वचनात्। एवं सति सत्तैव गुणो भवतीत्यर्थः। इति गुणव्याख्यानं गतम्। **सदवट्ठिदं सहावे दव्व त्ति** सदवस्थितं स्वभावे द्रव्यमिति। द्रव्यं परमात्मद्रव्यं भवति। किं कर्तृ। सदिति। केन। अभेदनयेन। कथंभूतम्। सत् अवस्थितम्। क्व। उत्पादव्ययध्रौव्यात्मकस्वभावे। **जिणोवदेसोयं** अयं जिनोपदेश इति 'सदवट्ठिदं सहावे दव्वं

अवस्थित (होनेसे) [**द्रव्यं**] द्रव्य [**सत्**] सत् है' – [**इति जिनोपदेशः**] – ऐसा जो (९९ वीं गाथामें कथित) जिनोपदेश है [**अयम्**] वही यह है। (अर्थात् ९९ वीं गाथाके कथनमेंसे इस गाथामें कथित भाव सहज ही निकलता है।)

[**टीका** :–द्रव्य स्वभावमें नित्य अवस्थित होनेसे सत् है, ऐसा पहले (९९ वीं गाथामें) प्रतिपादित किया गया है; और (वहाँ) द्रव्यका स्वभाव परिणाम कहा गया है। यहाँ यह सिद्ध किया जा रहा है कि जो द्रव्यका स्वभावभूत परिणाम है वही 'सत्' से अविशिष्ट (अस्तित्वसे अभिन्न ऐसा–अस्तित्वसे कोई अन्य नहीं ऐसा) गुण है।

द्रव्यके स्वरूपका वृत्तिभूत ऐसा जो अस्तित्व द्रव्यप्रधान कथनके द्वारा 'सत्' शब्दसे कहा जाता है उससे अविशिष्ट (उस अस्तित्वसे अनन्य) गुणभूत ही द्रव्य-स्वभावभूत परिणाम है; क्योंकि द्रव्यकी [1]वृत्ति (अस्तित्व) तीन प्रकारके समयको (भूत, भविष्यत्, वर्तमान कालको) स्पर्शित करती होनेसे (वह वृत्ति – अस्तित्व) प्रतिक्षण उस-उस स्वभावरूप परिणमित होती है।

---

[1] वृत्ति=वर्तना; अस्तित्व रहना वह; टिकना वह।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

रिणामः । स त्वस्तित्वभूतद्रव्यवृत्त्यात्मकत्वात्सदविशिष्टो द्रव्यविधायको गुण एवेति सत्ताद्रव्ययोर्गुणगुणिभावः सिद्धयति ॥ १०९ ॥

अथ गुणगुणिनोर्नानात्वमुपहन्ति –

णत्थि गुणो त्ति व कोई पज्जाओ त्तीह वा विणा दव्वं ।
दव्वत्तं पुण भावो तम्हा दव्वं सयं सत्ता ॥ ११० ॥

नास्ति गुण इति वा कश्चित् पर्याय इतीह वा विना द्रव्यम् ।
द्रव्यत्वं पुनर्भावस्तस्माद्द्रव्यं स्वयं सत्ता ॥ ११० ॥

दव्वस्स जो हु परिणामो' इत्यादिपूर्वसूत्रे यदुक्तं तदेवेदं व्याख्यानम्, गुणकथनं पुनरधिकमिति तात्पर्यम् । यथेदं जीवद्रव्ये गुणगुणिनोर्व्याख्यानं कृतं तथा सर्वद्रव्येषु ज्ञातव्यमिति ॥ १०९ ॥ अथ गुणपर्यायाभ्यां सह द्रव्यस्याभेदं दर्शयति – **णत्थि** नास्ति न विद्यते । स कः । **गुणो त्ति व कोई** गुण इति कश्चित् । न केवलं गुणः **पज्जाओ त्तीह वा** पर्यायो वेतीह । कथम् । **विणा** विना । किं विना । **दव्वं** द्रव्यम् । इदानीं द्रव्यं कथ्यते । **दव्वत्तं पुण भावो** द्रव्यत्वमस्तित्वम् । तत्पुनः किं भण्यते ।

(इसप्रकार) प्रथम तो द्रव्यका स्वभावभूत परिणाम है; और वह (उत्पाद-व्यय-ध्रौव्यात्मक परिणाम) अस्तित्वभूत ऐसी द्रव्यकी वृत्तिस्वरूप होनेसे, 'सत्' से अविशिष्ट, द्रव्यविधायक (द्रव्यका रचयिता) गुण ही है । इसप्रकार सत्ता और द्रव्यका गुणगुणीपना सिद्ध होता है ॥ १०९ ॥

अब, गुण और गुणीके अनेकत्वका खण्डन करते हैं :–

गाथा ११०

अन्वयार्थ :–[**इह**] इस विश्वमें [**गुणः इति वा कश्चित्**] गुण ऐसा कुछ [**पर्यायः इति वा**] या पर्याय ऐसा कुछ [**द्रव्यं विना नास्ति**] द्रव्यके बिना (द्रव्यसे पृथक्) नहीं होता; [**द्रव्यत्वं पुनः भावः**] और द्रव्यत्व वह भाव है (अर्थात् अस्तित्व गुण है); [**तस्मात्**] इसलिये [**द्रव्यं स्वयं सत्ता**] द्रव्य स्वयं सत्ता (अस्तित्व) है ।

टीका :–वास्तवमें द्रव्यसे पृथग्भूत (भिन्न) ऐसा कोई गुण या ऐसी कोई पर्याय कुछ नहीं होता; जैसे – सुवर्णसे पृथग्भूत उसका पीलापन आदि या उसका कुण्डलत्वादि नहीं होता तदनुसार । अब, उस द्रव्यके स्वरूपकी वृत्तिभूत जो 'अस्तित्व' नामसे कहा जानेवाला द्रव्यत्व वह उसका 'भाव' नामसे कहा जानेवाला गुण ही होनेसे,

---

पर्याय के गुण अेवुं कोई न द्रव्य विण विश्वे दीसे ।
द्रव्यत्व छे वली भाव; तेथी द्रव्य पोते सत्त्व छे ॥ ११० ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

न खलु द्रव्यात्पृथग्भूतो गुण इति वा पर्याय इति वा कश्चिदपि स्यात्; यथा सुवर्णात्पृथग्भूतं तत्पीतत्वादिकमिति वा तत्कुण्डलत्वादिकमिति वा। अथ तस्य तु द्रव्यस्य स्वरूपवृत्तिभूतमस्तित्वाख्यं यद्द्रव्यत्वं स खलु तद्भावाख्यो गुण एव भवन् किं हि द्रव्यात्पृथग्भूतत्वेन वर्तते। न वर्तत एव। तर्हि द्रव्यं सत्ताऽस्तु, स्वयमेव ॥ ११० ॥

अथ द्रव्यस्य सदुत्पादासदुत्पादयोरविरोधं साधयति –

एवंविहं सहावे दव्वं दव्वत्थपज्जयत्थेहिं।
सदसब्भावणिबद्धं पादुब्भावं सदा लभदि ॥ १११ ॥

एवंविधं स्वभावे द्रव्यं द्रव्यार्थपर्यायार्थाभ्याम्।
सदसद्भावनिबद्धं प्रादुर्भावं सदा लभते ॥ १११ ॥

भावः। भावः कोऽर्थः। उत्पादव्ययध्रौव्यात्मकसद्भावः। **तम्हा दव्वं सयं सत्ता** तस्मादभेदनयेन सत्ता स्वयमेव द्रव्यं भवतीति। तद्यथा – मुक्तात्मद्रव्ये परमावाप्तिरूपो मोक्षपर्यायः केवलज्ञानादिरूपो गुणसमूहश्च येन कारणेन तद्द्वयमपि परमात्मद्रव्यं विना नास्ति, न विद्यते। कस्मात्। प्रदेशाभेदादिति। उत्पादव्ययध्रौव्यात्मकशुद्धसत्तारूपं मुक्तात्मद्रव्यं भवति। तस्मादभेदेन सत्तैव द्रव्यमित्यर्थः। यथा मुक्तात्मद्रव्ये गुणपर्यायाभ्यां सहाभेदव्याख्यानं कृतं तथा यथासंभवं सर्वद्रव्येषु ज्ञातव्यमिति ॥ ११० ॥ एवं गुणगुणिव्याख्यानरूपेण प्रथमगाथा, द्रव्यस्य गुणपर्यायाभ्यां सह भेदो नास्तीति कथनरूपेण द्वितीया चेति स्वतन्त्रगाथाद्वयेन षष्ठस्थलं गतम्॥ अथ द्रव्यस्य द्रव्यार्थिकपर्यायार्थिकनयाभ्यां सदुत्पादासदुत्पादौ दर्शयति – **एवंविहसब्भावे** एवंविधसद्भावे सत्तालक्षणमुत्पादव्ययध्रौव्यलक्षणं गुणपर्यायलक्षणं द्रव्यं चेत्येवंविधपूर्वोक्तसद्भावे स्थितं, अथवा **एवंविहं सहावे** इति पाठान्तरम्।

क्या वह द्रव्यसे पृथक्‌रूप वर्तता है? नहीं ही वर्तता। तब फिर द्रव्य स्वयमेव सत्ता हो ॥ ११० ॥

अब, द्रव्यके सत्-उत्पाद और असत्-उत्पाद होनेमें अविरोध सिद्ध करते हैं :–

गाथा १११

अन्वयार्थ :– [**एवंविधं द्रव्यं**] ऐसा (पूर्वोक्त) द्रव्य [**स्वभावे**] स्वभावमें [**द्रव्यार्थपर्यायार्थाभ्यां**] द्रव्यार्थिक और पर्यायार्थिक नयोंके द्वारा [**सद्सद्भावनिबद्धं प्रादुर्भावं**] सद्भावसंबद्ध और असद्भावसंबद्ध उत्पादको [**सदा लभते**] सदा प्राप्त करता है।

आवुं दरव द्रव्यार्थ–पर्यायार्थथी निजभावमां।
सद्भाव-अणसद्भावयुत उत्पादने पामे सदा ॥ १११ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

एवमेतद्यथोदितप्रकारसाकल्याकलङ्कलाञ्छनमनादिनिधनं सत्स्वभावे प्रादुर्भावमास्कन्दति द्रव्यम् । स तु प्रादुर्भावो द्रव्यस्य द्रव्याभिधेयतायां सद्भावनिबद्ध एव स्यात् । पर्यायाभिधेयतायां त्वसद्भावनिबद्ध एव । तथाहि – यदा द्रव्यमेवाभिधीयते न पर्यायास्तदा

तत्रैवंविधं पूर्वोक्तलक्षणं स्वकीयसद्भावे स्थितम् । किम् । **दव्वं** द्रव्यं कर्तृ । किं करोति । **सदा लभदि** सदा सर्वकालं लभते । किं कर्मतापन्नम् **पादुब्भावं** प्रादुर्भावमुत्पादम् । कथंभूतम् । **सदसब्भावणिबद्धं** सद्भावनिबद्धमसद्भावनिबद्धं च । काभ्यां कृत्वा । **दव्वत्थपज्जयत्थेहिं** द्रव्यार्थिकपर्यायार्थिकनयाभ्यामिति । तथा हि – यथा यदा काले द्रव्यार्थिकनयेन विवक्षा क्रियते, यदेव कटकपर्याये सुवर्णं तदेव कङ्कणपर्याये नान्यदिति, तदा काले सद्भावनिबद्ध एवोत्पादः । कस्मादिति चेत् । द्रव्यस्य द्रव्यरूपेणाविनष्टत्वात् । यदा पुनः पर्यायविवक्षा क्रियते, कटकपर्यायात् सकाशादन्यो यः कङ्कणपर्यायः सुवर्णसम्बन्धी स एव न भवति, तदा पुनरसदुत्पादः । कस्मादिति चेत् । पूर्वपर्यायस्य विनष्टत्वाद् । तथा यदा द्रव्यार्थिकनयविवक्षा क्रियते, य एव पूर्वं गृहस्थावस्थायामेवमेवं गृहव्यापारं कृतवान्

टीका :– इसप्रकार यथोदित (पूर्वकथित) सर्व प्रकारसे [१]अकलंक लक्षणवाला अनादिनिधन यह द्रव्य सत्-स्वभावमें (अस्तित्वस्वभावमें) उत्पादको प्राप्त होता है । द्रव्यका वह उत्पाद, द्रव्यकी [२]अभिधेयताके समय सद्भावसंबद्ध ही है और पर्यायोंकी अभिधेयताके समय असद्भावसंबद्ध ही है । इसे स्पष्ट समझाते हैं :–

जब द्रव्य ही कहा जाता है – पर्यायें नहीं, तब उत्पत्तिविनाश रहित, युगपत् प्रवर्तमान, द्रव्यको उत्पन्न करनेवाली [३]अन्वयशक्तियोंके द्वारा, उत्पत्तिविनाशलक्षणवाली, क्रमशः प्रवर्तमान, पर्यायोंकी उत्पादक उन-उन [४]व्यतिरेक व्यक्तियोंको प्राप्त होनेवाले द्रव्यको [५]सद्भावसंबद्ध ही उत्पाद है; सुवर्णकी भाँति । जैसे :– जब सुवर्ण ही

---

१ अकलंक=निर्दोष (यह द्रव्य पूर्वकथित सर्वप्रकार निर्दोष लक्षणवाला है ।)

२ अभिधेयता=कहने योग्यपना; विवक्षा; कथनी ।

३ अन्वयशक्ति=अन्वयरूपशक्ति । (अन्वयशक्तियां उत्पत्ति और नाशसे रहित हैं, एक ही साथ प्रवृत्ति होती है और द्रव्यको उत्पन्न करती हैं । ज्ञान, दर्शन, चारित्र इत्यादि आत्मद्रव्यकी अन्वयशक्तियां हैं ।)

४ व्यतिरेकव्यक्ति=भेदरूप प्रगटता । [व्यतिरेकव्यक्तियां उत्पत्ति विनाशको प्राप्त होती हैं, क्रमशः प्रवृत्त होती हैं और पर्यायोंको उत्पन्न करती हैं । श्रुतज्ञान, केवलज्ञान इत्यादि तथा स्वरूपाचरण चारित्र, यथाख्यातचारित्र इत्यादि आत्मद्रव्यकी व्यतिरेकव्यक्तियां हैं । व्यतिरेक और अन्वयके अर्थोंके लिये १९९वें पृष्ठका फुटनोट (टिप्पणी) देखें ।]

५ सद्भाव संबद्ध=सद्भाव – अस्तित्वके साथ संबन्ध रखनेवाला, – संकलित । [द्रव्यकी विवक्षाके समय अन्वय शक्तियोंको मुख्य और व्यतिरेकव्यक्तियोंको गौण कर दिया जाता है, इसलिये द्रव्यके सद्भावसंबद्ध उत्पाद (सत्-उत्पाद, विद्यमानका उत्पाद) है ।]

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

प्रभवावसानवर्जिताभिर्यौगपद्यप्रवृत्ताभिर्द्रव्यनिष्पादिकाभिरन्वयशक्तिभिः प्रभवावसानलाञ्छनाः क्रमप्रवृत्ताः पर्यायनिष्पादिका व्यतिरेकव्यक्तीस्तास्ताः संक्रामतो द्रव्यस्य सद्भावनिबद्ध एव प्रादुर्भावः हेमवत् । तथाहि – यदा हेमैवाभिधीयते नाङ्गदादयः पर्यायास्तदा हेमसमानजीविताभिर्यौगपद्यप्रवृत्ताभिर्हेमनिष्पादिकाभिरन्वयशक्तिभिरङ्गदादिपर्यायसमानजीविताः क्रमप्रवृत्ता अङ्गदादिपर्यायनिष्पादिका व्यतिरेकव्यक्तीस्तास्ताः संक्रामतो हेम्नः सद्भावनिबद्ध एव प्रादुर्भावः । यदा तु पर्याय एवाभिधीयन्ते न द्रव्यं तदा प्रभवावसानलाञ्छनाभिः क्रमप्रवृत्ताभिः पर्यायनिष्पादिकाभिर्व्यतिरेकव्यक्तिभिस्ताभिस्ताभिः प्रभवावसानवर्जिता यौगपद्यप्रवृत्ता द्रव्यनिष्पादिका अन्वयशक्तीः संक्रामतो द्रव्यस्यासद्भावनिबद्ध एव प्रादुर्भावः हेमवदेव । तथाहि – यदाङ्गदादिपर्याया एवाभिधीयन्ते न हेम तदाङ्गदादिपर्यायसमानजीविताभिः क्रमप्रवृत्ताभिरङ्गदादिपर्यायनिष्पादिका-

---

पश्चाज्जिनदीक्षां गृहीत्वा स एवेदानीं रामादिकेवलिपुरुषो निश्चयरत्नत्रयात्मकपरमात्मध्यानेनानन्तसुखामृततृप्तो जातः, न चान्य इति, तदा सद्भावनिबद्ध एवोत्पादः। कस्मादिति चेत्। पुरुषत्वेनाविनष्टत्वात्। यदा तु पर्यायनयविवक्षा क्रियते, पूर्वं सरागावस्थायाः सकाशादन्योऽयं भरतसगरराम-

---

कहा जाता है– बाजूबंध आदि पर्यायें नहीं, तब सुवर्ण जितनी स्थायी, युगपत् प्रवर्तमान, सुवर्णकी उत्पादक अन्वयशक्तियोंके द्वारा, बाजूबंध इत्यादि पर्याय जितने स्थायी, क्रमश; प्रवर्तमान, बाजूबंध इत्यादि पर्यायोंकी उत्पादक उन-उन व्यतिरेकव्यक्तियोंको प्राप्त होनेवाले सुवर्णका सद्भावसंबद्ध ही उत्पाद है ।

और जब पर्यायें ही कही जाती हैं, द्रव्य नहीं, तब उत्पत्तिविनाश जिनका लक्षण है ऐसी, क्रमशः प्रवर्तमान, पर्यायोंको उत्पन्न करनेवाली उन-उन व्यतिरेकव्यक्तियोंके द्वारा, उत्पत्तिविनाश रहित, युगपत् प्रवर्तमान, द्रव्यकी उत्पादक अन्वयशक्तियोंको प्राप्त होनेवाले द्रव्यको [1]असद्भावसंबद्ध ही उत्पाद है; सुवर्णकी ही भाँति । वह इसप्रकार जब बाजूबंधादि पर्यायें ही कही जाती हैं – सुवर्ण नहीं, तब बाजूबंध इत्यादि पर्याय जितनी टिकनेवाली, क्रमशः प्रवर्तमान, बाजूबंध इत्यादि पर्यायोंकी उत्पादक उन-उन व्यतिरेक-व्यक्तियोंके द्वारा, सुवर्ण जितनी टिकनेवाली, युगपत् प्रवर्तमान, सुवर्णकी उत्पादक अन्वयशक्तियोंको प्राप्त सुवर्णके असद्भावयुक्त ही उत्पाद है ।

---

[1] असद्भावसंबद्ध=अनस्तित्वके साथ संबंधवाला-संकलित । [पर्यायोंकी विवक्षाके समय व्यतिरेकव्यक्तियोंको मुख्य और अन्वयशक्तियोंको गौण किया जाता है, इसलिये द्रव्यके असद्भावसंबद्ध उत्पाद (असत् उत्पाद, अविद्यमानका उत्पाद) है ।]

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

भिर्व्यतिरेकव्यक्तिभिस्ताभिस्ताभिर्हेमसमानजीविता यौगपद्यप्रवृत्ता हेमनिष्पादिका अन्वयशक्तीः संक्रामतो हेम्नोऽसद्भावनिबद्ध एव प्रादुर्भावः। अथ पर्यायाभिधेयतायाम-प्यसदुत्पत्तौ पर्यायनिष्पादिकास्तास्ता व्यतिरेकव्यक्तयो यौगपद्यप्रवृत्तिमासाद्यान्वयशक्ति-त्वमापन्नाः पर्यायान् द्रवीकुर्युः, तथाङ्गदादिपर्यायनिष्पादिकाभिस्ताभिस्ताभिर्व्यतिरेकव्य-क्तिभिर्यौगपद्यप्रवृत्तिमासाद्यान्वयशक्तित्वमापन्नाभिरङ्गदादिपर्याया अपि हेमीक्रियेरन्।

पाण्डवादिकेवलिपुरुषाणां संबन्धी निरुपरागपरमात्मपर्यायः स एव न भवति, तदा पुनरसद्भावनिबद्ध एवोत्पादः। कस्मादिति चेत्। पूर्वपर्यायादन्यत्वादिति। यथेदं जीवद्रव्ये सदुत्पादासदुत्पादव्याख्यानं

अब, पर्यायोंकी अभिधेयता (कथनी) के समय भी, असत्-उत्पादमें पर्यायोंको उत्पन्न करनेवाली वे-वे व्यतिरेकव्यक्तियाँ युगपत् प्रवृत्ति प्राप्त करके अन्वयशक्तिपनेको प्राप्त होती हुई पर्यायोंको द्रव्य करता है (पर्यायोंकी विवक्षाके समय भी व्यतिरेक-व्यक्तियाँ अन्वयशक्तिरूप बनती हुई पर्यायोंको द्रव्यरूप करती हैं); जैसे बाजूबंध आदि पर्यायोंको उत्पन्न करनेवाली वे-वे व्यतिरेकव्यक्तियाँ युगपत् प्रवृत्ति प्राप्त करके अन्वय-शक्तिपनेको प्राप्त करती हुई बाजूबंध इत्यादि पर्यायोंको सुवर्ण करता है तदनुसार। द्रव्यकी अभिधेयताके समय भी, सत्-उत्पादमें द्रव्यकी उत्पादक अन्वयशक्तियाँ क्रमप्रवृत्तिको प्राप्त करके उस-उस व्यतिरेकव्यक्तित्वको प्राप्त होती हुई, द्रव्यको पर्यायें (पर्यायरूप) करती हैं; जैसे सुवर्णकी उत्पादक अन्वयशक्तियाँ क्रमप्रवृत्ति प्राप्त करके उस-उस व्यतिरेकव्यक्तित्वको प्राप्त होती हुई, सुवर्णको बाजूबंधादि पर्यायमात्र (पर्यायमात्ररूप) करती हैं।

इसलिये द्रव्यार्थिक कथनसे सत्-उत्पाद है, पर्यायार्थिक कथनसे असत्-उत्पाद है – यह बात अनवद्य (निर्दोष, अबाध्य) है।

भावार्थ :– जो पहले विद्यमान हो उसीकी उत्पत्तिको सत्-उत्पाद कहते हैं और जो पहले विद्यमान न हो उसकी उत्पत्तिको असत्-उत्पाद कहते हैं। जब पर्यायोंको गौण करके द्रव्यका मुख्यतया कथन किया जाता है, तब तो जो विद्यमान था वही उत्पन्न होता है, (क्योंकि द्रव्य तो तीनों कालमें विद्यमान है); इसलिये द्रव्यार्थिक नयसे तो द्रव्यको सत्-उत्पाद है; और जब द्रव्यको गौण करके पर्यायोंका मुख्यतया कथन किया जाता है तब जो विद्यमान नहीं था वह उत्पन्न होता है (क्योंकि वर्तमान पर्याय भूतकालमें विद्यमान नहीं थी), इसलिये पर्यायार्थिक नयसे द्रव्यके असत्उत्पाद है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

द्रव्याभिधेयतायामपि सदुत्पत्तौ द्रव्यनिष्पादिका अन्वयशक्तयः क्रमप्रवृत्तिमासाद्य तत्तद्व्यतिरेकव्यक्तित्वमापन्ना द्रव्यं पर्यायीकुर्युः। तथा हेमनिष्पादिकाभिरन्वयशक्तिभिः क्रमप्रवृत्तिमासाद्य तत्तद्व्यतिरेकमापन्नाभिर्हेमाङ्गदादिपर्यायमात्री क्रियेत। ततो द्रव्यार्थादेशात्सदुत्पादः, पर्यायार्थादेशादसत् इत्यनवद्यम् ॥ १११ ॥

अथ सदुत्पादमनन्यत्वेन निश्चिनोति –

जीवो भवं भविस्सदि णरोऽमरो वा परो भवीय पुणो।
किं दव्वत्तं पजहदि ण जहं अण्णो कहं होदि ॥ ११२ ॥

जीवो भवन् भविष्यति नरोऽमरो वा परो भूत्वा पुनः।
किं द्रव्यत्वं प्रजहाति न जहदन्यः कथं भवति ॥ ११२ ॥

कृतं तथा सर्वद्रव्येषु यथासंभवं ज्ञातव्यमिति ॥ १११ ॥ अथ पूर्वोक्तमेव सदुत्पादं द्रव्यादभिन्नत्वेन विवृणोति – **जीवो** जीवः कर्ता **भवं** भवन् परिणमन् सन् **भविस्सदि** भविष्यति तावत्। किं किं भविष्यति। निर्विकारशुद्धोपयोगविलक्षणाभ्यां शुभाशुभोपयोगाभ्यां परिणम्य **णरोऽमरो वा परो** नरो देवः परस्तिर्यङ्नारकरूपो वा निर्विकारशुद्धोपयोगेन सिद्धो वा भविष्यति। **भवीय पुणो** एवं पूर्वोक्त-

---

यहाँ यह लक्ष्यमें रखना चाहिये कि द्रव्य और पर्यायें भिन्न-भिन्न वस्तुएँ नहीं हैं; इसलिये पर्यायोंकी विवक्षाके समय भी, असत्उत्पादमें, जो पर्यायें हैं वे द्रव्य ही हैं, और द्रव्यकी विवक्षाके समय भी, सत्उत्पादमें, जो द्रव्य है वे पर्यायें ही हैं ॥ १११ ॥

अब (सर्व पर्यायोंमें द्रव्य अनन्य है अर्थात् वह का वही है, इसलिये उसके सत्-उत्पाद है – इसप्रकार) सत्–उत्पादको अनन्यत्वके द्वारा निश्चित करते हैं :–

गाथा ११२

अन्वयार्थ :– [**जीवः**] जीव [**भवन्**] परिणमित होता हुआ [**नरः**] मनुष्य, [**अमरः**] देव [**वा**] अथवा [**परः**] अन्य (तिर्यंच, नारकी या सिद्ध) [**भविष्यति**] होगा, [**पुनः**] परन्तु [**भूत्वा**] मनुष्य देवादि होकर [**किं**] क्या वह [**द्रव्यत्वं प्रजहाति**] द्रव्यत्वको छोड़ देता है ? [**न जहत्**] नहीं छोड़ता हुआ वह [**अन्यः कथं भवति**] अन्य कैसे हो सकता है ? (अर्थात् वह अन्य नहीं, वहका वही है।)

जीव परिणमे तेथी नरादिक अे थशे; पण ते–रूपे।
शुं छोडतो द्रव्यत्वने ? नहि छोडतो क्यम अन्य अे ॥ ११२ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

द्रव्यं हि तावद्द्रव्यत्वभूतामन्वयशक्तिं नित्यमप्यपरित्यजद्भवति सदेव । यस्तु द्रव्यस्य पर्यायभूताया व्यतिरेकव्यक्तेः प्रादुर्भावः तस्मिन्नपि द्रव्यत्वभूताया अन्वयशक्तेरप्रच्यवनात् द्रव्यमनन्यदेव । ततोऽनन्यत्वेन निश्चीयते द्रव्यस्य सदुत्पादः । तथाहि – जीवो द्रव्यं भवन्नारकतिर्यङ्मनुष्यदेवसिद्धत्वानामन्यतमेन पर्यायेण द्रव्यस्य पर्यायदुर्ललितवृत्तित्वादवश्यमेव भविष्यति । स हि भूत्वा च तेन किं द्रव्यत्वभूतामन्वयशक्तिमुज्झति, नोज्झति । यदि नोज्झति कथमन्यो नाम स्यात्, येन प्रकटितत्रिकोटिसत्ताकः स एव न स्यात् ॥ ११२ ॥

प्रकारेण पुनर्भूत्वापि । अथवा द्वितीयव्याख्यानम् । भवन् वर्तमानकालापेक्षया, भविष्यति भाविकालापेक्षया, भूत्वा भूतकालापेक्षया चेति कालत्रये चैवं भूत्वापि **किं दव्वत्तं पजहदि** किं द्रव्यत्वं परित्यजति । **ण चयदि** द्रव्यार्थिकनयेन द्रव्यत्वं न त्यजति, द्रव्याद्भिन्नो न भवति । **अण्णो कहं हवदि** अन्यो भिन्नः कथं भवति । किंतु द्रव्यान्वयशक्तिरूपेण सद्भावनिबद्धोत्पादः स एवेति द्रव्यादभिन्न इति भावार्थः

टीका :– प्रथम तो द्रव्य द्रव्यत्वभूत अन्वयशक्तिको कभी न छोड़ता हुआ सत् (विद्यमान) ही है । और द्रव्यके जो पर्यायभूत व्यतिरेकव्यक्तिका उत्पाद होता है । उसमें भी द्रव्यत्वभूत अन्वयशक्तिका अच्युतपना होनेसे द्रव्य अनन्य ही है, (अर्थात् उस उत्पादमें भी अन्वयशक्ति तो अपतित-अविनष्ट-निश्चल होनेसे द्रव्य वहका वही है, अन्य नहीं ।) इसीलिये अनन्यपनेके द्वारा द्रव्यका सत्-उत्पाद निश्चित होता है, (अर्थात् उपरोक्त कथनानुसार द्रव्यका द्रव्यापेक्षासे अनन्यपना होनेसे, उसके सत्-उत्पाद है, – ऐसा अनन्यपने द्वारा सिद्ध होता है ।)

इसी बातको (उदाहरण से) स्पष्ट किया जाता है :–

जीव द्रव्य होनेसे और द्रव्य पर्यायोंमें वर्तनेसे जीव नारकत्व, तिर्यंचत्व, मनुष्यत्व, देवत्व और सिद्धत्वमेंसे किसी एक पर्यायमें अवश्यमेव (परिणमित) होगा । परन्तु वह जीव उस पर्यायरूप होकर क्या द्रव्यत्वभूत अन्वयशक्तिको छोड़ता है ? नहीं छोड़ता । यदि नहीं छोड़ता तो वह अन्य कैसे हो सकता है कि जिससे त्रिकोटि सत्ता (तीनप्रकारकी सत्ता, त्रैकालिक अस्तित्व) जिसके प्रगट है ऐसा वह (जीव), वही न हो ? (अर्थात् तीनों कालमें विद्यमान वह जीव अन्य नहीं, वहका वही है ।)

भावार्थ :– जीव मनुष्य-देवादिक पर्यायरूप परिणमित होता हुआ भी अन्य नहीं हो जाता, अनन्य रहता है, वहका वही रहता है; क्योंकि 'वही यह देवका जीव है, जो पूर्वभवमें मनुष्य था और अमुक भवमें तिर्यंच था' ऐसा ज्ञान हो सकता है ।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथासदुत्पादमन्यत्वेन निश्चिनोति –

मणुवो ण होदि देवो देवो वा माणुसो व सिद्धो वा ।
एवं अहोज्जमाणो अणण्णभावं कधं लहदि ॥ ११३ ॥

मनुजो न भवति देवो देवो वा मानुषो वा सिद्धो वा ।
एवमभवन्ननन्यभावं कथं लभते ॥ ११३ ॥

॥ ११२ ॥ अथ द्रव्यस्यासदुत्पादं पूर्वपर्यायादन्यत्वेन निश्चिनोति – **मणुवो ण हवदि देवो** आकुलत्वोत्पादकमनुजदेवादिविभावपर्यायविलक्षणमनाकुलत्वरूपस्वभावपरिणतिलक्षणं परमात्मद्रव्यं

इसप्रकार जीवकी भाँति प्रत्येक द्रव्य अपनी सर्व पर्यायोंमें वहका वही रहता है, अन्य नहीं हो जाता, – अनन्य रहता है। इसप्रकार द्रव्यका अन्यपना होनेसे द्रव्यका सत्-उत्पाद निश्चित होता है ॥ ११२ ॥

अब, असत्-उत्पादको अन्यत्वके द्वारा निश्चित करते हैं :–

गाथा ११३

अन्वयार्थ :– [**मनुजः**] मनुष्य [**देवः न भवति**] देव नहीं है, [**वा**] अथवा [**देवः**] देव [**मानुषः वा सिद्धः वा**] मनुष्य या सिद्ध नहीं है ; [**एवं अभवन्**] ऐसा न होता हुआ [**अनन्यभावं कथं लभते**] अनन्य भावको कैसे प्राप्त हो सकता है ?

टीका :– पर्यायें पर्यायभूत स्वव्यतिरेकव्यक्तिके कालमें ही सत् (विद्यमान) होनेसे, उससे अन्य कालोंमें असत् (अविद्यमान) ही हैं। और पर्यायोंका द्रव्यत्वभूत अन्वयशक्तिके साथ गुंथा हुआ (एकरूपतासे युक्त) जो क्रमानुपाती (क्रमानुसार) स्वकालमें उत्पाद होता है उसमें पर्यायभूत स्वव्यतिरेकव्यक्तिका पहले असत्पना होनेसे, पर्यायें अन्य ही हैं। इसलिये पर्यायोंकी अन्यताके द्वारा द्रव्यका – जो कि पर्यायोंके स्वरूपका कर्ता, करण और अधिकरण होनेसे पर्यायोंसे अपृथक् है उसका – असत्-उत्पाद निश्चित होता है।

इस बातको (उदाहरण देकर) स्पष्ट करते हैं :–

मानव नथी सुर, सुर पण नहि मनुज के नहि सिद्ध छे ।
ए रीत नहि होतो थको क्यम ते अनन्यपणुं धरे ? ॥ ११३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

पर्याया हि पर्यायभूताया आत्मव्यतिरेकव्यक्तेः काल एव सत्त्वात्ततोऽन्यकालेषु भवन्त्यसन्त एव। यश्च पर्यायाणां द्रव्यत्वभूतयान्वयशक्त्यानुस्यूतः क्रमानुपाती स्वकाले प्रादुर्भावः तस्मिन्पर्यायभूताया आत्मव्यतिरेकव्यक्तेः पूर्वमसत्त्वात्पर्याया अन्य एव। ततः पर्यायाणामन्यत्वेन निश्चीयते पर्यायस्वरूपकर्तृकरणाधिकरणभूतत्वेन पर्यायेभ्योऽपृथग्भूतस्य द्रव्यस्यासदुत्पादः। तथाहि – न हि मनुजस्त्रिदशो वा सिद्धो वा स्यात् न हि त्रिदशो मनुजो वा सिद्धो वा स्यात्। एवमसन् कथमनन्यो नाम स्यात् येनान्य एव न स्यात्। येन च निष्पद्यमानमनुजादिपर्यायं जायमानवलयादिविकारं काञ्चनमिव जीवद्रव्यमपि प्रतिपदमन्यन्न स्यात् ॥ ११३ ॥

यद्यपि निश्चयेन मनुष्यपर्याये देवपर्याये च समानं तथापि मनुजो देवो न भवति। कस्मात्। देवपर्याय-काले मनुष्यपर्यायस्यानुपलम्भात्। **देवो वा माणुसो व सिद्धो वा** देवो वा मनुष्यो न भवति स्वात्मोप-लब्धिरूपसिद्धपर्यायो वा न भवति। कस्मात्। पर्यायाणां परस्परं भिन्नकालत्वात्, सुवर्णद्रव्ये कुण्डलादिपर्यायाणामिव। **एवं अहोज्जमाणो** एवमभवन्सन् **अणण्णभावं कथं लहदि** अनन्यभावमेकत्वं कथं लभते, न कथमपि। तत एतावदायाति असद्भावनिबद्धोत्पादः पूर्वपर्यायाद्भिन्नो भवतीति

मनुष्य वह देव या सिद्ध नहीं है, और देव, वह मनुष्य या सिद्ध नहीं है; इसप्रकार न होता हुआ अनन्य (वहका वही) कैसे हो सकता है, कि जिससे अन्य ही न हो और जिससे मनुष्यादि पर्यायें उत्पन्न होती हैं ऐसा जीव द्रव्य भी – वलयादि विकार (कंकणादि पर्यायें) जिसके उत्पन्न होती हैं ऐसे सुवर्णकी भाँति – पद-पद पर (प्रति पर्याय पर) अन्य न हो ? [जैसे कंकण, कुण्डल इत्यादि पर्यायें अन्य हैं, (भिन्न-भिन्न हैं, वे की वे ही नहीं हैं) इसलिये उन पर्यायोंका कर्ता सुवर्ण भी अन्य है, इसी-प्रकार मनुष्य, देव इत्यादि पर्यायें अन्य हैं, इसलिये उन पर्यायोंका कर्त्ता जीवद्रव्य भी पर्यायापेक्षासे अन्य है।

भावार्थ :– जीवके अनादि अनन्त होने पर भी, मनुष्य पर्यायकालमें देवपर्यायकी या स्वात्मोपलब्धिरूप सिद्धपर्यायकी अप्राप्ति है अर्थात् मनुष्य, देव या सिद्ध नहीं है, इसलिये वे पर्यायें अन्य अन्य हैं। ऐसा होनेसे, उन पर्यायोंका कर्त्ता, साधन और आधार जीव भी पर्यायापेक्षासे अन्यपनेको प्राप्त होता है। इसप्रकार जीवकी भाँति प्रत्येक द्रव्यके पर्यायापेक्षासे अन्यपना है। इसप्रकार द्रव्यको अन्यपना होनेसे द्रव्यके असत्-उत्पाद है, – ऐसा निश्चित होता है ॥ ११३ ॥

अब, एक ही द्रव्यके अन्यपना और अनन्यपना होनेमें जो विरोध है, उसे दूर करते हैं। (अर्थात् उसमें विरोध नहीं आता, यह बतलाते हैं) :–

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथैकद्रव्यस्यान्यत्वानन्यत्वविप्रतिषेधमुद्धुनोति –

दव्वट्ठिएण सव्वं दव्वं तं पज्जयट्ठिएण पुणो ।
हवदि य अण्णमणण्णं तक्काले तम्मयत्तादो ॥ ११४ ॥

द्रव्यार्थिकेन सर्वं द्रव्यं तत्पर्यायार्थिकेन पुनः ।
भवति चान्यदनन्यत्तत्काले तन्मयत्वात् ॥ ११४ ॥

॥ ११३ ॥ अथैकद्रव्यस्य पर्यायैस्सहानन्यत्वाभिधानमेकत्वमन्यत्वाभिधानमनेकत्वं च नयविभागेन दर्शयति, अथवा पूर्वोक्तसद्भावनिबद्धासद्भावनिबद्धमुत्पादद्वयं प्रकारान्तरेण समर्थयति – **हवदि** भवति । किं कर्तृ । **सव्वं दव्वं** सर्वं विवक्षिताविवक्षितजीवद्रव्यम् । किंविशिष्टं भवति । **अणण्णं** अनन्यमभिन्नमेकं तन्मयमिति । केन सह । तेन नारकतिर्यङ्मनुष्यदेवरूपविभावपर्यायसमूहेन केवलज्ञानाद्यनन्तचतुष्टय-

---

गाथा ११४

अन्वयार्थ :– [**द्रव्यार्थिकेन**] द्रव्यार्थिक (नय) से [**सर्वं**] सब [**द्रव्यं**] द्रव्य है ; [**पुनः च**] और [**पर्यायार्थिकेन**] पर्यायार्थिक (नय) से [**तत्**] वह (द्रव्य) [**अन्यत्**] अन्य-अन्य है, [**तत्काले तन्मयत्वात्**] क्योंकि उस समय तन्मय होनेसे [**अनन्यत्**] (द्रव्य-पर्यायोंसे) अनन्य है ।

टीका :– वास्तवमें सभी वस्तु सामान्य-विशेषात्मक होनेसे वस्तुका स्वरूप देखनेवालोंके क्रमशः (१) सामान्य और (२) विशेषको जाननेवाली दो आँखें हैं :– (१) द्रव्यार्थिक और (२) पर्यायार्थिक ।

इनमेंसे पर्यायार्थिक चक्षुको सर्वथा बन्द करके जब मात्र खुली हुई द्रव्यार्थिक चक्षुके द्वारा देखा जाता है तब नारकपना, तिर्यंचपना, मनुष्यपना, देवपना और सिद्धपना-पर्यायस्वरूप विशेषोंमें रहनेवाले एक जीवसामान्यको देखनेवाले और विशेषोंको न देखनेवाले जीवोंको 'वह सब जीव द्रव्य है' ऐसा भासित होता है । और जब द्रव्यार्थिक चक्षुको सर्वथा बंद करके मात्र खुली हुई पर्यायार्थिक चक्षुके द्वारा देखा जाता है तब जीव-द्रव्यमें रहनेवाले नारकपना, तिर्यंचपना, मनुष्यपना, देवपना और सिद्धपना – पर्यायस्व-

---

द्रव्यार्थिके बधुं द्रव्य छे; ने ते ज पर्यायार्थिके ।
छे अन्य, जेथी ते समय तद्रूप होई अनन्य छे ॥ ११४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

सर्वस्य हि बस्तुनः सामान्यविशेषात्मकत्वात्तत्स्वरूपमुत्पश्यतां यथाक्रमं सामान्यविशेषौ परिच्छिन्दतो द्वे किल चक्षुषी, द्रव्यार्थिकं पर्यायार्थिकं चेति। तत्र पर्यायार्थिकमेकान्तनिमीलितं विधाय केवलोन्मीलितेन द्रव्यार्थिकेन यदावलोक्यते तदा नारकतिर्यङ्मनुष्यदेवसिद्धत्वपर्यायात्मकेषु विशेषेषु व्यवस्थितं जीवसामान्यमेकमवलोकयतामनवलोकितविशेषाणां तत्सर्वं जीवद्रव्यमिति प्रतिभाति। यदा तु द्रव्यार्थिकमेकान्तनिमीलितं विधाय केवलोन्मीलितेन पर्यायार्थिकेनावलोक्यते तदा जीवद्रव्ये व्यवस्थितान्नारकतिर्यग्मनुष्यदेवसिद्धत्वपर्यायात्मकान् विशेषाननेकानवलोकयतामनवलोकितसामान्यानामन्यदन्यत्प्रतिभाति। द्रव्यस्य तत्तद्विशेषकाले तत्तद्विशेषेभ्यस्तन्मयत्वेनानन्यत्वात् गणतृणपर्ण-

---

शक्तिरूपसिद्धपर्यायेण च। केन कृत्वा। **दव्वट्ठिएण** शुद्धान्वयद्रव्यार्थिकनयेन। कस्मात्। कुण्डलादिपर्यायेषु सुवर्णस्येव भेदाभावात्। **तं पज्जयट्ठिएण पुणो** तद्द्रव्यं पर्यायार्थिकनयेन पुनः **अण्णं** अन्यद्भिन्नमनेकं पर्यायैः सह पृथग्भवति। कस्मादिति चेत्। **तक्काले तम्मयत्तादो** तृणाग्निकाष्ठाग्निपत्राग्निवत् स्वकीयपर्यायैः सह तत्काले तन्मयत्वादिति। एतावता किमुक्तं भवति। द्रव्यार्थिकनयेन यदा

रूप अनेक विशेषोंको देखनेवाले और सामान्यको न देखनेवाले जीवोंको (वह जीव द्रव्य) अन्य-अन्य भासित होता है, क्योंकि द्रव्य उन-उन विशेषोंके समय तन्मय होनेसे उन-उन विशेषोंसे अनन्य है, – कण्डे, घास, पत्ते और काष्ठमय अग्निकी भाँति। (जैसे घास, लकड़ी इत्यादिकी अग्नि उस-उस समय घासमय, लकड़ीमय इत्यादि होनेसे घास, लकड़ी इत्यादिसे अनन्य है, उसीप्रकार द्रव्य उन-उन पर्यायरूप विशेषोंके समय तन्मय होनेसे उनसे अनन्य है – पृथक् नहीं है।) और जब उन द्रव्यार्थिक और पर्यायार्थिक दोनों आँखोंको एक ही साथ खोलकर उनके द्वारा और इनके द्वारा (द्रव्यार्थिक तथा पर्यायार्थिक चक्षुओंके) देखा जाता है तब नारकपना, तिर्यंचपना, मनुष्यपना, देवपना और सिद्धपना पर्यायोंमें रहनेवाला जीवसामान्य तथा जीवसामान्यमें रहनेवाले नारकपना, तिर्यंचपना, मनुष्यपना, देवपना और सिद्धत्वपर्यायस्वरूप विशेष तुल्यकालमें ही (एक ही साथ) दिखाई देते हैं।

वहाँ, एक आँखसे देखा जाना वह एकदेश अवलोकन है और दोनों आँखोंसे देखना वह सर्वावलोकन (सम्पूर्ण अवलोकन) है। इसलिये सर्वावलोकनमें द्रव्यके अन्यत्व और अनन्यत्व विरोधको प्राप्त नहीं होते।

भावार्थ :– प्रत्येक द्रव्य सामान्य – विशेषात्मक है, इसलिये प्रत्येक द्रव्य वह का वही भी रहता है और बदलता भी है। द्रव्यका स्वरूप ही ऐसा उभयात्मक होनेसे

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

दारुमयहव्यवाहवत्। यदा तु ते उभे अपि द्रव्यार्थिकपर्यायार्थिके तुल्यकालोन्मीलिते विधाय तत इतश्चावलोक्यते तदा नारकतिर्यङ्मनुष्यदेवसिद्धत्वपर्यायेषु व्यवस्थितं जीवसामान्यं जीवसामान्ये च व्यवस्थिता नारकतिर्यग्मनुष्यदेवसिद्धत्वपर्यायात्मका विशेषाश्च तुल्यकालमेवावलोक्यन्ते। तत्रैकचक्षुरवलोकनमेकदेशावलोकनं, द्विचक्षुरवलोकनं सर्वावलोकनं। ततः सर्वावलोकने द्रव्यस्यान्यत्वानन्यत्वं च न विप्रतिषिध्यते ॥ ११४ ॥

अथ सर्वविप्रतिषेधनिषेधिकां सप्तभङ्गीमवतारयति –

अत्थि त्ति य णत्थि त्ति य हवदि अवत्तव्वमिदि पुणो दव्वं।
पज्जाएण दु केण वि तदुभयमादिट्ठमण्णं वा ॥ ११५ ॥

अस्तीति च नास्तीति च भवत्यवक्तव्यमिति पुनर्द्रव्यम्।
पर्यायेण तु केनचित् तदुभयमादिष्टमन्यद्वा ॥ ११५ ॥

वस्तुपरीक्षा क्रियते तदा पर्यायसन्तानरूपेण सर्वं पर्यायकदम्बकं द्रव्यमेव प्रतिभाति। यदा तु पर्यायनयविवक्षा क्रियते तदा द्रव्यमपि पर्यायरूपेण भिन्नं भिन्नं प्रतिभाति। यदा च परस्परसापेक्षनयद्वयेन युगपत्समीक्ष्यते, तदैकत्वमनेकत्वं च युगपत्प्रतिभातीति। यथेदं जीवद्रव्ये व्याख्यानं कृतं तथा सर्वद्रव्येषु

द्रव्यके अनन्यत्वमें और अन्यत्वमें विरोध नहीं है। जैसे—मरीचि और भगवान महावीरका जीवसामान्यकी अपेक्षासे अनन्यत्व और जीवके विशेषोंकी अपेक्षासे अन्यत्व होनेमें किसी प्रकारका विरोध नहीं है।

द्रव्यार्थिकनयरूपी एक चक्षुसे देखनेपर द्रव्यसामान्य ही ज्ञात होता है, इसलिये द्रव्य अनन्य अर्थात् वह का वही भासित होता है और पर्यायार्थिकनयरूपी दूसरी एक चक्षुसे देखने पर द्रव्यके पर्यायरूप विशेष ज्ञात होते हैं, इसलिये द्रव्य अन्य-अन्य भासित होता है। दोनों नयरूपी दोनों चक्षुओंसे देखने पर द्रव्यसामान्य और द्रव्यके विशेष दोनों ज्ञात होते हैं, इसलिये द्रव्य अनन्य तथा अन्य-अन्य दोनों भासित होता है ॥ ११४ ॥

अब, समस्त विरोधोंको दूर करनेवाली सप्तभंगी प्रगट करते हैं :—

गाथा ११५

अन्वयार्थ :—[द्रव्यं] द्रव्य [अस्ति इति च] किसी पर्यायसे 'अस्ति', [नास्ति

अस्ति, तथा छे नास्ति, तेम ज द्रव्य अणवक्तव्य छे।
वणी उभय को पर्यायथी, वा अन्यरूप कथाय छे ॥ ११५ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

स्यादस्त्येव १ स्यान्नास्त्येव २ स्यादवक्तव्यमेव ३ स्यादस्तिनास्त्येव ४ स्यादस्त्यवक्तव्यमेव ५ स्यान्नास्त्यवक्तव्यमेव ६ स्यादस्तिनास्त्यवक्तव्यमेव ७, स्वरूपेण १ पररूपेण २ स्वपररूपयौगपद्येन ३ स्वपररूपक्रमेण ३ स्वरूपस्वपररूपयौगपद्याभ्यां ५ पररूपस्वपररूपयौगपद्याभ्यां ६ स्वरूपपररूपस्वपरपयौगपद्यैरादिश्यमानस्य स्वरूपेण सतः, पररूपेणासतः स्वपररूपाभ्यां युगपद्वक्तुमशक्यस्य, स्वपररूपाभ्यां क्रमेण सतोऽसतश्च, स्वरूप-

---

यथासंभवं ज्ञातव्यमित्यर्थः ॥ ११४ ॥ एवं सदुत्पादासदुत्पादकथनेन प्रथमा, सदुत्पादविशेषविवरणरूपेण द्वितीया, तथैवासदुत्पादविशेषविवरणरूपेण तृतीया, द्रव्यपर्याययोरेकत्वानेकत्वप्रतिपादनेन चतुर्थीति सदुत्पादासदुत्पादव्याख्यानमुख्यतया गाथाचतुष्टयेन सप्तमस्थलं गतम्। अथ समस्तदुर्नयैकान्तरूपविवादनिषेधिकां नयसप्तभङ्गीं विस्तारयति – **अत्थि त्ति य** स्यादस्त्येव। स्यादिति कोऽर्थः। कथंचित्। कथंचित्कोऽर्थः। विवक्षितप्रकारेण स्वद्रव्यादिचतुष्टयेन। तच्चतुष्टयं शुद्धजीवविषये कथ्यते। शुद्धगुणपर्यायाधारभूतं शुद्धात्मद्रव्यं द्रव्यं भण्यते, लोकाकाशप्रमिताः शुद्धासंख्येयप्रदेशाः क्षेत्रं भण्यते, वर्तमानशुद्धपर्यायरूपपरिणतो वर्तमानसमयः कालो भण्यते, शुद्धचैतन्यं भावश्चेत्युक्तलक्षणद्रव्यादिचतुष्टय इति प्रथमभङ्गः १। **णत्थि त्ति य** स्यान्नास्त्येव। स्यादिति कोऽर्थः कथंचिद्विवक्षितप्रकारेण परद्रव्यादि-

---

इति च] किसी पर्यायसे 'नास्ति' [**पुनः**] और [**अवक्तव्यम् इति भवति**] किसी पर्यायसे 'अवक्तव्य' है, [**केनचित् पर्यायेण तु तदुभयं**] और किसी पर्यायसे 'अस्ति-नास्ति' [**वा**] अथवा [**अन्यत् आदिष्टम्**] किसी पर्यायसे अन्य तीन भंगरूप कहा गया है।

टीका :—द्रव्य (१) स्वरूपापेक्षासे [१]'स्यात् अस्ति; (२) पररूपकी अपेक्षासे 'स्यात् नास्ति'; (३) स्वरूप-पररूपकी युगपत् अपेक्षासे 'स्यात् [२]अवक्तव्य'; (४) स्वरूप-पररूपके क्रमकी अपेक्षासे 'स्यात् अस्ति-नास्ति'; (५) स्वरूपकी और स्वरूप-पररूपकी युगपत् अपेक्षासे 'स्यात् अस्तिअवक्तव्य'; (६) पररूपकी, और स्वरूप-पररूपकी युगपत् अपेक्षासे 'स्यात् नास्ति; अवक्तव्य' और (७) स्वरूपकी, पररूपकी तथा स्वरूप-पररूपकी युगपत् अपेक्षासे 'स्यात् अस्ति-नास्ति-अवक्तव्य' है।

द्रव्यका कथन करनेमें, (१) जो स्वरूपसे 'सत्' है; (२) जो पररूपसे 'असत्'

---

[१] 'स्यात्=कथंचित्; किसीप्रकार; किसी अपेक्षासे। (प्रत्येक द्रव्य स्वचतुष्टयकी अपेक्षासे – स्वद्रव्य, स्वक्षेत्र, स्वकाल और स्वभावकी अपेक्षासे – 'अस्ति' है। शुद्ध जीवका स्वचतुष्टय इसप्रकार है :– शुद्ध गुणपर्यायोंका आधारभूत शुद्धात्मद्रव्य है; लोकाकाशप्रमाण शुद्ध असंख्यप्रदेश वह क्षेत्र है, शुद्ध पर्यायरूपसे परिणत वर्तमान समय वह काल है, और शुद्ध चैतन्य वह भाव है।)

[२] अवक्तव्य=जो कहा न जा सके। (एक ही साथ स्वरूप तथा पररूपकी अपेक्षासे द्रव्य कथनमें नहीं आ सकता, इसलिये 'अवक्तव्य' है।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

स्वपररूपयौगपद्याभ्यां सतो वक्तुमशक्यस्य च, पररूपस्वपररूपयौगपद्याभ्यामसतो वक्तुमशक्यस्य च, स्वरूपपररूपस्वपररूपयौपद्यैः सतोऽसतो वक्तुमशक्यस्य चानन्तधर्मणो द्रव्यस्यैकैकं धर्ममाश्रित्य विवक्षिताविवक्षितविधिप्रतिषेधाभ्यामवतरन्ती सप्तभङ्गिकैवकारविश्रान्तमश्रान्तसमुच्चार्यमाणस्यात्कारामोघमन्त्रपदेन समस्तमपि विप्रतिषेधविषमोहमुदस्यति ॥ ११५ ॥

चतुष्टयेन २। **हवदि** भवति। कथंभूतम्। **अवत्तव्वमिदि** स्यादवक्तव्यमेव। स्यादिति कोऽर्थः। कथंचिद्विवक्षितप्रकारेण युगपत्स्वपरद्रव्यादिचतुष्टयेन ३। स्यादस्ति, स्यान्नास्ति, स्यादवक्तव्यं, स्यादस्तिनास्ति, स्यादस्त्येवावक्तव्यं, स्यान्नास्त्येवावक्तव्यं, स्यादस्तिनास्त्येवावक्तव्यम्। **पुणो** पुनः इत्थंभूतम् किं भवति। **दव्वं** परमात्मद्रव्यं कर्तृ। पुनरपि कथंभूतं भवति। **तदुभयं** स्यादस्तिनास्त्येव। स्यादिति कोऽर्थः। कथंचिद्विवक्षितप्रकारेण क्रमेण स्वपरद्रव्यादिचतुष्टयेन ४। कथंभूतंसदित्थमित्थं भवति। **आदिट्ठं** आदिष्टं विवक्षितं सत्। केन कृत्वा। **पज्जायेण दु** पर्यायेण तु प्रश्नोत्तररूपनयविभागेन तु। कथंभूतेन। **केण वि** केनापि विवक्षितेन नैगमादिनयरूपेण। **अण्णं वा** अन्यद्वा संयोगभङ्गत्रयरूपेण। तत्कथ्यते – स्यादस्त्येवावक्तव्यं। स्यादिति कोऽर्थः। कथंचित् विवक्षितप्रकारेण स्वद्रव्यादिचतुष्टयेन युगपत्स्वपरद्रव्यादिचतुष्टयेन च ५। स्यान्नास्त्येवावक्तव्यं। स्यादिति कोऽर्थः। कथंचित् विवक्षितप्रकारेण परद्रव्यादिचतुष्टयेन युगपत्स्वपरद्रव्यादिचतुष्टयेन च ६। स्यादस्तिनास्त्येवावक्तव्यं। स्यादिति कोऽर्थः। कथंचित् विवक्षितप्रकारेण क्रमेण स्वपरद्रव्यादिचतुष्टयेन युगपत्स्वपरद्रव्यादि-

---

है; (३) जिसका स्वरूप और पररूपसे युगपत् 'कथन' अशक्य' है; (४) जो स्वरूपसे और पररूपसे क्रमशः 'सत् और असत्' है; (५) जो स्वरूपसे, और स्वरूप-पररूपसे युगपत् 'सत् और अवक्तव्य' है; (६) जो पररूपसे, और स्वरूप-पररूपसे युगपत् 'असत् और अवक्तव्य' है; तथा (७) जो स्वरूपसे, पर-रूप और स्वरूप-पररूपसे युगपत् 'सत' असत् और अवक्तव्य है – ऐसे अनन्त धर्मोंवाले द्रव्यके एक एक धर्मका आश्रय लेकर [१]विवक्षित-अविवक्षितताके विधि-निषेधके द्वारा प्रगट होनेवाली सप्तभंगी सतत् सम्यक्तया उच्चारित करनेपर [२]स्यात्काररूपी अमोघ मंत्र पदके द्वारा [३]'एव' कारमें

---

[१] विवक्षित (कथनीय) धर्मको मुख्य करके उसका प्रतिपादन करनेसे और अविवक्षित न (न कहने योग्य) धर्मको गौण करके उसका निषेध करनेसे सप्तभंगी प्रगट होती है।

[२] स्याद्वादमें अनेकान्तका सूचक 'स्यात्' शब्द सम्यक्तया प्रयुक्त होता है। वह 'स्यात्'पद एकान्तवादमें रहनेवाले समस्त विरोधरूपी विषके भ्रमको नष्ट करनेके लिये रामबाण मंत्र है।

[३] अनेकान्तात्मक वस्तुस्वभावकी अपेक्षासे रहित एकान्तवादमें मिथ्या एकान्तको सूचित करता हुआ जो 'एव' या 'ही' शब्द प्रयुक्त होता है वह वस्तुस्वभावसे विपरीत निरूपण करता है, इसलिये उसका यहाँ निषेध किया है। (अनेकान्तात्मक वस्तुस्वभावका ध्यान चूके बिना, जिस अपेक्षासे वस्तुका कथन चल रहा हो उस अपेक्षासे उसका निर्णीतत्व, – नियमबद्धत्व, – निरपवादत्व बतलानेके लिये 'त्व' या 'ही' शब्द प्रयुक्त होता है, उसका यहाँ निषेध नहीं समझना चाहिये।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ निर्धार्यमाणत्वेनोदाहरणीकृतस्य जीवस्य मनुष्यादिपर्यायाणां क्रियाफलत्वेनान्यत्वं द्योतयति –

एसो त्ति णत्थि कोई ण णत्थि किरिया सहावणिव्वत्ता ।
किरिया हि णत्थि अफला धम्मो जदि णिप्फलो परमो ॥ ११६ ॥

एष इति नास्ति कश्चिन्न नास्ति क्रिया स्वभावनिर्वृता ।
क्रिया हि नास्त्यफला धर्मो यदि निःफलः परमः ॥ ११६ ॥

चतुष्टयेन च ७। पूर्वं **पञ्चास्तिकाये** स्यादस्तीत्यादिप्रमाणवाक्येन प्रमाणसप्तभङ्गी व्याख्याता, अत्र तु स्यादस्त्येव, यदेवकारग्रहणं तन्नयसप्तभङ्गीज्ञापनार्थमिति भावार्थः। यथेदं नयसप्तभङ्गीव्याख्यानं शुद्धात्मद्रव्ये दर्शितं तथा यथासंभवं सर्वपदार्थेषु द्रष्टव्यमिति ॥ ११५ ॥ एवं नयसप्तभङ्गीव्याख्यानगाथयाष्टमस्थलं गतम्। एवं पूर्वोक्तप्रकारेण प्रथमा नमस्कारगाथा, द्रव्यगुणपर्यायकथनरूपेण द्वितीया, स्वसमयपरसमयप्रतिपादनेन तृतीया, द्रव्यस्य सत्तादिलक्षणत्रयसूचनरूपेण चतुर्थीति स्वतन्त्रगाथाचतुष्टयेन पीठिकास्थलम्। तदनन्तरमवान्तरसत्ताकथनरूपेण प्रथमा, महासत्तारूपेण द्वितीया, यथा द्रव्यं स्वभावसिद्धं तथा सत्तागुणोऽपीति कथनरूपेण तृतीया, उत्पादव्ययध्रौव्यत्वेऽपि सत्तैव द्रव्यं भवतीति कथनेन चतुर्थीति गाथाचतुष्टयेन सत्तालक्षणविवरणमुख्यतया। तदनन्तरमुत्पादव्ययध्रौव्यलक्षणविवरण-

---

रहनेवाले समस्त विरोधविषके मोहको दूर करती है ॥ ११५ ॥

अब, जिसका निर्धार करना है, इसलिये जिसे उदाहरणरूप बनाया गया है ऐसे जीवकी मनुष्यादि पर्यायें क्रियाका फल हैं इसलिये उनका अन्यत्व (अर्थात् वे पर्यायें बदलती रहती हैं, इसप्रकार) प्रकाशित करते हैं :–

गाथा ११६

अन्वयार्थ :– [**एषः इति कश्चित् नास्ति**] (मनुष्यादिपर्यायोंमें) 'यही' ऐसी कोई (शाश्वत पर्याय) नहीं हैं; [**स्वभावनिर्वृत्ता क्रिया नास्ति न**] (क्योंकि संसारी जीवके) स्वभावनिष्पन्न क्रिया नहीं हो सो बात नहीं है; (अर्थात् विभावस्वभावसे उत्पन्न होनेवाली रागद्वेषमय क्रिया अवश्य है।) [**यदि**] और यदि [**परमः धर्मः निःफलः**] परमधर्म अफल है तो [**क्रिया हि अफला नास्ति**] क्रिया अवश्य अफल नहीं

नथी 'आ ज' अेवो कोई, ज्यां किरिया स्वभाव-निपन्न छे ।
किरिया नथी फलहीन, जो निष्फल धरम उत्कृष्ट छे ॥ ११६ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

इह हि संसारिणो जीवस्यानादिकर्मपुद्गलोपाधिसन्निधिप्रत्ययप्रवर्तमानप्रतिक्षण-विवर्तनस्य क्रिया किल स्वभावनिर्वृत्तैवास्ति। ततस्तस्य मनुष्यादिपर्यायेषु न कश्चनाप्येष एवेति टङ्कोत्कीर्णोऽस्ति, तेषां पूर्वपूर्वोपमर्दप्रवृत्तक्रियाफलत्वेनोत्तरोत्तरोपर्द्यमानत्वात् फलमभिलष्येत वा मोहसंवलनाविलयनात् क्रियायाः। क्रिया हि तावच्चेतनस्य पूर्वोत्तर-दशाविशिष्टचैतन्यपरिणामात्मिका। सा पुनरणोरण्वन्तरसंगतस्य परिणतिरिवात्मनो

मुख्यत्वेन गाथात्रयं, तदनन्तरं द्रव्यपर्यायकथनेन गुणपर्यायकथनेन च गाथाद्वयं, ततश्च द्रव्यस्यास्तित्व-स्थापनारूपेण प्रथमा, पृथक्त्वलक्षणस्यातद्भावाभिधानान्यत्वलक्षणस्य च कथनरूपेण द्वितीया, संज्ञा-लक्षणप्रयोजनादिभेदरूपस्यातद्भावस्य विवरणरूपेण तृतीया, तस्यैव दृढीकरणार्थं चतुर्थीति गाथा-चतुष्टयेन सत्ताद्रव्ययोरभेदविषये युक्तिकथनमुख्यता। तदनन्तरं सत्ताद्रव्ययोर्गुणगुणिकथनेन प्रथमा, गुणपर्यायाणां द्रव्येण सहाभेदकथनेन द्वितीया चेति स्वतन्त्रगाथाद्वयम्। तदनन्तरं द्रव्यस्य सदुत्पादासदु-

---

है; (अर्थात् एक वीतराग भाव ही मनुष्यादिपर्यायरूप फल उत्पन्न नहीं करती; राग-द्वेषमय क्रिया तो अवश्य वह फल उत्पन्न करती है।)

टीका :– यहाँ (इस विश्वमें), अनादिकर्मपुद्गलकी उपाधिके सद्भावके आश्रय (कारण) से जिसके प्रतिक्षण [१]विवर्त्तन होता रहता है ऐसे संसारी जीवको क्रिया वास्तवमें स्वभाव निष्पन्न ही है, इसलिये उसके मनुष्यादिपर्यायोंमेंसे कोई भी पर्याय 'यही' है ऐसी टंकोत्कीर्ण नहीं है; क्योंकि वे पर्यायें पूर्व-पूर्व पर्यायोंके नाशमें प्रवर्तमान क्रिया फलस्वरूप होनेसे [२]उत्तर-उत्तर पर्यायोंके द्वारा नष्ट होती हैं। और क्रियाका फल तो, मोहके साथ [३]मिलनका नाश न हुआ होनेसे मानना चाहिये; क्योंकि – प्रथम तो, क्रिया चेतनकी पूर्वोत्तरदशासे [४]विशिष्ट चैतन्यपरिणामस्वरूप है; और वह (क्रिया) – जैसे दूसरे अणुके साथ युक्त (किसी) अणुकी परिणति [५]द्विअणुककार्यकी निष्पादक है, उसी प्रकार – मोहके साथ मिलित आत्माके संबंधमें, मनुष्यादिककार्यको निष्पादक होनेसे सफल ही है; और, जैसे दूसरे अणुके साथका संबंध जिसका नष्ट होगया है ऐसे अणुकी परिणति द्विअणुक कार्यकी निष्पादक नहीं है उसीप्रकार मोहके साथ मिलनका नाश

---

[१] विवर्तन=विपरिणमन; पलटा (फेरफार) होते रहना।

[२] उत्तर-उत्तर=बादकी। (मनुष्यादिपर्यायें रागद्वेषमय क्रियाकी फलरूप हैं, इसलिये कोई भी पर्याय पूर्व-पर्यायको नष्ट करती है और बादकी पर्यायसे स्वयं नष्ट होती है।)

[३] मिलन=मिल जाना; मिश्रितपना; संबंध; जुड़ान।

[४] विशिष्ट=भेदयुक्त। (पूर्वकी और पश्चात्की अवस्थाके भेदसे भेदयुक्त ऐसे चैतन्यपरिणाम वह आत्माकी क्रिया है।)

[५] द्विअणुककार्यकी निष्पादक=दो अणुओंसे बने हुए स्कंधरूप कार्यकी उत्पादक।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

मोहसंवलितस्य द्व्यणुककार्यस्येव मनुष्यादिकार्यस्य निष्पादिकत्वात्सफलैव। सैव मोहसंवलनविलयने पुनरणोरुच्छिन्नाप्यन्तरसंगमस्य परिणतिरिव द्व्यणुककार्यस्येव मनुष्यादिकार्यस्यानिष्पादकत्वात् परमद्रव्यस्वभावभूततया परमधर्माख्या भवत्यफलैव ॥ ११६ ॥

त्पादयोः सामान्यव्याख्यानेन विशेषव्याख्यानेन च गाथाचतुष्टयं, ततश्च सप्तभङ्गीकथनेन गाथैका चेति समुदायेन चतुर्विंशतिगाथाभिरष्टभिः स्थलैः सामान्यज्ञेयव्याख्यानमध्ये सामान्यद्रव्यप्ररूपणं समाप्तम्। अतः परं तत्रैव सामान्यद्रव्यनिर्णयमध्ये सामान्यभेदभावनामुख्यत्वेनैकादशगाथापर्यन्तं व्याख्यानं करोति। तत्र क्रमेण पञ्चस्थलानि भवन्ति। प्रथमतस्तावद्वार्तिकव्याख्यानाभिप्रायेण सांख्यैकान्तनिराकरणं, अथवा शुद्धनिश्चयनयेन जैनमतमेवेति व्याख्यानमुख्यतया 'एसो त्ति णत्थि कोई' इत्यादि सूत्रगाथैका। तदनन्तरं मनुष्यादिपर्याया निश्चयनयेन कर्मफलं भवति, न च शुद्धात्मस्वरूपमिति तस्यैवाधिकारसूत्रस्य विवरणार्थं 'कम्मं णामसमक्खं' इत्यादिपाठक्रमेण गाथाचतुष्टयं, ततः परं रागादिपरिणाम एव द्रव्यकर्मकारणत्वाद्भावकर्म भण्यत इति परिणाममुख्यत्वेन 'आदा कम्ममलिमसो' इत्यादिसूत्रद्वयं, तदनन्तरं कर्मफलचेतना कर्मचेतना ज्ञानचेतनेति त्रिविधचेतनाप्रतिपादनरूपेण 'परिणमदि चेदणाए' इत्यादिसूत्रत्रयं, तदनन्तरं शुद्धात्मभेदभावनाफलं कथयन् सन् 'कत्ताकरणं' इत्याद्येकसूत्रेणोपसंहरति। एवं भेदभावनाधिकारे स्थलपञ्चकेन समुदायपातनिका। तद्यथा – अथ नरनारकादिपर्यायाः कर्माधीनत्वेन विनश्वरत्वादिति शुद्धनिश्चयनयेन जीवस्वरूपं न भवतीति भेदभावनां कथयति – **एसो त्ति णत्थि कोई** टङ्कोत्कीर्णज्ञायकैकस्वभावपरमात्मद्रव्यवत्संसारे मनुष्यादिपर्यायेषु मध्ये सर्वदैवैष एकरूप एव नित्यः कोऽपि नास्ति। तर्हि मनुष्यादिपर्यायनिर्वर्तिका संसारक्रिया सापि न भविष्यति। **ण णत्थि किरिया** न नास्ति क्रिया मिथ्यात्वरागादिपरिणतिस्संसारः कर्मेति यावत् इति पर्यायनामचतुष्टयरूपा क्रियास्त्येव। सा च कथंभूता। **सभावणिव्वत्ता** शुद्धात्मस्वभावाद्विपरीतापि नरनारकादिविभावपर्यायस्वभावेन निर्वृत्ता। तर्हि किं निष्फला भविष्यति। **किरिया हि णत्थि अफला** क्रिया ही नास्त्यफला सा मिथ्यात्वरागादिपरिणतिरूपा क्रिया यद्यप्यनन्तसुखादिगुणात्मकमोक्षकार्यं प्रति निष्फला तथापि नानादुःखदायकस्वकीयकार्यभूतमनुष्यादिपर्यायनिर्वर्तकत्वात्सफलेति मनुष्यादिपर्यायनिष्पत्तिरेवास्याः फलम्। कथं ज्ञायत इति चेत्। **धम्मो जदि णिप्फलो परमो** धर्मो यदि निष्फलः परमः नीरागपरमात्मोपलम्भपरिणतिरूपः आगमभाषया परमयथाख्यातचारित्ररूपो वा योऽसौ परमो धर्मः, स केवलज्ञानाद्यनन्तचतुष्टयव्यक्तिरूपस्य कार्यसमयसारस्योत्पादकत्वात्सफलोऽपि नरनारकादिपर्यायकारणभूतं ज्ञानावरणादिकर्मबन्धं नोत्पादयति, ततः कारणान्निष्फलः। ततो ज्ञायते नरनारकादिसंसारकार्यं मिथ्यात्वरागादिक्रियायाः फलमिति। अथवास्य सूत्रस्य द्वितीयव्याख्यानं क्रियते – यथा शुद्धनयेन रागादिविभावेन न परिणमत्ययं जीवस्तथैवाशुद्धनयेनापि न परिणमतीति यदुक्तं सांख्येन तन्निराकृतम्। कथमिति चेत्। अशुद्धनयेन मिथ्यात्वरागादिविभावपरिणतजीवानां नरनारकादिपर्यायपरिणतिदर्शनादिति। एवं प्रथमस्थले सूत्रगाथा गता ॥ ११६ ॥ अथ मनुष्यादि-

---

होने पर वही क्रिया – द्रव्यकी परमस्वभावभूत होनेसे 'परमधर्म' नामसे कही जानेवाली ऐसी – मनुष्यादिकार्यकी निष्पादक न होनेसे अफल ही है।

भावार्थ :– चैतन्यपरिणति वह आत्माकी क्रिया है। मोह रहित क्रिया मनुष्यादि-

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ मनुष्यादिपर्यायाणां जीवस्य क्रियाफलत्वं व्यनक्ति –

कम्मं णामसमक्खं सभावमध अप्पणो सहावेण ॥
अभिभूय णरं तिरियं णेरइयं वा सुरं कुणदि ॥ ११७॥

कर्म नामसमाख्यं स्वभावमथात्मनः स्वभावेन ।
अभिभूय नरं तिर्यञ्चं नैरयिकं वा सुरं करोति ॥ ११७ ॥

पर्यायाः कर्मजनिता इति विशेषेण व्यक्तीकरोति – **कम्मं** कर्मरहितपरमात्मनो विलक्षणं कर्म कर्तृ। किंविशिष्टम्। **णामसमक्खं** निर्नामनिर्गोत्रमुक्तात्मनो विपरीतं नामेति सम्यगाख्या संज्ञा यस्य तद्भवति नामसमाख्यं नामकर्मेत्यर्थः। **सभावं** शुद्धबुद्धैकपरमात्मस्वभावं **अह** अथ **अप्पणो सहावेण** आत्मीयेन ज्ञानावरणादिस्वकीयस्वभावेन करणभूतेन **अभिभूय** तिरस्कृत्य प्रच्छाद्य तं पूर्वोक्तमात्मस्वभावम्। पश्चात्किं करोति। **णरं तिरियं णेरइयं वा सुरं कुणदि** नरतिर्यग्नारकसुररूपं करोतीति।

पर्यायरूप फल उत्पन्न नहीं करती, और मोह सहित [१]क्रिया अवश्य मनुष्यादिपर्यायरूप फल उत्पन्न करती है। मोह सहित भाव एक प्रकारके नहीं होते, इसलिये उसके फलरूप मनुष्यादिपर्यायें भी टंकोत्कीर्ण – शाश्वत – एकरूप नहीं होतीं ॥ ११६ ॥

अब, यह व्यक्त करते हैं कि मनुष्यादिपर्यायें जीवको क्रियाके फल हैं –

गाथा ११७

अन्वयार्थ :– [**अथ**] वहाँ [**नामसमाख्यं कर्म**] 'नाम' संज्ञावाला कर्म [**स्वभावेन**] अपने स्वभावसे **आत्मनः स्वभावं अभिभूय**] जीवके स्वभावका पराभव करके, [**नरं**] **तिर्यञ्चं नैरयिकं वा सुरं**] मनुष्य, तिर्यंच, नारक अथवा देव (इन पर्यायोंको) [**करोति**] करता है।

टीका :– क्रिया वास्तवमें आत्माके द्वारा प्राप्य होनेसे कर्म है, (अर्थात् आत्मा क्रियाको प्राप्त करता है – पहुंचता है इसलिये वास्तवमें क्रिया ही आत्माका कर्म है।) उसके निमित्तसे परिणमन को प्राप्त होता हुआ (द्रव्यकर्मरूपसे परिणमन करता हुआ) पुद्गल भी कर्म है। उस (पुद्गलकर्म) को कार्यभूत मनुष्यादिपर्यायें मूलकारणभूत ऐसी जीवकी क्रियासे प्रवर्तमान होनेसे क्रियाफल ही हैं; क्योंकि क्रियाके अभावमें पुद्गलोंको

---

[१] मूल गाथामें प्रयुक्त 'क्रिया' शब्दसे मोह सहित क्रिया समझनी चाहिये। मोह रहित क्रियाको तो 'परम धर्म' नाम दिया गया है।

नामाख्य कर्म स्वभावथी निज जीवद्रव्य-स्वभावने ।
अभिभूत करी तिर्यंच, देव, मनुष्य वा नारक करे ॥ ११७ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

क्रिया खल्वात्मना प्राप्यत्वात्कर्म, तन्निमित्तप्राप्तपरिणामः पुद्गलोऽपि कर्म, तत्कार्यभूता मनुष्यादिपर्याया जीवस्य क्रियाया मूलकारणभूतायाः प्रवृत्तत्वात् क्रियाफलमेव स्युः। क्रियाऽभावे पुद्गलानां कर्मत्वाभावात्तत्कार्यभूतानां तेषामभावात्। अथ कथं ते कर्मणः कार्यभावमायान्ति कर्मस्वभावेन जीवस्वभावमभिभूय क्रियमाणत्वात् प्रदीपवत्। तथाहि – यथा खलु ज्योतिःस्वभावेन तैलस्वभावमभिभूय क्रियमाणः प्रदीपो ज्योतिः कार्यं तथा कर्मस्वभावेन जीवस्वभावमभिभूय क्रियमाणा मनुष्यादिपर्यायाः कर्मकार्यम् ॥ ११७ ॥

अथ कुतो मनुष्यादिपर्यायेषु जीवस्य स्वभावाभिभवो भवतीति निर्धारयति –

णरणारयतिरियसुरा जीवा खलु णामकम्मणिव्वत्ता।
ण हि ते लद्धसहावा परिणममाणा सकम्माणि ॥ ११८ ॥

नरनारकतिर्यक्सुरा जीवाः खलुः नामकर्मनिर्वृत्ताः।
न हि ते लब्धस्वभावाः परिणममानाः स्वकर्माणि ॥ ११८ ॥

अयमत्रार्थः–यथाग्निः कर्ता तैलस्वभावं कर्मतापन्नमभिभूय तिरस्कृत्य वर्त्याधारेण दीपशिखारूपेण परिणमयति, तथा कर्माग्निः कर्ता तैलस्थानीयं शुद्धात्मस्वभावं तिरस्कृत्य वर्तिस्थानीयशरीराधारेण दीपशिखास्थानीयनरनारकादिपर्यायरूपेण परिणमयति। ततो ज्ञायते मनुष्यादिपर्यायाः निश्चयनयेन कर्मजनिता इति ॥ ११७ ॥ अथ नरनारकादिपर्यायेषु कथं जीवस्य स्वभावाभिभवो जातस्तत्र किं

कर्मपनेका अभाव होनेसे उस (पुद्गलकर्म) की कार्यभूत मनुष्यादिपर्यायोंका अभाव होता है।

वहाँ वे मनुष्यादिपर्यायें कर्मके कार्य कैसे हैं? (सो कहते हैं कि –) वे कर्मस्वभावके द्वारा जीवके स्वभावका पराभव करके की जाती हैं, इसलिये दीपककी भाँति। वह इस प्रकार :– जैसे [१]ज्योति (लौ) के स्वभावके द्वारा तेलके स्वभावका पराभव करके किया जानेवाला दीपक ज्योतिका कार्य है, उसीप्रकार कर्मस्वभावके द्वारा जीवके स्वभावका पराभव करके की जानेवाली मनुष्यादिपर्यायें कर्मके कार्य हैं।

भावार्थ :– मनुष्यादिपर्यायें ११६ वीं गाथामें कही गई रागद्वेषमय क्रियाके फल

---

[१] ज्योति = ज्योत; अग्नि।

तिर्यंच-सुर-नर-नारकी जीव नामकर्म-निपन्न छे।
निज कर्मरूप परिणमन थी ज स्वभावलब्धि न तेमने ॥ ११८ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अमी मनुष्यादयः पर्याया नामकर्मनिर्वृत्ताः सन्ति तावत्। न पुनरेतावतापि तत्र जीवस्य स्वभावाभिभवोऽस्ति। यथा कनकबद्धमाणिक्यकङ्कणेषु माणिक्यस्य। यत्तत्र नैव जीवः स्वभावमुपलभते तत् स्वकर्मपरिणमनात् पयःपूरवत्। यथा खलु पयःपूरः प्रदेश-

---

जीवाभाव इति प्रश्ने प्रत्युत्तरं ददाति – **णरणारयतिरियसुरा जीवा** नरनारकतिर्यक्सुरनामानो जीवाः सन्ति तावत्। **खलु** स्फुटम्। कथंभूताः। **णामकम्मणिव्वत्ता** नरनारकादिस्वकीयस्वकीयनामकर्मणा निर्वृत्ताः। **ण हि ते लद्धसहावा** किंतु यथा माणिक्यबद्धसुवर्णकङ्कणेषु माणिक्यस्य हि मुख्यता नास्ति, तथा ते जीवाश्चिदानन्दैकशुद्धात्मस्वभावमलभमानाः सन्तो लब्धस्वभावा न भवन्ति, तेन कारणेन स्वभावाभिभवो भण्यते, न च जीवाभावः। कथंभूताः सन्तो लब्धस्वभावा न भवन्ति। **परिणममाणा**

हैं; क्योंकि उस क्रियासे कर्मबन्ध होता है, और कर्म जीवके स्वभावका पराभव करके मनुष्यादिपर्यायोंको उत्पन्न करते हैं ॥११७॥

अब यह निर्णय करते हैं कि मनुष्यादिपर्यायोंमें जीवके स्वभावका पराभव किस कारणसे होता है? :–

गाथा ११८

अन्वयार्थ :–[**नरनारकतिर्यक्सुराः जीवाः**] मनुष्य, नारक, तिर्यंच और देवरूप जीव [**खलु**] वास्तवमें [**नामकर्म निवृत्ताः**] नामकर्मसे निष्पन्न हैं। [**हि**] वास्तवमें [**स्वकर्माणि**] वे अपने कर्मरूपसे [**परिणममानाः**] परिणमित होते हैं इसलिये [**ते न लब्धस्वभावाः**] उन्हें स्वभावकी उपलब्धि नहीं है।

टीका :–प्रथम तो, यह मनुष्यादिपर्यायें नामकर्मसे निष्पन्न हैं, किन्तु इतनेसे भी वहाँ जीवके स्वभावका पराभव नहीं है; जैसे कनकबद्ध (सुवर्णमें जड़े हुये) माणिकवाले कंकणोंमें माणिकके स्वभावका पराभव नहीं होता तदनुसार। जो वहाँ जीव स्वभावको उपलब्ध नहीं करता–अनुभव नहीं करता सो स्वकर्मरूप परिणमित होनेसे है, पानीके पूर (बाढ़) की भाँति। जैसे पानीका पूर प्रदेशसे और स्वादसे निम्ब-चन्दनादिवनराजिरूप (नीम, चन्दन इत्यादि वृक्षोंकी लम्बी पंक्तिरूप) परिणमित होता हुआ (अपने [१]द्रवत्व और [२]स्वादुत्वरूप स्वभावको उपलब्ध नहीं करता, उसीप्रकार आत्मा भी प्रदेशसे और भावसे स्वकर्मरूप परिणमित होनेसे (अपने) अमूर्तत्व और

---

[१] द्रवत्व = प्रवाहीपना।

[२] स्वादुत्व = स्वादिष्टपना।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

स्वादाभ्यां पिचुमन्दचन्दनादिवनराजीं परिणमन्न द्रव्यत्वस्वादुत्वस्वभावमुपलभते, तथात्मापि प्रदेशभावाभ्यां कर्मपरिणमनान्नामूर्तत्वनिरुपरागविशुद्धिमत्त्वस्वभावमुपलभते ॥ ११८ ॥

सकम्माणि स्वकीयोदयागतकर्माणि सुखदुःखरूपेण परिणममाना इति। अयमत्रार्थः – यथा वृक्षसेचनविषये जलप्रवाहश्चन्दनादिवनराजिरूपेण परिणतः सन्स्वकीयकोमलशीतलनिर्मलादिस्वभावं न लभते, तथायं जीवोऽपि वृक्षस्थानीयकर्मोदयपरिणतः सन्परमाह्लादैकलक्षणसुखामृतास्वादनैर्मल्यादिस्वकीयगुणसमूहं न लभत इति ॥ ११८ ॥ अथ जीवस्य द्रव्येण नित्यत्वेऽपि पर्यायेण विनश्वरत्वं दर्शयति –

---

[१]निरुपराग विशुद्धिमत्वरूप स्वभावको उपलब्ध नहीं करता।

भावार्थ :–मनुष्यादिपर्यायोंमें कर्म कहीं जीवके स्वभावको न तो हनता है और न आच्छादित करता है; परन्तु वहाँ जीव स्वयं ही अपने दोषसे कर्मानुसार परिणमन करता है, इसलिये उसे अपने स्वभावकी उपलब्धि नहीं है। जैसे पानीका पूर प्रदेशकी अपेक्षासे वृक्षोंके रूपसे परिणमित होता हुआ अपने प्रवाहोपनेरूप स्वभावको उपलब्ध करता हुआ अनुभव नहीं करता, और स्वादकी अपेक्षासे वृक्षरूप परिणमित होता हुआ अपने स्वादिष्टपनेरूप स्वभावको उपलब्ध नहीं करता, उसीप्रकार आत्मा भी प्रदेशकी अपेक्षासे स्वकर्मानुसार परिणमित होता हुआ अपने अमूर्तत्वरूप स्वभावको उपलब्ध नहीं करता और भावकी अपेक्षासे स्वकर्मरूप परिणमित होता हुआ उपरागसे रहित विशुद्धिवालापनारूप अपने स्वभावको उपलब्ध नहीं करता। इससे यह निश्चित होता है कि मनुष्यादिपर्यायोंमें जीवोंको अपने ही दोषसे अपने स्वभावकी अनुपलब्धि है, कर्मादिक अन्य किसी कारणसे नहीं। 'कर्म जीवके स्वभावका पराभव करता है' ऐसा कहना तो उपचार कथन है; परमार्थसे ऐसा नहीं है ॥ ११८ ॥

अब, जीवकी द्रव्यरूपसे [२]अवस्थितता होने पर भी पर्यायोंसे अनवस्थितता (अनित्यता-अस्थिरता) प्रकाशते हैं :–

गाथा ११९

अन्वयार्थ :–[**क्षणभङ्गसमुद्भवे जने**] प्रतिक्षण उत्पाद और विनाशवाले जीव-

---

[१] निरुपरागविशुद्धिमत्व = उपराग (मलिनता, विकार) रहित विशुद्धिवालापना [अरूपीपना और निर्विकार – विशुद्धिवालापना आत्माका स्वभाव है।]

[२] अवस्थितता = स्थिरपना ; ठीक रहना।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ जीवस्य द्रव्यत्वेनावस्थितत्वेऽपि पर्यायैरनवस्थितत्वं द्योतयति –

जायदि णेव ण णस्सदि खणभंगसमुब्भवे जणे कोई ।
जो हि भवो सो विलओ संभवविलय त्ति ते णाणा ॥ ११९ ॥

जायते नैव न नश्यति क्षणभङ्गसमुद्भवे जने कश्चित् ।
यो हि भवः स विलयः संभवविलयाविति तौ नाना ॥ ११९ ॥

जायदि णेव ण णस्सदि जायते नैव न नश्यति द्रव्यार्थिकनयेन। क्व। **खणभंगसमुब्भवे जणे कोई** क्षणभङ्गसमुद्भवे जने कोऽपि। क्षणं क्षणं प्रति भङ्गसमुद्भवो यत्र संभवति क्षणभङ्गसमुद्भवस्तस्मिन्क्षणभङ्गसमुद्भवे विनश्वरे पर्यायार्थिकनयेन जने लोके जगति कश्चिदपि, तस्मान्नैव जायते न चोत्पद्यत इति हेतुं वदति। **जो हि भवो सो विलओ** द्रव्यार्थिकनयेन यो हि भवस्स एव विलयो यतः कारणात्। तथा हि – मुक्तात्मनां य एव सकलविमलकेवलज्ञानादिरूपेण मोक्षपर्यायेण भव उत्पादः

लोकमें [**कश्चित्**] कोई [**न एव जायते**] उत्पन्न नहीं होता और [**न नश्यति**] न नष्ट होता है; [**हि**] क्योंकि [**यः भवः सः विलयः**] जो उत्पाद है वही विनाश है; [**संभव-विलयौ इति तौ नाना**] और उत्पाद तथा विनाश, इसप्रकार वे अनेक (भिन्न) भी हैं।

टीका :–प्रथम तो यहाँ न कोई जन्म लेता है और न मरता है (अर्थात् इस लोकमें कोई न तो उत्पन्न होता है और न नाशको प्राप्त होता है)। और (ऐसा होने पर भी) मनुष्य-देव-तिर्यंच-नारकात्मक जीवलोक प्रतिक्षण परिणामी होनेसे क्षण-क्षणमें होनेवाले विनाश और उत्पादके साथ (भी) जुडा हुआ है। और यह विरोधको प्राप्त नहीं होता; क्योंकि उद्भव और विलयका एकपना और अनेकपना है। जब उद्भव और विलयका एकपना है तब पूर्वपक्ष है, और जब अनेकपना है तब उत्तरपक्ष है। (अर्थात्–जब उत्पाद और विनाशके एकपनेकी अपेक्षा ली जाय तब यह पक्ष फलित होता है कि–'न तो कोई उत्पन्न होता है और न नष्ट होता है'; और जब उत्पाद तथा विनाशके अनेकपनेकी अपेक्षा ली जाय तब प्रतिक्षण होनेवाले विनाश और उत्पादका पक्ष फलित होता है।) वह इसप्रकार है :–

जैसे :–'जो घड़ा है वही कूँडा है' ऐसा कहा जानेपर, घड़े और कूंडेके स्वरूपका एकपना असम्भव होनेसे, उन दोनोंकी आधारभूत मिट्टी प्रगट होती है, उसीप्रकार 'जो

नहि कोई ऊपजे विणसे क्षणभंगसंभवमय जगे ।
कारण जनम ते नाश छे; वली जन्मनाश विभिन्न छे ॥ ११९ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

इह तावन्न कश्चिज्जायते न म्रियते च। अथ च मनुष्यदेवतिर्यङ्नारकात्मको जीवलोकः प्रतिक्षणपरिणामित्वादुत्संगितक्षणभङ्गोत्पादः। न च विप्रतिषिद्धमेतत्, संभवविलययोरेकत्वनानात्वाभ्याम्। यदा खलु भङ्गोत्पादयोरेकत्वं तदा पूर्वपक्षः, यदा तु नानात्वं तदोत्तरः। तथाहि – यथा य एव घटस्तदेव कुण्डमित्युक्ते घटकुण्डस्वरूपयोरेकत्वासंभवात्तदुभयाधारभूता मृत्तिका संभवति, तथा य एव संभवः स एव विलय इत्युक्ते संभवविलयस्वरूपयोरेकत्वासंभवात्तदुभयाधारभूतं ध्रौव्यं संभवति। ततो देवादिपर्याये संभवति मनुष्यादिपर्याये विलीयमाने च य एव संभवः स एव विलय इति कृत्वा तदुभयाधारभूतं ध्रौव्यवज्जीवद्रव्यं संभाव्यत एव। ततः सर्वदा द्रव्यत्वेन जीवष्टङ्कोत्कीर्णोऽवतिष्ठते। अपि च यथाऽन्यौ घटोऽन्यत्कुण्डमित्युक्ते तदुभयाधारभूताया मृत्तिकाया अन्यत्वासंभवात् घटकुण्डस्वरूपे संभवतः, तथान्यः संभवोऽन्यो विलय इत्युक्ते तदुभयाधारभूतस्य ध्रौव्यस्यान्यत्वासंभवात्संभवविलयस्वरूपे संभवतः। ततो देवादिपर्याये संभवति मनुष्यादिपर्याये विलीयमाने चान्यः संभवोऽन्यो विलय इति कृत्वा संभवविलयवन्तौ देवादिमनुष्यादिपर्यायौ संभाव्येते। ततः प्रतिक्षणं पर्यायैर्जीवोऽनवस्थितः ॥ ११९ ॥

स एव निश्चयरत्नत्रयात्मकनिश्चयमोक्षमार्गपर्यायेण विलयो विनाशस्तौ च मोक्षपर्यायमोक्षमार्गपर्यायौ कार्यकारणरूपेण भिन्नौ, तदुभयाधारभूतं यत्परमात्मद्रव्यं तदेव, मृत्पिण्डघटाधारभूतमृत्तिकाद्रव्यवत् मनुष्यपर्यायदेवपर्यायाधारभूतसंसारिजीवद्रव्यवद्वा। क्षणभङ्गसमुद्भवे हेतुः कथ्यते। **संभवविलय त्ति ते णाणा** संभवविलयौ द्वाविति तौ नाना भिन्नौ यतः कारणात्ततः पर्यायार्थिकनयेन भङ्गोत्पादौ। तथा हि – य एव पूर्वोक्तमोक्षपर्यायस्योत्पादो मोक्षमार्गपर्यायस्य विनाशस्तावेव भिन्नौ न च तदाधारभूतपरमात्मद्रव्यमिति। ततो ज्ञायते द्रव्यार्थिकनयेन नित्यत्वेऽपि पर्यायरूपेण विनाशोऽस्तीति ॥ ११९ ॥

उत्पाद है वही विनाश है' ऐसा कहा जानेपर उत्पाद और विनाशके स्वरूपका एकपना असम्भव होनेसे उन दोनोंका आधारभूत ध्रौव्य प्रगट होता है; इसलिये देवादिपर्यायके उत्पन्न होने और मनुष्यादिपर्यायके नष्ट होने पर, 'जो उत्पाद है वही विलय है' ऐसा माननेसे (इस अपेक्षासे) उन दोनोंका आधारभूत ध्रौव्यवान् जीवद्रव्य प्रगट होता है (लक्षमें आता है); इसलिये सर्वदा द्रव्यपनेसे जीव टंकोत्कीर्ण रहता है।

और फिर, जैसे 'अन्य घड़ा है और अन्य कूंडा है' ऐसा कहा जानेपर उन दोनोंकी आधारभूत मिट्टीका अन्यपना (भिन्न-भिन्नपना) असंभवित होनेसे घड़ेका और कूंडेका (दोनोंका भिन्न-भिन्न) स्वरूप प्रगट होता है, उसीप्रकार 'अन्य उत्पाद है और अन्न व्यय है' ऐसा कहा जानेपर, उन दोनोंके आधारभूत ध्रौव्यका अन्यपना असंभवित होनेसे उत्पाद और व्ययका स्वरूप प्रगट होता है; इसलिये देवादिपर्यायके उत्पन्न होने

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ जीवस्यानवस्थितत्वहेतुमुद्योतयति –

तम्हा दु णत्थि कोई सहावसमवट्ठिदो त्ति संसारे ।
संसारो पुण किरिया संसरमाणस्स दव्वस्स ॥ १२०॥

तस्मात्तु नास्ति कश्चित् स्वभावसमवस्थित इति संसारे ।
संसारः पुनः क्रिया संसरतो द्रव्यस्य ॥ १२० ॥

यतः खलु जीवो द्रव्यत्वेनावस्थितोऽपि पर्यायैरनवस्थितः, ततः प्रतीयते न कश्चिदपि संसारे स्वभावेनावस्थित इति । यच्चात्रानवस्थितत्वं तत्र संसार एव हेतुः । तस्य मनुष्या-

---

अथ विनश्वरत्वे कारणमुपन्यस्यति, अथवा प्रथमस्थलेऽधिकारसूत्रेण मनुष्यादिपर्यायाणां कर्मजनितत्वेन यद्विनश्वरत्वं सूचितं तदेव गाथात्रयेण विशेषेण व्याख्यातमिदानीं तस्योपसंहारमाह – **तम्हा दु णत्थि कोई सहावसमवट्ठिदो त्ति** तस्मान्नास्ति कश्चित्स्वभावसमवस्थित इति। यस्मात्पूर्वोक्तप्रकारेण मनुष्यादिपर्यायाणां विनश्वरत्वं व्याख्यातं तस्मादेव ज्ञायते परमानन्दैकलक्षणपरमचैतन्यचमत्कार-

---

पर और मनुष्यादिपर्यायके नष्ट होने पर, 'अन्य उत्पाद है और अन्य व्यय है' ऐसा माननेसे (इस अपेक्षासे) उत्पाद और व्ययवाली देवादिपर्याय और मनुष्यादिपर्याय प्रगट होती है (लक्षमें आती है) , इसलिये जीव प्रतिक्षण पर्यायोंसे अनवस्थित है ॥११९॥

अब, जीवकी अनवस्थितताका हेतु प्रगट करते हैं :–

गाथा १२०

अन्वयार्थ :– [**तस्मात् तु**] इसलिये [**संसारे**] संसारमें [**स्वभावसमवस्थितः इति**] स्वभावसे अवस्थित ऐसा [**कश्चित् न अस्ति**] कोई नहीं है ; (अर्थात् संसारमें किसीका स्वभाव केवल एकरूप रहनेवाला नहीं है) ; [**संसारः पुनः**] और संसार तो [**संसरतः**] संसरण करते हुये (गोल फिरते हुये, परिवर्तित होते हुये [**द्रव्यस्य**] द्रव्यकी [**क्रिया**] क्रिया है ।

टीका :– वास्तवमें जीव द्रव्यपनेसे अवस्थित होनेपर भी पर्यायोंसे अनवस्थित है ; इससे यह प्रतीत होता है कि ससारमें कोई भी स्वभावसे अवस्थित नहीं है (अर्थात् किसीका स्वभाव केवल अविचल – एकरूप रहनेवाला नहीं है) ; और यहाँ जो

तेथी स्वभावे स्थिर अेवुं न कोई छे संसारमां ।
संसार तो संसरण करता द्रव्य केरी छे क्रिया ॥ १२० ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

दिपर्यायात्मकत्वात् स्वरूपेणैव तथाविधत्वात्। अथ यस्तु परिणममानस्य द्रव्यस्य पूर्वोत्तरदशापरित्यागोपादानात्मकः क्रियाख्यः परिणामस्तत्संसारस्य स्वरूपम् ॥ १२० ॥

अथ परिणामात्मके संसारे कुतः पुद्गलश्लेषो येन तस्य मनुष्यादिपर्यायात्मकत्वमित्यत्र समाधानमुपवर्णयति –

आदा कम्ममलिमसो परिणामं लहदि कम्मसंजुत्तं।
दत्तो सिलिसदि कम्मं तम्हा कम्मं तु परिणामो ॥ १२१ ॥

आत्मा कर्ममलीमसः परिणामं लभते कर्मसंयुक्तम्।
ततः श्लिष्यति कर्म तस्मात् कर्म तु परिणामः ॥ १२१ ॥

परिणतशुद्धात्मस्वभाववदवस्थितो नित्यः कोऽपि नास्ति। क्व। **संसारे** निस्संसारशुद्धात्मनो विपरीते संसारे। संसारस्वरूपं कथयति – **संसारो पुण किरिया** संसारः पुनः क्रिया। निष्क्रियनिर्विकल्पशुद्धात्मपरिणतेर्विसदृशी मनुष्यादिविभावपर्यायपरिणतिरूपा क्रिया संसारस्वरूपं। सा च कस्य भवति। **संसरमाणस्स जीवस्स** विशुद्धज्ञानदर्शनस्वभावमुक्तात्मनो विलक्षणस्य संसरतः परिभ्रमतः संसारिजीवस्येति। ततः स्थितं मनुष्यादिपर्यायात्मकः संसार एव विनश्वरत्वे कारणमिति ॥ १२० ॥ एवं शुद्धात्मनो भिन्नानां कर्मजनितमनुष्यादिपर्यायाणां विनश्वरत्वकथनमुख्यतया गाथाचतुष्टयेन द्वितीयस्थलं गतम्।

अनवस्थितता है उसमें संसार ही हेतु है; क्योंकि वह (संसार) मनुष्यादिपर्यायात्मक है, कारण कि वह स्वरूपसे ही वैसा है, (अर्थात् संसारका स्वरूप ही ऐसा है) उसमें परिणमन करते हुये द्रव्यका पूर्वोत्तरदशाका त्यागग्रहणात्मक ऐसा जो क्रिया नाम का परिणाम है वह संसारका स्वरूप है ॥ १२० ॥

अब परिणामात्मक संसारमें किस कारणसे पुद्गलका संबंध होता है कि जिससे वह (संसार) मनुष्यादिपर्यायात्मक होता है ? – इसका यहाँ समाधान करते हैं :–

गाथा १२१

अन्वयार्थ :– [**कर्ममलीमसः आत्मा**] कर्मसे मलिन आत्मा [**कर्मसंयुक्तं परिणामं**] कर्मसंयुक्त परिणामको (द्रव्यकर्मके संयोगसे होनेवाले अशुद्ध परिणामको) [**लभते**] प्राप्त करता है, [**ततः**] उससे [**कर्म श्लिष्यति**] कर्म चिपक जाता है (द्रव्यकर्मका बंध होता है); [**तस्मात् तु**] इसलिये [**परिणामः कर्म**] परिणाम वह कर्म है।

कर्मे मलिन जीव कर्मसंयुत पामतो परिणामने।
तेथी करम बंधाय छे, परिणाम तेथी कर्म छे ॥ १२१ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यो हि नाम संसारनामायमात्मनस्तथाविधः परिणामः स एव द्रव्यकर्मश्लेषहेतुः। अथ तथाविधपरिणामस्यापि को हेतुः, द्रव्यकर्म हेतुः तस्य, द्रव्यकर्मसंयुक्तत्वेनेवोपलम्भात्। एवंसतीतरेतराश्रयदोषः। न हि अनादिप्रसिद्धद्रव्यकर्माभिसंबद्धस्यात्मनः प्राक्तनद्रव्यकर्मणस्तत्र हेतुत्वेनोपादानात्। एवं कार्यकारणभूतनवपुराणद्रव्यकर्मत्वादात्मनस्तथाविधपरिणामो द्रव्यकर्मैव। तथात्मा चात्मपरिणामकर्तृत्वाद्द्रव्यकर्मकर्तार्प्युपचारात्॥ १२१॥

अथ संसारस्य कारणं ज्ञानावरणादि द्रव्यकर्म तस्य तु कारणं मिथ्यात्वरागादिपरिणाम इत्यावेदयति– **आदा** निर्दोषिपरमात्मा निश्चयेन शुद्धबुद्धैकस्वभावोऽपि व्यवहारेणानादिकर्मबन्धवशात् **कम्ममलिमसो** कर्ममलीमसो भवति। तथाभवन्सन् किं करोति। **परिणामं लहदि** परिणामं लभते। कथंभूतम्। **कम्मसंजुत्तं** कर्म रहितपरमात्मनो विसदृशकर्मसंयुक्तं मिथ्यात्वरागादिविभावपरिणामं। **तत्तो सिलिसदि कम्मं** ततः परिणामात् श्लिष्यति बध्नाति। किम्। कर्म। यदि पुनर्निर्मलविवेकज्योतिःपरिणामेन परिणमति तदा तु कर्म मुञ्चति। **तम्हा कम्मं तु परिणामो** तस्मात् कर्म तु परिणामः। यस्माद्रागादिपरिणामेन कर्म बध्नाति, तस्माद्रागादिविकल्परूपो भावकर्मस्थानीयः सरागपरिणाम एव कर्मकारणत्वादुपचारेण कर्मेति भण्यते। ततः स्थितं रागादिपरिणामः कर्मबन्धकारणमिति॥ १२१॥ अथात्मा

टीका :– 'संसार' नामक जो यह आत्माका तथाविध (उसप्रकारका) परिणाम है वही द्रव्यकर्मके चिपकनेका हेतु है। अब, उसप्रकारके परिणामका हेतु कौन है? (इसके उत्तरमें कहते हैं कि) द्रव्यकर्म उसका हेतु है, क्योंकि [१]द्रव्यकर्मकी संयुक्तासे ही वह देखा जाता है।

(शंका :–) ऐसा होनेसे [२]इतरेतराश्रयदोष आयगा! (समाधान :–) नहीं आयगा, क्योंकि अनादिसिद्ध द्रव्यकर्मके साथ संबद्ध ऐसे आत्माका जो पूर्वका [१]द्रव्यकर्म है उसका वहाँ हेतुरूपसे ग्रहण (स्वीकार) किया गया है।

---

[१] द्रव्यकर्मके संयोगसे ही अशुद्ध परिणाम होते हैं, द्रव्यकर्मके बिना वे कभी नहीं होते; इसलिए द्रव्यकर्म अशुद्ध परिणामका कारण है।

[२] एक असिद्ध बात को सिद्ध करनेके लिये दूसरी असिद्ध बातका आश्रय लिया जाय, और फिर उस दूसरी बातको सिद्ध करनेके लिये पहलीका आश्रय लिया जाय, – सो इस तर्क-दोषको इतरेतराश्रयदोष कहा जाता है।

द्रव्यकर्मका कारण अशुद्ध परिणाम कहा है; फिर उस अशुद्ध परिणामके कारणके संबंधमें पूछे जानेपर उसका कारण पुनः द्रव्यकर्म कहा है, इसलिये शंकाकारको शंका होती है कि इस बातमें इतरेतराश्रय दोष आता है।

[३] नवीन द्रव्यकर्मका कारण अशुद्ध आत्मपरिणाम है, और उस अशुद्ध आत्मपरिणामका कारण वहका वही (नवीन) द्रव्यकर्म नहीं किंतु पहलेका (पुराना) द्रव्यकर्म है; इसलिये इसमें इतरेतराश्रय दोष नहीं आता।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ परमार्थादात्मनो द्रव्यकर्माकर्तृत्वमुद्योतयति –

परिणामो सयमादा सा पुण किरिय त्ति होदि जीवमया ।
किरिया कम्म त्ति मदा तम्हा कम्मस्स ण दु कत्ता ॥ १२२ ॥

परिणामः स्वयमात्मा सा पुनः क्रियेति भवति जीवमयी ।
क्रिया कर्मेति मता तस्मात्कर्मणो न तु कर्ता ॥ १२२ ॥

निश्चयेन स्वकीयपरिणामस्यैव कर्ता, न च द्रव्यकर्मण इति प्रतिपादयति । अथवा द्वितीयपातनिका – शुद्धपारिणामिकपरमभावग्राहकेण शुद्धनयेन यथैवाकर्ता तथैवाशुद्धनयेनापि सांख्येन यदुक्तं तन्निषेधार्थमात्मनो बन्धमोक्षसिद्ध्यर्थं कथंचित्परिणामित्वं व्यवस्थापयतीति पातनिकाद्वयं मनसि संप्रधार्य सूत्रमिदं निरूपयति – **परिणामो सयमादा** परिणामः स्वयमात्मा, आत्मपरिणामस्तावदात्मैव । कस्मात् । परिणामपरिणामिनोस्तन्मयत्वात् । **सा पुण किरिय त्ति होदि** सा पुनः क्रियेति भवति, स च परिणामः

इसप्रकार नवीन द्रव्यकर्म जिसका कार्यभूत और पुराना द्रव्यकर्म जिसका कारणभूत, है, ऐसा (आत्माका तथाविध परिणाम) होनेसे आत्माका तथाविध परिणाम उपचारसे द्रव्यकर्म ही है, और आत्मा भी अपने परिणामका कर्त्ता होनेसे द्रव्यकर्मका कर्त्ता भी उपचारसे है ॥ १२१ ॥

गाथा १२२

अन्वयार्थ :– [**परिणामः**] परिणाम [**स्वयम्**] स्वयं [**आत्मा**] आत्मा है, [**सा पुनः**] और वह [**जीवमयी क्रिया इति भवति**] जीवमय क्रिया है, [**क्रिया**] क्रियाको [**कर्म इति मता**] कर्म माना गया है; [**तस्मात्**] इसलिये आत्मा [**कर्मणः कर्ता तु न**] द्रव्यकर्मका कर्त्ता तो नहीं है ।

टीका :– प्रथम तो आत्माका परिणाम वास्तवमें स्वयं आत्मा ही है, क्योंकि परिणामी परिणामके स्वरूपका कर्त्ता होनेसे परिणामसे अनन्य है; और जो उसका (आत्माका) तथाविध परिणाम है वह जीवमयी ही क्रिया है, क्योंकि सर्व द्रव्योंकी परिणामलक्षणक्रिया आत्ममयता (निजमयता) से स्वीकार की गई है; और फिर,

---

परिणाम पोते जीव छे, ने छे क्रिया अे जीव मयी ।
किरिया गणी छे कर्म, तेथी कर्मनो कर्ता नथी ॥ १२२ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

आत्मपरिणामो हि तावत्स्वयमात्मैव, परिणामिनः परिणामस्वरूपकर्तृत्वेन परिणामादनन्यत्वात्। यश्च तस्य तथाविधः परिणामः सा जीवमय्येव क्रिया, सर्वद्रव्याणां परिणामलक्षणक्रियाया आत्ममयत्वाभ्युपगमात्। या च क्रिया सा पुनरात्मना स्वतन्त्रेण प्राप्यत्वात्कर्म। ततस्तस्य परमार्थादात्मा आत्मपरिणामात्मकस्य भावकर्मण एव कर्ता, न तु पुद्गलपरिणामात्मकस्य द्रव्यकर्मणः। अथ द्रव्यकर्मणः कः कर्तेति चेत् पुद्गल-परिणामो हि तावत्स्वयं पुद्गल एव, परिणामिनः परिणामस्वरूपकर्तृत्वेन परिणामा-दनन्यत्वात्। यश्च तस्य तथाविधः परिणामः सा पुद्गलमय्येव क्रिया, सर्वद्रव्याणां परिणामलक्षणक्रियाया आत्ममयत्वाभ्युपगमात्। या च क्रिया सा पुनः पुद्गलेन स्वतन्त्रेण प्राप्यत्वात्कर्म। ततस्तस्य परमार्थात् पुद्गलात्मा आत्मपरिणामात्मकस्य द्रव्यकर्मण एव कर्ता, न त्वात्मपरिणामात्मकस्य भावकर्मणः। तत आत्मात्मस्वरूपेण परिणमति न पुद्गलस्वरूपेण परिणमति ॥ १२२ ॥

क्रिया परिणतिरिति भवति। कथंभूता। **जीवमया** जीवेन निर्वृत्तत्वाज्जीवमयी। **किरिया कम्म त्ति मदा** जीवेन स्वतन्त्रेण स्वाधीनेन शुद्धाशुद्धोपादानकारणभूतेन प्राप्यत्वात्सा क्रिया कर्मेति मता संमता। कर्मशब्देनात्र यदेव चिद्रूपं जीवादभिन्नं भावकर्मसंज्ञं निश्चयकर्म तदेव ग्राह्यम्। तस्यैव कर्ता जीवः। **तम्हा कम्मस्स ण दु कत्ता** तस्माद्द्रव्यकर्मणो न कर्तेति। अत्रैतदायाति – यद्यपि कथंचित् परिणामित्वे सति जीवस्य कर्तृत्वं जातं तथापि निश्चयेन स्वकीयपरिणामानामेव कर्ता, पुद्गलकर्मणां व्यवहारेणेति। तत्र तु यदा शुद्धोपादानकारणरूपेण शुद्धोपयोगेन परिणमति तदा मोक्षं साधयति, अशुद्धोपादान-कारणेन तु बन्धमिति। पुद्गलोऽपि जीववन्निश्चयेन स्वकीयपरिणामानामेव कर्ता, जीवपरिणामानां

जो (जीवमयी) क्रिया है वह आत्माके द्वारा स्वतंत्रतया [1]प्राप्य होनेसे कर्म है। इसलिये परमार्थतः आत्मा अपने परिणामस्वरूप भावकर्मका ही कर्त्ता है; किन्तु पुद्गलपरिणाम-स्वरूप द्रव्यकर्मका नहीं।

अब यहाँ ऐसा प्रश्न होता है कि '(जीव भावकर्मका ही कर्त्ता है तब फिर) द्रव्यकर्मका कर्त्ता कौन है?' इसका उत्तर इसप्रकार है :– प्रथम तो पुद्गलका परिणाम वास्तवमें स्वयं पुद्गल ही है, क्योंकि परिणामी परिणामके स्वरूपका कर्त्ता होनेसे परिणामसे अनन्य है; और जो उसका (पुद्गल का) तथाविध परिणाम है वह पुद्गल-मयी ही क्रिया है, क्योंकि सर्व द्रव्योंकी परिणामस्वरूप क्रिया निजमय होती है, ऐसा स्वीकार किया गया है; और फिर, जो (पुद्गलमयी) क्रिया है वह पुद्गलके द्वारा स्वतंत्रतया प्राप्य होनेसे कर्म है। इसलिये परमार्थतः पुद्गल अपने परिणामस्वरूप उस द्रव्यकर्मका ही कर्त्ता है, किन्तु आत्माके परिणामस्वरूप भावकर्मका नहीं।

---

[1] प्राप्य = प्राप्त होने योग्य, (जो स्वतंत्रपने करे सो कर्ता है ; और कर्ता जिसे प्राप्त करे सो कर्म है।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ किं तत्स्वरूपं येनात्मा परिणमतीति तदावेदयति –

परिणमदि चेदणाए आदा पुण चेदणा तिधाभिमदा ।
सा पुण णाणे कम्मे फलम्मि वा कम्मणो भणिदा ॥ १२३ ॥

परिणमति चेतनया आत्मा पुनः चेतना त्रिधाभिमता ।
सा पुनः ज्ञाने कर्मणि फले वा कर्मणो भणिता ॥ १२३ ॥

यतो हि नाम चैतन्यमात्मनः स्वधर्मव्यापकत्वं, ततश्चेतनैवात्मनः स्वरूपं तया खल्वात्मा परिणमति । यः कश्चनाप्यात्मनः परिणामः स सर्वोऽपि चेतनां नातिवर्तत इति

व्यवहारेणेति ॥ १२२ ॥ एवं रागादिपरिणामाः कर्मबन्धकारणं, तेषामेव कर्ता जीव इतिकथनमुख्यतया

इससे (ऐसा समझना चाहिये कि) आत्मा आत्मस्वरूप परिणमित होता है, पुद्गलस्वरूप परिणमित नहीं होता ॥ १२२ ॥

अब, यह कहते हैं कि वह कौनसा स्वरूप है जिसरूप आत्मा परिणमित होता है ? :–

गाथा १२३

अन्वयार्थ :– [**आत्मा**] आत्मा [**चेतनया** चेतनारूपसे] [**परिणमति**] परिणमित होता है [**पुनः**] और [**चेतना**] चेतना [**त्रिधा अभिमता**] तीन प्रकारसे मानी गयी है; [**पुनः**] और [**सा**] वह [**ज्ञाने**] ज्ञानसंबंधी, [**कर्मणि**] कर्मसंबंधी [**वा**] अथवा [**कर्मणः फले**] कर्मफल संबंधी –[**भणिता**] ऐसी कही गयी है ।

टीका :– जिससे चैतन्य वह आत्माका [1]स्वधर्मव्यापकपना है, उससे चेतना ही आत्माका स्वरूप है; उसरूप (चेतनारूप) वास्तवमें आत्मा परिणमित होता है । आत्माका जो कुछ भी परिणाम हो वह सब ही चेतनका उल्लंघन नहीं करता, (अर्थात् आत्माका कोई भी परिणाम चेतनाको किंचित्मात्र भी नहीं छोड़ता – बिना चेतनाके

[1] स्वधर्मव्यापकपना = निजधर्मोंमें व्यापकपना ।

जीव चेतनारूप परिणमे, वली चेतना त्रिविधागणी ।
ते ज्ञानविषयक, कर्मविषयक, कर्म फलविषयक कही ॥ १२३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

तात्पर्यम्। चेतना पुनर्ज्ञानकर्मकर्मफलत्वेन त्रेधा। तत्र ज्ञानपरिणतिर्ज्ञानचेतना, कर्म-परिणतिः कर्मचेतना, कर्मफलपरिणतिः कर्मफलचेतना ॥ १२३ ॥

अथ ज्ञानकर्मकर्मफलस्वरूपमुपवर्णयति –

णाणं अट्ठवियप्पो कम्मं जीवेण जं समारद्धं।
तमणेगविधं भणिदं फलं ति सोक्खं व दुक्खं वा ॥ १२४ ॥

ज्ञानमर्थविकल्पः कर्म जीवेन यत्समारब्धम्।
तदनेकविधं भणितं फलमिति सौख्यं वा दुःखं वा ॥ १२४ ॥

गाथाद्वयेन तृतीयस्थलं गतम्। अथ येन परिणामेनात्मा परिणमति तं परिणामं कथयति – **परिणमदि चेदणाए आदा** परिणमति चेतनया करणभूतया। स कः। आत्मा। यः कोऽप्यात्मनः शुद्धाशुद्ध-परिणामः स सर्वोऽपि चेतनां न त्यजति इत्यभिप्रायः। **पुण चेदणा तिधाभिमदा सा** सा चेतना पुनस्त्रिधाभिमता। कुत्र कुत्र। **णाणे** ज्ञानविषये **कम्मे** कर्मविषये **फलम्मि वा** फले वा। कस्य फले। **कम्मणो** कर्मणः। **भणिदा** भणिता कथितेति। ज्ञानपरिणतिः ज्ञानचेतना अग्रे वक्ष्यमाणा, कर्मपरिणतिः कर्मचेतना, कर्मफलपरिणतिः कर्मफलचेतनेति भावार्थः ॥ १२३ ॥ अथ ज्ञानकर्मकर्म-फलरूपेण त्रिधा चेतनां विशेषेण विचारयति – **णाणं अट्ठवियप्पं** ज्ञानं मत्यादिभेदेनाष्टविकल्पं भवति। अथवा पाठान्तरम् – **णाणं अट्ठवियप्पो** ज्ञानमर्थविकल्पः। तथा हि – अर्थः परमात्मादि-पदार्थः, अनन्तज्ञानसुखादिरूपोऽहमिति रागाद्यास्रवास्तु मत्तो भिन्ना इति स्वपराकारावभासेनादर्श

बिलकुल नहीं होता) – ऐसा तात्पर्य है। और चेतना ज्ञानरूप, कर्मरूप और कर्मफल रूपसे तीन प्रकारकी है। उसमें ज्ञानपरिणति (ज्ञानरूपसे परिणति) वह ज्ञानचेतना, कर्म परिणति वह कर्मचेतना और कर्मफलपरिणति वह कर्मफलचेतना है ॥ १२३ ॥

अब ज्ञान, कर्म और कर्मफलका स्वरूप वर्णन करते हैं :–

गाथा १२४

अन्वयार्थ :– [**अर्थविकल्पः**] अर्थविकल्प (अर्थात् स्व-पर पदार्थोंका भिन्नतापूर्वक युगपत् अवभासन) [**ज्ञानं**] वह ज्ञान है; [**जीवेन**] जीवके द्वारा [**यत् समारब्धं**] जो किया जा रहा हो [**कर्म**] वह कर्म है, [**तद् अनेकविधं**] वह अनेक प्रकारका है, [**सौख्यं वा दुःखं वा**] सुख अथवा दुःख [**फलं इति भणितम्**] वह कर्मफल कहा गया है।

टीका :– प्रथम तो, अर्थविकल्प वह ज्ञान है। वहाँ, अर्थ क्या है ? स्व-परके

छे 'ज्ञान' अर्थविकल्प, ने जीवथी करातुं 'कर्म' छे।
ते छे अनेक प्रकारनुं, 'फल' सौख्य अथवा दुःख छे ॥ १२४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अर्थविकल्पस्तावत् ज्ञानम्। तत्र कः खल्वर्थः, स्वपरविभागेनावस्थितं विश्वं, विकल्पस्तदाकारावभासनम्। यस्तु मुकुरुन्दहृदयाभोग इव युगपदवभासमानस्वपराकारोर्थविकल्पस्तद् ज्ञानम्। क्रियमाणमात्मना कर्म, क्रियमाणः खल्वात्मा प्रतिक्षणं तेन तेन भावेन भवता यः तद्भावः स एव कर्मात्मना प्राप्यत्वात्। तत्त्वेकविधमपि द्रव्यकर्मोपाधिसन्निधिसद्भावासद्भावाभ्यामनेकविधम्। तस्य कर्मणो यन्निष्पाद्यं सुखदुःखं तत्कर्मफलम्। तत्र द्रव्यकर्मोपाधिसान्निध्यासद्भावात्कर्म तस्य फलमनाकुलत्वलक्षणं

इवार्थपरिच्छित्तिसमर्थो विकल्पः विकल्पलक्षणमुच्यते। स एव ज्ञानं ज्ञानचेतनेति। **कम्मं जीवेण जं समारद्धं** कर्म जीवेन यत्समारब्धम्। बुद्धिपूर्वकमनोवचनकायव्यापाररूपेण जीवेन यत्सम्यक्कर्तुमारब्धं तत्कर्म भण्यते। सैव कर्मचेतनेति। **तमणेगविधं भणिदं** तच्च कर्म शुभाशुभशुद्धोपयोगभेदेनानेकविधं

विभागपूर्वक अवस्थित [१]विश्व वह अर्थ है। उसके आकारोंका [२]अवभासन वह विकल्प है। और दर्पणके निज विस्तारकी भाँति (अर्थात् जैसे दर्पणके निज विस्तारमें स्व और पर आकार एक ही साथ प्रकाशित होते हैं, उसीप्रकार) जिसमें एक ही साथ स्व-पराकार अवभासित होते हैं, ऐसा अर्थविकल्प वह ज्ञान है।

जो आत्माके द्वारा किया जाता है वह कर्म है। प्रतिक्षण उस-उस भावसे होता हुआ आत्माके द्वारा वास्तवमें किया जानेवाला जो उसका भाव है वही, आत्माके द्वारा [३]प्राप्य होने से कर्म है। और वह (कर्म) एक प्रकारका होनेपर भी, द्रव्यकर्मरूप उपाधिकी निकटताके सद्भाव और असद्भावके कारण अनेक प्रकारका है।

उस कर्मसे उत्पन्न किया जानेवाला सुख-दुःख वह कर्मफल है। वहाँ, द्रव्यकर्मरूप उपाधिकी निकटताके असद्भावके कारण जो कर्म होता है, उसका फल अनाकुलत्व-लक्षण [४]प्रकृतिभूत सुख है; और द्रव्यकर्मरूप उपाधिकी निकटताके सद्भावके कारण जो कर्म होता है, उसका फल [५]विकृति – (विकार) भूत दुःख है, क्योंकि वहाँ सुखके लक्षणका अभाव है।

इसप्रकार ज्ञान, कर्म और कर्मफलका स्वरूप निश्चित हुआ।

---

[१] विश्व = समस्त पदार्थ-द्रव्य-गुण-पर्याय। (पदार्थोंमें स्व और पर ऐसे दो विभाग हैं। जो जाननेवाले आत्माका अपना हो वह स्व है, और दूसरा सब, पर है।)

[२] अवभासन = अवभासन; प्रकाशन; ज्ञात होना; प्रगट होना।

[३] आत्मा अपने भावको प्राप्त करता है, इसलिये वह भाव ही आत्माका कर्म है।

[४] प्रकृतिभूत = स्वभावभूत। (सुख स्वभावभूत है।)

[५] विकृतिभूत = विकारभूत (दुःख विकारभूत है, स्वभावभूत नहीं है।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

प्रकृतिभूतं सौख्यं, यत्तु द्रव्यकर्मोपाधिसान्निध्यसद्भावात्कर्म तस्य फलं सौख्यलक्षणाभावाद्विकृतिभूतं दुःखम् । एवं ज्ञानकर्मकर्मफलस्वरूपनिश्चयः ॥ १२४ ॥

अथ ज्ञानकर्मकर्मफलान्यात्मत्वेन निश्चिनोति –

अप्पा परिणामप्पा परिणामो णाणकम्मफलभावी ।
तम्हा णाणं कम्मं फलं च जादा मुणेदव्वो ॥ १२५ ॥

आत्मा परिणामात्मा परिणामो ज्ञानकर्मफलभावी ।
तस्मात् ज्ञानं कर्म फलं चात्मा ज्ञातव्यः ॥ १२५ ॥

त्रिविधं भणितम् । इदानीं फलचेतना कथ्यते – **फलं ति सोक्खं व दुक्खं वा** फलमिति सुखं दुःखं वा । विषयानुरागरूपं यदशुभोपयोगलक्षणं कर्म तस्य फलमाकुलत्वोत्पादकं नारकादिदुःखं यच्च धर्मानुरागरूपं शुभोपयोगलक्षणं कर्म तस्य फलं चक्रवर्त्यादिपञ्चेन्द्रियभोगानुभवरूपं, तच्चाशुद्धनिश्चयेन सुखमप्याकुलोत्पादकत्वात् शुद्धनिश्चयेन दुःखमेव । यच्च रागादिविकल्परहितशुद्धोपयोगपरिणतिरूपं कर्म तस्य फलमनाकुलत्वोत्पादकं परमानन्दैकरूपसुखामृतमिति । एवं ज्ञानकर्मकर्मफलचेतनास्वरूपं ज्ञातव्यम् ॥ १२४ ॥ अथ ज्ञानकर्मकर्मफलान्यभेदनयेनात्मैव भवतीति प्रज्ञापयति – **अप्पा परिणामप्पा** आत्मा भवति । कथंभूतः । परिणामात्मा परिणामस्वभावः । कस्मादिति चेत् 'परिणामो सयमादा' इति पूर्वं स्वयमेव भणितत्वात् । परिणामः कथ्यते – **परिणामो णाणकम्मफलभावी**

भावार्थ :– जिसमें स्व, स्व-रूपसे और पर, पर-रूपसे (परस्पर एकमेक हुये बिना, स्पष्ट भिन्नतापूर्वक) एक ही साथ प्रतिभासित हो सो ज्ञान है ।

जीवके द्वारा किया जानेवाला भाव वह (जीवका) कर्म है । उसके मुख्य दो भेद हैं (१) निरुपाधिक (स्वाभाविक) शुद्धभावरूप कर्म, और (२) औपाधिक शुभाशुभ भावरूप कर्म ।

इस कर्मके द्वारा उत्पन्न होनेवाला सुख अथवा दुःख कर्मफल है । वहाँ, द्रव्यकर्मरूप उपाधिमें युक्त न होनेसे जो निरुपाधिक शुद्धभावरूप कर्म होता है, उसका फल तो अनाकुलता जिसका लक्षण है ऐसा स्वभावभूत सुख है ; ऐसा द्रव्यकर्मरूप उपाधिमें युक्त होनेसे जो औपाधिक शुभाशुभभावरूप कर्म होता है, उसका फल विकारभूत दुःख है; क्योंकि उसमें अनाकुलता नहीं, किन्तु आकुलता है ।

इसप्रकार ज्ञान, कर्म और कर्मफलका स्वरूप कहा गया ॥ १२४ ॥

अब ज्ञान, कर्म और कर्मफलको आत्मारूपसे निश्चित करते हैं :–

परिणाम-आत्मक जीव छे, परिणाम ज्ञानादिक बने ।
तेथी करमफल, कर्म तेम ज ज्ञान आत्मा जाणजे ॥ १२५ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

आत्मा हि तावत्परिणामात्मैव, परिणामः स्वयमात्मेति स्वयमुक्तत्वात् । परिणामस्तु चेतनात्मकत्वेन ज्ञानं कर्म कर्मफलं वा भवितुं शीलः, तन्मयत्वाच्चेतनायाः । ततो ज्ञानं कर्म कर्मफलं चात्मैव । एवं हि शुद्धद्रव्यनिरूपणायां परद्रव्यसंपर्कासंभवात्पर्यायाणां द्रव्यान्तःप्रलयाच्च शुद्धद्रव्य एवात्मावतिष्ठते ॥ १२५ ॥

अथैवमात्मनो ज्ञेयतामापन्नस्य शुद्धत्वनिश्चयात् ज्ञानतत्त्वसिद्धौ शुद्धात्मतत्त्वोपलम्भो भवतीति तमभिनन्दन् द्रव्यसामान्यवर्णनामुपसंहरति –

परिणामो भवति । किंविशिष्टः । ज्ञानकर्मकर्मफलभावी; ज्ञानकर्मकर्मफलरूपेण भवितुं शील इत्यर्थः । **तम्हा** यस्मादेवं तस्मात्कारणात् । **णाणं** पूर्वसूत्रोक्ता ज्ञानचेतना । **कम्मं** तत्रैवोक्तलक्षणा कर्मचेतना । **फलं च** पूर्वोक्तलक्षणफलचेतना च । **आदा मुणेदव्वो** इयं चेतना त्रिविधाप्यभेदनयेनात्मैव मन्तव्यो ज्ञातव्य इति । एतावता किमुक्तं भवति । त्रिविधचेतनापरिणामेन परिणामी सन्नात्मा किं करोति । निश्चयरत्नत्रयात्मकशुद्धपरिणामेन मोक्षं साधयति, शुभाशुभाभ्यां पुनर्बन्धमिति ॥ १२५ ॥ एवं

गाथा १२५

अन्वयार्थ :– [**आत्मा परिणामात्मा**] आत्मा परिणामात्मक है ; [**परिणामः**] परिणाम [**ज्ञानकर्मफलभावी**] ज्ञानरूप, कर्मरूप और कर्मफलरूप होता है ; [**तस्मात्**] इसलिये [**ज्ञानं कर्म फलं च**] ज्ञान, कर्म और कर्मफल [**आत्मा ज्ञातव्यः**] आत्मा है ऐसा समझना ।

टीका :– प्रथम तो आत्मा वास्तवमें परिणामस्वरूप ही है, क्योंकि 'परिणाम स्वयं आत्मा है' ऐसा (११२ वीं गाथामें भगवत् कुन्दकुन्दाचार्यदेवने) स्वयं कहा है ; तथा परिणाम चेतनास्वरूप होनेसे ज्ञान, कर्म और कर्मफलरूप होनेके स्वभाववाला है, क्योंकि चेतना तन्मय (ज्ञानमय, कर्ममय अथवा कर्मफलमय) होती है । इसलिये ज्ञान, कर्म और कर्मफल आत्मा ही है ।

इसप्रकार वास्तवमें शुद्धद्रव्यके निरूपणमें परद्रव्यके सम्पर्कका (सम्बन्ध ; संग) असंभव होनेसे और पर्यायें द्रव्यके भीतर [१]प्रलीन हो जानेसे आत्मा शुद्धद्रव्य ही रहता है ॥ १२५ ॥

अब, इसप्रकार [२]ज्ञेयपनेको प्राप्त आत्माकी शुद्धताके निश्चयसे ज्ञानतत्त्वकी सिद्धि

---

[१] प्रलीन हो जाना = अत्यंत लीन हो जाना; मग्न हो जाना; डूब जाना; अदृश्य हो जाना ।

[२] ज्ञेयपनेको प्राप्त = ज्ञेयभूत । (आत्मा ज्ञानरूप भी और ज्ञेयरूप भी है, इस ज्ञेयतत्व-प्रज्ञापन अधिकारमें यहाँ द्रव्य सामान्यका निरूपण किया जा रहा है; उसमें आत्मा ज्ञेयभूतरूपसे समाविष्ट हुआ है ।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

कत्ता करणं कम्मं फलं च अप्प त्ति णिच्छिदो समणो ।
परिणमदि णेव अण्णं जदि अप्पाणं लहदि सुद्धं ॥१२६॥

कर्ता करणं कर्म कर्मफलं चात्मेति निश्चितः श्रमणः ।
परिणमति नैवान्यद्यदि आत्मानं लभते शुद्धम् ॥ १२६ ॥

त्रिविधचेतनाकथनमुख्यतया गाथात्रयेण चतुर्थस्थलं गतम् । अथ सामान्यज्ञेयाधिकारसमाप्तौ पूर्वोक्त-भेदभावनायाः शुद्धात्मप्राप्तिरूपं फलं दर्शयति – **कत्ता** स्वतन्त्रः स्वाधीनः कर्ता साधको निष्पादकोऽस्मि भवामि । स कः । **अप्प त्ति** आत्मेति । आत्मेति कोऽर्थः । अहमिति । कथंभूतः । एकः । कस्याः साधकः । निर्मलात्मानुभूतेः । किंविशिष्टः । निर्विकारपरमचैतन्यपरिणामेन परिणतः सन् ।

होनेपर शुद्ध आत्मतत्त्वकी उपलब्धि (अनुभव, प्राप्ति) होती है; इसप्रकार उसका अभिनन्दन करते हुए (अर्थात् आत्माकी शुद्धताके निर्णयकी प्रशंसा करते हुए – धन्यवाद देते हुए), द्रव्यसामान्यके वर्णनका उपसंहार करते हैं :–

गाथा १२६

अन्वयार्थ :– [**यदि**] यदि [**श्रमणः**] श्रमण [**कर्ता करणं कर्म कर्मफलं च आत्मा**] 'कर्ता, करण, कर्म और कर्मफल आत्मा है' [**इति निश्चितः**] ऐसा निश्चयवाला होता हुआ [**अन्यत्**] अन्यरूप [**न एव परिणमति**] परिणमित ही नही हो, [**शुद्धं आत्मानं**] तो वह शुद्ध आत्माको [**लभते**] उपलब्ध करता है ।

टीका :– जो पुरुष इसप्रकार 'कर्ता, करण, कर्म और कर्मफल आत्मा ही है' यह निश्चय [१] करके वास्तवमें परद्रव्यरूप परिणमित नहीं होता, वही पुरुष, जिसका परद्रव्यके साथ संपर्क रुक गया है और जिसकी पर्यायें द्रव्यके भीतर प्रलीन होगई हैं ऐसे शुद्धात्माको उपलब्ध करता है; परन्तु अन्य कोई (पुरुष) ऐसे शुद्ध आत्माको उपलब्ध नहीं करता ।

इसीको स्पष्टतया समझाते हैं :–

---

[१] कर्ता करण इत्यादि आत्मा ही है' ऐसा निश्चय होने पर दो बातें निश्चित हो जाती हैं । एक तो यह कि 'कर्ता, करण इत्यादि आत्मा है, पुद्गलादि नहीं अर्थात् आत्माका परद्रव्यके साथ संबंध नहीं है'; दूसरी – 'अभेद दृष्टिमें कर्ता, करण इत्यादि भेद नहीं हैं, यह सब एक आत्मा ही है अर्थात् पर्यायें द्रव्यके भीतर लीन हो गई हैं ।'

'कर्ता, करम, फल, करण जीव छे एम जो निश्चय करी ।
मुनि अन्य रूप नव परिणमे, प्राप्ति करे शुद्धात्मनी ॥ १२६ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यो हि नामैवं कर्तारं करणं कर्म कर्मफलं चात्मानमेव निश्चित्य न खलु परद्रव्यं परिणमति स एव विश्रान्तपरद्रव्यसंपर्कं द्रव्यान्तःप्रलीनपर्यायं च शुद्धमात्मानमुपलभते, न पुनरन्यः। तथा हि – यदा नामानादिप्रसिद्धपौद्गलिकबन्धनोपाधिसंनिधिप्रधावितोपरागरंजितात्मवृत्तिर्जपापुष्पसंनिधिप्रधावितोपरागरञ्जितात्मवृत्तिः स्फटिकमणिरिव परारोपितविकारोऽहमासं संसारी, तदापि न नाम मम कोऽप्यासीत् तदाप्यहमेक एवोपरक्तचित्स्वभावेन स्वतन्त्रः कर्तासम् अहमेक एवोपरक्तचित्स्वभावेन साधकतमः करणमासम्

करणं अतिशयेन साधकं साधकतमं करणमुपकरणं करणकारकमहमेक एवास्मि भवामि। कस्याः साधकम्। सहजशुद्धपरमात्मानुभूतेः। केन कृत्वा। रागादिविकल्परहितस्वसंवेदनज्ञानपरिणतिबलेन। **कर्म्मं** शुद्धबुद्धैकस्वभावेन परमात्मना प्राप्यं व्याप्यमहमेक एव कर्मकारकमस्मि। **फलं च** शुद्धज्ञानदर्शनस्वभावपरमात्मनः साध्यं निष्पाद्यं निजशुद्धात्मरुचिपरिच्छित्तिनिश्चलानुभूतिरूपाभेदरत्नत्रया-

---

"जब अनादिसिद्ध पौद्गलिक कर्मकी बन्धनरूप उपाधिकी निकटतासे उत्पन्न हुए [१]उपरागके द्वारा जिसकी स्वपरिणति रंजित (विकृत, मलिन) थी ऐसा मैं – जवाकुसुमकी निकटतासे उत्पन्न हुये उपरागसे (लालिमासे) जिसकी स्वपरिणति रंजित (रँगी हुई) हो ऐसे स्फटिक मणिकी भाँति – परके द्वारा [२]आरोपित विकारवाला होनेसे, संसारी था, तब भी (अज्ञातदशामें भी) वास्तवमें मेरा कोई भी (संबंधी) नहीं था। तब भी मैं अकेला ही [३]कर्ता था, क्योंकि मैं अकेला ही उपरक्त चैतन्यरूप स्वभावसे स्वतंत्र था) अर्थात् स्वाधीनतया कर्ता था); मैं अकेला हो करण था, क्योंकि मैं अकेला ही उपरक्त चैतन्यरूप स्वभावके द्वारा साधकतम (उत्कृष्टसाधन) था; मैं अकेला ही कर्म था, क्योंकि मैं अकेला ही उपरक्त चैतन्यरूप परिणमित होनेके स्वभावके कारण आत्मासे प्राप्य (प्राप्त होने योग्य) था; और मैं अकेला ही सुखसे विपरीत लक्षणवाला, 'दुःख' नामक कर्मफल था – जो कि (फल) उपरक्त चैतन्यरूप (फल) परिणमित होनेके स्वभावसे उत्पन्न किया जाता था।

और अब, अनादिसिद्ध पौद्गलिक कर्मकी बंधनरूप उपाधिकी निकटताके नाशसे जिसकी सुविशुद्ध सहज (स्वाभाविक) स्वपरिणति प्रगट हुई है ऐसा मैं – जवाकुसुमकी निकटताके नाशसे जिसकी सुविशुद्ध सहज स्वपरिणति प्रगट हुई हो ऐसे

---

[१] उपराग = किसी पदार्थमें, अन्य उपाधिकी समीपताके निमित्तसे होनेवाला उपाधिके अनुरूप विकारी भाव; औपाधिक भाव; विकार; मलिनता।

[२] आरोपित = (नवीन अर्थात् औपाधिकरूपसे) किये गये। [विकार स्वभावभूत नहीं थे, किन्तु उपाधिके निमित्तसे औपाधिकरूपसे (नवीन) हुए थे।]

[३] कर्ता, करण और कर्मके अर्थोंके लिये १६वीं गाथाका भावार्थ देखना चाहिये।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अहमेक एवोपरक्तचित्परिणमनस्वभावेनात्मना प्राप्यः कर्मासम्, अहमेक एव चोपरक्त-चित्परिणमनस्वभावस्य निष्पाद्यं सौख्यं विपर्यस्तलक्षणं दुःखाख्यं कर्मफलमासम् । इदानीं पुनरनादिप्रसिद्धपौद्गलिककर्मबन्धनोपाधिसन्निधिध्वंसविस्फुरितसुविशुद्धसहजात्मवृत्तिर्जपा पुष्पसंनिधिध्वंसविस्फुरितसुविशुद्धसहजात्मवृत्तिः स्फटिकमणिरिव विश्रान्तपरारोपित-विकारोऽहमेकान्तेनास्मि मुमुक्षुः, इदानीमपि न नाम मम कोऽप्यस्ति, इदानीमप्यहमेक एव सुविशुद्धचित्स्वभावेन स्वतन्त्रः कर्तास्मि, अहमेक एव च सुविशुद्धचित्स्वभावेन साधकतमः करणमस्मि, अहमेक एव च सुविशुद्धचित्परिणमनस्वभावेनात्मना प्राप्यः कर्मास्मि, अहमेक एव च सुविशुद्धचित्परिणमनस्वभावस्य निष्पाद्यमनाकुलत्वलक्षणं सौख्याख्यं कर्मफलमस्मि । एवमस्य बन्धपद्धतौ मोक्षपद्धतौ चात्मानमेकमेव भावयतः

त्मकपरमसमाधिसमुत्पन्नसुखामृतरसास्वादपरिणतिरूपमहमेक एव फलं चास्मि । **णिच्छिदो** एवमुक्त-प्रकारेण निश्चितमतिः सन् **समणो** सुखदुःखजीवितमरणशत्रुमित्रादिसमताभावनापरिणतः श्रमणः परममुनिः **परिणमदि णेव अण्णं जदि** परिणमति नैवान्यं रागादिपरिणामं यदि चेत्, **अप्पाणं लहदि सुद्धं**

स्फटिकमणिकी भाँति—जिसका परके द्वारा आरोपित विकार रुक गया है ऐसा होनेसे एकान्ततः मुमुक्षु (केवल मोक्षार्थी) हूँ; अभी भी (मुमुक्षुदशामें अर्थात् ज्ञानदशामें भी) वास्तवमें मेरा कोई भी नहीं है। अभी भी मैं अकेला ही कर्ता हूँ, क्योंकि मैं अकेला ही सुविशुद्ध चैतन्यरूप स्वभावसे स्वतन्त्र हूँ, (अर्थात् स्वाधीनतया कर्ता हूँ); मैं अकेला ही करण हूँ, क्योंकि मैं अकेला ही सुविशुद्ध चैतन्यरूप स्वभावसे साधकतम हूँ; मैं अकेला ही कर्म हूँ, क्योंकि मैं अकेला ही सुविशुद्ध चैतन्य परिणमित होनेके स्वभावके कारण आत्मासे प्राप्य हूँ और मैं अकेला ही अनाकुलतालक्षणवाला, 'सुख' नामक कर्म, फल हूँ – जो कि (फल) [1]सुविशुद्ध चैतन्यरूप परिणमित होनेके स्वभावसे उत्पन्न किया जाता है।''

– इसप्रकार बंधमार्गमें तथा मोक्षमार्गमें आत्मा अकेला ही है इसप्रकार [2]भानेवाला यह पुरुष परमाणुकी भाँति एकत्वभावनामें उन्मुख होनेसे, (अर्थात् एकत्वके भानेमें

---

[1] सुविशुद्धचैतन्यपरिणमनस्वभाव आत्माका कर्म है, और वह कर्म अनाकुलतास्वरूप सुखको उत्पन्न करता है, इसलिये सुख वह कर्मफल है। सुख आत्माकी ही अवस्था होनेसे आत्मा ही कर्मफल है।

[2] भाना = अनुभव करना; समझना; चिन्तवन करना ['किसी जीवका – अज्ञानी या ज्ञानीका – परके साथ संबन्ध नहीं है। बंधमार्गमें आत्मा स्वयं निजको निजसे बाँधता था और निजको (अर्थात् अपने दुःखपर्यायरूप फलको) भोगता था। अब मोक्षमार्गमें आत्मा स्वयं निजको निजसे मुक्त करता है और निजको (अर्थात् अपने सुखपर्याय-रूप फलको) भोगता है। – ऐसे एकत्वको सम्यग्दृष्टि जीव भाता है – अनुभव करता है – समझता है – चिन्तवन करता है। मिथ्यादृष्टि इससे विपरीतभावनावाला होता है।]

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

परमाणोरिवैकत्वभावनोन्मुखस्य परद्रव्यपरिणतिर्न जातु जायते। परमाणुरिव भावितैकत्वश्च परेण नो संपृच्यते। ततः परद्रव्यासंपृक्तत्वात्सुविशुद्धो भवति। कर्तृकरणकर्मकर्मफलानि चात्मत्वेन भावयन् पर्यायैर्न संकीर्यते; ततः पर्यायासंकीर्णत्वाच्च सुविशुद्धो भवतीति ॥ १२६ ॥

वसंततिलका छन्द।

द्रव्यान्तरव्यतिकरादपसारितात्मा
सामान्यमज्जितसमस्तविशेषजातः।

तदात्मानं भावकर्मद्रव्यकर्मनोकर्मरहितत्वेन शुद्धं शुद्धबुद्धैकस्वभावं लभते प्राप्नोति इत्यभिप्रायो भगवतां **श्रीकुन्दकुन्दाचार्यदेवानाम्** ॥ १२६ ॥ एवमेकसूत्रेण पञ्चमस्थलं गतम्। इति सामान्यज्ञेयाधिकारमध्ये स्थलपञ्चकेन भेदभावना गता। इत्युक्तप्रकारेण 'तम्हा तस्स णमाइं' इत्यादिपञ्चत्रिंशत्सूत्रैः **सामान्यज्ञेयाधिकार**व्याख्यानं समाप्तम्। इत उर्ध्वमेकोनविंशतिगाथाभिर्जीवाजीवद्रव्यादिविवरणरूपेण विशेषज्ञेयव्याख्यानं करोति। तत्राष्टस्थलानि भवन्ति। तेष्वादौ जीवाजीवत्वकथनेन प्रथमगाथा, लोकालोकत्वकथनेन द्वितीया, सक्रियनिःक्रियत्वव्याख्यानेन तृतीया चेति। 'दव्वं जीवमजीवं' इत्यादि-

---

तत्पर होनेसे), उसे परद्रव्यरूप परिणति किंचित् नहीं होती; और परमाणुकी भाँति (जैसे एकत्वभावसे परिणमित परमाणु परके साथ संगको प्राप्त नहीं होता उसी-प्रकार–),एकत्वको भानेवाला पुरुष परके साथ [१]संपृक्त नहीं होता; इसलिये परद्रव्यके साथ असंबद्धताके कारण वह सुविशुद्ध होता है। और कर्ता, करण, कर्म, तथा कर्मफलको [२]आत्मारूपसे भाता हुआ वह पुरुष पर्यायोंसे संकीर्ण (खंडित) नहीं होता; और इसलिये पर्यायोंके द्वारा संकीर्ण न होनेसे सुविशुद्ध होता है ॥ १२६ ॥

[अब, श्लोकद्वारा इसी आशयको व्यक्त करके शुद्धनयकी महिमा करते हैं :–]

अर्थ :–जिसने अन्य द्रव्यसे भिन्नताके द्वारा आत्माको एक ओर हटा लिया है (अर्थात् परद्रव्योंसे अलग दिखाया है) तथा जिसने समस्त विशेषोंके समूहको सामान्यमें लीन किया है (अर्थात् समस्त पर्यायोंको द्रव्यके भीतर डूबा हुआ दिखाया है)–ऐसा जो यह, उद्धत मोहकी लक्ष्मी को (ऋद्धिको, शोभाको) लूट लेनेवाला शुद्धनय है, उसने उत्कट विवेकके द्वारा तत्वको (आत्मस्वरूपको) [३]विविक्त किया है।

---

[१] संपृक्त = संपर्कवाला; संबंधवाला; संगवाला।

[२] सम्यग्दृष्टि जीव भेदोंको न भाकर अभेद आत्माको ही भाता – अनुभव करता है।

[३] विविक्त = शुद्ध; अकेला; अलग।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

इत्येष शुद्धनय उद्धतमोहलक्ष्मी-
लुण्टाक उत्कटविवेकविविक्ततत्त्वः ॥ ७ ॥

मंदाक्रांता छन्द।

इत्युच्छेदात्परपरिणतेः कर्तृकर्मादिभेद-
भ्रान्तिध्वंसादपि च सुचिराल्लब्धशुद्धात्मतत्त्वः।
सञ्चिन्मात्रे महसि विशदे मूर्च्छितश्चेतनोऽयं
स्थास्यत्युद्यत्सहजमहिमा सर्वदा मुक्त एव ॥ ८ ॥

अनुष्टुप् छंद।

द्रव्यसामान्यविज्ञाननिम्नं कृत्वेति मानसम्।
तद्विशेषपरिज्ञानप्राग्भारः क्रियतेऽधुना ॥ ९ ॥

गाथात्रयेण प्रथमस्थलम्। तदनन्तरं ज्ञानादिविशेषगुणानां स्वरूपकथनेन 'लिंगेहिं जेहिं' इत्यादि-गाथाद्वयेन द्वितीयस्थलम्। अथानन्तरं स्वकीयस्वकीयविशेषगुणोपलक्षितद्रव्याणां निर्णयार्थं 'वण्णरस' इत्यादिगाथात्रयेण तृतीयस्थलम्। अथ पञ्चास्तिकायकथनमुख्यत्वेन 'जीवा पोग्गलकाया' इत्यादि-गाथाद्वयेन चतुर्थस्थलम्। अतः परं द्रव्याणां लोकाकाशमाधार इति कथनेन प्रथमा, यदेवाकाशद्रव्यस्य प्रदेशलक्षणं तदेव शेषाणामिति कथनरूपेण द्वितीया चेति 'लोगालोगेसु' इत्यादिसूत्रद्वयेन पञ्चमस्थलम्। तदनन्तरं कालद्रव्यस्याप्रदेशत्वस्थापनरूपेण प्रथमा, समयरूपः पर्यायकालः कालाणुरूपो द्रव्यकाल

[अब शुद्धनयके द्वारा शुद्ध आत्मस्वरूपको प्राप्त करनेवाले आत्माकी महिमा श्लोक द्वारा कहकर, द्रव्यसामान्यके वर्णनकी पूर्णाहुति की जाती है :-]

अर्थ :—इसप्रकार परपरिणतिके उच्छेदसे (अर्थात् परद्रव्यरूप परिणमनके नाशसे) तथा कर्ता, कर्म इत्यादि भेदोंकी भ्रांतिके भी नाशसे अन्तमें जिसने शुद्ध आत्म-तत्वको उपलब्ध किया है — ऐसा यह आत्मा, चैतन्यमात्ररूप विशद (निर्मल) तेजमें लीन होता हुआ, अपनी सहज (स्वाभाविक) महिमाके प्रकाशमानरूपसे सर्वदा मुक्त ही रहेगा।

[अब, श्लोक द्वारा नवीन विषयको—द्रव्यविशेषके वर्णनको—सूचित किया जाता है :—]

अर्थ :—इसप्रकार द्रव्यसामान्यके ज्ञानसे मनको गंभीर करके, अब द्रव्यविशेषके [1]परिज्ञानका प्रारंभ किया जाता है।

---

[1] परिज्ञान=विस्तारपूर्वक ज्ञान।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

इति प्रवचनसारवृत्तौ तत्त्वदीपिकायां श्रीमदमृतचंद्रसूरिविरचितायां ज्ञेयतत्त्वप्रज्ञापने द्रव्यसामान्यप्रज्ञापनं समाप्तम् ।

अथ द्रव्यविशेषप्रज्ञापनं तत्र द्रव्यस्य जीवाजीवत्वविशेषं निश्चिनोति –

दव्वं जीवमजीवं जीवो पुण चेदणोवओगमओ ।
पोग्गलदव्वप्पमुहं अचेदणं हवदि य अजीवं ॥ १२७ ॥

द्रव्यं जीवोऽजीवो जीवः पुनश्चेतनोपयोगमयः ।
पुद्गलद्रव्यप्रमुखोऽचेतनो भवति चाजीवः ॥ १२७ ॥

इति कथनरूपेण द्वितीया चेति 'समओ दु अप्पदेसो' इत्यादिगाथाद्वयेन षष्ठस्थलम् । अथ प्रदेशलक्षणकथनेन प्रथमा, तिर्यक्प्रचयोर्ध्वप्रचयस्वरूपकथनेन द्वितीया चेति 'आगासमणुणिविट्ठं' इत्यादिसूत्रद्वयेन सप्तमस्थलम् । तदनन्तरं कालाणुरूपद्रव्यकालस्थापनरूपेण 'उप्पादो पद्धंसो' इत्यादिगाथात्रयेणाष्टमस्थलमिति विशेषज्ञेयाधिकारे समुदायपातनिका । तद्यथा – अथ जीवाजीवलक्षणमावेदयति – **दव्वं जीवमजीवं** द्रव्यं जीवाजीवलक्षणं भवति । **जीवो पुण चेदणो** जीवः पुनश्चेतनः

इसप्रकार (श्रीमद्भगवत्कुन्दकुन्दाचार्यदेवप्रणीत) श्री प्रवचनसार शास्त्रकी श्रीमद् अमृतचंद्राचार्यदेव विरचित तत्वदीपिका नामकी टीकामें ज्ञेयतत्त्व–प्रज्ञापनमें द्रव्यसामान्यप्रज्ञापन समाप्त हुआ ।

अब, द्रव्यविशेषका प्रज्ञापन करते हैं (अर्थात् द्रव्यविशेषोंको–द्रव्यके भेदोंको–बतलाते हैं) । उसमें (प्रथम), द्रव्यके जीव-अजीवपनेरूप विशेषको निश्चित करते हैं, (अर्थात् द्रव्यके जीव और अजीव–ऐसे दो भेद बतलाते हैं) :–

गाथा १२७

अन्वयार्थ :–[**द्रव्यं**] द्रव्य [**जीवः अजीवः**] जीव और अजीव है । [**पुनः**] उसमें [**चेतनोपयोगमयः**] चेतनामय तथा उपयोगमय सो [**जीवः**] जीव है, [**च**] और [**पुद्गलद्रव्यप्रमुखः अचेतनः**] पुद्गलद्रव्यादिक अचेतन द्रव्य के [**अजीवः भवति**] अजीव हैं ।

टीका :–यहाँ (इस विश्वमें) द्रव्य, एकत्वके कारणभूत द्रव्यत्वसामान्यको छोड़े

छे द्रव्य जीव, अजीव, चित-उपयोगमय ते जीव छे ।
पुद्गल प्रमुख जे छे अचेतन द्रव्य, तेह अजीव छे ॥ १२७ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

इह हि द्रव्यमेकत्वनिबन्धनभूतं द्रव्यत्वसामान्यमनुज्झदेव तदधिरूढविशेषलक्षण-सद्भावादन्योन्यव्यवच्छेदेन जीवाजीवत्वविशेषमुपढौकते। तत्र जीवस्यात्मद्रव्यमेवैका व्यक्तिः। अजीवस्य पुनः पुद्गलद्रव्यं धर्मद्रव्यमधर्मद्रव्यं कालद्रव्यमाकाशद्रव्यं चेति पञ्च व्यक्तयः। विशेषलक्षण जीवस्य चेतनोपयोगमयत्वं; अजीवस्य पुनरचेतनत्वम्। तत्र यत्र स्वधर्मव्यापकत्वात्स्वरूपत्वेन द्योतमानयानपायिन्या भगवत्या संवित्तिरूपया चेतनया यत्परिणामलक्षणेन द्रव्यवृत्तिरूपेणोपयोगेन च निर्वृत्तत्वमवतीर्णं प्रतिभाति स जीवः। यत्र पुनरुपयोगसहचरिताया यथोदितलक्षणायाश्चेतनाया अभावाद्बहिरन्तश्चाचेतनत्व-मवतीर्णं प्रतिभाति सोऽजीवः॥ १२७॥

स्वतःसिद्धया बहिरङ्गकारणनिरपेक्षया बहिरन्तश्च प्रकाशमानया नित्यरूपया निश्चयेन परमशुद्ध-चेतनया, व्यवहारेण पुनरशुद्धचेतनया च युक्तत्वाच्चेतनो भवति। पुनरपि किंविशिष्टः। **उवओगमओ** उपयोगमयः अखण्डैकप्रतिभासमयेन सर्वविशुद्धेन केवलज्ञानदर्शनलक्षणेनार्थग्रहणव्यापाररूपेण निश्चय-नयेनेत्थंभूतशुद्धोपयोगेन, व्यवहारेण पुनर्मतिज्ञानाद्यशुद्धोपयोगेन च निर्वृत्तत्वान्निष्पन्नत्वादुपयोगमयः। **पोग्गलदव्वप्पमुहं अचेदणं हवदि अजीवं** पुद्गलद्रव्यप्रमुखमचेतनं भवत्यजीवद्रव्यं; पुद्गलधर्माधर्मा-काशकालसंज्ञं द्रव्यपञ्चकं पूर्वोक्तलक्षणचेतनाया उपयोगस्य चाभावादजीवमचेतनं भवतीत्यर्थः॥ १२७॥

विना ही, उसमें रहे हुए विशेषलक्षणोंके सद्भावके कारण एक-दूसरेसे पृथक् किये जानेपर जीवत्वरूप और अजीवत्वरूप विशेषको प्राप्त होता है। उसमें, जीवका आत्म-द्रव्य ही एक भेद है; और अजीवके पुद्गल द्रव्य; धर्मद्रव्य, अधर्मद्रव्य, कालद्रव्य, तथा आकाशद्रव्य – यह पाँच भेद हैं। जीवका विशेषलक्षण चेतना-उपयोगमयत्व (चेतना-) मयपना और उपयोगमयपना) है; और अजीवका, (विशेष लक्षण) अचेतनपना है। वहाँ (जीवके) स्वधर्मोंमें व्यापनेवाली होनेसे (जीवके) स्वरूपरूपसे प्रकाशित होती हुई, अविनाशिनी; भगवती, संवेदनरूप चेतनाके द्वारा तथा चेतनापरिणामलक्षण, [१]द्रव्यपरिणतिरूप उपयोगके द्वारा जिसमें निष्पन्नपना (रचनारूपपना) अवतरित प्रतिभासित होता है, वह जीव है और जिसमें उपयोगके साथ रहनेवाली [२]यथोक्त लक्षणवाली चेतनाका अभाव होनेसे बाहर तथा भीतर अचेतनपना अवतरित प्रतिभासित होता है, वह अजीव है।

भावार्थ :– द्रव्यत्वरूप सामान्यकी अपेक्षासे द्रव्योंमें एकत्व है तथापि विशेषलक्षणोंकी अपेक्षासे उनके जीव और अजीव ऐसे दो भेद हैं। जो (द्रव्य) भगवती चेतनाके द्वारा

---

[१] चेतनाका परिणामस्वरूप उपयोग जीवद्रव्यकी परिणति है।

[२] यथोक्त लक्षणवाली=ऊपर कहे अनुसार लक्षणवाली (चेतनाका लक्षण ऊपर ही कहनेमें आया है।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ लोकालोकत्वविशेषं निश्चिनोति –

पोग्गलजीवणिबद्धो धम्माधम्मत्थिकायकालड्ढो ।
वट्टदि आगासे जो लोगो सो सव्वकाले दु ॥ १२८ ॥

पुद्गलजीवनिबद्धो धर्माधर्मास्तिकायकालाढ्यः ।
वर्तते आकाशे यो लोकः स सर्वकाले तु ॥ १२८ ॥

अस्ति हि द्रव्यस्य लोकालोकत्वेन विशेषविशिष्टत्वं स्वलक्षणसद्भावात् । स्वलक्षणं हि लोकस्य षड्द्रव्यसमवायात्मकत्वं, अलोकस्य पुनः केवलाकाशात्मकत्वम् । तत्र सर्व-

---

अथ लोकालोकरूपेण पदार्थस्य द्वैविध्यमाख्याति – **पोग्गलजीवणिबद्धो** अणुस्कन्धभेदभिन्नाः पुद्गलास्तावत्तथैवामूर्तत्वातीन्द्रियज्ञानमयत्वनिर्विकारपरमानन्दैकसुखमयत्वादिलक्षणा जीवाश्चेत्थंभूतजीवपुद्गलैर्निबद्धः संबद्धो भृतः पुद्गलजीवनिबद्धः । **धम्माधम्मत्थिकायकालड्ढो** धर्माधर्मास्तिकायौ च कालश्च धर्माधर्मास्तिकायकालास्तैराढ्यो भृतो धर्माधर्मास्तिकायकालाढ्यः । **जो** यः एतेषां पञ्चानामित्थंभूतसमुदायो राशिः समूहः । **वट्टदि** वर्तते । कस्मिन् । **आगासे** अनन्तानन्ताकाशद्रव्यस्य मध्यवर्तिनि लोकाकाशे । **सो लोगो** स पूर्वोक्तपञ्चानां समुदायस्तदाधारभूतं लोकाकाशं चेति षड्द्रव्यसमूहो लोको

और चेतनाके परिणामस्वरूप उपयोग द्वारा रचित है वह जीव है, और जो (द्रव्य) चेतनारहित होनेसे अचेतन है वह अजीव है । जीवका एक ही भेद है ; अजीवके पाँच भेद हैं । इन सबका विस्तृत विवेचन आगे किया जायगा ॥ १२७ ॥

अब (द्रव्यके) लोकालोकत्वरूप विशेष (भेद) निश्चित करते हैं :–

गाथा १२८

अन्वयार्थ :– [**आकाशे**] आकाशमें [**यः**] जो भाग [**पुद्गलजीवनिबद्धः**] जीव और पुद्गलसे संयुक्त [**धर्माधर्मास्तिकायकालाढ्यः वर्तते**] तथा धर्मास्तिकाय अधर्मास्तिकाय और कालसे समृद्ध है, [**सः**] वह [**सर्वकाले तु**] सर्वकालमें [**लोकः**] लोक है । (शेष केवल आकाश वह अलोक है ।)

टीका :– वास्तवमें द्रव्य लोकत्व और अलोकत्वके भेदसे विशेषवान् है, क्योंकि अपने-अपने लक्षणोंका सद्भाव है । लोकका स्वलक्षण षड्द्रव्यसमवायात्मकपना (छह

आकाशमां जे भाग धर्म-अधर्म-काल सहित छे ।
जीव-पुद्गलोथी युक्त छे, ते सर्वकाले लोक छे ॥ १२८ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

द्रव्यव्यापिनि परममहत्याकाशे यत्र यावति जीवपुद्गलौ गतिस्थितिधर्माणौ गतिस्थितो आस्कन्दतस्तद्गतिस्थितिनिबन्धनभूतौ च धर्माऽधर्मावभिव्याप्यावस्थितौ, सर्वद्रव्यवर्तना-निमित्तभूतश्च कालो नित्यदुर्ललितस्तत्तावदाकाशं शेषाण्यशेषाणि द्रव्याणि चेत्यमीषां समवाय आत्मत्वेन स्वलक्षणं यस्य स लोकः। यत्र यावति पुनराकाशे जीवपुद्गलयोर्गतिस्थिती न संभवतो धर्माधर्मौ नावस्थितौ, न कालो दुर्ललितस्तावत्केवलमाकाशमात्मत्वेन स्वलक्षणं यस्य सोऽलोकः ॥ १२८ ॥

अथ क्रियाभावतद्भावविशेषं निश्चिनोति –

उप्पादट्ठिदिभंगा पोग्गलजीवप्पगस्स लोगस्स ।
परिणामा जायंते संघादादो व भेदादो ॥ १२९ ॥

उत्पादस्थितिभङ्गाः पुद्गलजीवात्मकस्य लोकस्य ।
परिणामाज्जायन्ते संघाताद्वा भेदात् ॥ १२९ ॥

भवति। **क्व**। **सव्वकाले दु** सर्वकाले तु। दृबतहिर्भूतमनन्तानन्ताकाशमलोक इत्यभिप्रायः ॥ १२८ ॥ अथ द्रव्याणां सक्रियनिःक्रियत्वेन भेदं दर्शयतीत्येका पातनिका, द्वितीया तु जीवपुद्गलयोरर्थव्यञ्जनपर्यायौ द्वौ शेषद्रव्याणां तु मुख्यवृत्त्यार्थपर्याय इति व्यवस्थापयति – **जायंते** जायन्ते। के कर्तारः। **उप्पाद-**

द्रव्योंका समुदायस्वरूपपना) है और अलोकका केवल आकाशात्मकपना (मात्र आकाश-स्वरूपपना] है। वहाँ, सर्व द्रव्योंमें व्याप्त होनेवाले परम महान आकाशमें, जहाँ जितनेमें गतिस्थिति धर्मवाले जीव तथा पुद्गल गति-स्थितिको प्राप्त होते हैं, (जहाँ जितनेमें) उन्हें, गति-स्थितिमें निमित्तभूत धर्म तथा अधर्म व्याप्त होकर रहते हैं और (जहाँ जितनेमें) सर्वद्रव्योंको वर्तनामें निमित्तभूत काल सदा वर्तता है, वह उतना आकाश तथा शेष समस्त द्रव्य – उनका समुदाय जिसका [1]स्वपनेसे स्वलक्षण है, वह लोक है; और जहाँ जितने आकाशमें जीव तथा पुद्गलकी गति-स्थिति नहीं होती, धर्म तथा अधर्म नहीं रहते और काल नहीं वर्तता, उतना केवल आकाश जिसका स्वपनेसे स्वलक्षण है, वह अलोक है ॥ १२८ ॥

---

[1] स्वपनेसे=निजरूपसे (षड्द्रव्यसमुदाय ही लोक है, अर्थात् वही लोकका स्वत्व है – स्वरूप है। इसलिये लोकके स्वपनेसे षड्द्रव्योंका समुदाय लोकका स्वलक्षण है।)

उत्पाद, व्यय, ने ध्रुवता जीवपुद्गलात्मक लोकने ।
परिणाम द्वारा, भेद वा संघात द्वारा थाय छे ॥ १२९ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

क्रियाभाववत्त्वेन केवलभाववत्त्वेन च द्रव्यस्यास्ति विशेषः। तत्र भाववन्तौ क्रियावन्तौ च पुद्गलजीवौ परिणामाद्भेदसंघाताभ्यां चोत्पद्यमानावतिष्ठमानभज्यमानत्वात्। शेषद्रव्याणि तु भाववन्त्येव परिणामादेवोत्पद्यमानावतिष्ठमानभज्यमानत्वादिति निश्चयः। तत्र परिणाममात्रलक्षणो भावः, परिस्पन्दनलक्षणा क्रिया। तत्र सर्वाण्यपि द्रव्याणि परिणामस्वभावत्वात् परिणामेनोपात्तान्वयव्यतिरेकाण्यवतिष्ठमानोत्पद्यमानभज्यमानानि भाववन्ति भवन्ति। पुद्गलास्तु परिस्पन्दस्वभावत्वात्परिस्पन्देन भिन्नाः संघातेन संहताः पुनर्भेदेनोत्पद्यमानावतिष्ठमानभज्यमानाः क्रियावन्तश्च भवन्ति। तथा जीवा अपि

ट्ठिदिभंगा उत्पादस्थितिभङ्गाः। कस्य संबन्धिनः। **लोगस्स** लोकस्य। किंविशिष्टस्य। **पोग्गलजीवप्पगस्स** पुद्गलजीवात्मकस्य, पुद्गलजीवावित्युपलक्षणं षड्द्रव्यात्मकस्य। कस्मात्सकाशात् जायन्ते। **परिणामादो** परिणामात् एकसमयवर्तिनोऽर्थपर्यायात्। **संघादादो व भेदादो** न केवलमर्थपर्यायात्सकाशाज्जायन्ते जीवपुद्गलानामुत्पादादयः संघाताद्वा, भेदाद्वा व्यञ्जनपर्यायादित्यर्थः। तथा हि – धर्माधर्माकाशकालानां मुख्यवृत्त्यैकसमयवर्तिनोऽर्थपर्याया एव, जीवपुद्गलानामर्थपर्यायव्यञ्जनपर्यायाश्च। कथमिति चेत्। प्रतिसमयपरिणतिरूपा अर्थपर्याया भण्यन्ते। यदा जीवोऽनेन शरीरेण सह भेदं वियोगं त्यागं कृत्वा भवान्तरशरीरेण सह संघातं मेलापक करोति तदा विभावव्यञ्जनपर्यायो भवति,

---

अब, 'क्रिया' रूप और 'भाव' रूप ऐसे जो द्रव्यके भाव हैं उनकी अपेक्षासे द्रव्यका विशेष (भेद) निश्चित करते हैं :–

गाथा १२९

अन्वयार्थ :– [**पुद्गलजीवात्मकस्य लोकस्य**] पुद्गल-जीवात्मक लोकके [**परिणामात्**] परिणमनसे और [**संघातात् वा भेदात्**] संघात (मिलने) और भेद (पृथक् होने)से [**उत्पादस्थितिभंगाः**] उत्पाद, ध्रौव्य और व्यय [**जायन्ते**] होते हैं।

टीका :– कोई द्रव्य 'भाव' तथा 'क्रिया वाले' होनेसे और कोई द्रव्य केवल 'भाव' वाले होनेसे, – इस अपेक्षासे द्रव्यका विशेष (भेद) है। वहाँ पुद्गल तथा जीव (१) भाववाले तथा (२) क्रियावाले हैं, क्योंकि (१) परिणाम द्वारा तथा (२) संघात और भेदके द्वारा वे उत्पन्न होते हैं, टिकते हैं और नष्ट होते हैं। शेष द्रव्य तो भाववाले ही हैं, क्योंकि वे परिणामके द्वारा ही उत्पन्न होते हैं, टिकते हैं और नष्ट होते हैं – ऐसा निश्चय है।

उसमें, 'भाव' का लक्षण परिणाममात्र है; 'क्रिया' का लक्षण परिस्पंद (कम्पन) है। वहाँ समस्त ही द्रव्य भाववाले हैं, क्योंकि परिणामस्वभाववाले होनेसे परिणामके

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

परिस्पन्दस्वभावत्वात्परिस्पन्देन नूतनकर्मनोकर्मपुद्गलेभ्यो भिन्नास्तैः सह संघातेन, संहताः पुनर्भेदेनोत्पद्यमानावतिष्ठमानभज्यमानाः क्रियावन्तश्च भवन्ति ॥ १२९ ॥

अथ द्रव्यविशेषो गुणविशेषादिति प्रज्ञापयति –

लिंगेहिं जेहिं दव्वं जीवमजीवं च हवदि विण्णादं ।
तेऽतब्भावविसिट्ठा मुत्तामुत्ता गुणा णेया ॥ १३० ॥

तस्मादेव भवान्तरसंक्रमणात्सक्रियत्वं भण्यते । पुद्गलानां तथैव विवक्षितस्कन्धविघटनात्सक्रियत्वेन स्कन्धान्तरसंयोगे सति विभावव्यञ्जनपर्यायो भवति । मुक्तजीवानां तु निश्चयरत्नत्रयलक्षणेन परमकारणसमयसारसंज्ञेन निश्चयमोक्षमार्गबलेनायोगिचरमसमये नखकेशान्विहाय परमौदारिकशरीरस्य विलीयमानरूपेण विनाशे सति केवलज्ञानाद्यनन्तचतुष्टयव्यक्तिलक्षणेन परमकार्यसमयसाररूपेण स्वभावव्यञ्जनपर्यायेण कृत्वा योऽसावुत्पादः स भेदादेव भवति, न संघातात् । कस्मादिति चेत् शरीरान्तरेण सह संबन्धाभावादिति भावार्थः ॥ १२९ ॥ एवं जीवाजीवत्वलोकालोकत्वसक्रियनिःक्रियत्वकथनक्रमेण प्रथमस्थले गाथात्रयं गतम् । अथ ज्ञानादिविशेषगुणभेदेन द्रव्यभेदमावेदयति – **लिंगेहिं जेहिं**

द्वारा [1]अन्वय और व्यतिरेकोंको प्राप्त होते हुऐ वे उत्पन्न होते हैं, टिकते हैं और नष्ट होते हैं । पुद्गल तो (भाववाले होनेके अतिरिक्त) क्रियावाले भी होते हैं, क्योंकि परिस्पंदस्वभाववाले होनेसे परिस्पंदके द्वारा [2]पृथक् पुद्गल एकत्रित होजाते हैं इसलिये, और एकत्रित – मिले हुए पुद्गल पुनः पृथक् होजाते हैं, इसलिये (इस अपेक्षासे) वे उत्पन्न होते हैं, टिकते हैं और नष्ट होते हैं । तथा जीव भी (भाववाले होनेके अतिरिक्त) क्रियावाले भी होते हैं, क्योंकि परिस्पन्दस्वभाववाले होनेसे परिस्पंदके द्वारा नवीन कर्म – नोकर्मरूप पुद्गलोंसे भिन्न जीव उनके साथ एकत्रित होनेसे और [3]कर्म-नोकर्मरूप पुद्गलोंके साथ एकत्रित हुए जीव बादमें पृथक् होनेके (इस अपेक्षासे) वे उत्पन्न होते हैं, टिकते हैं और नष्ट होते हैं ॥ १२९ ॥

अब यह बतलाते हैं कि – गुण विशेष से (गुणोंके भेदसे) द्रव्य विशेष (द्रव्योंका भेद) होता है :–

---

[1] अन्वय, स्थायीपनेको और व्यतिरेक, उत्पाद तथा व्ययपनेको बतलाते हैं ।

[2] पृथक् पुद्गल कंपनके द्वारा एकत्रित होते हैं । वहाँ वे भिन्नपनेसे नष्ट हुए, पुद्गलपनेसे टिके और एकत्रपनेसे उत्पन्न हुए ।

[3] ज्ञानावरणादि कर्मरूप और शरीरादि नोकर्मरूप पुद्गलोंके साथ मिला हुआ जीव कंपनसे पुनः पृथक् हो जाता है । वहाँ (उन पुद्गलोंके साथ) एकत्ररूपसे वह नष्ट हुआ, जीवरूपसे स्थिर हुआ और (उनसे) पृथक्रूपसे उत्पन्न हुआ ।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

लिंगैर्यैर्द्रव्यं जीवोऽजीवश्च भवति विज्ञातम् ।
तेऽतद्भावविशिष्टा मूर्तामूर्ता गुणा ज्ञेयाः ।। १३० ।।

द्रव्यमाश्रित्य परानाश्रयत्वेन वर्तमानैर्लिङ्ग्यते गम्यते द्रव्यमेतैरिति लिङ्गानि गुणाः । ते च यद्द्रव्यं भवति न तद्गुणा भवन्ति, ये गुणा भवन्ति ते न द्रव्यं भवतीति द्रव्यादतद्भावेन विशिष्टाः सन्तो लिङ्गलिङ्गिप्रसिद्धौ तल्लिङ्गत्वमुपढौकन्ते । अथ ते द्रव्यस्य जीवोऽयमजीवोऽयमित्यादिविशेषमुत्पादयन्ति, स्वयमपि तद्भावविशिष्टत्वेनोपात्त-

---

लिङ्गैर्यैः सहजशुद्धपरमचैतन्यविलासरूपैस्तथैवाचेतननैर्जड़रूपैर्वा लिङ्गैश्चिह्नैर्विशेषगुणैर्यैः कारणभूतैर्जीवेन कर्तृभूतेन **हवदि विण्णादं** विशेषेण ज्ञातं भवति । किं कर्मतापन्नम् । **दव्वं** द्रव्यम् । कथंभूतम् । **जीवमजीवं च** जीवद्रव्यमजीवद्रव्यं च । **ते मुत्तामुत्ता गुणा णेया** ते तानि पूर्वोक्तचेतनाचेतनलिङ्गानि मूर्तामूर्तगुणा ज्ञेया ज्ञातव्याः । ते च कथंभूताः । **अतब्भावविसिट्ठा** अतद्भावविशिष्टाः । तद्यथा-

---

गाथा १३०

अन्वयार्थ :– [**यैः लिंगैः**] जिन लिंगोंसे [**द्रव्यं**] द्रव्य [**जीवः अजीवः च**] जीव और अजीवके रूपमें [**विज्ञातं भवति**] ज्ञात होता है, [**ते**] वे [**अतद्भावविशिष्टाः**] अतद्भाव विशिष्ट (द्रव्यसे अतद्भावके द्वारा भिन्न ऐसे) [**मूर्तामूर्ताः**] मूर्त-अमूर्त [**गुणाः**] गुण [**ज्ञेयाः**] जानने चाहिये ।

टीका :– द्रव्यका आश्रय लेकर और परके आश्रयके बिना प्रवर्तमान होनेसे जिनके द्वारा द्रव्य 'लिंगित' (प्राप्त) होता है – पहचाना जा सकता है, ऐसे लिंग गुण हैं । वे (गुण), 'जो द्रव्य हैं वे गुण नहीं हैं, जो गुण हैं वे द्रव्य नहीं हैं' – इस अपेक्षासे द्रव्यसे [१]अतद्भावके द्वारा विशिष्ट (भिन्न) वर्तते हुए, लिंग और [२]लिंगीके रूपमें प्रसिद्धि (ख्याति) के समय द्रव्यके लिंगत्वको प्राप्त होते हैं । अब, वे द्रव्यमें 'यह जीव है, यह अजीव है' ऐसा विशेष (भेद) उत्पन्न करते हैं, क्योंकि स्वयं भी [३]तद्भावके द्वारा [४]विशिष्ट होनेसे विशेषको प्राप्त हैं । जिस-जिस द्रव्यका जो-जो स्वभाव हो उस-उसका

---

[१] अतद्भाव = (कथंचित्) उसरूप नहीं होना वह;
[२] लिंगी = लिंगवाला, (विशेषगुण वह लिंग चिह्न – लक्षण है और लिंगी वह द्रव्य है)
[३] तद्भाव = उसरूप, उसपना ; उसपनेसे होना ; स्वरूप ।
[४] विशिष्ट = विशेषतावाला ; खास; भिन्न ।

जे लिंगथी द्रव्यो महीं 'जीव' 'अजीव' अेम जणाय छे ।
ते जाण मूर्त-अमूर्त गुण, अतत्पणाथी विशिष्ट जे ।। १३० ।।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

विशेषत्वात्। यतो हि यस्य यस्य द्रव्यस्य यो यः स्वभावस्तस्य तस्य तेन तेन विशिष्टत्वात्तेषामस्ति विशेषः। अत एव च मूर्तानाममूर्तानां च द्रव्याणां मूर्तत्वेनामूर्तत्वेन च तद्भावेन विशिष्टत्वादिमे मूर्ता गुणा इमे अमूर्ता इति तेषां विशेषो निश्चेयः ॥ १३० ॥

अथ मूर्तामूर्तगुणानां लक्षणसंबन्धमाख्याति –

मुत्ता इंदियगेज्झा पोग्गलदव्वप्पगा अणेगविधा।
दव्वाणममुत्ताणं गुणा अमुत्ता मुणेदव्वा ॥ १३१ ॥

मूर्ता इन्द्रियग्राह्याः पुद्गलद्रव्यात्मका अनेकविधाः।
द्रव्याणाममूर्तानां गुणा अमूर्ता ज्ञातव्याः ॥ १३१ ॥

शुद्धजीवद्रव्ये ये केवलज्ञानादिगुणास्तेषां शुद्धजीवप्रदेशैः सह यदेकत्वमभिन्नत्वं तन्मयत्वं स तद्भावो भण्यते, तेषामेव गुणानां तैः प्रदेशैः सह यदा संज्ञालक्षणप्रयोजनादिभेदः क्रियते तदा पुनरतद्भावो भण्यते, तेनातद्भावेन संज्ञादिभेदरूपेण स्वकीयस्वकीयद्रव्येण सह विशिष्टा भिन्ना इति, द्वितीयव्याख्यानेन पुनः स्वकीयद्रव्येण सह तद्भावेन तन्मयत्वेनान्यद्रव्याद्विशिष्टा भिन्ना इत्यभिप्रायः। एवं गुणभेदेन द्रव्यभेदो ज्ञातव्यः ॥ १३० ॥ अथ मूर्तामूर्तगुणानां लक्षणं संबन्धं च निरूपयति– **मुत्ता इंदियगेज्झा** मूर्ता गुणा इन्द्रियगाह्या भवन्ति, अमूर्ताः पुनरिन्द्रियविषया न भवन्ति इति मूर्तामूर्तगुणानामिन्द्रियानिन्द्रियविषयत्वं लक्षणमुक्तम्। इदानीं मूर्तगुणाः कस्य संबन्धिनो भवन्तीति संबन्धं कथयति। **पोग्गलदव्वप्पगा अणेगविधा** मूर्तगुणाः पुद्गलद्रव्यात्मका अनेकविधा भवन्ति;

उस-उसके द्वारा विशिष्टत्व होनेसे उनमें विशेष (भेद) हैं; और इसीलिये मूर्त तथा अमूर्त द्रव्योंका मूर्तत्व-अमूर्तत्वरूप तद्भावके द्वारा विशिष्टत्व होनेसे उनमें इसप्रकारके भेद निश्चित करना चाहिये कि 'यह मूर्त गुण हैं और यह अमूर्तगुण हैं ॥ १३० ॥

अब, मूर्त और अमूर्त गुणोंके लक्षण तथा संबंध (अर्थात् उनका किन द्रव्योंके साथ संबंध है यह) कहते हैं :–

गाथा १३१

अन्वयार्थ :– [**इन्द्रियग्राह्याः मूर्ताः**] इन्द्रियग्राह्य ऐसे मूर्तगुण [**पुद्गलद्रव्यात्मकाः**] पुद्गलद्रव्यात्मक [**अनेकविधाः**] अनेक प्रकारके हैं; [**अमूर्तानां द्रव्याणां**] अमूर्त द्रव्योंके [**गुणाः**] गुण [**अमूर्ताः ज्ञातव्याः**] अमूर्त जानना चाहिये।

गुण मूर्त इन्द्रियग्राह्य ते पुद्गलमयी बहुविध छे।
द्रव्यो अमूर्तिक जेह तेना गुण अमूर्तिक जाणजे ॥ १३१ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

मूर्तानां गुणानामिन्द्रियग्राह्यत्वं लक्षणम् । अमूर्तानां तदेव विपर्यस्तम् । ते च मूर्ताः पुद्गलद्रव्यस्य, तस्यैवैकस्य मूर्तत्वात् । अमूर्ताः शेषद्रव्याणां पुद्गलादन्येषां सर्वेषामप्यमूर्तत्वात् ॥ १३१ ॥

अथ मूर्तस्य पुद्गलद्रव्यस्य गुणान् गृणाति –

वण्णरसगंधफासा विज्जंते पुग्गलस्स सुहुमादो ।
पुढवीपरियंतस्स य सद्दो सो पोग्गलो चित्तो ॥ १३२ ॥

वर्णरसगंधस्पर्शा विद्यन्ते पुद्गलस्य सूक्ष्मात् ।
पृथिवीपर्यन्तस्य च शब्दः स पुद्गलश्चित्रः ॥ १३२ ॥

पुद्गलद्रव्यसंबन्धिनो भवन्तीत्यर्थः । अमूर्तगुणानां संबन्धं प्रतिपादयति । **दव्वाणममुत्ताणं** विशुद्धज्ञानदर्शनस्वभावं यत्परमात्मद्रव्यं तत्प्रभृतीनाममूर्तद्रव्याणां संबन्धिनो भवन्ति । ते के । **गुणा अमुत्ता** अमूर्ताः गुणाः, केवलज्ञानादय इत्यर्थः । इति मूर्तामूर्तगुणानां लक्षणसंबन्धौ ज्ञातव्यौ ॥ १३१ ॥ एवं ज्ञानादिविशेषगुणभेदेन द्रव्यभेदो भवतीति कथनरूपेण द्वितीयस्थले गाथाद्वयं गतम् । अथ मूर्तपुद्गलद्रव्यस्य गुणानावेदयति–**वण्णरसगंधफासा विज्जंते पोग्गलस्स** वर्णरसगन्धस्पर्शा विद्यन्ते । कस्य । पुद्गलस्य । कथंभूतस्य । **सुहुमादो पुढवीपरियंतस्स य** "पुढवी जलं च छाया चउरिंदियविसयकम्मपरमाणू । छव्विहभेयं भणियं पोग्गलदव्वं जिणवरेहिं" ॥ इति गाथाकथितक्रमेण परमाणु-

---

टीका :– मूर्त गुणोंका लक्षण इन्द्रियग्राह्यत्व है ; और अमूर्तगुणोंका उससे विपरीत है ; (अर्थात् अमूर्त गुण इन्द्रियोंसे ज्ञात नहीं होते ।) और मूर्त गुण पुद्गलद्रव्यके हैं, क्योंकि वही (पुद्गल ही) एक मूर्त है ; और अमूर्त गुण शेष द्रव्योंके हैं, क्योंकि पुद्गलके अतिरिक्त शेष सभी द्रव्य अमूर्त हैं ॥ १३१ ॥

अब, मूर्त पुद्गल द्रव्यके गुण कहते हैं :–

गाथा १३२

अन्वयार्थ :– [**वर्णरसगंधस्पर्शाः**] वर्ण, रस, गंध और स्पर्श (गुण) [**सूक्ष्मात्**] सूक्ष्मसे लेकर [**पृथिवीपर्यंतस्य च**] पृथ्वी पर्यन्तके [**पुद्गलस्य**] (सर्व) पुद्गलके [**विद्यन्ते**] होते हैं ; [**चित्रः शब्दः**] जो विविध प्रकारका शब्द है [**सः**] वह [**पुद्गल**] पुद्गल अर्थात् पौद्गलिक पर्याय है ।

छे वर्ण तेम ज गंध वली रस-स्पर्श पुद्गलद्रव्यने ।
अतिसूक्ष्मथी पृथ्वी सुधी; वली शब्द पुद्गल विविध जे ॥ १३२ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

इन्द्रियग्राह्याः किल स्पर्शरसगन्धवर्णास्तद्विषयत्वात्, ते चेन्द्रियग्राह्यत्वव्यक्तिशक्तिवशात् गृह्यमाणा अगृह्यमाणाश्च आ – एकद्रव्यात्मकसूक्ष्मपर्यायात्परमाणोः आ – अनेकद्रव्यात्मकस्थूलपर्यायात्पृथिवीस्कन्धाच्च सकलस्यापि पुद्गलस्याविशेषेण विशेषगुणत्वेन विद्यन्ते। ते च मूर्तत्वादेव शेषद्रव्याणामसंभवन्तः पुद्गलमधिगमयन्ति। शब्दस्यापीन्द्रियग्राह्यत्वाद्गुणत्वं न खल्वाशङ्कनीयं, तस्य वैचित्र्यप्रपञ्चितवैश्वरूपस्याप्यनेकद्रव्यात्मकपुद्गलपर्यायत्वेनाभ्युपगम्यमानत्वात्। गुणत्वे वा, न तावदमूर्तद्रव्यगुणः शब्दः गुणगुणिनोरविभक्तप्रदेशत्वेनैकवेदनवेद्यत्वादमूर्तद्रव्यस्यापि श्रवणेन्द्रियविषयत्वापत्तेः। पर्यायलक्षणेनोत्खातगुणलक्षणत्वान्मूर्तद्रव्यगुणोऽपि न भवति। पर्यायलक्षणं हि कादाचित्कत्वं गुणलक्षणं तु नित्यत्वम्। ततः कादाचित्कत्वोत्खातनित्यत्वस्य न शब्दस्यास्ति गुणत्वम्।

लक्षणसूक्ष्मस्वरूपादेः पृथ्वीस्कन्धलक्षणस्थूलस्वरूपपर्यन्तस्य च। तथा हि – तथानन्तज्ञानादिचतुष्टयं विशेषलक्षणभूतं यथासंभवं सर्वजीवेषु साधारणं तथा वर्णादिचतुष्टयं विशेषलक्षणभूतं यथासंभवं सर्वपुद्गलेषु साधारणम्। यथैव चानन्तज्ञानादिचतुष्टयं मुक्तजीवेऽतीन्द्रियज्ञानविषयमनुमानगम्यमागमगम्यं च, तथा शुद्धपरमाणुद्रव्ये वर्णादिचतुष्टयमप्यतीन्द्रियज्ञानविषयमनुमानगम्यमागमगम्यं च। यथा वानन्तचतुष्टयस्य संसारिजीवे रागादिस्नेहनिमित्तेन कर्मबन्धवशादशुद्धत्वं भवति तथा वर्णादि-

---

टीका :– स्पर्श, रस, गंध और वर्ण इन्द्रियग्राह्य हैं; क्योंकि वे इन्द्रियोंके विषय हैं। वे इन्द्रियग्राह्यताकी[1] व्यक्ति और शक्तिके वशसे भलेही इन्द्रियोंके द्वारा ग्रहण किये जाते हों या न किये जाते हों तथापि वे एकद्रव्यात्मक सूक्ष्मपर्यायरूप परमाणुसे लेकर अनेकद्रव्यात्मक स्थूलपर्यायरूप पृथ्वीस्कंध तकके समस्त पुद्गलके, अविशेषतया विशेष गुणोंके रूपमें होते हैं, और उनके मूर्त होनेके कारण ही, (पुद्गलके अतिरिक्त) शेष द्रव्योंके न होनेसे वे पुद्गलको बतलाते हैं।

ऐसी शंका नहीं करनी चाहिये कि शब्द भी इन्द्रियग्राह्य होनेसे गुण होगा; क्योंकि वह (शब्द) [2]विचित्रताके द्वारा विश्वरूपपना (अनेकानेकप्रकारपना) दरशाता होनेपर भी उसे अनेकद्रव्यात्मक पुद्गलपर्यायके रूपमें स्वीकार किया जाता है।

यदि शब्दको (पर्याय न मानकर) गुण माना जाय तो वह क्यों योग्य नहीं है उसका समाधान :–

---

[1] परमाणु, कार्मणवर्गणा इत्यादिमें इन्द्रियग्राह्यता व्यक्त नहीं है तथापि शक्तिरूपसे अवश्य होती है; इसीलिये बहुतसे परमाणु स्कंधरूप होकर स्थूलता धारण करके इन्द्रियोंसे ज्ञात होते हैं।

[2] विचित्रता = विविधता (शब्द भाषात्मक, अभाषात्मक, प्रायोगिक, वैश्रसिक – ऐसे अनेक प्रकारके हैं।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यत्तु तत्र नित्यत्वं तत्तदारम्भकपुद्गलानां तद्गुणानां च स्पर्शादीनामेव, न शब्दपर्यायस्येति दृढ़तरं ग्राह्यम्। न च पुद्गलपर्यायत्वे शब्दस्य पृथिवीस्कन्धस्येव स्पर्शनादीन्द्रियविषयत्वम्; अपां घ्राणेन्द्रियाविषयत्वात्, ज्योतिषो घ्राणरसनेन्द्रियाविषयत्वात्, मरुतो घ्राणरसनचक्षुरिन्द्रियाविषयत्वाच्च। न चागन्धागन्धरसागन्धरसवर्णाः, एवमप्ज्योतिर्मारुतः, सर्वपुद्गलानां स्पर्शादिचतुष्कोपेतत्वाभ्युपगमात्; व्यक्तस्पर्शादिचतुष्कानां च

चतुष्टयस्यापि स्निग्धरूक्षगुणनिमित्तेन द्व्यणुकादिबन्धावस्थायामशुद्धत्वम्। यथा वानन्तज्ञानादिचतुष्टयस्य रागादिस्नेहरहितशुद्धात्मध्यानेन शुद्धत्वं भवति तथा वर्णादिचतुष्टयस्यापि स्निग्धगुणाभावे बन्धनेऽसति परमाणुपुद्गलावस्थायां शुद्धत्वमिति। **सद्दो सो पोग्गलो** यस्तु शब्दः स पौद्गलः। यथा जीवस्य नरनारकादिविभावपर्यायाः तथायं शब्दः पुद्गलस्य विभावपर्यायो, न च गुणः। कस्मात्। गुणस्याविनश्वरत्वात्, अयं च विनश्वरो। नैयायिकमतानुसारी कश्चिद्वदत्याकाशगुणोऽयं शब्दः। परिहारमाह –

प्रथम तो, शब्द अमूर्त द्रव्यका गुण नहीं है क्योंकि गुण-गुणीमें अभिन्न प्रदेशपना होनेसे वे (गुण-गुणी) [१] एक वेदनसे वेद्य होनेसे अमूर्त द्रव्यके भी श्रवणेन्द्रियकी विषयभूतपना आजायगा।

(दूसरे, शब्दोंमें) पर्यायके लक्षण द्वारा गुणका लक्षण उत्थापित होनेसे शब्द मूर्त द्रव्यका गुण भी नहीं है। पर्यायका लक्षण कादाचित्कपना (अनित्यपना) है, और गुणका लक्षण नित्यपना है, इसलिये (शब्दमें) अनित्यपनेसे नित्यपनेके उत्थापित होनेसे (अर्थात् शब्द कभी-कभी ही होता है, और नित्य नहीं है, इसलिये) शब्द वह गुण नहीं है। जो वहाँ नित्यपना है वह उसे (शब्दको) उत्पन्न करनेवाले पुद्गलोंका और उनके स्पर्शादिक गुणोंका ही है, शब्दपर्यायका नहीं – इसप्रकार अति दृढ़तापूर्वक ग्रहण करना चाहिये।

विनाश युगपत् होते हैं, इसलिये वह निरन्वय अर्थात् खंडित नहीं है, इसलिये स्वभावतः अवश्य ध्रुव है।)

इसप्रकार एक वृत्त्यंशमें कालपदार्थ उत्पाद-व्यय-ध्रौव्यवाला है, ऐसा सिद्ध हुआ ॥ १४२ ॥

अब, (जैसे एक वृत्त्यंशमें कालपदार्थ उत्पाद-व्यय-ध्रौव्यवाला सिद्ध किया है उसीप्रकार) सर्व वृत्त्यंशोंमें कालपदार्थ उत्पाद-व्यय-ध्रौव्यवाला है ऐसा सिद्ध करते हैं :–

गाथा १४३

अन्वयार्थ :– [**एकस्मिन् समये**] एक-एक समयमें [**संभवस्थितिनाशसंज्ञिताः अर्थाः**] उत्पाद, ध्रौव्य और व्यय नामक अर्थ [**समयस्य**] कालके [**सर्वकालं**] सदा [**संति**] होते हैं। [**एषः हि**] यही [**कालाणुसद्भावः**] कालाणुका सद्भाव है; यही कालाणुके अस्तित्वकी सिद्धि है।)

टीका :– कालपदार्थके सभी वृत्त्यंशोंमें उत्पाद-व्यय-ध्रौव्य होते हैं, क्योंकि (१४२ वीं गाथामें जैसे सिद्ध हुआ है तदनुसार) एक वृत्त्यंशमें वे (उत्पाद-व्यय-ध्रौव्य) देखे जाते हैं। और यह योग्य ही है, क्योंकि विशेष अस्तित्व सामान्य अस्तित्वके बिना

प्रत्येक समये जन्म-ध्रौव्य-विनाश अर्थो कालने।
वर्ते सरवदा, आ ज बस कालाणुनो सद्भाव छे ॥ १४३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अस्ति हि समस्तेष्वपि वृत्त्यंशेषु समयपदार्थस्योत्पादव्ययध्रौव्यत्वमेकस्मिन् वृत्त्यंशे तस्य दर्शनात्, उपपत्तिमच्चैतत्, विशेषास्तित्वस्य सामान्यास्तित्वमन्तरेणानुपपत्तेः। अयमेव च समयपदार्थस्य सिद्धयति सद्भावः। यदि विशेषसामान्यास्तित्वे सिद्धयतस्तदा तु अस्तित्वमन्तरेण न सिद्धयतः कथंचिदपि ॥ १४३ ॥

अथ कालपदार्थस्यास्तित्वान्यथानुपपत्त्या प्रदेशमात्रत्वं साधयति –

जस्स ण संति पदेसा पदेसमेत्तं व तच्चदो णादुं ।
सुण्णं जाण तमत्थं अत्थंतरभूदमत्थीदो ॥ १४४ ॥

यस्य न सन्ति प्रदेशाः प्रदेशमात्रं वा तत्त्वतो ज्ञातुम् ।
शून्यं जानाहि तमर्थमर्थान्तरभूतमस्तित्वात् ॥ १४४ ॥

यद्यप्यतीतानन्तकाले दुर्लभायाः सर्वप्रकारोपादेयभूतायाः सिद्धगतेः काललब्धिरूपेण बहिरङ्गसहकारी भवति कालस्तथापि निश्चयनयेन निजशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुष्ठानसमस्तपरद्रव्येच्छानिरोधलक्षणतपश्चरणरूपा या तु निश्चयचतुर्विधाराधना सैव तत्रोपादानकारणं, न च कालस्तेन कारणेन स हेय इति भावार्थः ॥ १४३ ॥ अथोत्पादव्ययध्रौव्यात्मकास्तित्वावष्टम्भेन कालस्यैकप्रदेशत्वं साधयति—

नहीं हो सकता। यही कालपदार्थके सद्भावकी (अस्तित्वकी) सिद्धि है; (क्योंकि) यदि विशेष अस्तित्व और सामान्य अस्तित्व सिद्ध होते हैं तो वे अस्तित्वके बिना किसी भी प्रकारसे सिद्ध नहीं होते ॥ १४३ ॥

अब, कालपदार्थके अस्तित्वकी अन्यथा अनुपपत्ति होनेसे (अर्थात् काल पदार्थका अस्तित्व अन्य किसी प्रकार नहीं बन सकनेके कारण) उसका प्रदेशमात्रपना सिद्ध करते हैं :–

गाथा १४४

अन्वयार्थ :– [**यस्य**] जिस पदार्थके [**प्रदेशाः**] प्रदेश [**प्रदेशमात्रं वा**] अथवा एकप्रदेश भी [**तत्त्वतः**] परमार्थतः [**ज्ञातुम् न संति**] ज्ञात नहीं होते, [**तम् अर्थम्**] उस पदार्थको [**शून्यं जानीहि**] शून्य जानो – [**अस्तित्वात् अर्थान्तरभूतम्**] जो कि अस्तित्वसे अर्थान्तरभूत (अन्य) है।

जे अर्थने न बहु प्रदेश, न एक वा परमार्थथी ।
ते अर्थ जाणो शून्य केवल-अन्य जे अस्तित्वथी ॥ १४४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अस्तित्वं हि तावदुत्पादव्ययध्रौव्यैक्यात्मिका वृत्तिः। न खलु सा प्रदेशमन्तरेण सूत्र्यमाणा कालस्य संभवति, यतः प्रदेशाभावे वृत्तिमदभावः। स तु शून्य एव, अस्तित्व-संज्ञाया वृत्तेरर्थान्तरभूतत्वात्। न च वृत्तिरेव केवला कालो भवितुमर्हति, वृत्तेर्हि वृत्ति-मन्तमन्तरेणानुपपत्तेः। उपपत्तौ वा कथमुत्पादव्ययध्रौव्यैक्यात्मकत्वम्। अनाद्यन्तनिरन्तरा-नेकांशवशीकृतैकात्मकत्वेन पूर्वपूर्वांशप्रध्वंसादुत्तरोत्तरांशोत्पादादेकात्मध्रौव्यादिति चेत्; नैवम्। यस्मिन्नंशे प्रध्वंसो यस्मिंश्चोत्पादस्तयोः सहप्रवृत्त्यभावात् कुतस्त्यमैक्यम्। तथा

जस्स ण संति यस्य पदार्थस्य न सन्ति न विद्यन्ते। के। **पदेसा** प्रदेशाः। **पदेसमेत्तं तु** प्रदेशमात्रमेकप्रदेश प्रमाणं पुनस्तद्वस्तु **तच्चदो णादुं** तत्त्वतः परमार्थतो ज्ञातुं शक्यते। **सुण्णं जाण तमत्थं** यस्यैकोऽपि प्रदेशो नास्ति तमर्थं पदार्थं शून्यं जानीहि हे शिष्य। कस्माच्छून्यमिति चेत्। **अत्थंतरभूदं** एकप्रदेशाभावे सत्यर्थान्तरभूतं भिन्नं भवति यतः कारणात्। कस्याः सकाशाद्भिन्नम्। **अत्थीदो** उत्पादव्ययध्रौव्या-त्मकसत्ताया इति। तथा हि–कालपदार्थस्य तावत्पूर्वसूत्रोदितप्रकारेणोत्पादव्ययध्रौव्यात्मकमस्तित्वं विद्यते; तच्चास्तित्वं प्रदेशं विना न घटते। यश्च प्रदेशवान् स कालपदार्थ इति। अथ मतं कालद्रव्या-

---

टीका :– प्रथम तो अस्तित्व वह उत्पाद, व्यय और ध्रौव्यकी ऐक्यस्वरूपवृत्ति है। वह (वृत्ति अर्थात् विद्यमानता) कालके प्रदेश विना ही होती है यह कथन संभवित नहीं है, क्योंकि प्रदेशके अभावमें वृत्तिमान्का अभाव होता है। वह तो शून्य ही है, क्योंकि अस्तित्व नामक वृत्तिसे अर्थान्तरभूत है – अन्य है।

और (यदि यहाँ यह तर्क किया जाय कि 'मात्र समयपर्यायरूपवृत्ति ही माननी चाहिये; वृत्तिमान् कालाणु पदार्थकी क्या आवश्यकता है?' तो उसका समाधान किया जाता है ;–) मात्र वृत्ति समयरूप परिणति) ही काल नहीं हो सकती, क्योंकि वृत्ति वृत्तिमान्के बिना नहीं हो सकती। यदि यह कहा जाय कि वृत्तिमान् के बिना भी वृत्ति हो सकती है तो, (पूछते हैं कि – वृत्ति तो उत्पादव्यय-ध्रौव्यकी एकतास्वरूप होनी चाहिये;) अकेली वृत्ति उत्पाद-व्यय-ध्रौव्यकी एकरूपता कैसे हो सकती है? यदि यह कहा जाय कि – 'अनादि-अनन्त, अनन्तर (– परस्पर अन्तर हुए बिना एकके बाद एक प्रवर्तमान) अनेक अंशोंके कारण [1]एकात्मकता होती है इसलिये; पूर्व-पूर्व के अंशोंका नाश होता है और उत्तर-उत्तरके अंशोंका उत्पाद होता है तथा एकात्मकतारूप ध्रौव्य रहता है, – इसप्रकार मात्र (अकेली) वृत्ति भी उत्पाद-व्यय-ध्रौव्यकी एकतास्वरूप हो

---

[1] एकात्मकता = एकस्वरूपता (कालद्रव्यके बिना भी अनादि कालसे अनन्त काल तक समय एकके बाद एक परस्पर अन्तरके बिना ही प्रवर्तित होते हैं, इसलिये एकप्रवाहरूप बन जानेसे उसमें एकरूपत्व आता है – इसप्रकार शंकाकारका तर्क है।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

प्रध्वस्तांशस्य सर्वथास्तमितत्वादुत्पद्यमानांशस्य वासंभवितात्मलाभत्वात्प्रध्वंसोत्पादैक्यवर्तिध्रौव्यमेव कुतस्त्यम्। एवं सति नश्यति त्रैलक्षण्यं, उल्लसति क्षणभङ्गः, अस्तमुपैति नित्यं द्रव्यं, उदीयन्ते क्षणक्षयिणो भावाः। ततस्तत्त्वविप्लवभयात्कश्चिदवश्यमाश्रयभूतो वृत्तेर्वृत्तिमाननुसर्तव्यः। स तु प्रदेश एवाप्रदेशस्यान्वयव्यतिरेकानुविधायित्वासिद्धेः। एवं सप्रदेशत्वे हि कालस्य कुत एकद्रव्यनिबन्धनं लोकाकाशतुल्यासंख्येयप्रदेशत्वं नाभ्युपगम्येत। पर्यायसमयाप्रसिद्धेः। प्रदेशमात्रं हि द्रव्यसमयमतिक्रामतः परमाणोः पर्यायसमयः प्रसिद्ध्यति। लोकाकाशतुल्यासंख्ययप्रदेशत्वे तु द्रव्यसमयस्य कुतस्त्या तत्सिद्धिः।

भावेऽप्युत्पादव्ययध्रौव्यत्वं घटते। नैवम्। अङ्गुलिद्रव्याभावे वर्तमानवक्रपर्यायोत्पादो भूतर्जुपर्यायस्य विनाशस्तदुभयाधारभूतं ध्रौव्यं कस्य भविष्यति। न कस्यापि। तथा कालद्रव्याभावे वर्तमानसमयरूपोत्पादो भूतसमयरूपो विनाशस्तदुभयाधारभूतं ध्रौव्यं कस्य भविष्यति। न कस्यापि। एवं सत्येतदायाति—अन्यस्य भङ्गोऽन्यस्योत्पादोऽन्यस्य ध्रौव्यमिति सर्वं वस्तुस्वरूपं विप्लवते। तस्माद्वस्तुविप्लवभयादुत्पादव्ययध्रौव्याणां कोऽप्येक आधारभूतोऽस्तीत्यभ्युपगन्तव्यम्। स चैकप्रदेशरूपः कालाणुपदार्थ एवेति। अत्रातीतानन्तकाले ये केचन सिद्धसुखभाजनं जाताः, भाविकाले च

सकती है' तो ऐसा नहीं है। (क्योंकि उस अकेली वृत्तिमें तो) जिस अंशमें नाश है और जिस अंशमें उत्पाद है वे दो अंश एक साथ प्रवृत्त नहीं होते, इसलिये (उत्पाद और व्ययका) ऐक्य कहाँसे हो सकता है? तथा नष्ट अंशके सर्वथा अस्त होनेसे और उत्पन्न होनेवाला अंश अपने स्वरूपको प्राप्त न होनेसे (अर्थात् उत्पन्न नहीं हुआ है इसलिये) नाश और उत्पादकी एकतामें प्रवर्तमान ध्रौव्य कहाँसे हो सकता है? ऐसा होनेपर त्रिलक्षणता (उत्पादव्ययध्रौव्यता) नष्ट हो जाती है, क्षणभंग (बौद्धसम्मत क्षणविनाश) उल्लसित हो उठता है, नित्य द्रव्य अस्त होजाता है और क्षणविध्वंसी भाव उत्पन्न होते हैं। इसलिये [1]तत्वविप्लवके भयसे अवश्य ही वृत्तिका आश्रयभूत कोई वृत्तिमान् ढूँढ़ना—स्वीकार करना योग्य है। वह तो प्रदेश ही है (अर्थात् वह वृत्तिमान् सप्रदेश ही होता है), क्योंकि अप्रदेशके अन्वय तथा व्यतिरेकका अनुविधायित्व असिद्ध है। (जो अप्रदेश होता है वह अन्वय तथा व्यतिरेकोंका अनुसरण नहीं कर सकता, अर्थात् उसमें ध्रौव्य तथा उत्पाद-व्यय नहीं हो सकते।)

(प्रश्न :–) इसप्रकार काल सप्रदेश है तो उसके एकद्रव्यके कारणभूत लोकाकाश तुल्य असंख्यप्रदेश क्यों न मानने चाहिये।

(उत्तर :–) ऐसा हो तो पर्यायसमय प्रसिद्ध नहीं होता, इसलिये असंख्य प्रदेश

---

[1] तत्वविप्लव = वस्तुस्वरूपमें अंधाधुन्धी।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

लोकाकाशतुल्यासंख्येयप्रदेशैकद्रव्यत्वेऽपि तस्यैकं प्रदेशमतिक्रामतः परमाणोस्तत्सिद्धिरिति चेन्नैवं; एकदेशवृत्तेः सर्ववृत्तित्वविरोधात्। सर्वस्यापि हि कालपदार्थस्य यः सूक्ष्मो वृत्त्यंशः स समयो, न तु तदेकदेशस्य। तिर्यक्प्रचयस्योर्ध्वप्रचयत्वप्रसंगाच्च। तथाहि – प्रथममेकेन प्रदेशेन वर्तते, ततोऽन्येन, ततोप्यन्यतरेणेति तिर्यक्प्रचयोऽप्यूर्ध्वप्रचयीभूय प्रदेशमात्रं द्रव्यमवस्थापयति। तत स्तिर्यक्प्रचयस्योर्ध्वप्रचयत्वमनिच्छता प्रथममेव प्रदेशमात्रं कालद्रव्यं व्यवस्थापयितव्यम्॥ १४४॥

'आत्मोपादानसिद्धं स्वयमतिशयवद्' इत्यादिविशेषणविशिष्टसिद्धसुखस्य भाजनं भविष्यन्ति ते सर्वेऽपि काललब्धिवशेनैव। तथापि तत्र निजपरमात्मोपादेयरुचिरूपं वीतरागचारित्राविनाभूतं यन्निश्चयसम्यक्त्वं तस्यैव मुख्यत्वं, न च कालस्य, येन स हेय इति। तथा चोक्तम्–"किं पलविएण बहुणा जे सिद्धा णरवरा गये काले सिज्झहहि जे वि भविया तं जाणह सम्ममाहप्पं" ॥ १४४॥ एवं निश्चयकालव्याख्यानमुख्यत्वेनाष्टमस्थले गाथात्रयं गतम्। इति पूर्वोक्तप्रकारेण 'दव्वं जीवमजीवं' इत्याद्येकोनविंशतिगाथाभिः स्थलाष्टकेन **विशेषज्ञेयाधिकारः** समाप्तः॥ अतः परं

मानना योग्य नहीं है। परमाणुके द्वारा प्रदेशमात्र द्रव्यसमयका उल्लंघन करने पर (अर्थात् – परमाणुके द्वारा एकप्रदेशमात्र कालाणुसे निकटके दूसरे प्रदेशमात्र कालाणु तक मंदगतिसे गमन करने पर) पर्यायसमय प्रसिद्ध होता है। यदि द्रव्यसमय लोकाकाश-तुल्य असंख्यप्रदेशी हो तो पर्यायसमयकी सिद्धि कहाँसे होगी?

'यदि द्रव्यसमय अर्थात् कालपदार्थ लोकाकाश जितने असंख्य प्रदेशवाला एक द्रव्य हो तो भी परमाणुके द्वारा उसका एक प्रदेश उल्लंघित होनेपर पर्यायसमयकी सिद्धि हो' ऐसा कहा जाय तो यह ठीक नहीं है; क्योंकि (उसमें दो दोष आते हैं) :–

(१) [द्रव्यके एक देशकी परिणतिको सम्पूर्ण द्रव्यकी परिणति माननेका प्रसंग आता है।] एक देशकी वृत्तिको सम्पूर्ण द्रव्यकी वृत्ति माननेमें विरोध है। सम्पूर्ण काल पदार्थका जो सूक्ष्म वृत्त्यंश है वह समय है, परन्तु उसके एक देशका वृत्त्यंश वह समय नहीं।

तथा, (२) तिर्यक्प्रचयको ऊर्ध्वप्रचयपनेका प्रसंग आता है। वह इसप्रकार है कि :– प्रथम, कालद्रव्य एक प्रदेशसे वर्ते, फिर दूसरे प्रदेशसे वर्ते और फिर अन्यप्रदेशसे वर्ते (ऐसा प्रसंग आता है) इसप्रकार तिर्यक्प्रचय ऊर्ध्वप्रचय बनकर द्रव्यको प्रदेशमात्र स्थापित करता है। (अर्थात् तिर्यक्प्रचय ही ऊर्ध्वप्रचय है, ऐसा माननेका प्रसंग आता है, इसलिये द्रव्यप्रदेशमात्र ही सिद्ध होता है।) इसलिये तिर्यक्प्रचयको ऊर्ध्वप्रचयपना न मानने (चाहने) वालेको प्रथम ही कालद्रव्यको प्रदेशमात्र निश्चित करना चाहिये॥१४४॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथैवं ज्ञेयतत्त्वमुक्त्वा ज्ञानज्ञेयविभागेनात्मानं निश्चिन्वन्नात्मनोऽत्यन्तविभक्तत्वाय व्यवहारजीवत्वहेतुमालोचयति –

सपदेसेहिं समग्गो लोगो अट्ठेहिं णिट्ठिदो णिच्चो ।
जो तं जाणदि जीवो पाणचदुक्काभिसंबद्धो ॥ १४५ ॥

सप्रदेशैः समग्रो लोकोऽर्थैर्निष्ठितो नित्यः ।
यस्तं जानाति जीवः प्राणचतुष्काभिसंबद्धः ॥ १४५ ॥

शुद्धजीवस्य द्रव्यभावप्राणैः सह भेदनिमित्तं 'सपदेसेहिं समग्गो' इत्यादि यथाक्रमेण गाथाष्टकपर्यन्तं सामान्यभेदभावनाव्याख्यानं करोति। तद्यथा। अथ ज्ञानज्ञेयज्ञापनार्थं तथैवात्मनः प्राणचतुष्केन सह भेदभावनार्थं वा सूत्रमिदं प्रतिपादयति—**लोगो** लोको भवति। कथंभूतः। **णिट्ठिदो** निष्ठितः समाप्तिं नीतो भृतो वा। कैः कर्तृभूतैः। **अट्ठेहिं** सहजशुद्धबुद्धैकस्वभावो योऽसौ परमात्मपदार्थस्तत्प्रभृतयो येऽर्थास्तैः। पुनरपि किंविशिष्टः। **सपदेसेहिं समग्गो** स्वकीयप्रदेशैः समग्रः परिपूर्णः। अथवा पदार्थैः। कथंभूतैः। सप्रदेशैः प्रदेशसहितैः। पुनरपि किंविशिष्टो लोकः।

(इसप्रकार ज्ञेयतत्त्वप्रज्ञापनमें द्रव्यविशेषप्रज्ञापन समाप्त हुआ ।)

अब, इसप्रकार ज्ञेयतत्व कहकर, ज्ञान और ज्ञेयके विभाग द्वारा आत्माको निश्चित करते हुए, आत्माको अत्यन्त विभक्त (भिन्न) करनेके लिये व्यवहारजीवत्वके हेतुका विचार करते हैं :–

गाथा १४५

अन्वयार्थ – [**सप्रदेशैः अर्थैः**] सप्रदेश पदार्थोंके द्वारा [**निष्ठितः**] समाप्तिको[१] प्राप्त [**समग्रः लोकः**] सम्पूर्ण लोक [**नित्यः**] नित्य है, [**तं**] उसे [**यः जानाति**] जो जानता है [**जीवः**] वह जीव है, – [**प्राणचतुष्काभिसंबद्धः**] जो कि (संसार दशामें) चार प्राणोंसे संयुक्त है ।

टीका :– इसप्रकार जिन्हें प्रदेशका सद्भाव फलित हुआ है ऐसे आकाशपदार्थसे

---

[१] छह द्रव्योंसे ही सम्पूर्ण लोक समाप्त हो जाता है, अर्थात् उनके अतिरिक्त लोकमें दूसरा कुछ नहीं है ।

सप्रदेश अर्थोथी समाप्त समग्र लोक सुनित्य छे ।
तसु जाणनारो जीव, प्राण चतुष्कथी संयुक्त जे ॥ १४५ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

एवमाकाशपदार्थादाकालपदार्थाच्च समस्तैरेव संभावितप्रदेशसद्भावैः पदार्थैः समग्र एव यः समाप्तिं नीतो लोकस्तं खलु तदन्तःपातित्वेऽप्यचिन्त्यस्वपरपरिच्छेदशक्तिसंपदा जीव एव जानीते, न त्वितरः। एवं शेषद्रव्याणि ज्ञेयमेव, जीवद्रव्यं तु ज्ञेयं ज्ञानं चेति ज्ञानज्ञेयविभागः। अथास्य जीवस्य सहजविजृम्भितानन्तज्ञानशक्तिहेतुके त्रिसमयावस्थायित्वलक्षणे वस्तुस्वरूपभूततया सर्वदानपायिनि निश्चयजीवत्वे सत्यपि संसारावस्थायामनादिप्रवाहप्रवृत्तपुद्गलसंश्लेषदूषितात्मतया प्राणचतुष्काभिसंबद्धत्वं व्यवहारजीवत्वहेतु-

---

णिच्चो द्रव्यार्थिकनयेन नित्यः लोकाकाशापेक्षया वा। अथवा नित्यो, न केनापि पुरुषविशेषेण कृतः। **जो तं जाणदि** यः कर्ता तं ज्ञेयभूतं लोकं जानाति **जीवो** स जीवपदार्थो भवति। एतावता किमुक्तं भवति। योऽसौ विशुद्धज्ञानदर्शनस्वभावो जीवः स ज्ञानं ज्ञेयश्च भण्यते। शेषपदार्थास्तु ज्ञेया एवेति ज्ञातृज्ञेयविभागः। पुनरपि किंविशिष्टो जीवः। **पाणचदुक्केण संबद्धो** यद्यपि निश्चयेन स्वतःसिद्धपरमचैतन्यस्वभावेन निश्चयप्राणेन जीवति तथापि व्यवहारेणानादिकर्मबन्धवशादायुराद्यशुद्ध-

---

लेकर काल पदार्थ तकके सभी पदार्थोंसे समाप्तिको प्राप्त जो समस्त लोक है उसे वास्तवमें, उसमें [१]अंतःपाती होनेपर भी, अचिन्त्य ऐसी स्वपरको जाननेकी शक्तिरूप सम्पदाके द्वारा जीव ही जानता है, दूसरा कोई नहीं। इसप्रकार शेष द्रव्य ज्ञेय ही हैं। और जीवद्रव्य तो ज्ञेय तथा ज्ञान है; – इसप्रकार ज्ञान और ज्ञेयका विभाग है।

अब, इस जीवको, सहजरूपसे (स्वभावसे ही) प्रगट अनन्तज्ञानशक्ति जिसका हेतु है और तीनों कालमें अवस्थायिपना (टिकना) जिसका लक्षण है ऐसा, वस्तुका स्वरूपभूत होनेसे सर्वदा अविनाशी निश्चयजीवत्व होनेपर भी, संसारावस्थामें अनादि-प्रवाहरूपसे वर्तमान पुद्गल संश्लेषके द्वारा स्वयं दूषित होनेसे उसके चार प्राणोंसे संयुक्तपना है – जो कि (संयुक्तपना) व्यवहारजीवत्वका हेतु है, और विभक्त करने योग्य है।

भावार्थ :– षट् द्रव्योंका समुदाय वह लोक है। जीव उसे (अपनी) अचिन्त्य ज्ञानशक्तिसे जानता है; इसलिये जीवके अतिरिक्त शेष द्रव्य ज्ञेय हैं और जीव ज्ञान तथा ज्ञेय है। उस जीवको वस्तुके स्वरूपभूत होनेसे जो कभी नष्ट नहीं होता, ऐसा निश्चय-जीवत्व सदा ही है। उस निश्चय जीवत्वका कारण स्वाभाविक अनन्तज्ञानशक्ति है। ऐसा निश्चयजीवत्व जीवके सदा होनेपर भी वह, संसार दशामें स्वयं पुद्गल के संबंधसे दूषित होनेसे चार प्राणोंसे संयुक्त है, और इसलिये उसके व्यवहारजीवत्व भी है। उस व्यवहारजीवत्वको कारणरूप जो चार प्राणोंसे संयुक्तपना उससे जीवको भिन्न करना

---

[१] अंतःपाती = अन्दर आ जानेवाला; अन्दर समा जानेवाला (- जीव लोकके भीतर आ जाता है)।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

विभक्तव्योऽस्ति ॥ १४५ ॥

अथ के प्राणा इत्यावेदयति –

इंदियपाणो य तधा बलपाणो तह य आउपाणो य ।
आणप्पाणप्पाणो जीवाणं होंति पाणा ते ॥१४६॥

इन्द्रियप्राणश्च तथा बलप्राणस्तथा चायुःप्राणश्च ।
आनपानप्राणो जीवानां भवन्ति प्राणास्ते ॥ १४६ ॥

स्पर्शनरसनघ्राणचक्षुःश्रोत्रपञ्चकमिन्द्रियप्राणाः, कायवाङ्मनस्त्रयं बलप्राणाः, भवधारणनिमित्तमायुःप्राणः । उदञ्चनन्यञ्चनात्मको मरुदानपानप्राणः ॥ १४६ ॥

प्राणचतुष्केनापि संबद्धः सन् जीवति । तच्च शुद्धनयेन जीवस्वरूपं न भवतीति भेदभावना ज्ञातव्येत्यभिप्रायः ॥ १४५ ॥ अथेन्द्रियादिप्राणचतुष्कस्वरूपं प्रतिपादयति—अतीन्द्रियानन्तसुखस्वभावात्मनो विलक्षण इन्द्रियप्राणः, मनोवाक्कायव्यापाररहितात्परमात्मद्रव्याद्विसदृशो बलप्राणः, अनाद्यनन्तस्वभावात्परमात्मपदार्थाद्विपरीतः साद्यन्त आयुःप्राणः, उच्छ्वासनिश्वासजनितखेदरहिताच्छुद्धात्मतत्त्वात्प्रतिपक्षभूत आनपानप्राणः । एवमायुरिन्द्रियबलोच्छ्वासरूपेणाभेदनयेन जीवानां संबन्धिनश्चत्वारः प्राणा भवन्ति । ते च शुद्धनयेन जीवाद्भिन्ना भावयितव्या इति ॥ १४६ ॥ अथ त एव प्राणा भेदनयेन दशविधा

चाहिये ॥ १४५ ॥

अब, प्राण कौन-कौनसे हैं, सो बतलाते हैं :–

गाथा १४६

अन्वयार्थ :– [**इन्द्रिय प्राणः च**] इन्द्रिय प्राण [**तथा बलप्राणः**] बलप्राण, [**तथा च आयुःप्राणः**] आयुप्राण [**च**] और [**आनपानप्राणः**] श्वासोच्छ्वास प्राण; [**ते**] ये (चार) [**जीवानां**] जीवोंके [**प्राणाः**] प्राण [**भवन्ति**] हैं ।

टीका :– स्पर्शन, रसना, घ्राण, चक्षु और श्रोत्र, – यह पाँच इन्द्रियप्राण हैं; काय, वचन, और मन, – यह तीन बलप्राण हैं, भव धारणका निमित्त (अर्थात् मनुष्यादि पर्यायकी स्थितिका निमित्त) आयुप्राण है; नीचे और ऊपर जाना जिसका स्वरूप है ऐसी वायु (श्वास) श्वासोच्छ्वास प्राण है ॥ १४६ ॥

इन्द्रियप्राण, तथा वली बलप्राण, आयुप्राणने ।
वली प्राण श्वासोच्छ्वास-ए सौ जीव केरा प्राण छे ॥ १४६ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ प्रणानां निरुक्त्या जीवत्वहेतुत्वं पौद्गलिकत्वं च सूत्रयति –

पाणेहिं चदुहिं जीवदि जीविस्सदि जो हि जीविदो पुव्वं।
सो जीवो पाणा पुण पोग्गलदव्वेहिं णिव्वत्ता ॥ १४७ ॥

प्राणैश्चतुर्भिर्जीवति जीविष्यति यो हि जीवितः पूर्वम्।
स जीवः प्राणाः पुनः पुद्गलद्रव्यैर्निर्वृत्ताः ॥ १४७ ॥

भवन्तीत्यावेदयति—

पंच वि इंदियपाणा मणवचिकाया य तिण्णि बलपाणा।
आणप्पाणप्पाणो आउगपाणेण होंति दसपाणा ॥ ❀१२ ॥

इन्द्रियप्राणः पञ्चविधः, त्रिधा बलप्राणः, पुनश्चैक आनपानप्राणः, आयुःप्राणश्चेति भेदेन दश प्राणास्तेऽपि चिदानन्दैकस्वभावात्परमात्मनो निश्चयेन भिन्ना ज्ञातव्या इत्यभिप्रायः ॥ ❀१२ ॥ अथ प्राणशब्दव्युत्पत्त्या जीवस्य जीवत्वं प्राणानां पुद्गलस्वरूपत्वं च निरूपयति—**पाणेहिं चदुहिं जीवदि** यद्यपि निश्चयेन सत्ताचैतन्यसुखबोधादिशुद्धभावप्राणैर्जीवति तथापि व्यवहारेण वर्तमानकाले

अब, व्युत्पत्तिसे प्राणोंको जीवत्वका हेतुपना और उनका पौद्गलिकपना सूत्र द्वारा कहते हैं (अर्थात् प्राण जीवत्वके हेतु हैं। ऐसा व्युत्पत्तिसे दरशाते हैं तथा प्राण पौद्गलिक हैं ऐसा कहते हैं) :–

गाथा १४७

अन्वयार्थ :–[**यः हि**] जो [**चतुर्भिः प्राणैः**] चार प्राणोंसे [**जीवति**] जीता है, [**जीविष्यति**] जियेगा [**जीवितः पूर्वं**] और पहले जीता था, [**सः जीवः**] वह जीव है। [**पुनः**] फिर भी [**प्राणाः**] प्राण तो [**पुद्गलद्रव्यैः निर्वृत्ताः**] पुद्गल द्रव्योंसे निष्पन्न (रचित) हैं।

टीका :–(व्युत्पत्तिके अनुसार) प्राणसामान्यसे जीता है, जियेगा, और पहले जीता था, वह जीव है। इसप्रकार (प्राणसामान्य) अनादि संतानरूप (प्रवाहरूप, से प्रवर्तमान होनेसे (संसारदशामें) त्रिकाल स्थायी होनेसे प्राणसामान्य जीवके जीवत्वका हेतु है ही। तथापि वह (प्राण सामान्य) जीवका स्वभाव नहीं है क्योंकि वह पुद्गल द्रव्यसे निष्पन्न – रचित है।

जे चार प्राणे जीवतो पूर्वे, जीवेछे, जीवशे, ते जीव छे।
पण प्राण तो पुद्गलदरबनिष्पन्न छे ॥ १४७ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

प्राणसामान्येन जीवति जीविष्यति जीवितवांश्च पूर्वमिति जीवः। एवमनादिसंतानप्रवर्तमानतया त्रिसमयावस्थत्वात्प्राणसामान्यं जीवस्य जीवत्वहेतुरस्त्येव। तथापि न तन्न जीवस्य स्वभावत्वमवाप्नोति पुद्गलद्रव्यनिर्वृत्तत्वात् ॥ १४७ ॥

अथ प्राणानां पौद्गलिकत्वं साधयति –

जीवो पाणणिबद्धो बद्धो मोहादिएहिं कम्मेहिं।
उवभुंजं कम्मफलं बज्झदि अण्णेहिं कम्मेहिं ॥ १४८ ॥

जीवः प्राणनिबद्धो बद्धो मोहादिकैः कर्मभिः।
उपभुंजानः कर्मफलं बध्यतेऽन्यैः कर्मभिः ॥ १४८ ॥

द्रव्यभावरूपैश्चतुर्भिरशुद्धप्राणैर्जीवति **जीविस्सदि** जीविष्यति भाविकाले **जो हि जीविदो** यो हि स्फुटं जीवितः **पुव्वं** पूर्वकाले **सो जीवो** स जीवो भवति। **ते पाणा** ते पूर्वोक्ताः प्राणाः **पोग्गलदव्वेहिं णिव्वत्ता** उदयागतपुद्गलकर्मणा निर्वृत्ता निष्पन्ना इति। तत एव कारणात्पुद्गलद्रव्यविपरीतादनन्तज्ञानदर्शनसुखवीर्याद्यनन्तगुणस्वभावात्परमात्मतत्त्वाद्भिन्ना भावयितव्या इति भावः ॥ १४७ ॥ अथ प्राणानां यत्पूर्वसूत्रोदितं पौद्गलिकत्वं तदेव दर्शयति—**जीवो पाणणिबद्धो** जीवः कर्ता चतुर्भिः प्राणैर्निबद्धः संबद्धो भवति। कथंभूतः सन्। **बद्धो** शुद्धात्मोपलम्भलक्षणमोक्षाद्विलक्षणैर्बद्धः। कैर्बद्धः।

भावार्थ :– यद्यपि निश्चयसे जीव सदा ही भावप्राणसे जीता है, तथापि संसारदशामें व्यवहारसे उसे व्यवहारजीवत्वके कारणभूत इन्द्रियादि द्रव्यप्राणोंसे जीवित कहा जाता है। ऐसा होनेपर भी वे द्रव्यप्राण आत्माका स्वरूप किंचित् मात्र नहीं हैं क्योंकि वे पुद्गल द्रव्यसे निर्मित हैं ॥ १४७ ॥

अब, प्राणोंका पौद्गलिकपना सिद्ध करते हैं : –

गाथा १४८

अन्वयार्थ :– [**मोहादिकैः कर्मभिः**] मोहादिक कर्मोंसे [**बद्धः**] बँधा हुआ होनेसे [**जीवः**] जीव [**प्राणनिबद्धः**] प्राणोंसे संयुक्त होता हुआ [**कर्मफलं उपभुंजानः**] कर्मफलको भोगता हुआ [**अन्यैः कर्मभिः**] अन्य कर्मोंसे [**बध्यते**] बँधता है।

टीका :– (१) मोहादिक पौद्गलिक कर्मोंसे बँधा हुआ होनेसे जीव प्राणोंसे संयुक्त होता है और (२) प्राणोंसे संयुक्त होनेके कारण पौद्गलिक कर्मफलको (मोही-

---

मोहादिकर्म निबंधथी संबन्धपामी प्राणनो।
जीव कर्मफल-उपभोग करतां बंध पामे कर्मनो ॥ १४८ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यतो मोहादिभिः पौद्गलिककर्मभिर्बद्धत्वाज्जीवः प्राणनिबद्धो भवति, यतश्च प्राणनिबद्धत्वात्पौद्गलिककर्मफलमुपभुञ्जानः पुनरप्यन्यैः पौद्गलिककर्मभिर्बध्यते, ततः पौद्गलिककर्मकार्यत्वात्पौद्गलिककर्मकारणत्वाच्च पौद्गलिका एव प्राणा निश्चीयन्ते ॥ १४८ ॥

अथ प्राणानां पौद्गलिककर्मकारणत्वमुन्मीलयति –

पाणाबाधं जीवो मोहपदेसेहिं कुणदि जीवाणं ।
जदि सो हवदि हि बंधो णाणावरणादिकम्मेहिं ॥ १४९ ॥

प्राणाबाधं जीवो मोहप्रद्वेषाभ्यां करोति जीवयोः ।
यदि स भवति हि बन्धो ज्ञानावरणादिकर्मभिः ॥ १४९ ॥

मोहादिएहिं कम्मेहिं मोहनीयादिकर्मभिर्बद्धस्ततो ज्ञायते मोहादिकर्मभिर्बद्धः सन् प्राणनिबद्धो भवति, न च कर्मबन्धरहित इति । तत एव ज्ञायते प्राणाः पुद्गलकर्मोदयजनिता इति । तथाविधः सन् किं करोति । **उवभुंजदि कम्मफलं** परमसमाधिसमुत्पन्ननित्यानन्दैकलक्षणसुखामृतभोजनमलभमानः सन् कटुकविषसमानमपि कर्मफलमुपभुङ्क्ते । **बज्झदि अण्णेहिं कम्मेहिं** तत्कर्मफलमुपभुञ्जानः सन्नयं जीवः कर्मरहितात्मनो विसदृशैरन्यकर्मभिर्नवतरकर्मभिर्बध्यते । यतः कारणात्कर्मफलं भुञ्जानो नवतरकर्माणि बध्नाति, ततो ज्ञायते प्राणा नवतरपुद्गलकर्मणां कारणभूता इति ॥ १४८ ॥ अथ प्राणा नवतरपुद्गलकर्मबन्धस्य कारणं भवन्तीति पूर्वोक्तमेवार्थं विशेषेण समर्थयति—**पाणाबाधं** आयुरादिप्राणानां बाधां पीडां **कुणदि** करोति । स कः । **जीवो** जीवः । काभ्यां कृत्वा । **मोहपदेसेहिं** सकलविमल-

---

रागी-द्वेषी जीव मोह-राग-द्वेषपूर्वक) भोगता हुआ पुनः भी अन्य पौद्गलिक कर्मोंसे बँधता है, इसलिये (१) पौद्गलिक कर्मके कार्य होनेसे और (२) पौद्गलिक कर्मके कारण होनेसे प्राण पौद्गलिक ही निश्चित होते हैं ॥ १४८ ॥

अब, प्राणोंके पौद्गलिक कर्मका कारणपना (अर्थात् प्राण पौद्गलिक कर्मके कारण किस प्रकार हैं) वह प्रगट करते हैं :–

गाथा १४९

अन्वयार्थ :– [**यदि**] यदि [**जीवः**] जीव [**मोहप्रद्वेषाभ्यां**] मोह और द्वेषके द्वारा [**जीवयोः**] जीवोंके (स्वजीवके तथा परजीवके) [**प्राणाबाधं करोति**] प्राणोंको बाधा

जीव मोहद्वेष वडे करे बाधा, जीवोना प्राण ने ।
तो बन्ध ज्ञानावरण-आदिक कर्मनो ते थाय छे ॥ १४९ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

प्राणैर्हि तावज्जीवः कर्मफलमुपभुंक्ते, तदुपभुञ्जानो मोहप्रद्वेषावाप्नोति ; ताभ्यां स्वजीवपरजीवयोः प्राणाबाधं विदधाति । तदा कदाचित्परस्य द्रव्यप्राणानाबाध्य कदाचिदनाबाध्य स्वस्य भावप्राणानुपरक्तत्वेन बाधमानो ज्ञानावरणादीनि कर्माणि बध्नाति । एवं प्राणाः पौद्गलिककर्मकारणतामुपयान्ति ॥ १४९ ॥

अथ पुद्गलप्राणसन्ततिप्रवृत्तिहेतुमन्तरङ्गमासूत्रयति –

केवलज्ञानप्रदीपेन मोहान्धकारविनाशकात्परमात्मनो विपरीताभ्यां मोहप्रद्वेषाभ्यां । केषां प्राणबाधां करोति । **जीवाणं** एकेन्द्रियप्रमुखजीवानाम् । **जदि** यदि चेत् **सो हवदि बंधो** तदा स्वात्मोपलम्भप्राप्तिरूपान्मोक्षाद्विपरीतो मूलोत्तरप्रकृत्यादिभेदभिन्नः स परमागमप्रसिद्धो **हि** स्फुटं बन्धो भवति । कैः कृत्वा । **णाणावरणादिकम्मेहिं** ज्ञानावरणादिकर्मभिरिति । ततो ज्ञायते प्राणाः पुद्गलकर्मबन्धकारणं भवन्तीति । अयमत्रार्थः—यथा कोऽपि तप्तलोहपिण्डेन परं हन्तुकामः सन् पूर्वं तावदात्मानमेव हन्ति, पश्चादन्यघाते नियमो नास्ति, तथायमज्ञानी जीवोऽपि तप्तलोहपिण्डस्थानीयमोहादिपरिणामेन परिणतः सन् पूर्वं निर्विकारस्वसंवेदनज्ञानस्वरूपं स्वकीयशुद्धप्राणं हन्ति, पश्चादुत्तरकाले परप्राणघाते नियमो नास्तीति ॥ १४९ ॥ अथेन्द्रियादिप्राणोत्पत्तेरन्तरङ्गहेतुमुपदिशति—**आदा कम्ममलिमसो**

पहुंचाते हैं, [**सः हि**] तो पूर्वकथित [**ज्ञानावरणादिकर्मभिः बंधः**] ज्ञानावरणादिक कर्मोंके द्वारा बंध [**भवति**] होता है ।

टीका :– प्रथम तो प्राणोंसे जीव कर्मफलको भोगता है ; उसे भोगता हुआ मोह तथा द्वेषको प्राप्त होता है ; मोह तथा द्वेषसे स्वजीव तथा परजीवके प्राणोंको [१]बाधा पहुंचाता है । वहाँ कदाचित् (किसी समय) परके द्रव्य प्राणोंको बाधा पहुचाकर और कदाचित् (परके द्रव्य प्राणोंको) बाधा न पहुंचाकर, अपने भावप्राणोंको तो [२]उपरक्तपनेसे (अवश्य ही) बाधा पहुंचाता हुआ जीव ज्ञानावरणादि कर्मोंको बाँधता है । इसप्रकार प्राण पौद्गलिक कर्मोंके कारणपनेको प्राप्त होते हैं ॥ १४९ ॥

अब पौद्गलिक प्राणोंकी संततिकी (प्रवाहकी – परम्पराकी) प्रवृत्तिका अन्तरंग हेतु सूत्र द्वारा कहते हैं :–

---

[१] बाधा = पीड़ा, उपद्रव, विघ्न ।

[२] उपरक्तपना = मलिनपना ; विकारीपना ; मोहादिपरिणामरूप परिणमित होना । [जैसे कोई पुरुष तप्त लोहेके गोलेसे दूसरेको जलानेकी इच्छा करता हुआ प्रथम तो स्वयं अपनेको ही जलाता है; (स्वयं अपने ही हाथको जलाता है) फिर दूसरा जले या न जले – इसका कोई नियम नहीं है; उसीप्रकार जीव मोहादिपरिणामरूप परिणमित होता हुआ प्रथम तो निर्विकार स्वसंवेदनज्ञानस्वरूप निज शुद्ध भावप्राणोंको ही हानि पहुँचाता है, फिर दूसरेके द्रव्यप्राणोंकी हानि हो या न हो – इसका कोई नियम नहीं है ।]

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

आदा कम्ममलिमसो धरेदि पाणे पुणो पुणो अण्णे ।
ण चयदि जाव ममत्तिं देहपधाणेसु विसयेसु ॥ १५० ॥

आत्मा कर्ममलीमसो धारयति प्राणान् पुनः पुनरन्यान् ।
न त्यजति यावन्ममत्वं देहप्रधानेषु विषयेषु ॥ १५० ॥

येययात्मनः पौद्गलिकप्राणानां संतानेन प्रवृत्तिः, तस्या अनादिपौद्गलकर्ममूलं शरीरादिममत्वरूपमुपरक्तत्वमन्तरङ्गो हेतुः ॥ १५० ॥

अयमात्मा स्वभावेन भावकर्मद्रव्यकर्मनोकर्ममलरहितत्वेनात्यन्तनिर्मलोऽपि व्यवहारेणानादिकर्मबन्धवशान्मलीमसो भवति। तथाभूतः सन् किं करोति। **धरेदि पाणे पुणो पुणो अण्णे** धारयति प्राणान् पुनःपुनः अन्यान्नवतरान्। यावत्किम्। **ण चयदि जाव ममत्तं** निस्नेहचिच्चमत्कारपरिणतेर्विपरीतां ममतां यावत्कालं न त्यजति। केषु विषयेषु। **देहपधाणेसु विसयेसु** देहविषयरहितपरमचैतन्यप्रकाशपरिणतेः प्रतिपक्षभूतेषु देहप्रधानेषु पञ्चेन्द्रियविषयेष्विति। ततः स्थितमेतत्—इन्द्रियादिप्राणोत्पत्तेर्देहादिममत्वमेवान्तरङ्गकारणमिति ॥ १५० ॥ अथेन्द्रियादिप्राणानामभ्यन्तरं विनाशकारणमावेद-

---

गाथा १५०

अन्वयार्थ :– [**यावत्**] जब तक [**देहप्रधानेषु विषयेषु**] देहप्रधान विषयोंमें [**ममत्वं**] ममत्वको [**न त्यजति**] नहीं छोड़ता, [**कर्ममलीमसः आत्मा**] तब तक कर्मसे मलिन आत्मा [**पुनः पुनः**] पुनः-पुनः [**अन्यान् प्राणान्**] अन्य-अन्य प्राणोंको [**धारयति**] धारण करता है।

टीका :– जो इस आत्माको पौद्गलिक प्राणोंकी संतानरूप प्रवृत्ति है, उसका अन्तरंग हेतु शरीरादिका ममत्वरूप उपरक्तपना है, जिसका मूल (निमित्त) अनादि पौद्गलिक कर्म है।

भावार्थ :– द्रव्यप्राणोंकी परम्परा चलते रहनेका अन्तरंग कारण अनादि पुद्गलकर्मके निमित्तसे होनेवाला जीवका विकारी परिणमन है। जबतक जीव देहादि विषयोंके ममत्वरूप विकारी परिणमनको नहीं छोड़ता तब तक उसके निमित्तसे पुनः-पुनः पुद्गलकर्म बँधते रहते हैं और उससे पुनः-पुनः द्रव्यप्राणोंका सम्बन्ध होता रहता है ॥१५०॥

अब पौद्गलिक प्राणोंकी संततिकी निवृत्तिका अन्तरंग हेतु समझाते हैं :–

कर्मे मलिन जीव त्यां लगी प्राणो धरे छे फरी फरी ।
ममता शरीरप्रधान विषये ज्यां लगी छोड़े नहीं ॥ १५० ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ पुद्गलप्राणसंततिनिवृत्तिहेतुमन्तरङ्गं ग्राहयति –

जो इंदियादिविजई भवीय उवओगमप्पगं झादि ।
कम्मेहिं सो ण रज्जदि किह तं पाणा अणुचरंति ॥१५१॥

य इन्द्रियादिविजयी भूत्वोपयोगमात्मकं ध्यायति ।
कर्मभिः स न रज्यते कथं तं प्राणा अनुचरन्ति ॥ १५१ ॥

यति—**जो इंदियादिविजई भवीय** यः कर्तातीन्द्रियात्मोत्थसुखामृतसंतोषबलेन जितेन्द्रियत्वेन निःकषाय-निर्मलानुभूतिबलेन कषायजयेन चेन्द्रियादिविजयी भूत्वा **उवओगमप्पगं झादि** केवलज्ञानदर्शनोपयोगं निजात्मानं ध्यायति, **कम्मेहिं सो ण रंजदि** कर्मभिश्चिच्चमत्कारात्मनः प्रतिबन्धकैर्ज्ञानावरणादिकर्मभिः स न रज्यते, न बध्यते । **किह तं पाणा अणुचरंति** कर्मबन्धाभावे सति तं पुरुषं प्राणाः

गाथा १५१

अन्वयार्थ :– [**यः**] जो [**इन्द्रियादिविजयीभूत्वा**] इन्द्रियादिका विजयी होकर [**उपयोगं आत्मकं**] उपयोगमात्र आत्माका [**ध्यायति**] ध्यान करता है, [**सः**] वह [**कर्मभिः**] कर्मोंके द्वारा [**न रज्यते**] रंजित नहीं होता; [**तं**] उसे [**प्राणाः**] प्राण [**कथं**] कैसे [**अनुचरंति**] अनुसरेंगे ? (अर्थात् उसके प्राणोंका सम्बन्ध नहीं होता ।)

टीका :– वास्तवमें पौद्गलिक प्राणोंके संततिकी निवृत्तिका अन्तरङ्ग हेतु पौद्गलिक कर्म जिसका कारण (-निमित्त) है ऐसे [१]उपरक्तपनेका अभाव है । और वह अभाव जो जीव समस्त इन्द्रियादिक परद्रव्योंके अनुसार परिणतिका विजयी होकर, (अनेक वर्णोंवाले) [२]आश्रयानुसार सारी परिणतिसे व्यावृत्त (पृथक्, अलग) हुए स्फटिक मणिकी भाँति, अत्यन्त विशुद्ध उपयोगमात्र अकेले आत्मामें सुनिश्चलतया बसता है, उस जीवके होता है ।

यहाँ यह तात्पर्य है कि – आत्माकी अत्यन्त विभक्तता सिद्ध करनेके लिये व्यवहारजीवत्वके हेतुभूत पौद्गलिक प्राण इसप्रकार उच्छेद करनेयोग्य हैं ।

---

[१] उपरक्तपना = विकृतपना ; मलिनपना ; रंजितपना ; उपरागयुक्तपना, [उपरागके अर्थके लिये गाथा १२६ का फुटनोट देखो]

[२] आश्रय = जिसमें स्फटिकमणि रखा हो वह वस्तु ।

करी इन्द्रियादिक-विजय ध्यावे आत्मने उपयोगने ।
ते कर्मथी रंजित नहि; क्यम प्राण तेने अनुसरे ? ॥ १५१ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

पुद्गलप्राणसंततिनिवृत्तेरन्तरङ्गो हेतुर्हि पौद्गलिककर्ममूलस्योपरक्तत्वस्याभावः। स तु समस्तेन्द्रियादिपरद्रव्यानुवृत्तिविजयिनो भूत्वा समस्तोपाश्रयानुवृत्तिव्यावृत्तस्य स्फटिकमणेरिवात्यन्तविशुद्धमुपयोगमात्रमात्मानं सुनिश्चलं केवलमधिवसतः स्यात्। इदमत्र तात्पर्यं आत्मनोऽत्यन्तविभक्तसिद्धये व्यवहारजीवत्वहेतवः पुद्गलप्राणा एव-मुच्छेत्तव्याः ॥ १५१ ॥

अथ पुनरप्यात्मनोऽत्यन्तविभक्तत्वसिद्धये गतिविशिष्टव्यवहारजीवत्वहेतुपर्याय-स्वरूपमुपवर्णयति –

कर्तारः कथमनुचरन्ति कथमाश्रयन्ति। न कथमपीति। ततो ज्ञायते कषायेन्द्रियविजय एव पञ्चेन्द्रि-यादिप्राणानां विनाशकारणमिति ॥ १५१ ॥ एवं 'सपदेसेहिं समग्गो' इत्यादि गाथाष्टकेन सामान्यभेद-भावनाधिकारः समाप्तः। अथानन्तरमेकपञ्चाशद्गाथापर्यन्तं विशेषभेदभावनाधिकारः कथ्यते। तत्र विशेषान्तराधिकारचतुष्टयं भवति। तेषु चतुर्षु मध्ये शुभाद्युपयोगत्रयमुख्यत्वेनैकादशगाथापर्यन्तं प्रथमविशेषान्तराधिकारः प्रारभ्यते। तत्र चत्वारि स्थलानि भवन्ति। तस्मिन्नादौ नरादिपर्यायैः सह शुद्धात्मस्वरूपस्य पृथक्त्वपरिज्ञानार्थं 'अत्थित्तणिच्छिदस्स हि' इत्यादि यथाक्रमेण गाथात्रयम्। तदनन्तरं तेषां संयोगकारणं 'अप्पा उवओगप्पा' इत्यादि गाथाद्वयम्। तदनन्तरं शुभाशुभशुद्धोपयोगत्रयसूचन-मुख्यत्वेन 'जो जाणादि जिणिंदे' इत्यादि गाथात्रयम्। तदनन्तरं कायवाङ्मनसां शुद्धात्मना सह भेद-कथनरूपेण 'णाहं देहो' इत्यादि गाथात्रयम्। एवमेकादशगाथाभिः प्रथमविशेषान्तराधिकारे समुदाय-पातनिका। तद्यथा—अथ पुनरपि शुद्धात्मनो विशेषभेदभावनार्थं नरनारकादिपर्यायरूपं व्यवहार-

---

भावार्थ :—जैसे अनेक रंगयुक्त आश्रयभूत वस्तुके अनुसार जो (स्फटिक मणिका) अनेकरंगी परिणमन है उससे सर्वथा व्यावृत्त हुये स्फटिकमणिके उपरक्तपनेका अभाव है, उसीप्रकार अनेकप्रकारके कर्म व इन्द्रियादिके अनुसार जो (आत्माका) अनेक प्रकारका विकारी परिणमन है उससे सर्वथा व्यावृत हुये आत्माके (जो एक उपयोगमात्र आत्मामें) सुनिश्चलतया बसता है उसके) उपरक्तपनेका अभाव होता है। उस अभावसे पौद्गलिक प्राणोंकी परम्परा अटक जाती है।

इसप्रकार पौद्गलिक प्राणों का उच्छेद करने योग्य है ॥ १५१ ॥

अब फिर भी, आत्माकी अत्यन्त विभक्तता सिद्ध करनेके लिये, व्यवहार जीवत्वके हेतु ऐसी जो गतिविशिष्ट (देव-मनुष्यादि) पर्यायोंका स्वरूप कहते हैं :—

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अत्थित्तणिच्छिदस्स हि अत्थस्सत्थंतरम्हि संभूदो ।
अत्थो पज्जाओ सो संठाणादिप्पभेदेहिं ॥ १५२ ॥

अस्तित्वनिश्चितस्य ह्यर्थस्यार्थान्तरे संभूतः ।
अर्थः पर्यायः स संस्थानादिप्रभेदैः ॥ १५२ ॥

जीवत्वहेतुं दर्शयति—**अत्थित्तणिच्छिदस्स हि** चिदानन्दैकलक्षणस्वरूपास्तित्वेन निश्चितस्य ज्ञातस्य हि स्फुटम् । कस्य । **अत्थस्स** परमात्मपदार्थस्य **अत्थंतरम्मि** शुद्धात्मार्थादन्यस्मिन् ज्ञानावरणादिकर्म-रूपे अर्थान्तरे **संभूदो** संजात उत्पन्नः **अत्थो** यो नरनारकादिरूपोऽर्थः, **पज्जाओ सो** निर्विकारशुद्धात्मा-

---

गाथा १५२

अन्वयार्थ :– [**अस्तित्वनिश्चितस्य अर्थस्य हि**] अस्तित्वसे निश्चित अर्थका (द्रव्य-का) [**अर्थान्तरे संभूतः**] अन्य अर्थमें (द्रव्यमें) उत्पन्न [**अर्थः**] जो अर्थ (भाव) [**स पर्यायः**] वह पर्याय है – [**संस्थानादिप्रभेदैः**] कि जो संस्थानादि भेदों सहित होती है ।

टीका :– स्वलक्षणभूत स्वरूप-अस्तित्वसे निश्चित एक अर्थका (द्रव्यका), स्वलक्षणभूत स्वरूप-अस्तित्वसे ही निश्चित ऐसे अन्य अर्थमें (द्रव्यमें) विशिष्टरूपसे (भिन्न-भिन्न रूपसे) उत्पन्न होता हुआ जो अर्थ (भाव), वह अनेकद्रव्यात्मक पर्याय है वह अनेक द्रव्यात्मक पर्याय वास्तवमें, जैसे पुद्गलकी अन्य पुद्गलमें (अनेकद्रव्यात्मक-उत्पन्न होती हुई देखी जाती है उसी प्रकार, जीवकी पुद्गलमें संस्थानादिसे विशिष्टतया (संस्थान इत्यादिके भेद सहित) उत्पन्न होती हुई अनुभवमें अवश्य आती है और ऐसी पर्याय उपपन्न (योग्य घटित, न्याययुक्त) है; क्योंकि जो केवल जीवकी व्यतिरेक-मात्र है ऐसी अस्खलित एकद्रव्यपर्याय ही अनेक द्रव्योंके संयोगात्मकरूपसे भीतर अवभासित होती है ।

भावार्थ :–यद्यपि प्रत्येक द्रव्यका स्वरूप-अस्तित्व सदा ही भिन्न-भिन्न रहता है तथापि, जैसे पुद्गलोंकी अन्य पुद्गलके संबंधसे स्कंधरूप पर्याय होती है उसीप्रकार जीवकी पुद्गलोंके संबंधसे देवादिक पर्याय होती है । जीवकी ऐसी अनेकद्रव्यात्मक देवादिपर्याय अयुक्त नहीं है; क्योंकि भीतर देखने पर, अनेक द्रव्योंका संयोग होने पर

अस्तित्व निश्चित अर्थनो को अन्यअर्थे उपजतो ।
जे अर्थ ते पर्याय छे, ज्यां भेद संस्थानादिनो ॥ १५२ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

स्वलक्षणभूतस्वरूपास्तित्वनिश्चितस्यैकस्यार्थस्य स्वलक्षणभूतस्वरूपास्तित्वनिश्चित एवान्यस्मिन्नर्थे विशिष्टरूपतया संभावितात्मलाभोऽर्थोऽनेकद्रव्यात्मकः पर्यायः। स खलु पुद्गलस्य पुद्गलान्तर इव जीवस्य पुद्गले संस्थानादिविशिष्टतया समुपजायमानः संभाव्यत एव। उपपन्नश्चैवंविधः पर्यायः। अनेकद्रव्यसंयोगात्मत्वेन केवलजीवव्यतिरेकमात्रस्यैकद्रव्यपर्यायस्यास्खलितस्यान्तरवभासनात् ॥ १५२ ॥

अथ पर्यायव्यक्तीर्दर्शयति –

णरणारयतिरियसुरा संठाणादीहिं अण्णहा जादा।
पज्जाया जीवाणं उदयादिहिं णामकम्मस्स ॥ १५३ ॥

नरनारकतिर्यक्सुराः संस्थानादिभिरन्यथा जातः।
पर्याया जीवानामुदयादिभिर्नामकर्मणः ॥ १५३ ॥

नुभूतिलक्षणस्वभावव्यञ्जनपर्यायादन्यादृशः सन् विभावव्यञ्जनपर्यायो भवति स इत्थंभूतपर्यायो जीवस्य। कैः कृत्वा जातः। **संठाणादिप्पभेदेहिं** संस्थानादिरहितपरमात्मद्रव्यविलक्षणैः संस्थानसंहननशरीरादिप्रभेदैरिति ॥ १५२ ॥ अथ तानेव पर्यायभेदान् व्यक्तीकरोति—**णरणारयतिरियसुरा** नरनारकतिर्यग्देवरूपा अवस्थाविशेषाः **संठाणादीहिं अण्णहा जादा** संस्थानादिभिरन्यथा जाताः; मनुष्यभवे

भी, जीव कहीं पुद्गलोंके साथ एकरूप पर्याय नहीं करता, परन्तु वहाँ भी मात्र जीवकी (पुद्गल पर्यायसे भिन्न) अस्खलित (अपनेसे च्युत न होनेवाली) एकद्रव्यपर्याय ही सदा प्रवर्तमान रहती है ॥ १५२ ॥

अब पर्यायके भेद बतलाते हैं :–

गाथा १५३

अन्वयार्थ :– [**नरनारकतिर्यक्सुराः**] मनुष्य, नारक, तिर्यंच और देव – ये [**नामकर्मणः उदयादिभिः**] नामकर्मके उदयादिकके कारण [**जीवानां पर्यायाः**] जीवोंकी पर्यायें हैं – [**संस्थानादिभिः**] जो कि संस्थानादिके द्वारा [**अन्यथा जाताः**] अन्य-अन्य प्रकारकी होती हैं।

तिर्यंच, नारक, देव, नर अे नामकर्मोदय वडे।
छे जीवना पर्याय, जेह विशिष्ट संस्थानादिके ॥ १५३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

नारकस्तिर्यङ्मनुष्यो देव इति किल पर्याया जीवानाम्। ते खलु नामकर्मपुद्गल-विपाककारणत्वेनानेकद्रव्यसंयोगात्मकत्वात् कुकूलाङ्गारादिपर्याया जातवेदसः क्षोदखिल्व-संस्थानादिभिरिव संस्थानादिभिरन्यथैव भूता भवन्ति ॥ १५३ ॥

अथात्मनोऽन्यद्रव्यसंकीर्णत्वेऽप्यर्थनिश्चायकमस्तित्वं स्वपरविभावहेतुत्वेनोद्योतयति —

तं सब्भावणिबद्धं दव्वसहावं तिहा समक्खादं।
जाणादि जो सवियप्पं ण मुहदि सो अण्णदवियम्हि ॥ १५४ ॥

तं सद्भावनिबद्धं द्रव्यस्वभावं त्रिधा समाख्यातम्।
जानाति यः सविकल्पं न मुह्यति सोऽन्यद्रव्ये ॥ १५४ ॥

यत्समचतुरस्राचिसंस्थानमौदारिकशरीरादिकं च तदपेक्षया भवान्तरेऽन्यद्विसदृशं संस्थानादिकं भवति। तेन कारणेन ते नरनारकादिपर्याया अन्यथा जाता भिन्ना भण्यन्ते; न च शुद्धबुद्धैकस्वभावपरमात्म-द्रव्यत्वेन। कस्मात्। तृणकाष्ठपत्राकारादिभेदभिन्नस्याग्नेरिव स्वरूपं यदेव। **पज्जाया जीवाणं ते च** नरनारकादयो जीवानां विभावव्यञ्जनपर्याया भण्यन्ते। कैः कृत्वा। **उदयादिहिं णामकम्मस्स** उदया-दिभिर्नामकर्मणो निर्दोषपरमात्मशब्दवाच्यान्निर्नामनिर्गोत्रादिलक्षणाच्छुद्धात्मद्रव्यादन्यादृशैर्नामकर्म-जनितैर्बन्धोदयोदीरणादिभिरिति। यत एव ते कर्मोदयजनितास्ततो ज्ञायते शुद्धात्मस्वरूपं न संभवन्तीति ॥ १५३ ॥ अथ स्वरूपास्तित्वलक्षणं परमात्मद्रव्यं योऽसौ जानाति स परद्रव्ये मोहं

टीका :— नारक, तिर्यंच, मनुष्य और देव — ये जीवोंकी पर्यायें हैं। वे नाम-कर्मरूप पुद्गलसे विपाकके कारण अनेक द्रव्योंकी संयोगात्मक हैं; इसलिये जैसे तुषकी अग्नि और अङ्गार इत्यादि अग्निकी पर्यायें चूरा और डली इत्यादि आकारोंसे अन्य-अन्य प्रकारको होती हैं, उसीप्रकार जीवकी वे नारकादि पर्यायें संस्थानादिके द्वारा अन्यान्य प्रकारकी ही होती हैं ॥ १५३ ॥

अब, आत्माका अन्य द्रव्यके साथ संयुक्तपना होने पर भी [1]अर्थ निश्चायक अस्ति-त्वको स्व-पर विभागके हेतुके रूपमें समझाते हैं :—

---

[1] अर्थ निश्चायक = द्रव्यका निश्चय करनेवाला ; (द्रव्यका निर्णय करनेका साधन जो स्वरूपास्तित्व है वह स्वपरका भेद करने में साधनभूत है, इसप्रकार इस गाथामें समझाते हैं।)

अस्तित्वथी निष्पन्न द्रव्यस्वभावने त्रिविकल्पने।
जे जाणतो, ते आत्मा नहि मोह परद्रव्ये लहे ॥ १५४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यत्खलु स्वलक्षणभूतं स्वरूपास्तित्वमर्थनिश्चायकमाख्यातं स खलु द्रव्यस्य स्वभाव एव, सद्भावनिबद्धत्वाद्द्रव्यस्वभावस्य। यथासौ द्रव्यस्वभावो द्रव्यगुणपर्यायत्वेन स्थित्युत्पादव्ययत्वेन च त्रितयीं विकल्पभूमिकामधिरूढः परिज्ञायमानः परद्रव्ये मोहमपोह्य स्वपरविभागहेतुर्भवति ततः स्वरूपास्तित्वमेव स्वपरविभागसिद्धये प्रतिपदमवधार्यम्। तथा हि – यच्चेतनत्वान्वयलक्षणं द्रव्यं, यश्चेतनाविशेषत्वलक्षणो गुणो, यश्चेतनत्वव्यति-

---

न करोतीति प्रकाशयति – **जाणदि** जानाति। **जो** यः कर्ता। कम्। **तं** पूर्वोक्तं **दव्वसहावं** परमात्मद्रव्यस्वभावम्। किंविशिष्टम्। **सब्भावणिबद्धं** स्वभावः स्वरूपसत्ता तत्र निबद्धमाधीनं तन्मयं सद्भावनिबद्धम्। पुनरपि किंविशिष्टम्। **तिहा समक्खादं** त्रिधा समाख्यातं कथितम्। केवलज्ञानादयो गुणाः सिद्धत्वादिविशुद्धपर्यायास्तदुभयाधारभूतं परमात्मद्रव्यत्वमित्युक्तलक्षणत्रयात्मकं तथैव

गाथा १५४

अन्वयार्थ :– [**यः**] जो जीव [**तं**] उस (पूर्वोक्त) [**सद्भावनिबद्धं**] अस्तित्व-निष्पन्न, [**त्रिधा समाख्यातं**] तीन प्रकारसे कथित, [**सविकल्पं**] भेदोंवाले [**द्रव्य-स्वभावं**] द्रव्यस्वभावको [**जानाति**] जानता है, [**सः**] वह [**अन्यद्रव्ये**] अन्य द्रव्यमें [**न मुह्यति**] मोहको प्राप्त नहीं होता।

टीका :– जो, द्रव्यको निश्चित करनेवाला, स्वलक्षणभूत स्वरूप-अस्तित्व कहा गया है वह वास्तवमें द्रव्यका स्वभाव ही है; क्योंकि द्रव्यका स्वभाव अस्तित्व-निष्पन्न (अस्तित्वका बना हुआ) है। द्रव्य-गुण-पर्यायरूपसे तथा ध्रौव्य-उत्पाद-व्यय-रूपसे [1]त्रयात्मक भेदभूमिकामें आरूढ़ ऐसा यह द्रव्यस्वभाव ज्ञात होता हुआ, परद्रव्यके प्रति मोहको दूर करके स्व-परके विभागका हेतु होता है, इसलिये स्वरूप-अस्तित्व ही स्व-परके विभागकी सिद्धिके लिये पद-पद पर अवधारना (लक्ष्यमें लेना) चाहिये। वह इसप्रकार है :-

(१) चेतनत्वका अन्वय जिसका लक्षण है ऐसा जो द्रव्य, (२) चेतनाविशेषत्व (चेतनाका विशेषपना) जिसका लक्षण है ऐसा जो गुण और (३) चेतनत्वका व्यतिरेक जिसका लक्षण है ऐसी जो पर्याय – यह त्रयात्मक (ऐसा स्वरूप-अस्तित्व), तथा

---

[1] त्रयात्मक=तीनस्वरूप; तीनके समूहस्वरूप (द्रव्यका स्वभाव द्रव्य, गुण और पर्याय ऐसे तीन भेदोंवाला तथा ध्रौव्य, उत्पाद और व्यय ऐसे तीन भेदोंवाला है।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

रेकलक्षणः पर्यायस्तत्त्रयात्मकं, या पूर्वोत्तरव्यतिरेकस्पर्शिना चेतनत्वेन स्थितिर्यावुत्तर-पूर्वव्यतिरेकत्वेन चेतनस्योत्पादव्ययौ तत्त्रयात्मकं च स्वरूपास्तित्वं यस्य नु स्वभावोऽहं स खल्वयमन्यः। यच्चाचेतनत्वान्वयलक्षणं द्रव्यं, योऽचेतनाविशेषत्वलक्षणो गुणो, योऽचेतनत्वव्यतिरेकलक्षणः पर्यायस्तत्त्रयात्मकं, या पूर्वोत्तरव्यतिरेकस्पर्शिनाचेतनत्वेन स्थितिर्यावुत्तरपूर्वव्यतिरेकत्वेनाचेतनस्योत्पादव्ययौ तत्त्रयात्मकं च स्वरूपास्तित्वम् यस्य तु स्वभावः पुद्गलस्य स खल्वयमन्यः। नास्ति मे मोहोऽस्ति स्वपरविभागः ॥ १५४ ॥

शुद्धोत्पादव्ययध्रौव्यत्रयात्मकं च यत्पूर्वोक्तं स्वरूपास्तित्वं तेन कृत्वा त्रिधा सम्यगाख्यातं कथितं प्रतिपादितम्। पुनरपि कथंभूतं आत्मस्वभावम्। **सवियप्पं** सविकल्पं पूर्वोक्तद्रव्यगुणपर्यायरूपेण सभेदम्। य इत्थंभूतमात्मस्वभावं जानाति, **ण मुहदि सो अण्णदवियम्हि** न मुह्यति सोऽन्यद्रव्ये, स तु भेदज्ञानी विशुद्धज्ञानदर्शनस्वभावमात्मतत्त्वं विहाय देहरागादिपरद्रव्ये मोहं न गच्छतीत्यर्थः ॥ १५४ ॥

---

(१) [1]पूर्व और उत्तर व्यतिरेकको स्पर्श करनेवाले चेतनत्वरूपसे जो ध्रौव्य और (२-३) चेतनके उत्तर तथा पूर्व व्यतिरेकरूपसे जो उत्पाद और व्यय – यह त्रयात्मक (ऐसा) स्वरूप-अस्तित्व जिसका स्वभाव है ऐसा मैं वास्तवमें यह अन्य हूं, (अर्थात् मैं पुद्गलसे ये भिन्न रहा)। और (१) अचेतनत्वका अन्वय जिसका लक्षण है ऐसा जो द्रव्य, (२) अचेतना विशेषत्व जिसका लक्षण है ऐसा जो गुण और (३) अचेतन-त्वका व्यतिरेक जिसका लक्षण है ऐसी जो पर्याय – यह त्रयात्मक (ऐसा स्वरूप-अस्तित्व) तथा (१) पूर्व और उत्तर व्यतिरेकको स्पर्शकरनेवाले अचेतनत्वरूपसे जो ध्रौव्य और (२-३) अचेतनके उत्तर तथा पूर्व व्यतिरेकरूपसे जो उत्पाद और व्यय – यह त्रयात्मक ऐसा स्वरूप-अस्तित्व जिस पुद्गलका स्वभाव है वह वास्तवमें (मुझसे) अन्य है। (इसलिये) मुझे मोह नहीं है ; स्वपरका विभाग है।

भावार्थ :– मनुष्य, देव इत्यादि अनेकद्रव्यात्मक पर्यायोंमें भी जीवका स्वरूप-अस्तित्व और प्रत्येक परमाणुका स्वरूप-अस्तित्व सर्वथा भिन्न-भिन्न है। सूक्ष्मतासे देखने पर वहाँ जीव और पुद्गलका स्वरूप-अस्तित्व (अर्थात् अपने-अपने द्रव्य-गुण-पर्याय और ध्रौव्य-उत्पाद-व्यय) स्पष्टतया भिन्न जाना जा सकता है। स्व-परका भेद करनेके लिये जीवको इस स्वरूपास्तित्वको पद-पद पर लक्ष्यमें लेना योग्य है। यथा – यह (जाननेमें आता हुआ) चेतन द्रव्य-गुण-पर्याय और चेतन ध्रौव्य-उत्पाद-व्यय जिसका स्वभाव है

---

[1] पूर्व अर्थात् पहलेका; और उत्तर अर्थात् बादका। (चेतन पूर्व और उत्तरकी दोनों पर्यायोंको स्पर्श करता है; इस अपेक्षासे ध्रौव्य है; बादकी अर्थात् वर्तमान पर्यायकी अपेक्षासे उत्पाद है और पहलेकी पर्यायकी अपेक्षासे व्यय है।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथात्मनोऽत्यन्तविभक्तत्वाय परद्रव्यसंयोगकारणस्वरूपमालोचयति –

अप्पा उवओगप्पा उवओगो णाणदंसणं भणिदो ।
सो वि सुहो असुहो वा उवओगो अप्पणो हवदि ॥ १५५ ॥

आत्मा उपयोगात्मा उपयोगो ज्ञानदर्शनं भणितः ।
सोऽपि शुभोऽशुभो वा उपयोग आत्मनो भवति ॥ १५५ ॥

एवं नरनारकादिपर्यायैः सह परमात्मनो विशेषभेदकथनरूपेण प्रथमस्थले गाथात्रयं गतम्। अथात्मनः पूर्वोक्तप्रकारेण नरनारकादिपर्यायैः सह भिन्नत्वपरिज्ञानं जातं, तावदिदानीं तेषां संयोगकारणं कथ्यते – **अप्पा** आत्मा भवति। कथंभूतः। **उवओगप्पा** चैतन्यानुविधायी योऽसावुपयोगस्तेन निर्वृत्तत्वादुपयोगात्मा। **उवओगो णाणदंसणं भणिदो** स चोपयोगः सविकल्पं ज्ञानं निर्विकल्पं

ऐसा मैं इस (पुद्गल) से भिन्न रहा; और यह अचेतन द्रव्य-गुण-पर्याय तथा अचेतन ध्रौव्य-उत्पाद-व्यय जिसका स्वभाव है ऐसा पुद्गल यह (मुझसे) भिन्न रहा। इसलिये मुझे परके प्रति मोह नहीं है; स्व-परका भेद है ॥ १५४ ॥

अब, आत्माको अत्यन्त विभक्त करनेके लिये परद्रव्यके संयोगके कारणका स्वरूप कहते हैं :–

गाथा १५५

अन्वयार्थ :– [**आत्मा उपयोगात्मा**] आत्मा उपयोगात्मक है; [**उपयोगः**] उपयोग [**ज्ञानदर्शनं भणितः**] ज्ञान-दर्शन कहा गया है; [**अपि**] और [**आत्मनः**] आत्माका [**सः उपयोगः**] वह उपयोग [**शुभः अशुभः वा**] शुभ अथवा अशुभ [**भवति**] होता है।

टीका :– वास्तवमें आत्माको परद्रव्यके संयोगका कारण [1]उपयोगविशेष है। प्रथम तो उपयोग वास्तवमें आत्माका स्वभाव है क्योंकि वह चैतन्य-अनुविधायी (उपयोग चैतन्यका अनुसरण करके होनेवाला) परिणाम है। और वह उपयोग

---

[1] उपयोगविशेष=उपयोगका भेद, प्रकार या अमुक प्रकारका उपयोग। (अशुद्धोपयोग परद्रव्यके संयोगका कारण है; यह १५६ वीं गाथामें कहेंगे।)

छे आतमा उपयोगरूप, उपयोग दर्शन-ज्ञान छे ।
उपयोग अे आत्मा तणो शुभ वा अशुभरूप होय छे ॥ १५५ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

आत्मनो हि परद्रव्यसंयोगकारणमुपयोगविशेषः। उपयोगो हि तावदात्मनः स्वभावश्चैतन्यानुविधायिपरिणामत्वात्। स तु ज्ञानं दर्शनं च, साकारनिराकारत्वेनोभयरूपत्वाच्चैतन्यस्य। अथायमुपयोगो द्वेधा विशिष्यते शुद्धाशुद्धत्वेन। तत्र शुद्धो निरुपरागः, अशुद्धः सोपरागः। स तु विशुद्धिसंक्लेशरूपत्वेन द्वैविध्यादुपरागस्य द्विविधः शुभोऽशुभश्च ॥ १५५ ॥

अथात्र क उपयोगः परद्रव्यसंयोगकारणमित्यावेदयति –

उवओगो जदि हि सुहो पुण्णं जीवस्स संचयं जादि।
असुहो वा तध पावं तेसिमभावे ण चयमत्थि ॥ १५६ ॥

उपयोगो यदि हि शुभः पुण्यं जीवस्य संचयं याति।
अशुभो वा तथा पापं तयोरभावे न चयोऽस्ति ॥ १५६ ॥

दर्शनमिति भणितः। **सो वि सुहो** सोऽपि ज्ञानदर्शनोपयोगो धर्मानुरागरूपः शुभः, **असुहो** विषयानुरागरूपो द्वेषमोहरूपश्चाशुभः। **वा** वाशब्देन शुभाशुभानुरागरहितत्वेन शुद्धः। **उवओगो अप्पणो हवदि** इत्थंभूतस्त्रिलक्षण उपयोग आत्मनः संबन्धी भवतीत्यर्थः ॥ १५५ ॥ अथोपयोगस्तावन्नरनारकादिपर्यायकारणभूतस्य कर्मरूपस्य परद्रव्यस्य संयोगकारणं भवति। तावदिदानीं कस्य कर्मणः क उपयोगः कारणं भवतीति विचारयति – **उवओगो जदि हि सुहो** उपयोगो यदि चेत् हि स्फुटं शुभो

ज्ञान तथा दर्शन है, क्योंकि चैतन्य [१]साकार और [२]निराकार ऐसा उभयरूप है। अब इस उपयोगके शुद्ध और अशुद्ध ऐसे दो भेद किये गये हैं। उसमें, शुद्ध उपयोग निरुपराग (निर्विकार) है; और अशुद्ध उपयोग सोपराग (सविकार) है। और वह अशुद्ध उपयोग शुभ और अशुभ ऐसे दो प्रकारका है, क्योंकि उपराग विशुद्धिरूप और संक्लेशरूप ऐसा दो प्रकारका है (अर्थात् विकार मन्दकषायरूप और तीव्रकषायरूप ऐसा दो प्रकारका है)।

भावार्थ :– आत्मा उपयोगस्वरूप है। प्रथम तो उपयोगके दो भेद हैं – शुद्ध और अशुद्ध। और फिर अशुद्ध उपयोगके दो भेद हैं, शुभ तथा अशुभ ॥ १५५ ॥

---

[१] साकार=आकारवाला या भेदवाला; सविकल्प; विशेष।

[२] निराकार=आकार रहित; भेदरहित; निर्विकल्प; सामान्य।

उपयोग जो शुभ होय, संचय थाय पुण्य तणो तहीं।
ने पापसंचय अशुभथी; ज्यां उभय नहिं संचय नहीं ॥ १५६ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

उपयोगो हि जीवस्य परद्रव्यसंयोगकारणमशुद्धः। स तु विशुद्धिसंक्लेशरूपोपराग-वशात् शुभाशुभत्वेनोपात्तद्वैविध्यः, पुण्यपापत्वेनोपात्तद्वैविध्यस्य परद्रव्यस्य संयोगकारण-त्वेन निर्वर्तयति। यदा तु द्विविधस्याप्यस्याशुद्धस्याभावः क्रियते तदा खलूपयोगः शुद्ध एवावतिष्ठते। स पुनरकारणमेव परद्रव्यसंयोगस्य ॥ १५६ ॥

अथ शुभोपयोगस्वरूपं प्ररूपयति –

भवति। **पुण्णं जीवस्स संचयं जादि** तदा काले द्रव्यपुण्यं कर्तृ जीवस्य संचयमुपचयं वृद्धिं याति बध्यत इत्यर्थः। **असुहो वा तह पावं** अशुभोपयोगो वा तथा तेनैव प्रकारेण पुण्यवद्द्रव्यपापं संचयं याति। **तेसिमभावे ण चयमत्थि** तयोरभावे न चयोऽस्ति। निर्दोषिनिजपरमात्मभावनारूपेण शुद्धो-पयोगबलेन यदा तयोर्द्वयोः शुभाशुभोपयोगयोरभावः क्रियते तदोभयः संचयः कर्मबन्धो नास्तीत्यर्थः ॥ १५६ ॥ एवं शुभाशुभशुद्धोपयोगत्रयस्य सामान्यकथनरूपेण द्वितीयस्थले गाथाद्वयं गतम्। अथ

अब यह कहते हैं कि इनमें कौनसा उपयोग परद्रव्यके संयोगका कारण है :–

गाथा १५६

अन्वयार्थ :–[**उपयोगः**] उपयोग [**यदि हि**] यदि [**शुभः**] शुभ हो [**जीवस्य**] तो जीवके [**पुण्यं**] पुण्य [**संचयं याति**] संचयको प्राप्त होता है [**तथा वा अशुभः**] और यदि अशुभ हो [**पापं**] तो पाप संचय होता है। [**तयोः अभावे**] उनके (दोनोंके) अभावमें [**चयः नास्ति**] संचय नहीं होता।

टीका :–जीवको परद्रव्यके संयोगका कारण अशुद्ध उपयोग है। और वह विशुद्धि तथा संक्लेशरूप उपरागके कारण शुभ और अशुभरूपसे द्विविधताको प्राप्त होता हुआ, जो पुण्य और पापरूपसे द्विविधताको प्राप्त होता है ऐसा जो परद्रव्य उसके संयोगके कारणरूपसे काम करता है। (उपराग मन्दकषायरूप और तीव्रकषायरूपसे दो प्रकारका है, इसलिये अशुद्ध उपयोग भी शुभ-अशुभके भेदसे दो प्रकारका है; उसमेंसे शुभोपयोग पुण्यरूप परद्रव्यके संयोगका कारण होता है और अशुभोपयोग पापरूप परद्रव्यके संयोगका कारण होता है।) किन्तु जब दोनों प्रकारके अशुद्धोपयोगका अभाव किया जाता है तब वास्तवमें उपयोग शुद्ध ही रहता है; और वह तो परद्रव्यके संयोगका अकारण ही है। (अर्थात् शुद्धोपयोग परद्रव्यके संयोगका कारण नहीं है) ॥ १५६ ॥

अब शुभोपयोगका स्वरूप कहते हैं :–

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

जो जाणादि जिणिंदे पेच्छदि सिद्धे तहेव अणगारे ।
जीवेसु साणुकंपो उवओगो सो सुहो तस्स ॥ १५७ ॥

यो जानाति जिनेन्द्रान् पश्यति सिद्धांस्तथैवानागारान् ।
जीवेषु सानुकम्प उपयोगः स शुभस्तस्य ॥ १५७ ॥

विशिष्टक्षयोपशमदशाविश्रान्तदर्शनचारित्रमोहनीयपुद्गलानुवृत्तिपरत्वेन परिग्रहीत-शोभनोपरागत्वात् परमभट्टारकमहादेवाधिदेवपरमेश्वरार्हत्सिद्धसाधुश्रद्धाने समस्तभूत-ग्रामानुकम्पाचरणे च प्रवृत्तः शुभ उपयोगः ॥ १५७ ॥

विशेषेण शुभोपयोगस्वरूपं व्याख्याति – **जो जाणादि जिणिंदे** यः कर्ता जानाति । कान् । अनन्त-ज्ञानादिचतुष्टयसहितान् क्षुधाद्यष्टादशदोषरहितांश्च जिनेन्द्रान् । **पेच्छदि सिद्धे** पश्यति । कान् । ज्ञानावरणाद्यष्टकर्मरहितान्सम्यक्त्वाद्यष्टगुणान्तर्भूतानन्तगुणसहितांश्च सिद्धान् । **तहेव अणगारे** तथैवानागारान् । अनागारशब्दवाच्यान्निश्चयव्यवहारपञ्चाचारादियथोक्तलक्षणानाचार्योपाध्याय-साधून् । **जीवेसु साणुकंपो** त्रसस्थावरजीवेषु सानुकम्पः सदयः । **उवओगो सा सुहो** स इत्थंभूत उपयोगः शुभो भण्यते । स च कस्य भवति । **तस्स** तस्य पूर्वोक्तलक्षणजीवस्येत्यभिप्रायः ॥ १५७ ॥ अथा-

---

गाथा १५७

अन्वयार्थ :– [**यः**] जो [**जिनेन्द्रान्**] जिनेन्द्रोंको [**जानाति**] जानता है, [**सिद्धान् तथैव अनागारान्**] सिद्धों तथा अनागारों की (आचार्य, उपाध्याय और सर्व-साधुओं की) [**पश्यति**] श्रद्धा करता है, [**जीवेषु सानुकम्पः**] और जीवोंके प्रति अनुकम्पायुक्त है, [**तस्य**] उसके [**सः**] वह [**शुभः उपयोगः**] शुभ उपयोग है ।

टीका :– विशिष्ट (विशेष प्रकारकी) क्षयोपशमदशामें रहनेवाले दर्शनमोहनीय और चारित्रमोहनीयरूप पुद्गलोंके अनुसार परिणतिमें लगा होनेसे शुभ [1]उपरागका ग्रहण किया होनेसे, जो (उपयोग) परम भट्टारक महा देवाधिदेव, परमेश्वर ऐसे अर्हंत, सिद्ध और साधुकी श्रद्धा करनेमें तथा समस्त जीवसमूहकी अनुकम्पाका आचरण करनेमें प्रवृत्त है, वह शुभोपयोग है ॥ १५७ ॥

---

[1] उपरागका अर्थ गाथा १२६ के टिप्पणमें देखें ।

जाणे जिनोने जेह, श्रद्धे सिद्धने, अणगारने ।
जे सानुकम्प जीवो प्रति, उपयोग छे शुभ तेहने ॥ १५७ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथाशुभोपयोगस्वरूपं प्ररूपयति –

विसयकसाओगाढो दुस्सुदिदुच्चित्तदुट्ठगोट्ठिजुदो ।
उग्गो उम्मग्गपरो उवओगो जस्स सो असुहो ॥ १५८ ॥

विषयकषायावगाढो दुःश्रुतिदुश्चित्तदुष्टगोष्ठियुतः ।
उग्र उन्मार्गपर उपयोगो यस्य सोऽशुभः ॥ १५८ ॥

विशिष्टोदयदशाविश्रान्तदर्शनचारित्रमोहनीयपुद्गलानुवृत्तिपरत्वेन परिगृहीताशोभनोपरागत्वात्परमभट्टारकमहादेवाधिदेवपरमेश्वरार्हत्सिद्धसाधुभ्योऽन्यत्रोन्मार्गश्रद्धाने विषयकषायदुःश्रवणदुराशयदुष्टसेवनोग्रताचरणे च प्रवृत्तोऽशुभोपयोगः ॥ १५९ ॥

शुभोपयोगस्वरूपं निरूपयति – **विसयकसाओगाढो** विषयकषायावगाढः । **दुस्सुदिदुच्चित्तदुट्ठगोट्ठिजुदो** दुःश्रुतिदुश्चित्तदुष्टगोष्ठियुतः । **उग्गो** उग्रः । **उम्मग्गपरो** उन्मार्गपरः । **उवओगो** एवं विशेषणचतुष्टययुक्त उपयोगः परिणामः **जस्स** यस्य जीवस्य भवति **सो असुहो** स उपयोगस्त्वशुभो भण्यते, अभेदेन पुरुषो वा । तथा हि – विषयकषायरहितशुद्धचैतन्यपरिणतेः प्रतिपक्षभूतो विषयकषायावगाढो विषयकषायपरिणतः । शुद्धात्मतत्त्वप्रतिपादिका श्रुतिः सुश्रुतिस्तद्विलक्षणा दुःश्रुतिः मिथ्याशास्त्रश्रुतिर्वा; निश्चिन्तात्मध्यानपरिणतं सुचित्तं, तद्विनाशकं दुश्चित्तं, स्वपरनिमित्तेष्टकामभोगचिन्तापरिणतं रागाद्यपध्यानं वा; परमचैतन्यपरिणतेर्विनाशिका दुष्टगोष्ठी, तत्प्रतिपक्षभूतकुशीलपुरुषगोष्ठी वा । इत्थंभूतदुःश्रुतिदुश्चित्तदुष्टगोष्ठीभिर्युतो दुःश्रुतिदुश्चित्तदुष्टगोष्ठियुक्तः । परमोपशमभावपरिणतपरमचैतन्यस्वभावात्प्रतिकूलः उग्रः । वीतरागसर्वज्ञप्रणीतनिश्चयव्यवहारमोक्षमार्गाद्विलक्षण उन्मार्गपरः । इत्थंभूतविशेषणचतुष्टयसहित उपयोगः परिणामः तत्परिणतपुरुषो वेत्यशु-

---

अब अशुभोपयोगका स्वरूप कहते हैं :–

गाथा १५८

अन्वयार्थ :– [**यस्य उपयोगः**] जिसका उपयोग [**विषयकषायावगाढः**] विषयकषायमें अवगाढ़ (मग्न) है, [**दुःश्रुतिदुश्चित्तदुष्टगोष्ठियुतः**] कुश्रुति, कुविचार और कुसंगतिमें लगा हुआ है, [**उग्रः**] उग्र है तथा [**उन्मार्गपरः**] उन्मार्गमें लगा हुआ है, [**सः अशुभः**] उसका वह अशुभोपयोग है ।

टीका :– विशिष्ट उदयदशामें रहनेवाले दर्शनमोहनीय और चारित्रमोहनीयरूप पुद्गलोंके अनुसार परिणतिमें लगा होनेसे अशुभ उपरागको ग्रहण करनेसे, जो (उपयोग)

कुविचार-संगति-श्रवणयुत, विषये कषाये मग्न जे ।
जे उग्रने उन्मार्गपर, उपयोग तेह अशुभ छे ॥ १५८ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ परद्रव्यसंयोगकारणविनाशमभ्यस्यति –

असुहोवओगरहिदो सुहोवजुत्तो ण अण्णदवियम्हि ।
होज्जं मज्झत्थोऽहं णाणप्पगमप्पगं झाए ॥ १५९ ॥

अशुभोपयोगरहितः शुभोपयुक्तो न अन्यद्रव्ये ।
भवन्मध्यस्थोऽहं ज्ञानात्मकमात्मकं ध्यायामि ॥ १५९ ॥

भोपयोगो भण्यत इत्यर्थः ॥ १५८ ॥ अथ शुभाशुभरहितशुद्धोपयोगं प्ररूपयति – **असुहोवओगरहिदो** अशुभोपयोगरहितो भवामि । स कः । **अहं** अहं कर्ता । पुनरपि कथंभूतः । **सुहोवजुत्तो ण** शुभोपयोग-युक्तः परिणतो न भवामि । क्व । विषयेऽसौ शुभोपयोगः । **अण्णदवियम्हि** निजपरमात्मद्रव्यादन्यद्रव्ये । तर्हि कथंभूतो भवामि । **होज्जं मज्झत्थो** जीवितमरणलाभालाभसुखदुःखशत्रुमित्रनिन्दाप्रशंसादिविषये

परम भट्टारक, महा देवाधिदेव, परमेश्वर ऐसे अर्हंत, सिद्ध और साधुके अतिरिक्त अन्य – उन्मार्गकी – श्रद्धा करनेमें तथा विषय, कषाय, कुश्रवण, कुविचार, कुसंग और उग्रताका आचरण करनेमें प्रवृत्त है, वह अशुभोपयोग है ॥ १५८ ॥

अब, परद्रव्यके संयोगका जो कारण (अशुद्धोपयोग) उसके विनाशका अभ्यास बतलाते हैं :–

गाथा १५९

अन्वयार्थ :– [**अन्यद्रव्ये**] अन्य द्रव्यमें [**मध्यस्थः**] मध्यस्थ [**भवन्**] होता हुआ [**अहम्**] मैं [**अशुभोपयोगरहितः**] अशुभोपयोग रहित होता हुआ तथा [**शुभोपयुक्तः न**] शुभोपयुक्त नहीं होता हुआ [**ज्ञानात्मकम्**] ज्ञानात्मक [**आत्मकं**] आत्माको [**ध्यायामि**] ध्याता हूँ ।

टीका :– जो यह, (१५६ वीं गाथामें) परद्रव्यके संयोगके कारणरूपमें कहा गया अशुद्धोपयोग है, वह वास्तवमें मन्द-तीव्र उदयदशामें रहनेवाले परद्रव्यानुसार परिणतिके आधीन होनेसे ही प्रवर्तित होता है, किन्तु अन्य कारणसे नहीं । इसलिये यह मैं समस्त परद्रव्यमें मध्यस्थ होऊँ । और इसप्रकार मध्यस्थ होता हुआ मैं परद्रव्यानुसार परिणतिके

मध्यस्थ परद्रव्ये थतो, अशुभोपयोग रहितने ।
शुभमां अयुक्त, हुँ ध्याऊँ छुं निज आत्मने ज्ञानात्मने ॥ १५९ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यो हि नामायं परद्रव्यसंयोगकारणत्वेनोपन्यस्तोऽशुद्ध उपयोगः स खलु मन्दतीव्रोदयदशाविश्रान्तपरद्रव्यानुवृत्तितन्त्रत्वादेव प्रवर्तते, न पुनरन्यस्मात्। ततोऽहमेष सर्वस्मिन्नेव परद्रव्ये मध्यस्थो भवामि। एवं भवंश्चाहं परद्रव्यानुवृत्तितन्त्रत्वाभावात् शुभेनाशुभेन वाशुद्धोपयोगेन निर्मुक्तो भूत्वा केवलस्वद्रव्यानुवृत्तिपरिग्रहात् प्रसिद्धशुद्धोपयोग उपयोगात्मनात्मन्येव नित्यं निश्चलमुपयुक्तस्तिष्ठामि। एष मे परद्रव्यसंयोगकारणविनाशाभ्यासः ॥ १५९ ॥

अथ शरीरादावपि परद्रव्ये माध्यस्थं प्रकटयति –

णाहं देहो ण मणो ण चेव वाणी ण कारणं तेसिं।
कत्ता ण ण कारयिदा अणुमंता णेव कत्तीणं ॥ १६० ॥

नाहं देहो न मनो न चैव वाणी न कारणं तेषाम्।
कर्ता न न कारयिता अनुमन्ता नैव कर्तृणाम् ॥ १६० ॥

मध्यस्थो भवामि। इत्थंभूतः सन् किं करोमि। **णाणप्पगमप्पगं झाए** ज्ञानात्मकमात्मानं ध्यायामि। ज्ञानेन निर्वृत्तं ज्ञानात्मकं केवलज्ञानान्तर्भूतानन्तगुणात्मकं निजात्मानं शुद्धध्यानप्रतिपक्षभूतसमस्तमनोरथरूपचिन्ताजालत्यागेन ध्यायामीति शुद्धोपयोगलक्षणं ज्ञातव्यम् ॥ १५९ ॥ एवं शुभाशुभशुद्धोपयोगविवरणरूपेण तृतीयस्थले गाथात्रयं गतम्। अथ देहमनोवचनविषयेऽत्यन्तमाध्यस्थ्यमुद्योतयति – **णाहं देहो ण मणो ण चेव वाणी** नाहं देहो न मनो न चैव वाणी। मनोवचनकायव्यापाररहितात्प-

---

आधीन न होनेसे शुभ अथवा अशुभ ऐसा जो अशुद्धोपयोग उससे मुक्त होकर, मात्र स्वद्रव्यानुसार परिणतिको ग्रहण करनेसे जिसको शुद्धोपयोग सिद्ध हुआ है, ऐसा होता हुआ, उपयोगात्मा द्वारा (उपयोगरूप निज स्वरूप से) आत्मामें ही सदा निश्चल रूपसे उपयुक्त रहता हूं। यह मेरा परद्रव्यके संयोगके कारणके विनाशका अभ्यास है ॥ १५९ ॥

अब, शरीरादि परद्रव्यके प्रति भी मध्यस्थपना प्रगट करते हैं :–

गाथा १६०

अन्वयार्थ :– [**अहं न देहः**] मैं न देह हूँ, [**न मनः**] न मन हूँ, [**च एव**] और

हुं देह नहि, वाणी न, मन नहि, तेमनुं कारण नहीं।
कर्ता न, कारयिता न अनुमंता हुँ कर्तानो नहीं ॥ १६० ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

शरीरं च वाचं च मनश्च परद्रव्यत्वेनाहं प्रपद्ये, ततो न तेषु कश्चिदपि मम पक्षपातोऽस्ति। सर्वत्राप्यहमत्यन्तं मध्यस्थोऽस्मि। तथा हि – न खल्वहं शरीरवाङ्मनसां स्वरूपाधारभूतमचेतनद्रव्यमस्मि; तानि खलु मां स्वरूपाधारमन्तरेणाप्यात्मनः स्वरूपं धारयन्ति। ततोऽहं शरीरवाङ्मनःपक्षपातमपास्यात्यन्तं मध्यस्थोऽस्मि। न च मे शरीर-वाङ्मनःकारणाचेतनद्रव्यत्वमस्ति; तानि खलु मां कारणमन्तरेणापि कारणवन्ति भवन्ति। ततोऽहं तत्कारणत्वपक्षपातमपास्यास्म्ययमत्यन्तं मध्यस्थः। न च मे स्वतन्त्र-

---

रमात्मद्रव्याद्भिन्नं यन्मनोवचनकायत्रयं निश्चयनयेन तन्नाहं भवामि। ततः कारणात्तत्पक्षपातं मुक्त्वात्यन्तमध्यस्थोऽस्मि। **ण कारणं तेसिं** न कारणं तेषाम्। निर्विकारपरमाह्लादैकलक्षणसुखा-मृतपरिणतेर्यदुपादानकारणभूतमात्मद्रव्यं तद्विलक्षणो मनोवचनकायानामुपादानकारणभूतः पुद्गल-पिण्डो न भवामि। ततः कारणात्तत्पक्षपातं मुक्त्वात्यन्तमध्यस्थोऽस्मि। **कत्ता ण हि कारइदा अणुमंता**

[**न वाणी**] न वाणी हूँ, [**तेषां कारणं न**] उनका कारण नहीं हूँ [**कर्ता न**] कर्ता नहीं हूँ, [**कारयिता न**] करानेवाला नहीं हूँ; [**कर्तॄणां अनुमन्ता न एव**] (और) कर्ताका अनुमोदक नहीं हूँ।

टीका :– मैं शरीर, वाणी और मनको परद्रव्यके रूपमें समझता हूं, इसलिये मुझे उनके प्रति कुछ भी पक्षपात नहीं है। मैं उन सबके प्रति अत्यन्त मध्यस्थ हूं। वह इसप्रकार :–

वास्तवमें मैं शरीर, वाणी और मनके स्वरूपका आधारभूत ऐसा अचेतन द्रव्य नहीं हूँ, मैं स्वरूपाधार (हुए) विना भी वे वास्तवमें अपने स्वरूपको धारण करते हैं। इसलिये मैं शरीर, वाणी और मनका पक्षपात छोड़कर अत्यन्त मध्यस्थ हूं।

और मैं शरीर, वाणी तथा मनका कारण ऐसा अचेतन द्रव्य नहीं हूँ। मैं कारण (हुए) विना भी वे वास्तवमें कारणवान् हैं। इसलिये उनके कारणपनेका पक्षपात छोड़कर यह मैं अत्यन्त मध्यस्थ हूँ।

और मैं स्वतंत्ररूपसे शरीर, वाणी तथा मनका कर्ता ऐसा अचेतन द्रव्य नहीं हूँ; मैं कर्ता (हुए) विना भी वे वास्तवमें किये जाते हैं। इसलिये उनके कर्तृत्वका पक्षपात छोड़कर यह मैं अत्यन्त मध्यस्थ हूँ।

और मैं, स्वतन्त्ररूपसे शरीर, वाणी तथा मनका कारक (कर्ता) ऐसा जो अचेतन द्रव्य है उसका प्रयोजक नहीं हूँ; मैं कर्ता–प्रयोजक विना भी (अर्थात् मैं उनके

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

शरीरवाङ्मनःकारकाचेतनद्रव्यत्वमस्ति; तानि खलु मां कर्तारमन्तरेणापि क्रियमाणानि। ततोऽहं तत्कर्तृत्वपक्षपातमपास्यास्म्ययमत्यन्तं मध्यस्थः। न च मे स्वतन्त्रशरीरवाङ्मनःकारकाचेतनद्रव्यप्रयोजकत्वमस्ति; तानि खलु मां कारकप्रयोजकमन्तरेणापि क्रियमाणानि। ततोऽहं तत्कारकप्रयोजकत्वपक्षपातमपास्यास्म्ययमत्यन्तं मध्यस्थः। न च मे स्वतन्त्रशरीरवाङ्मनःकारकाचेतनद्रव्यानुज्ञातृत्वमस्ति; तानि खलु मां कारकानुज्ञातारमन्तरेणापि क्रियमाणानि। ततोऽहं तत्कारकानुज्ञातृत्वपक्षपातमपास्यास्म्ययमत्यन्तं मध्यस्थः ॥ १६० ॥

अथ शरीरवाङ्मनसां परद्रव्यत्वं निश्चिनोति –

देहो य मणो वाणी पोग्गलदव्वप्पग त्ति णिद्दिट्ठा।
पोग्गलदव्वं हि पुणो पिंडो परमाणुदव्वाणं ॥१६१॥

देहश्च मनो वाणी पुद्गलद्रव्यात्मका इति निर्दिष्टाः।
पुद्गलद्रव्यमपि पुनः पिण्डः परमाणुद्रव्याणाम् ॥ १६१ ॥

णेव कत्तीणं कर्ता न हि कारयिता अनुमन्ता नैव कर्तृणाम्। स्वशुद्धात्मभावनाविषये यत्कृतकारितानुमतस्वरूपं तद्विलक्षणं यन्मनोवचनकायविषये कृतकारितानुमतस्वरूपं तन्नाहं भवामि। ततः कारणात्तत्पक्षपातं मुक्त्वात्यन्तमध्यस्थोऽस्मीति तात्पर्यम् ॥ १६० ॥ अथ कायवाङ्मनसां शुद्धात्म-

---

कर्ताका प्रयोजक – उनका करानेवाला – हुए विना भी) वे वास्तवमें किये जाते हैं। इसलिये यह मैं उनके कर्ताके प्रयोजकपनेका पक्षपात छोड़कर अत्यन्त मध्यस्थ हूं।

और मैं स्वतन्त्ररूपसे शरीर, वाणी तथा मनका कारक जो अचेतन द्रव्य है, उसका अनुमोदक नहीं हूं; मैं कर्ता – अनुमोदक बिना भी (मैं उनके कर्ताका अनुमोदक हुए विना भी) वे वास्तवमें किये जाते हैं। इसलिये उनके कर्ताके अनुमोदकपनेका पक्षपात छोड़कर यह मैं अत्यन्त मध्यस्थ हूं ॥ १६० ॥

अब, शरीर, वाणी और मनका परद्रव्यपना निश्चित करते हैं :–

गाथा १६१

अन्वयार्थ :– [**देहः च मनः वाणी**] देह, मन और वाणी [**पुद्गलद्रव्यात्मकाः**]

मन, वाणी तेम ज देह पुद्गलद्रव्यरूप निर्दिष्ट छे।
ने तेह पुद्गलद्रव्य बहु परमाणुओनो पिंड छे ॥ १६१ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

शरीरं च वाक् च मनश्च त्रीण्यपि परद्रव्यं, पुद्गलद्रव्यात्मकत्वात् पुद्गलद्रव्यत्वं तु तेषां पुद्गलद्रव्यस्वलक्षणभूतस्वरूपास्तित्वनिश्चितत्वात्। तथाविधपुद्गलद्रव्यं त्वनेकपरमाणुद्रव्याणामेकपिण्डपर्यायेण परिणामः। अनेकपरमाणुद्रव्यस्वलक्षणभूतस्वरूपास्तित्वानामनेकत्वेऽपि कथंचिदेकत्वेनावभासनात् ॥ १६१ ॥

अथात्मनः परद्रव्यत्वाभावं परद्रव्यकर्तृत्वाभावं च साधयति –

णाहं पोग्गलमइओ ण ते मया पोग्गला कया पिंडं।
तम्हा हि ण देहोऽहं कत्ता वा तस्य देहस्य ॥१६२॥

नाहं पुद्गलमयो न ते मया पुद्गलाः कृताः पिण्डम्।
तस्माद्धि न देहोऽहं कर्ता वा तस्य देहस्य ॥ १६२ ॥

स्वरूपात्परद्रव्यत्वं व्यवस्थापयति – **देहो य मणो वाणी पुग्गलदव्वप्पग त्ति णिद्दिट्ठा** देहश्च मनो वाणी तिस्रोऽपि पुद्गलद्रव्यात्मका इति निर्दिष्टाः। कस्मात्। व्यवहारेण जीवेन सहैकत्वेपि निश्चयेन परमचैतन्यप्रकाशपरिणतेर्भिन्नत्वात्। पुद्गलद्रव्यं किं भण्यते। **पुग्गलदव्वं हि पुणो पिंडो परमाणुदव्वाणं** पुद्गलद्रव्यं हि स्फुटं पुनः पिण्डः समूहो भवति। केषाम्। परमाणुद्रव्याणामित्यर्थः ॥ १६१ ॥ अथात्मनः शरीररूपपरद्रव्याभावं तत्कर्तृत्वाभावं च निरूपयति – **णाहं पुग्गलमइओ** नाहं पुद्गलमयः।

पुद्गलद्रव्यात्मक [**इति निर्दिष्टाः**] हैं, ऐसा (वीतरागदेवने) कहा है [**अपि पुनः**] और [**पुद्गलद्रव्यं**] वे पुद्गलद्रव्य [**परमाणुद्रव्याणां पिण्डः**] परमाणुद्रव्योंका पिण्ड है।

टीका :– शरीर, वाणी और मन तीनों ही परद्रव्य हैं, क्योंकि वे पुद्गलद्रव्यात्मक हैं। उनके पुद्गलद्रव्यपना है, क्योंकि वे पुद्गलद्रव्यके स्वलक्षणभूत स्वरूपास्तित्वमें निश्चित (रहे हुए) हैं। उस प्रकारका [१]पुद्गलद्रव्य अनेक परमाणुद्रव्योंका एक पिण्डपर्यायरूपसे परिणाम है, क्योंकि अनेक परमाणुद्रव्योंके स्वलक्षणभूत स्वरूपास्तित्व अनेक होने पर भी कथंचित् (स्निग्धत्व-रूक्षत्वकृत बंधपरिणामकी अपेक्षासे) एकत्वरूप अविभासित होते हैं ॥ १६१ ॥

अब आत्माके परद्रव्यत्वका अभाव और परद्रव्यके कर्तृत्वका अभाव सिद्ध करते हैं :–

---

[१] शरीरादिरूप।

हुँ पौद्गलिक नथी, पुद्गलो में पिंडरूप कर्यो नथी।
तेथी नथी हुँ देह वा ते देहना कर्ता नथी ॥ १६२ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यदेतत्प्रकरणनिर्धारितं पुद्गलात्मकमन्तर्नीतवाङ्मनोद्वैतं शरीरं नाम परद्रव्यं न तावदहमस्मि, ममापुद्गलमयस्य पुद्गलात्मकशरीरत्वविरोधात्। न चापि तस्य कारण-द्वारेण कर्तृद्वारेण कर्तृप्रयोजकद्वारेण कर्त्रनुमन्तृद्वारेण वा शरीरस्य कर्ताहमस्मि, ममानेकपरमाणुद्रव्यैकपिण्डपर्यायपरिणामस्याकर्तुरनेकपरमाणुद्रव्यैकपिण्डपर्यायपरिणामात्मक-शरीरकर्तृत्वस्य सर्वथा विरोधात्॥ १६२॥

अथ कथं परमाणुद्रव्याणां पिण्डपर्यायपरिणतिरिति संदेहमपनुदति –

ण ते मया पुग्गला कया पिंडा न च ते पुद्गला मया कृताः पिण्डाः। **तम्हा हि ण देहोऽहं** तस्माद्देहो न भवाम्यहं। हि स्फुटं। **कत्ता वा तस्स देहस्स** कर्ता वा न भवामि तस्य देहस्येति। अयमत्रार्थः – देहोऽहं न भवामि। कस्माद्। अशरीरसहजशुद्धचैतन्यपरिणतत्वेन मम देहत्वविरोधात्। कर्ता वा न भवामि तस्य देहस्य। तदपि कस्मात्। निःक्रियपरमचिज्ज्योतिःपरिणतत्वेन मम देहकर्तृत्व-विरोधादिति॥ १६२॥ एवं कायवाङ्मनसां शुद्धात्मना सह भेदकथनरूपेण चतुर्थस्थले गाथात्रयं

गाथा १६२

अन्वयार्थ :–[**अहं पुद्गलमयः न**] मैं पुद्गलमय नहीं हूँ और [**ते पुद्गलाः**] वे पुद्गल [**मया**] मेरे द्वारा [**पिण्डं न कृताः**] पिण्डरूप नहीं किये गये हैं, [**तस्मात् हि**] इसलिये [**अहं न देहः**] मैं देह नहीं हूँ, [**वा**] तथा [**तस्य देहस्य कर्ता**] उस देहका कर्ता नहीं हूँ।

टीका :–प्रथम तो, जो यह प्रकरणसे निर्धारित पुद्गलात्मक शरीर नामक पर द्रव्य है – जिसके भीतर वाणी और मनका समावेश हो जाता है – वह मैं नहीं हूँ; क्योंकि अपुद्गलमय ऐसा मैं पुद्गलात्मक शरीररूप होनेमें विरोध है। और इसीप्रकार उस (शरीर) के कारण द्वारा, कर्ता द्वारा, कर्ताके प्रयोजक द्वारा या कर्ताके अनुमोदक द्वारा शरीरका कर्ता मैं नहीं हूँ, क्योंकि मैं अनेक परमाणुद्रव्योंके एकपिण्ड पर्यायरूप परिणामका अकर्ता ऐसा मैं अनेक परमाणुद्रव्योंके एकपिण्डपर्यायरूप [१]परिणामात्मक शरीरका कर्तारूप होनेमें सर्वथा विरोध है॥ १६२॥

अब इस संदेहको दूर करते हैं कि "परमाणुद्रव्योंको पिण्डपर्यायरूप परिणति कैसे होती है?" :–

---

[१] शरीर अनेक परमाणुद्रव्योंका एकपिण्डपर्यायरूप परिणाम है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अपदेसो परमाणू पदेसमेत्तो द सयमसद्दो जो ।
णिद्धो वा लुक्खो वा दुपदेसादित्तमणुभवदि ॥ १६३ ॥

अप्रदेशः परमाणुः प्रदेशमात्रश्च स्वयमशब्दो यः ।
स्निग्धो वा रूक्षो वा द्विप्रदेशादित्वमनुभवति ॥ १६३ ॥

गतम् । इति पूर्वोक्तप्रकारेण 'अत्थित्तणिच्छिदस्स हि' इत्याद्येकादशगाथाभिः स्थलचतुष्टयेन प्रथमो विशेषान्तराधिकारः समाप्तः । अथ केवलपुद्गलबन्धमुख्यत्वेन नवगाथापर्यन्तं व्याख्यानं करोति । तत्र स्थलद्वयं भवति । परमाणूनां परस्परबन्धकथनार्थं 'अपदेसो परमाणू' इत्यादिप्रथमस्थले गाथाचतुष्टयम् । तदनन्तरं स्कन्धानां बन्धमुख्यत्वेन 'दुपदेसादी खंधा' इत्यादिद्वितीयस्थले गाथापञ्चकम् । एवं द्वितीयविशेषान्तराधिकारे समुदायपातनिका । अथ यद्यात्मा पुद्गलानां पिण्डं न करोति तर्हि कथं पिण्डपर्यायपरिणतिरिति प्रश्ने प्रत्युत्तरं ददाति – **अपदेसो** अप्रदेशः । स कः । **परमाणू** पुद्गलपरमाणुः । पुनरपि कथंभूतः । **पदेसमेत्तो य** द्वितीयादिप्रदेशाभावात् प्रदेशमात्रश्च । पुनश्च किंरूपः ।

गाथा १६३

अन्वयार्थ :–[**परमाणुः**] परमाणु [**यः अप्रदेशः**] जो कि अप्रदेश है, [**प्रदेशमात्रः**] प्रदेशमात्र है [**च**] और [**स्वयं अशब्दः**] स्वयं अशब्द है, [**स्निग्धः वा रूक्षः वा**] वह स्निग्ध अथवा रूक्ष होता हुआ [**द्विप्रदेशादित्वम् अनुभवति**] द्विप्रदेशादिपनेका अनुभव करता है ।

टीका :–वास्तवमें परमाणु द्वि-आदि (दो, तीन आदि) प्रदेशोंके अभावके कारण अप्रदेश है, एक प्रदेशके सद्भावके कारण प्रदेशमात्र है और स्वयं अनेक परमाणुद्रव्यात्मक शब्द पर्यायकी व्यक्तिका (प्रगटताका) असंभव होनेसे अशब्द है । (वह परमाणु) अविरोधपूर्वक चार स्पर्श, पाँच रस, दो गंध और पाँच वर्णोंके सद्भावके कारण स्निग्ध अथवा रूक्ष होता है, इसीलिये उसे [1]पिण्डपर्यायपरिणतिरूप द्विप्रदेशादिपनेकी अनुभूति होती है । इसप्रकार स्निग्धरूक्षत्व पिण्डपनेका कारण है ॥ १६३ ॥

---

[1] एक परमाणुकी दूसरे एक परमाणुके साथ पिण्डरूप परिणति द्विप्रदेशीपनेकी अनुभूति है; एक परमाणुकी अन्य दो परमाणुओंके साथ पिण्डरूप परिणति त्रिप्रदेशीपनेका अनुभव है । इसप्रकार परमाणु अन्य परमाणुओंके साथ पिण्डरूप परिणत होनेपर अनेकप्रदेशीपनेका अनुभव करता है ।

परमाणु जे अप्रदेश, तेम प्रदेशमात्र, अशब्द छे ।
ते स्निग्ध रूक्ष बनी प्रदेशद्वयादिवत्त्व अनुभवे ॥ १६३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

परमाणुर्हि द्व्यादिप्रदेशानामभावादप्रदेशः, एकप्रदेशसद्भावात्प्रदेशमात्रः, स्वयमनेकपरमाणुद्रव्यात्मकशब्दपर्यायव्यक्त्यसंभवादशब्दश्च। यतश्चतुःस्पर्शपञ्चरसद्विगन्धपञ्चवर्णानामविरोधेन सद्भावात् स्निग्धो वा रूक्षो वा स्यात्, तत एव तस्य पिण्डपर्यायपरिणतिरूपा द्विप्रदेशादित्वानुभूतिः। अथैवं स्निग्धरूक्षत्वं पिण्डत्वसाधनम् ॥ १६३ ॥

अथ कीदृशं तत्स्निग्धरूक्षत्वं परमाणोरित्यावेदयति –

एगुत्तरमेगादी अणुस्स णिद्धत्तणं च लुक्खत्तं ।
परिणामादो भणिदं जाव अणंतत्तमणुभवदि ॥ १६४ ॥

एकोत्तरमेकाद्यणोः स्निग्धत्वं वा रूक्षत्वम् ।
परिणामाद्भणितं यावदनन्तत्वमनुभवति ॥ १६४ ॥

सयमसद्दो य स्वयं व्यक्तिरूपेणाशब्दः। एवं विशेषणत्रयविशिष्टः सन् **णिद्धो वा लुक्खो वा** स्निग्धो वा रूक्षो वा यतः कारणात्संभवति ततः कारणात् **दुपदेसादित्तमणुभवदि** द्विप्रदेशादिरूपं बन्धमनुभवतीति। तथा हि – यथायमात्मा शुद्धबुद्धैकस्वभावेन बन्धरहितोऽपि पश्चादशुद्धनयेन स्निग्धस्थानीयरागभावेन रूक्षस्थानीयद्वेषभावेन यदा परिणमति तदा परमागमकथितप्रकारेण बन्धमनुभवति, तथा परमाणुरपि स्वभावेन बन्धरहितोऽपि यदा बन्धकारणभूतस्निग्धरूक्षगुणेन परिणतो भवति तदा पुद्गलान्तरेण सह विभावपर्यायरूपं बन्धमनुभवतीत्यर्थः ॥ १६३ ॥ अथ कीदृशं तत्स्निग्धरूक्षत्वमिति पृष्टे प्रत्युत्तरं ददाति – **एगुत्तरमेगादी** एकोत्तरमेकादि। किम्। **णिद्धत्तणं च लुक्खत्तं** स्निग्धत्वं रूक्षत्वं च कर्मतापन्नं। **भणिदं** भणितं कथितम्। किंपर्यन्तम्। **जाव अणंतत्तमणुभवदि** अनन्तत्वमनन्तपर्यन्तं यावदनुभवति प्राप्नोति। कस्मात्सकाशात्। **परिणामादो** परिणतिविशेषात्परिणामित्वादित्यर्थः। कस्य संबन्धि। **अणुस्स** अणोः पुद्गलपरमाणोः। तथा हि – यथा जीवे जलाजागोमहिषीक्षीरे स्नेहवृद्धिवत्स्नेहस्थानीयं रागत्वं रूक्षस्थानीयं द्वेषत्वं बन्धकारणभूतं जघन्य-

---

अब यह बतलाते हैं कि परमाणुके वह स्निग्ध-रूक्षत्व किसप्रकारका होता है :–

गाथा १६४

अन्वयार्थ :– [**अणोः**] परमाणुके [**परिणामात्**] परिणमनके कारण [**एकादि**] एकसे (एक अविभाग प्रतिच्छेदसे) लेकर [**एकोत्तरं**] एक-एक बढ़ते हुए [**यावत्**] जब तक [**अनन्तत्वम् अनुभवति**] अनन्तपनेको (अनन्त अविभागी प्रतिच्छेदपनेको) प्राप्त हो तब तक [**स्निग्धत्वं वा रूक्षत्वं**] स्निग्धत्व अथवा रूक्षत्व होता है ऐसा

एकांशथी आरंभी ज्यां अविभाग अंश अनंत छे ।
स्निग्धत्व वा रूक्षत्व ओ परिणामथी परमाणुने ॥ १६४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

परमाणोर्हि तावदस्ति परिणामः तस्य वस्तुस्वभावत्वेनानतिक्रमात्। ततस्तु परिणामादुपात्तकादाचित्कवैचित्र्यं चित्रगुणयोगित्वात्परमाणोरेकाद्येकोत्तरानन्तावसाना-विभागपरिच्छेदव्यापि स्निग्धत्वं वा रूक्षत्वं वा भवति ॥ १६४ ॥

विशुद्धिसंक्लेशस्थानीयमादिं कृत्वा परमागमकथितक्रमेणोत्कृष्टविशुद्धिसंक्लेशपर्यन्तं वर्धते, तथा पुद्गलपरमाणुद्रव्येऽपि स्निग्धत्वं रूक्षत्वं च बन्धकारणभूतं पूर्वोक्तजलादितारतम्यशक्तिदृष्टान्तेनैक-गुणसंज्ञां जघन्यशक्तिमादिं कृत्वा गुणसंज्ञेनाविभागपरिच्छेदद्वितीयनामाभिधेयेन शक्तिविशेषेण वर्धते। किंपर्यन्तं। यावदनन्तसंख्यानम्। कस्मात्। पुद्गलद्रव्यस्य परिणामित्वात्, परिणामस्य वस्तु-स्वभावादेव निषेधितुमशक्यत्वादिति ॥ १६४ ॥ अथात्र कीदृशात्स्निग्धरूक्षत्वगुणात् पिण्डो भवतीति

[**भणितम्**] (जिनेन्द्रदेवने) कहा है।

टीका :– प्रथम तो परमाणुके परिणाम होता है क्योंकि वह (परिणाम) वस्तुका स्वभाव होनेसे उल्लंघन नहीं किया जा सकता। और उस परिणामके कारण जो [१]कादा-चित्क [२]विचित्रता धारण करता है ऐसा, एकसे लेकर एक-एक बढ़ते हुए अनन्त अविभाग प्रतिच्छेदों तक व्याप्त होनेवाला स्निग्धत्व अथवा रूक्षत्व परमाणुके होता है क्योंकि परमाणु अनेक प्रकारके गुणोंवाला है।

भावार्थ :– परमाणु परिणमन वाला है, इसलिये उसके स्निग्धत्व और रूक्षत्व एक अविभाग – [३]प्रतिच्छेदसे लेकर अनन्त अविभाग प्रतिच्छेदों तक तरतमताको प्राप्त होते हैं।

अब यह बतलाते हैं कि कैसे स्निग्धत्व-रूक्षत्वसे पिण्डपना होता है :–

गाथा १६५

अन्वयार्थ :– [**अणुपरिणामाः**] परमाणु-परिणाम, [**स्निग्धाः वा रूक्षाः वा**]

---

[१] कादाचित्क = किसी समय हो ऐसा; क्षणिक; अनित्य।

[२] विचित्रता = अनेकप्रकारता; विविधता; अनेकरूपता (चिकनापन और रूखापन परिणामके कारण क्षणिक अनेकरूपता = तरतमता, तारतम्यता धारण करता है)।

[३] किसी गुणमें (अर्थात् गुणकी पर्यायमें) अंशकल्पना करनेपर, उसका जो छोटेसे छोटा (निरंश) अंश होता है उसे उस गुणका (अर्थात् गुणकी पर्यायका) अविभाग प्रतिच्छेद कहा जाता है (बकरीसे गायके दूधमें और गायसे भैंसके दूधमें सचिक्कणताके अविभागी प्रतिच्छेद अधिक होते हैं। धूलसे राखमें और राखसे बालूमें रूक्षताके अविभागी प्रतिच्छेद अधिक होते हैं।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथात्र कीदृशात्स्निग्धरूक्षत्वात्पिण्डत्वमित्यावेदयति –

णिद्धा वा लुक्खा वा अणुपरिणामा समा व विसमा वा।
समदो दुराधिगा जदि बज्झन्ति हि आदिपरिहीणा ॥ १६५ ॥

स्निग्धा वा रूक्षा वा अणुपरिणामाः समा वा विषमा वा।
समतो द्व्यधिका यदि बध्यन्ते हि आदिपरिहीणाः ॥ १६५ ॥

प्रश्ने समाधानं ददाति – **बज्झंति हि** बध्यन्ते हि स्फुटम्। के। कर्मतापन्नाः **अणुपरिणामा** अणुपरिणामाः। अणुपरिणामशब्देनात्र परिणामपरिणता अणवो गृह्यन्ते। कथंभूताः। **णिद्धा वा लुक्खा वा** स्निग्धपरिणामपरिणता वा रूक्षपरिणामपरिणता वा। पुनरपि किंविशिष्टाः। **समा व विसमा वा** द्विशक्तिचतुःशक्तिषट्शक्त्यादिपरिणतानां सम इति संज्ञा, त्रिशक्तिपञ्चशक्तिसप्तशक्त्यादिपरिणतानां विषम इति संज्ञा। पुनश्च किंरूपाः। **समदो दुराधिगा जदि** समतः समसंख्यानात्सकाशाद् द्वाभ्यां गुणाभ्यामधिका यदि चेत्। कथं द्विगुणाधिकत्वमिति चेत्। एको द्विगुणस्तिष्ठति द्वितीयोऽपि द्विगुण

स्निग्ध हों या रूक्ष हों [**समाः वा विषमाः वा**] सम अंशवाले हों या विषम अंशवाले हों [**यदि समतः द्व्यधिकाः**] यदि समानसे दो अधिक अंशवाले हों तो [**बध्यन्ते हि**] बँधते हैं, [**आदिपरिहीणाः**] जघन्यांश वाले नहीं बंधते।

टीका :– समानसे दो गुण (अंश) अधिक स्निग्धत्व या रूक्षत्व हो तो बंध होता है यह उत्सर्ग (सामान्य नियम) है; क्योंकि स्निग्धत्व या रूक्षत्वकी द्विगुणाधिकताका होना वह परिणामक (परिणमन करानेवाला) होनेसे बंधका कारण है।

यदि एक गुण स्निग्धत्व या रूक्षत्व हो तो बंध नहीं होता यह अपवाद है; क्योंकि एक गुण स्निग्धत्व या रूक्षत्वके [१]परिणम्य-परिणामकताका अभाव होनेसे बंधके

---

[१] परिणम्य = परिणमन करने योग्य। [दश अंश स्निग्धतावाला परमाणु बारह अंश रूक्षता वाले परमाणुके साथ बंधकर स्कंध बननेपर, दश अंश स्निग्धतावाला परमाणु बारह अंश रूक्षतारूप परिणमित हो जाता है; अथवा दश अंश स्निग्धतावाला परमाणु बारह अंश स्निग्धतावाले परमाणुके सा बंधकर स्कंध बनने पर, दश अंश स्निग्धतावाला परमाणु बारह अंश स्निग्धतारूप परिणमित हो जाता है; इसलिये कम अंशवाला परमाणु परिणम्य है और दो अधिक अंशवाला परमाणु परिणामक है। एक अंश स्निग्धता या रूक्षतावाला परमाणु (सामान्य नियमानुसार) परिणामक तो है ही नहीं, किन्तु जघन्यभावमें वर्तित होनेसे परिणम्य भी नहीं है। इसप्रकार जघन्यभाव बंधका कारण नहीं है।]

हो स्निग्ध अथवा रूक्ष अणु-परिणाम सम वा विषम हो।
बंधाय जो गुणद्वय अधिक; नहि बंध होय जघन्यनो ॥ १६५ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

समतो द्व्यधिकगुणाद्धि स्निग्धरूक्षत्वाद्बन्ध इत्युत्सर्गः, स्निग्धरूक्षद्व्यधिकगुणत्वस्य हि परिणामकत्वेन बन्धसाधनत्वात्। न खल्वेकगुणात् स्निग्धरूक्षत्वाद्बन्ध इत्यपवादः, एकगुणस्निग्धरूक्षत्वस्य हि परिणम्यपरिणामकत्वाभावेन बन्धस्यासाधनत्वात् ॥ १६५ ॥

अथ परमाणूनां पिण्डत्वस्य यथोदितहेतुत्वमवधारयति –

णिद्धत्तणेण दुगुणो चदुगुणणिद्धेण बंधमणुभवदि।
लुक्खेण वा तिगुणिदो अणु बज्झदि पंचगुणजुत्तो ॥ १६६ ॥

स्निग्धत्वेन द्विगुणश्चतुर्गुणस्निग्धेन बन्धमनुभवति।
रूक्षेण वा त्रिगुणितोऽणुर्बध्यते पञ्चगुणयुक्तः ॥ १६६ ॥

इति द्वौ समसंख्यानौ तिष्ठतस्तावत् एकस्य विवक्षितद्विगुणस्य द्विगुणाधिकत्वे कृते सति सः चतुर्गुणो भवति शक्तिचतुष्टयपरिणतो भवति। तस्य चतुर्गुणस्य पूर्वोक्तद्विगुणेन सह बन्धो भवतीति। तथैव द्वौ त्रिशक्तियुक्तो तिष्ठतस्तावत्, तत्राप्येकस्य त्रिगुणशब्दाभिधेयस्य त्रिशक्तियुक्तस्य परमाणोः शक्तिद्वयमेलापके कृते सति पञ्चगुणत्वं भवति। तेन पञ्चगुणेन सह पूर्वोक्तत्रिगुणस्य बन्धो भवति। एवं द्वयोर्द्वयोः स्निग्धयोर्द्वयोर्द्वयो रूक्षयोर्द्वयोर्द्वयोः स्निग्धरूक्षयोर्वा समयोः विषमयोश्च द्विगुणाधिकत्वे सति बन्धो भवतीत्यर्थः, किंतु विशेषोऽस्ति। **आदिपरिहीणा** आदिशब्देन जलस्थानीयं जघन्यस्निग्धत्वं वालुकास्थानीयं जघन्यरूक्षत्वं भण्यते, ताभ्यां विहीना आदिपरिहीणा बध्यन्ते। किंच – परमचैतन्यपरिणतिलक्षणपरमात्मतत्त्वभावनारूपधर्मध्यानशुक्लध्यानबलेन यथा जघन्यस्निग्धशक्तिस्थानीये क्षीणरागत्वे सति जघन्यरूक्षशक्तिस्थानीये क्षीणद्वेषत्वे च सति जलवालुकयोरिव जीवस्य बन्धो न भवति, तथा पुद्गलपरमाणोरपि जघन्यस्निग्धरूक्षशक्तिप्रस्तावे बन्धो न भवतीत्यभिप्रायः ॥ १६५ ॥

कारणपनेका अभाव है ॥ १६५ ॥

अब ऐसा निश्चित करते हैं कि परमाणुओंके पिण्डपनेमें यथोक्त (उपरोक्त) हेतु है :–

गाथा १६६

अन्वयार्थ :– [**स्निग्धत्वेन द्विगुणः**] स्निग्धरूपसे दो अंशवाला परमाणु [**चतुर्गुणस्निग्धेन**] चार अंशवाले स्निग्ध (अथवा रूक्ष) परमाणुके साथ [**बंधं अनुभवति**]

चतुरंश को स्निग्धाणु सह द्वय-अंशमय स्निग्धाणुनो।
पंचांशी अणु सह बंध थाय त्र्यांशमय रूक्षाणुनो ॥ १६६ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यथोदितहेतुकमेव परमाणूनां पिण्डत्वमवधार्यं, द्विचतुर्गुणयोस्त्रिपञ्चगुणयोश्च द्वयोः स्निग्धयोः द्वयो रूक्षयोर्द्वयोः स्निग्धरूक्षयोर्वा परमाण्वोर्बन्धस्य प्रसिद्धेः। उक्तं

अथ तमेवार्थं विशेषेण समर्थयति-गुणशब्दवाच्यशक्तिद्वययुक्तस्य स्निग्धपरमाणोश्चतुर्गुणस्निग्धेन रूक्षेण वा समशब्दसंज्ञेन तथैव त्रिशक्तियुक्तरूक्षस्य पञ्चगुणरूक्षेण स्निग्धेन वा विषमसंज्ञेन द्विगुणाधिकत्वे सति बन्धो भवतीति ज्ञातव्यम्। अयं तु विशेषः – परमानन्दैकलक्षणस्वसंवेदनज्ञानबलेन हीयमानरागद्वेषत्वे सति पूर्वोक्तजलवालुकादृष्टान्तेन यथा जीवानां बन्धो न भवति तथा जघन्यस्निग्धरूक्षत्वगुणे सति

बंधका अनुभव करता है। [**वा**] अथवा [**रूक्षेण त्रिगुणितः अणुः**] रूक्षरूपसे तीन अंशवाला परमाणु [**पंचगुणयुक्तः**] पाँच अंशवालेके साथ युक्त होता हुआ [**बध्यते**] बंधता है।

टीका :—यथोक्त हेतुसे ही परमाणुओंके पिण्डपना होता है ऐसा निश्चित करना चाहिये; क्योंकि दो और चार गुणवाले तथा तीन और पाँच गुणवाले दो स्निग्ध परमाणुओंके अथवा दो रूक्ष परमाणुओंके अथवा दो स्निग्ध-रूक्ष परमाणुओंके (-एक स्निग्ध और एक रूक्ष परमाणुके) बंधकी प्रसिद्धि है। कहा भी है कि :—

"णिद्धा णिद्धेण बज्झंति लुक्खा लुक्खा य पोग्गला।
णिद्धलुक्खा य बज्झंति रूवारूवी य पोग्गला॥"
"णिद्धस्स णिद्धेण दुराहिएण लुक्खस्स लुक्खेण दुराहिएण।
णिद्धस्स लुक्खेण हवेदि बंधो जहण्णवज्जे विसमे समे वा॥"

[अर्थ :—पुद्गल [१] 'रूपी' और 'अरूपी' होते हैं। उनमेंसे स्निग्ध पुद्गल स्निग्धके साथ बंधते हैं, रूक्ष पुद्गल रूक्षके साथ बंधते हैं, स्निग्ध और रूक्ष भी बंधते हैं।

जघन्यके अतिरिक्त सम अंशवाला हो या विषम अंशवाला हो, स्निग्ध का दो अधिक अंशवाले स्निग्ध परमाणुके साथ, रूक्षका दो अधिक अंशवाले रूक्ष परमाणुके साथ और स्निग्धका (दो अधिक अंशवाले) रूक्ष परमाणुके साथ बंध होता है।]

---

[१] किसी एक परमाणुकी अपेक्षासे विसदृशजातिका समान अंशोंवाला दूसरा परमाणु 'रूपी' कहलाता है और शेष सब परमाणु उसकी अपेक्षासे 'अरूपी' कहलाते हैं। जैसे – पांच अंश स्निग्धतावाले परमाणुको पांच अंश रूक्षतावाला दूसरा परमाणु 'रूपी' है और शेष सब परमाणु उसके लिये 'अरूपी' हैं। इसका अर्थ यह हुआ कि – विसदृशजातिके समान अंशवाले परमाणु परस्पर 'रूपी' हैं; और सदृशजातिके अथवा असमान अंशवाले परमाणु परस्पर 'अरूपी' हैं।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

च "णिद्धा णिद्धेण बज्झंति लुक्खा लुक्खा य पोग्गला। णिद्धलुक्खा य बज्झंति रूवा-रूवी य पोग्गला।" "णिद्धस्स णिद्धेण दुराहिएण लुक्खस्स लुक्खेण दुराहिएण। णिद्धस्स लुक्खेण हवेदि बंधो जहण्णवज्जे विसमे समे वा॥" ॥ १६६ ॥

अथात्मनः पुद्गलपिण्डकर्तृत्वाभावमवधारयति –

दुपदेसादी खंधा सुहुमा वा बादरा ससंठाणा।
पुढविजलतेउवाऊ सगपरिणामेहिं जायंते ॥ १६७ ॥

द्विप्रदेशादयः स्कन्धाः सूक्ष्मा वा बादराः ससंस्थानाः।
पृथिवीजलतेजोवायवः स्वकपरिणामैर्जायन्ते ॥ १६७ ॥

परमाणूनां चेति। तथा चोक्तम्–"णिद्धस्स णिद्धेण दुराधिगेण लुक्खस्स लुक्खेण दुराधिगेण। सिद्धस्स लुक्खेण हवेदि बंधो जघण्णवज्जे विसमे समे वा" ॥ १६६ ॥ एवं पूर्वोक्तप्रकारेण स्निग्धरूक्षपरिणत-

---

भावार्थ :–दो अंशोंसे लेकर अनन्त अंश स्निग्धता या रूक्षतावाला परमाणु उससे दो अधिक अंश स्निग्धता या रूक्षतावाले परमाणुके साथ बँधकर स्कंध बनता है। जैसे :–२ अंश स्निग्धतावाला परमाणु ४ अंश स्निग्धतावाले परमाणुके साथ बंधता है; ९१ अंश स्निग्धतावाला परमाणु ९३ अंश रूक्षतावाले परमाणुके साथ बंधता है; ५३३ अंश रूक्षतावाला परमाणु ५३५ अंश रूक्षतावाले परमाणुके साथ बंधता है; ७००६ अंश रूक्षतावाला परमाणु ७००८ अंश स्निग्धतावाले परमाणुके साथ बंधता है – इन उदाहरणोंके अनुसार दो से लेकर अनन्त अंशों (अविभागी प्रतिच्छेदों) तक समझ लेना चाहिये।

मात्र एक अंशवाले परमाणुमें जघन्यभावके कारण बंधकी योग्यता नहीं है, इसलिये एक अंशवाला स्निग्ध या रूक्ष परमाणु तीन अंशवाले स्निग्ध या रूक्ष परमाणुके साथ भी नहीं बंधता।

इसप्रकार, (एक अंशवालेके अतिरिक्त) दो परमाणुओंके बीच यदि दो अंशोंका अन्तर हो तब ही वे बँधते हैं; दो से अधिक या कम अंशोंका अन्तर हो तो बंध नहीं होता। जैसे :–पाँच अंश स्निग्धता या रूक्षतावाला परमाणु सात अंशोंवाले परमाणुके साथ बंधता है; परन्तु पाँच अंशोंवाला परमाणु आठ या छह अंशोंवाले (अथवा पाँच

स्कन्धो प्रदेशद्वयादियुत, स्थूल सूक्ष्मने साकार जे।
ते पृथ्वी-वायु-तेज-जल परिणामथी निज थाय छे ॥ १६७ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

एवममी समुपजायमाना द्विप्रदेशादयः स्कन्धा विशिष्टावगाहनशक्तिवशादुपात्त-सौक्ष्म्यस्थौल्यविशेषा विशिष्टाकारधारणशक्तिवशाद्गृहीतविचित्रसंस्थानाः सन्तो यथास्वं स्पर्शादिचतुष्कस्याविर्भावतिरोभावस्वशक्तिवशमासाद्य पृथिव्यप्तेजोवायवः स्वपरिणामैरेव जायन्ते। अतोऽवधार्यते द्व्यणुकाद्यनन्तानन्तपुद्गलानां न पिण्डकर्ता पुरुषोऽस्ति ॥ १६७ ॥

परमाणुस्वरूपकथनेन प्रथमगाथा, स्निग्धरूक्षगुणविवरणेन द्वितीया, स्निग्धरूक्षगुणाभ्यां द्व्यधिकत्वे सति बन्धकथनेन तृतीया, तस्यैव दृढीकरणेन चतुर्थी चेति परमाणूनां परस्परबन्धव्याख्यानमुख्यत्वेन प्रथम स्थले गाथाचतुष्टयं गतम्। अथात्मा द्व्यणुकादिपुद्गलस्कन्धानां कर्ता न भवतीत्युपदिशति— **जायन्ते** उत्पद्यन्ते। के कर्तारः। **दुपदेसादी खंदा** द्विप्रदेशाद्यनन्ताणुपर्यन्ताः स्कन्धाः। के जायन्ते। **पुढविजलतेउवाऊ** पृथ्वीजलतेजोवायवः। कथंभूताः सन्तः। **सुहुमा वा बादरा** सूक्ष्मा वा बादरा वा। पुनरपि किंविशिष्टाः सन्तः। **ससंठाणा** यथासंभवं वृत्तचतुरस्रादिस्वकीयस्वकीयसंस्थानाकारयुक्ताः। कैः कृत्वा जायन्ते। **सगपरिणामेहिं** स्वकीयस्वकीयस्निग्धरूक्षपरिणामैरिति। अथ विस्तरः—जीवा हि तावद्वस्तुतष्टङ्कोत्कीर्णज्ञायकैकरूपेण शुद्धबुद्धैकस्वभावा एव पश्चाद्व्यवहारेणानादिकर्मबन्धोपाधिवशेन शुद्धात्मस्वभावमलभमानाः सन्तः पृथिव्यप्तेजोवातकायिकेषु समुत्पद्यन्ते, तथापि स्वकीयाभ्यन्तरसुखदुःखादिरूपपरिणतेरेवाशुद्धोपादानकारणं भवन्ति, न च पृथिव्यादिकायाकारपरिणतेः। कस्मादिति चेत्। तत्र स्कन्धानामेवोपादानकारणत्वादिति। ततो ज्ञायते पुद्गलपिण्डानां जीवः कर्ता न

अंशोंवाले) परमाणुके साथ नहीं बंधता ॥१६६॥

अब, आत्माके पुद्गलोंके पिण्डके कर्तृत्वका अभाव निश्चित करते हैं :—

गाथा १६७

अन्वयार्थ :—[**द्विप्रदेशादयः स्कंधाः**] द्विप्रदेशादिक (दो से लेकर अनन्तप्रदेश वाले) स्कंध [**सूक्ष्माः वा बादराः**] जो कि सूक्ष्म अथवा बादर होते हैं और [**ससंस्थानाः**] संस्थानों (आकारों) सहित होते हैं वे — [**पृथिवीजलतेजोवायवः**] पृथ्वी, जल, तेज और वायुरूप [**स्वकपरिणामैः जायन्ते**] अपने परिणामोंसे होते हैं।

टीका :— इस (पूर्वोक्त) प्रकारसे यह उत्पन्न होनेवाले द्विप्रदेशादिक स्कंध—जिनने विशिष्ट अवगाहनकी शक्तिके वश सूक्ष्मता और स्थूलतारूप भेद ग्रहण किये हैं और जिनने विशिष्ट आकार धारण करनेकी शक्तिके वश होकर विचित्र संस्थान ग्रहण किये हैं वे — अपनी योग्यतानुसार [1]स्पर्शादिचतुष्कके आविर्भाव और तिरोभावकी स्वशक्तिके वश होकर पृथ्वी, जल, अग्नि और वायुरूप अपने परिणामोंसे ही होते हैं। इससे

---

[1] स्पर्शादिचतुष्क=स्पर्श, रस, गंध और वर्ण। (स्पर्शादिकी प्रगटता और अप्रगटता वह पुद्गलकी शक्ति है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथात्मनः पुद्गलपिण्डानेतृत्वाभावमवधारयति –

ओगाढगाढणिचिदो पोग्गलकायेहिं सव्वदो लोगो ।
सुहुमेहि बादरेहि य अप्पाओग्गेहिं जोग्गेहिं ॥ १६८ ॥

अवगाढगाढनिचितः पुद्गलकायैः सर्वतो लोकः ।
सूक्ष्मैर्बादरैश्चाप्रायोग्यैर्योग्यैः ॥ १६८ ॥

भवतीति ॥ १६७ ॥ अथात्मा बन्धकाले बन्धयोग्यपुद्गलान् बहिर्भागान्नैवानयतीत्यावेदयति – **ओगाढगाढणिचिदो** अवगाह्यावगाह्य नैरन्तर्येण निचितो भृतः । स कः । **लोगो** लोकः । कथं भूतः । **सव्वदो** सर्वतः सर्वप्रदेशेषु । कैः कर्तृभूतैः । **पुग्गलकायेहिं** पुद्गलकायैः । किंविशिष्टैः । **सुहुमेहि बादरेहि य** इन्द्रियग्रहणायोग्यैः सूक्ष्मैस्तद्ग्रहण योग्यैर्बादरैश्च । पुनश्च कथंभूतैः । **अप्पाओग्गेहिं** अतिसूक्ष्मस्थूलत्वेन कर्मवर्गणायोग्यतारहितैः । पुनश्च किंविशिष्टैः । **जोग्गेहिं** अतिसूक्ष्मस्थूलत्वाभावात्कर्म-

---

निश्चित होता है कि द्वि-अणुकादि अनन्तानन्त पुद्गलोंका पिण्डकर्ता आत्मा नहीं है ॥१६७॥

अब ऐसा निश्चित करते हैं कि (जिसप्रकार आत्मा पुद्गलपिण्डका करने वाला नहीं उसी प्रकार) आत्मा पुद्गलपिण्डका लानेवाला (भी) नहीं है :–

गाथा १६८

अन्वयार्थ :– [**लोकः**] लोक [**सर्वतः**] सर्वतः [**सूक्ष्मैः बादरैः**] सूक्ष्म तथा बादर [**च**] और [**अप्रायोग्यैः योग्यैः**] कर्मत्वके अयोग्य तथा कर्मत्वके योग्य [**पुद्गलकायैः**] पुद्गलस्कंधोंके द्वारा [**अवगाढगाढनिचितः**] (विशिष्ट प्रकारसे) अवगाहित होकर गाढ़ (-घनिष्ठ) भरा हुआ है ।

टीका :–सूक्ष्मतया परिणत तथा बादररूप परिणत, अति सूक्ष्म अथवा अति स्थूल न होनेसे कर्मरूप परिणत होनेकी शक्तिवाले तथा अति सूक्ष्म अथवा अति स्थूल होनेसे कर्मरूप परिणत होनेकी शक्तिसे रहित – ऐसे पुद्गलकायोंके द्वारा, अवगाहकी विशिष्टताके कारण परस्पर बाधा किये विना, स्वयमेव सर्वतः (सर्व प्रदेशोंसे) लोक

अवगाढ़ गाढ़ भरेल छे सर्वत्र पुद्गलकायथी ।
आलोक बादर-सूक्ष्मथी, कर्मत्वयोग्य-अयोग्यथी ॥ १६८ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यतो हि सूक्ष्मत्वपरिणतैर्बादरपरिणतैश्चानतिसूक्ष्मत्वस्थूलत्वात् कर्मत्वपरिणमनशक्तियोगिभिरतिसूक्ष्मस्थूलतया तदयोगिभिश्चावगाहविशिष्टत्वेन परस्परमबाधमानैः स्वयमेव सर्वत एव पुद्गलकायैर्गाढं निचितो लोकः। ततोऽवधार्यते न पुद्गलपिण्डानामानेता पुरुषोऽस्ति ॥ १६८ ॥

अथात्मनः पुद्गलपिण्डानां कर्मत्वकर्तृत्वाभावमवधारयति –

कम्मत्तणपाओग्गा खंधा जीवस्स परिणइं पप्पा।
गच्छंति कम्मभावं ण हि ते जीवेण परिणमिदा ॥ १६९ ॥

कर्मत्वप्रायोग्याः स्कन्धा जीवस्य परिणतिं प्राप्य।
गच्छन्ति कर्मभावं न हि ते जीवेन परिणमिताः ॥ १६९ ॥

वर्गणायोग्यैरिति। अयमत्रार्थः – निश्चयेन शुद्धस्वरूपैरपि व्यवहारेण कर्मोदयाधीनतया पृथिव्यादिपञ्चसूक्ष्मस्थावरत्वं प्राप्तैर्जीवैर्यथा लोको निरन्तरं भृतस्तिष्ठति तथा पुद्गलैरपि। ततो ज्ञायते यत्रैव शरीरावगाढक्षेत्रे जीवस्तिष्ठति बन्धयोग्यपुद्गला अपि तत्रैव तिष्ठन्ति, न च बहिर्भागाज्जीव आनयतीति ॥ १६८ ॥ अथ कर्मस्कन्धानां जीव उपादानकर्ता न भवतीति प्रज्ञापयति – **कम्मत्तणपा-**

गाढ़ भरा हुआ है। इससे निश्चित होता है कि पुद्गलपिण्डोंका लानेवाला आत्मा नहीं है।

भावार्थ :–इस लोकमें सर्वत्र जीव हैं और कर्मबंधके योग्य पुद्गलवर्गणा भी सर्वत्र है। जीवके जैसे परिणाम होते हैं उसीप्रकार जीवको कर्मबंध होता है। ऐसा नहीं है कि आत्मा किसी बाहरके स्थानसे कर्मयोग्य पुद्गल लाकर बंध करता है ॥ १६८ ॥

अब ऐसा निश्चित करते हैं कि आत्मा पुद्गलपिण्डोंको कर्मरूप नहीं करता :–

गाथा १६९

अन्वयार्थ :– [**कर्मत्वप्रायोग्याः स्कंधाः**] कर्मत्वके योग्य स्कंध [**जीवस्यपरिणतिं प्राप्य**] जीवकी परिणतिको प्राप्त करके [**कर्मभावं गच्छन्ति**] कर्मभावको प्राप्त होते हैं; [**न हि ते जीवेन परिणमिताः**] जीव उनको नहीं परिणमाता।

स्कंधो करमने योग्य पामी जीवना परिणामने।
कर्मत्वने पामे; नहि जीव परिणमावे तेमने ॥ १६९ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यतो हि तुल्यक्षेत्रावगाढजीवपरिणाममात्रं बहिरङ्गसाधनमाश्रित्य जीवं परिणमयितारमन्तरेणापि कर्मत्वपरिणमनशक्तियोगिनः पुद्गलस्कन्धाः स्वयमेव कर्मभावेन परिणमन्ति। ततोऽवधार्यते न पुद्गलपिण्डानां कर्मत्वकर्ता पुरुषोऽस्ति ॥ १६९ ॥

अथात्मनः कर्मत्वपरिणतपुद्गलद्रव्यात्मकशरीरकर्तृत्वाभावमवधारयति –

ते ते कम्मत्तगदा पोग्गलकाया पुणो जीवस्स।
संजायंते देहा देहंतरसंकमं पप्पा ॥ १७० ॥

ते ते कर्मत्वगताः पुद्गलकायाः पुनरपि जीवस्य।
संजायन्ते देहा देहान्तरसंक्रमं प्राप्य ॥ १७० ॥

ओग्गा खंधा कर्मत्वप्रायोग्याः स्कन्धाः कर्तारः **जीवस्स परिणइं पप्पा** जीवस्य परिणतिं प्राप्य निर्दोषिपरमात्मभावनोत्पन्नसहजानन्दैकलक्षणसुखामृतपरिणतेः प्रतिपक्षभूतां जीवसंबन्धिनीं मिथ्यात्वरागादिपरिणतिं प्राप्य **गच्छंति कम्मभावं** गच्छन्ति परिणमन्ति। कम्। कर्मभावं ज्ञानावरणादिद्रव्यकर्मपर्यायम्। **ण हि ते जोवेण परिणमिदा** न हि नैव ते कर्मस्कन्धा जीवेनोपादानकर्तृभूतेन परिणमिताः परिणतिं नीता इत्यर्थः। अनेन व्याख्यानेनैतदुक्तं भवति कर्मस्कन्धानां निश्चयेन जीवः कर्ता न भवतीति ॥ १६९ ॥ अथ शरीराकारपरिणतपुद्गलपिण्डानां जीवः कर्ता न भवतीत्युपदि-

---

टीका :– कर्मरूप परिणमित होनेकी शक्तिवाले पुद्गलस्कंध, तुल्य (समान) क्षेत्रावगाह जीवके परिणाममात्रका – जो कि बहिरंग साधन (बाह्यकारण) है उसका आश्रय करके, जीव उनको परिणमाने वाला न होने पर भी, स्वयमेव कर्मभावसे परिणमित होते हैं। इससे निश्चित होता है कि पुद्गलपिण्डोंको कर्मरूप करनेवाला आत्मा नहीं है।

भावार्थ :– समान क्षेत्रमें रहनेवाले जीवके विकारी परिणामको निमित्तमात्र करके कार्मणवर्गणायें स्वयमेव अपनी अन्तरंगशक्तिसे ज्ञानावरणादि कर्मरूप परिणमित होजाती हैं; जीव उन्हें कर्मरूप परिणमित नहीं करता ॥ १६९ ॥

अब आत्माके कर्मरूप परिणत पुद्गलद्रव्यात्मक शरीरके कर्तृत्वका अभाव निश्चित करते हैं (अर्थात् ऐसा निश्चित करते हैं कि कर्मरूप परिणत जो पुद्गलद्रव्य उस-स्वरूप शरीरका कर्ता आत्मा नहीं है) :–

कर्मत्व परिणत पुद्गलोना स्कन्ध ते ते फरी फरी।
शरीरो बने छे जीवने, संक्रान्ति पामी देहनी ॥ १७० ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

ये ये नामामी यस्य जीवस्य परिणामं निमित्तमात्रीकृत्य पुद्गलकायाः स्वयमेव कर्मत्वेन परिणमन्ति, अथ ते ते तस्य जीवस्यानादिसंतानप्रवृत्तशरीरान्तरसंक्रान्तिमाश्रित्य स्वयमेव च शरीराणि जायन्ते। अतोऽवधार्यते न कर्मत्वपरिणतपुद्गलद्रव्यात्मकशरीर-कर्ता पुरुषोऽस्ति ॥ १७० ॥

अथात्मनः शरीरत्वाभावमवधारयति –

शति – **ते ते कम्मत्तगदा** ते ते पूर्वसूत्रोदिताः कर्मत्वं गता द्रव्यकर्मपर्यायपरिणताः **पोग्गलकाया** पुद्गलस्कन्धाः **पुणो वि जीवस्स** पुनरपि भवान्तरेऽपि जीवस्य **संजायंते देहा** संजायन्ते सम्यग्जायन्ते देहाः शरीराणीति। किं कृत्वा। **देहंतरसंकमं पप्पा** देहान्तरसंक्रमं भवान्तरं प्राप्य लब्ध्वेति। अनेन किमुक्तं भवति – औदारिकादिशरीरनामकर्मरहितपरमात्मानमलभमानेन जीवेन यान्युपार्जितान्यौदारिकादिशरीरनामकर्माणि तानि भवान्तरे प्राप्ते सत्युदयमागच्छन्ति, तदुदयेन नोकर्मपुद्गला औदारिकादिशरीराकारेण स्वयमेव परिणमन्ति। ततः कारणादौदारिकादिकायानां जीवः कर्ता न भवतीति ॥ १७० ॥ अथ शरीराणि जीवस्वरूपं न भवन्तीति निश्चिनोति–**ओरालिओ य देहो**

गाथा १७०

अन्वयार्थ :– [**कर्मत्वगताः**] कर्मरूप परिणत [**ते ते**] वे-वे [**पुद्गलकायाः**] पुद्गलपिण्ड [**देहान्तरसंक्रमं प्राप्य**] देहान्तररूप परिवर्तनको प्राप्त करके [**पुनः अपि**] पुनः-पुनः [**जीवस्य**] जीवके [**देहाः**] शरीर [**संजायन्ते**] होते हैं।

टीका :– जिस जीवके परिणामको निमित्तमात्र करके जो-जो यह पुद्गलकाय स्वयमेव कर्मरूप परिणत होते हैं, वे जीव अनादि संततिरूप (प्रवाहरूप) प्रवर्तमान देहान्तर (भवांतर) रूप परिवर्तनका आश्रय लेकर वे-वे पुद्गलपिण्ड स्वयमेव शरीर (शरीररूप, शरीरके होनेमें निमित्तरूप) बनते हैं। इससे निश्चित होता है कि कर्मरूप परिणत पुद्गल द्रव्यात्मक शरीरका कर्ता आत्मा नहीं है।

भावार्थ :– जीवके परिणामको निमित्तमात्र करके जो पुद्गल स्वयमेव कर्मरूप परिणत होते हैं, वे पुद्गल ही अन्य भवमें शरीरके बननेमें निमित्तभूत होते हैं, और नोकर्मपुद्गल स्वयमेव शरीररूप परिणमित होते हैं। इसलिये शरीरका कर्ता आत्मा नहीं है ॥ १७० ॥

अब, आत्माके शरीरपनेका अभाव निश्चित करते हैं :–

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

ओरालिओ य देहो देहो वेउव्विओ य तेजसिओ ।
आहारय कम्मइओ पोग्गलदव्वप्पगा सव्वे ॥ १७१ ॥

औदारिकश्च देहो देहो वैक्रियिकश्च तैजसः ।
आहारकः कार्मणः पुद्गलद्रव्यात्मकाः सर्वे ॥ १७१ ॥

यतो ह्यौदारिकवैक्रियिकाहारकतैजसकार्मणानि शरीराणि सर्वाण्यपि पुद्गलद्रव्यात्मकानि । ततोऽवधार्यते न शरीरं पुरुषोऽस्ति ॥ १७१ ॥

अथ किं तर्हि जीवस्य शरीरादिसर्वपरद्रव्यविभागसाधनमसाधारणं स्वलक्षणमित्यावेदयति –

औदारिकश्च देहः **देहो देउव्विओ य** देहो वैक्रियकश्च **तेजइओ** तैजसिकः **आहारय कम्मइयो** आहारकः कार्मणश्च **पुग्गलदव्वप्पगा सव्वे** एते पञ्च देहाः पुद्गलद्रव्यात्मकाः सर्वेऽपि मम स्वरूपं न भवन्ति । कस्मादिति चेत् । ममाशरीरचैतन्यचमत्कारपरिणतत्वेन सर्वदैवाचेतनशरीरत्वविरोधादिति ॥ १७१ ॥ एवं पुद्गलस्कन्धानां बन्धव्याख्यानमुख्यतया द्वितीयस्थले गाथापञ्चकं गतम् । इति 'अपदेसो परमाणू' इत्यादि गाथानवकेन परमाणुस्कन्धभेदभिन्नपुद्गलानां पिण्डनिष्पत्तिव्याख्यानमुख्यतया द्वितीयविशेषान्तराधिकारः समाप्तः । अथैकोनविंशतिगाथापर्यन्तं जीवस्य पुद्गलेन सह बन्धमुख्यतया व्याख्यानं करोति, तत्र षट्स्थलानि भवन्ति । तेष्वादौ 'अरसमरूवं' इत्यादि शुद्धजीवव्याख्यानेन गाथैका, 'मुत्तो रूवादि' इत्यादिपूर्वपक्षपरिहारमुख्यतया गाथाद्वयमिति प्रथमस्थले गाथात्रयम् ।

गाथा १७१

अन्वयार्थ :– [**औदारिकः च देहः**] औदारिक शरीर, [**वैक्रियिकः देहः**] वैक्रियिक शरीर, [**तैजसः**] तैजस शरीर, [**आहारकः**] आहारक शरीर [**च**] और [**कार्मणः**] कार्मण शरीर – [**सर्वे**] सब [**पुद्गलद्रव्यात्मकाः**] पुद्गलद्रव्यात्मक हैं ।

टीका :– औदारिक, वैक्रियिक, आहारक, तैजस और कार्मण ये शरीर सब पुद्गलद्रव्यात्मक हैं । इससे निश्चित होता है कि आत्मा शरीर नहीं है ॥ १७१ ॥

तब फिर जीवका, शरीरादि सर्वपरद्रव्योंसे विभागका साधनभूत, असाधारण स्वलक्षण क्या है, सो कहते हैं :–

जे देह औदारिक, ने वैक्रिय-तेजस देह छे ।
कार्मण-आहारक देह जे, ते सर्व पुद्गलरूप छे ॥ १७१ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अरसमरूवमगंधं अव्वत्तं चेदणागुणमसद्दं ।
जाण अलिंगग्गहणं जीवमणिद्दिट्ठसंठाणं ॥ १७२ ॥

अरसमरूपमगन्धमव्यक्तं चेतनागुणमशब्दम् ।
जानीह्यलिङ्गग्रहणं जीवमनिर्दिष्टसंस्थानम् ॥ १७२ ॥

आत्मनो हि रसरूपगन्धगुणाभावस्वभावत्वात्स्पर्शगुणव्यक्त्यभावस्वभावत्वात् शब्द-पर्यायाभावस्वभावत्वात्तथा तन्मूलादलिङ्गग्राह्यत्वात्सर्वसंस्थानाभावस्वभावत्वाच्च पुद्गल-द्रव्यविभागसाधनमरसत्वमरूपत्वमगन्धत्वमव्यक्तत्वमशब्दत्वमलिङ्गग्राह्यत्वमसंस्थानत्वं चास्ति । सकलपुद्गलापुद्गलाजीवद्रव्यविभागसाधनं तु चेतनागुणत्वमस्ति । तदेव च

तदनन्तरं भावबन्धमुख्यत्वेन 'उवओगमओ' इत्यादि गाथाद्वयम् । अथ परस्परं द्वयोः पुद्गलयोः बन्धो, जीवस्य रागादिपरिणामेन सह बन्धो, जीवपुद्गलयोर्बन्धश्चेति त्रिविधबन्धमुख्यत्वेन 'फासेहि पुग्गलाणं' इत्यादि सूत्रद्वयम् । ततः परं निश्चयेन द्रव्यबन्धकारणत्वाद्रागादिपरिणाम एव बन्ध इति

गाथा १७२

अन्वयार्थ :– [**जीवम्**] जीवको [**अरसम्**] अरस, [**अरूपम्**] अरूप [**अगंधम्**] अगंध, [**अव्यक्तम्**] अव्यक्त, [**चेतनागुणम्**] चेतनागुणयुक्त, [**अशब्दम्**] अशब्द, [**अलिंगग्रहणम्**] अलिंगग्रहण (लिंग द्वारा ग्रहण न होने योग्य) और [**अनिर्दिष्ट-संस्थानम्**] जिसका कोई संस्थान नहीं कहा गया है ऐसा [**जानीहि**] जानो ।

टीका :–आत्मा (१) रसगुणके अभावरूप स्वभाववाला होनेसे, (२) रूप-गुणके अभावरूप स्वभाववाला होनेसे, (३) गंधगुणके अभावरूप स्वभाववाला होनेसे, (४) स्पर्शगुणरूप व्यक्ताके अभावरूप स्वभाववाला होनेसे, (५) शब्दपर्यायके अभावरूप स्वभाववाला होनेसे, तथा (६) इन सबके कारण (अर्थात् रस-रूप-गंध इत्यादिके अभावरूप स्वभावके कारण) लिंगके द्वारा अग्राह्य होनेसे और (७) सर्व संस्थानोंके अभावरूप स्वभाववाला होनेसे, आत्माको पुद्गलद्रव्यसे विभागका साधनभूत (१) अरसपना, (२) अरूपपना, (३) अगंधपना, (४) अव्यक्तपना, (५) अशब्दपना (६) अलिंगग्राह्यपना, और (७) असंस्थानपना है । पुद्गल तथा अपुद्गल ऐसे समस्त अजीव द्रव्योंसे विभागका साधन तो चेतनागुणमयपना है ; और वही, मात्र

छे चेतनागुण, गंध–रूप रस–शब्द व्यक्ति न जीवने ।
वली लिंगग्रहण नथी अने संस्थान भाख्युं न तेहने ॥ १७२ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

तस्य स्वजीवद्रव्यमात्राश्रितत्वेन स्वलक्षणतां बिभ्राणं शेषद्रव्यान्तरविभागं साधयति। अलिङ्गग्राह्य इति वक्तव्ये यदलिङ्गग्रहणमित्युक्तं तद्बहुतरार्थप्रतिपत्तये। तथाहि (१) न लिंगैरिन्द्रियैर्ग्राहकतामापन्नस्य ग्रहणं यस्येत्यतीन्द्रियज्ञानमयत्वस्य प्रतिपत्तिः। (२) न लिंगैरिन्द्रियैर्ग्राह्यतामापन्नस्य ग्रहणं यस्येतीन्द्रियप्रत्यक्षाविषयत्वस्य। (३) न लिंगादिन्द्रियगम्याद्धूमादग्नेरिव ग्रहणं यस्येतीन्द्रियप्रत्यक्षपूर्वकानुमानाविषयत्वस्य। (४) न लिंगादेव परैः ग्रहणं यस्येत्यनुमेयमात्रत्वाभावस्य। (५) न लिंगादेव परेषां ग्रहणं यस्येत्यनुमातृमात्रत्वाभावस्य। (६) न लिंगात्स्वभावेन ग्रहणं यस्येति प्रत्यक्षज्ञातृत्वस्य।

कथनमुख्यतया 'रत्तो बंधदि' इत्यादि गाथात्रयम्। अथ भेदभावनामुख्यत्वेन 'भणिदा पुढवी' इत्यादि सूत्रद्वयम्। तदनन्तरं जीवो रागादिपरिणामानामेव कर्ता, न च द्रव्यकर्मणामिति कथनमुख्यत्वेन 'कुव्वं सहावमादा' इत्यादि षष्ठस्थले गाथासप्तकम्। यत्र मुख्यत्वमिति वदति तत्र यथासंभवमन्योऽप्यर्थो लभ्यत इति सर्वत्र ज्ञातव्यम्। एवमेकोनविंशतिगाथाभिस्तृतीयविशेषान्तराधिकारे समुदायपातनिका। तद्यथा – अथ किं तर्हि जीवस्य शरीरादिपरद्रव्येभ्यो भिन्नमन्यद्रव्यासाधारणं स्वस्वरूपमिति प्रश्ने प्रत्युत्तरं ददाति – **अरसमरूवमगंधं** रसरूपगन्धरहितत्वात्तथा चाव्याहार्यमाणा-

---

स्वजीवद्रव्याश्रित होनेसे स्वलक्षणपनेको धारण करता हुआ, आत्माका शेष अन्य द्रव्योंसे विभाग (भेद) सिद्ध करता है।

जहाँ 'अलिंगग्राह्य' कहना है वहाँ जो 'अलिंगग्रहण' कहा है, वह बहुतसे अर्थोंकी प्रतिपत्ति (प्राप्ति, प्रतिपादन) करनेके लिये है। वह इसप्रकार है :– (१) ग्राहक (ज्ञायक) जिसके लिंगोंके द्वारा अर्थात् इन्द्रियोंके द्वारा ग्रहण (जानना) नहीं होता वह अलिंगग्रहण है; इसप्रकार 'आत्मा अतीन्द्रियज्ञानमय है' इस अर्थकी प्राप्ति होती है। (२) ग्राह्य (ज्ञेय) जिसका लिंगोंके द्वारा अर्थात् इन्द्रियोंके द्वारा ग्रहण (जानना) नहीं होता वह अलिंगग्रहण है; इसप्रकार 'आत्मा इन्द्रियप्रत्यक्षका विषय नहीं है' इस अर्थकी प्राप्ति होती है। (३) जैसे धुंएँसे अग्निका ग्रहण (ज्ञान) होता है, उसीप्रकार लिंग द्वारा, अर्थात् इन्द्रियगम्य (इन्द्रियोंसे जानने योग्य चिह्न) द्वारा जिसका ग्रहण नहीं होता वह अलिंगग्रहण है। इसप्रकार 'आत्मा इन्द्रियप्रत्यक्षपूर्वक अनुमानका विषय नहीं है' ऐसे अर्थकी प्राप्ति होती है। (४) दूसरों के द्वारा – मात्र लिंग द्वारा ही जिसका ग्रहण नहीं होता वह अलिंगग्रहण है; इसप्रकार 'आत्मा अनुमेय मात्र (केवल अनुमानसे ही ज्ञात होने योग्य) नहीं है' ऐसे अर्थकी प्राप्ति होती है। (५) जिसके लिंगसे ही परका ग्रहण नहीं होता वह अलिंगग्रहण है; इसप्रकार 'आत्मा अनुमातामात्र (केवल अनुमान करनेवाला ही) नहीं है' ऐसे अर्थकी प्राप्ति होती है। (६) जिसके

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

(७) न लिंगेनोपयोगाख्यलक्षणेन ग्रहणं ज्ञेयार्थालम्बनं यस्येति बहिरर्थालम्बनज्ञानाभावस्य। (८) न लिंगस्योपयोगाख्यलक्षणस्य ग्रहणं स्वयमाहरणं यस्येत्यनाहार्यज्ञानत्वस्य। (९) न लिंगस्योपयोगाख्यलक्षणस्य ग्रहणं परेण हरणं यस्येत्यहार्यज्ञानत्वस्य। (१०) न लिंगे उपयोगाख्यलक्षणे ग्रहणं सूर्य इवोपरागो यस्येति शुद्धोपयोगस्वभावस्य। (११) न लिंगादुपयोगाख्यलक्षणाद्ग्रहणं पौद्गलिककर्मादान यस्येति द्रव्यकर्मासंपृथक्त्वस्य। (१२) न लिंगेभ्य इन्द्रियेभ्यो ग्रहणं विषयाणामुपभोगो यस्येति विषयोपभोक्तृत्वाभावस्य। (१३) न लिंगात्मनो वेन्द्रियादिलक्षणाद्ग्रहणं जीवस्य धारणं

स्पर्शरूपत्वाच्च **अव्वत्तं** अव्यक्तत्वात् **असद्दं** अशब्दत्वात् **अलिंगग्गहणं** अलिङ्गग्रहणत्वात् **अणिद्दिट्ठसंठाणं** अनिर्दिष्टसंस्थानत्वाच्च **जाण जीवं** जानीहि जीवम्। अरसमरूपमगन्धमस्पर्शमव्यक्तमशब्दमलिङ्गग्रहणमनिर्दिष्टसंस्थानलक्षणं च हे शिष्य, जीवं जीवद्रव्यं जानीहि। पुनरपि कथंभूतम्। **चेदणागुणं** समस्तपुद्गलादिभ्योऽचेतनेभ्यो भिन्नः समस्तान्यद्रव्यासाधारणः स्वकीयानन्तजीवजातिसाधारणश्च चेतनागुणो यस्य तं चेतनागुणं च अलिङ्गग्राह्यमिति वक्तव्ये यदलिङ्गग्रहणमित्युक्तं तत्किमर्थमिति चेत्, बहुतरार्थप्रतिपत्त्यर्थम्। तथा हि–लिङ्गमिन्द्रियं तेनार्थानां ग्रहणं परिच्छेदनं न करोति

लिंगके द्वारा नहीं किन्तु स्वभावके द्वारा ग्रहण होता है वह अलिंगग्रहण है; इसप्रकार 'आत्मा प्रत्यक्ष ज्ञाता है' ऐसे अर्थकी प्राप्ति होती है। (७) जिसके लिंग द्वारा अर्थात् उपयोगनामक लक्षण द्वारा ग्रहण नहीं है अर्थात् ज्ञेय पदार्थोंका आलम्बन नहीं है, वह अलिंगग्रहण है; इसप्रकार 'आत्माके बाह्य पदार्थोंका आलम्बनवाला ज्ञान नहीं है' ऐसे अर्थकी प्राप्ति होती है। (८) जो लिंगको अर्थात् उपयोग नामक लक्षणको ग्रहण नहीं करता अर्थात् स्वयं (कहीं बाहरसे) नहीं लाता सो अलिंगग्रहण है; इसप्रकार 'आत्मा जो कहींसे नहीं लाया जाता ऐसे ज्ञानवाला है' ऐसे अर्थकी प्राप्ति होती है। (९) जिसे लिंगका अर्थात् उपयोगनामक लक्षणका ग्रहण अर्थात् परसे हरण नहीं हो सकता (अन्य से नहीं ले जाया जा सकता) सो अलिंग ग्रहण है; इसप्रकार 'आत्माके ज्ञानका हरण नहीं किया जा सकता' ऐसे अर्थकी प्राप्ति होती है। (१०) जिसे लिंगमें अर्थात् उपयोगनामक लक्षणमें ग्रहण अर्थात् सूर्यकी भाँति उपराग (मलिनता, विकार) नहीं है वह अलिंगग्रहण है; इसप्रकार 'आत्मा शुद्धोपयोगस्वभावी है' ऐसे अर्थकी प्राप्ति होती है। (११) लिंग द्वारा अर्थात् उपयोगनामक लक्षण द्वारा ग्रहण अर्थात् पौद्गलिक कर्मका ग्रहण जिसके नहीं है, वह अलिंगग्रहण है; इसप्रकार 'आत्मा द्रव्यकर्मसे असंयुक्त (असंबद्ध) है' ऐसे अर्थकी प्राप्ति होती है। (१२) जिसे लिंगोंके द्वारा अर्थात् इन्द्रियोंके द्वारा ग्रहण अर्थात् विषयोंका उपभोग नहीं है सो अलिंगग्रहण है; इसप्रकार' 'आत्मा

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यस्येति शुक्रार्तवानुविधायित्वाभावस्य । (१४) न लिंगस्य मेहनाकारस्य ग्रहणं यस्येति लौकिकसाधनमात्रत्वाभावस्य । (१५) न लिंगेनामेहनाकारेण ग्रहणं लोकव्याप्तिर्यस्येति कुहुकप्रसिद्धसाधनाकारलोकव्याप्तित्वाभावस्य । (१६) न लिंगानां स्त्रीपुन्नपुंसकवेदानां ग्रहणं यस्येति स्त्रीपुन्नपुंसकद्रव्यभावाभावस्य । (१७) न लिंगानां धर्मध्वजानां ग्रहणं

तेनालिङ्गग्रहणो भवति। तदपि कस्मात्। स्वयमेवातीन्द्रियाखण्डज्ञानसहितत्वात्। तेनैव लिङ्ग-शब्दवाच्येन चक्षुरादीन्द्रियेणान्यजीवानां यस्य ग्रहणं परिच्छेदनं कर्तुं नायाति तेनालिङ्गग्रहण उच्यते। तदपि कस्मात्। निर्विकारातीन्द्रियस्वसंवेदनप्रत्यक्षज्ञानगम्यत्वात्। लिङ्गं धूमादि तेन धूमलिङ्गोद्भवानुमानेनाग्निवदनुमेयभूतपरपदार्थानां ग्रहणं न करोति तेनालिङ्गग्रहण इति। तदपि कस्मात्। स्वयमेवालिङ्गोद्भवातीन्द्रियज्ञानसहितत्वात्। तेनैव लिङ्गोद्भवानुमानेनाग्निग्रहणवत् परपुरुषाणां यस्यात्मनो ग्रहणं परिज्ञानं कर्तुं नायाति तेनालिङ्गग्रहण इति। तदपि कस्मात्।

अन्वयार्थ :–[**सप्रदेशः**] प्रदेशयुक्त [**सः आत्मा**] वह आत्मा [**समये**] यथाकाल [**मोहरागद्वेषैः**] मोह-राग-द्वेषके द्वारा [**कषायितः**] कषायित होनेसे [**कर्मरजोभिः श्लिष्टः**] कर्मरजसे लिप्त या बद्ध होता हुआ [**बंध इति प्ररूपितः**] 'बंध' कहा गया है।

टीका : –जैसे जगतमें वस्त्र सप्रदेश होनेसे लोध, फिटकरी आदिसे [1]कषायित होता है, जिससे वह मंजीठादिके रंगसे संबद्ध होता हुआ अकेला ही रंगा हुआ देखा जाता है, इसी प्रकार आत्मा भी सप्रदेश होनेसे यथाकाल मोह-राग-द्वेषके द्वारा कषायित

---

[1] कषायित=रंगा हुआ, उपरक्त, मलिन।

आ जीव केरा बंधनो संक्षेप निश्चय भाखियो ।
अर्हंतदेवे योगीने; व्यवहार अन्य रीते कह्यो ॥ १८९ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

रागपरिणाम एवात्मनः कर्म, स एव पुण्यपापद्वैतम्। रागपरिणामस्यैवात्मा कर्ता, तस्यैवोपादाता हाता चेत्येष शुद्धद्रव्यनिरूपणात्मको निश्चयनयः यस्तु पुद्गलपरिणाम आत्मनः कर्म स एव पुण्यपापद्वैतं, पुद्गलपरिणामस्यात्मा कर्ता, तस्योपादाता हाता

व्यवहारनयस्येति ॥ १८८ ॥ अथ निश्चयव्यवहारयोरविरोधं दर्शयति – **एसो बंधसमासो** एष बन्धसमासः। एष बहुधा पूर्वोक्तप्रकारो रागादिपरिणतिरूपो बन्धसंक्षेपः। केषां संबन्धी। **जीवाणं** जीवानाम्। **णिच्छयेण णिद्दिट्ठो** निश्चयनयेन निर्दिष्टः कथितः। कैः कर्तृभूतैः। **अरहंतेहिं** अर्हद्भिः निर्दोषिपरमात्मभिः। केषाम्। **जदीणं** जितेन्द्रियत्वेन शुद्धात्मस्वरूपे यत्नपराणां गणधरदेवादियतीनाम्। **ववहारो** द्रव्यकर्मरूपव्यवहारबन्धः **अण्णहा भणिदो** निश्चयनयापेक्षयान्यथा व्यवहारनयेनेति भणितः। किंच रागादीनेवात्मा करोति तानेव भुङ्क्ते चेति निश्चयनयलक्षणमिदम्। अयं तु निश्चयनयो द्रव्यकर्मबन्धप्रतिपादकासद्भूतव्यवहारनयापेक्षया शुद्धद्रव्यनिरूपणात्मको विवक्षितनिश्चयनयस्तथैवाशुद्धनिश्चयश्च भण्यते। द्रव्यकर्माण्यात्मा करोति भुङ्क्ते चेत्यशुद्धद्रव्यनिरूपणात्मकासद्भूतव्यवहारनयो भण्यते। इदं नयद्वयं तावदस्ति। किंत्वत्र निश्चयनय उपादेयः, न चासद्भूतव्यवहारः। ननु रागादीनात्मा करोति। भुङ्क्ते चेत्येवंलक्षणो निश्चयनयो व्याख्यातः स कथमुपादेयो भवति। परिहारमाह –

होनेसे कर्मरजके द्वारा श्लिष्ट होता हुआ अकेला ही बंध है; ऐसा देखना (मानना) चाहिये, क्योंकि निश्चयका विषय शुद्ध द्रव्य है ॥ १८८ ॥

अब निश्चय और व्यवहारका अविरोध बतलाते हैं :—

गाथा १८९

अन्वयार्थ :–[**एषः**] यह (पूर्वोक्त प्रकारसे), [**जीवानां**] जीवोंके [**बंधसमासः**] बंधका संक्षेप [**निश्चयेन**] निश्चयसे [**अर्हद्भिः**] अर्हन्तभगवानने [**यतीनां**] यतियोंसे [**निर्दिष्टः**] कहा है; [**व्यवहारः**] व्यवहार [**अन्यथा**] अन्यप्रकारसे [**भणितः**] कहा है।

टीका :–रागपरिणाम ही आत्माका कर्म है, वही पुण्य-पापरूप द्वैत है, आत्मा रागपरिणामका ही कर्ता है, उसीका ग्रहण करनेवाला है और उसीका त्याग करनेवाला है; –यह, शुद्धद्रव्यका [1]निरूपणस्वरूप निश्चयनय है। और जो पुद्गलपरिणाम आत्माका कर्म है, वही पुण्य-पापरूप द्वैत है, आत्मा पुद्गलपरिणामका कर्ता है, उसका ग्रहण करने-

---

[1] निश्चयनय मात्र स्वद्रव्यके परिणामको बतलाता है, इसलिये उसे शुद्धद्रव्यका कथन करनेवाला कहा है, और व्यवहारनय परद्रव्यके परिणामको आत्मपरिणाम बतलाता है इसलिये उसे अशुद्धद्रव्यका कथन करनेवाला कहा है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

चेति सोऽशुद्धद्रव्यनिरूपणात्मको व्यवहारनयः। उभावप्येतौ स्तः, शुद्धाशुद्धत्वेनोभयथा द्रव्यस्य प्रतीयमानत्वात्। किन्त्वत्र निश्चयनयः साधकतमत्वादुपात्तः, साध्यस्य हि शुद्धत्वेन द्रव्यस्य शुद्धत्वद्योतकत्वान्निश्चयनय एव साधकतमो, न पुनरशुद्धत्वद्योतको व्यवहारनयः॥ १८९॥

अथाशुद्धनयादशुद्धात्मलाभ एवेत्यावेदयति –

रागादीनेवात्मा करोति, न च द्रव्यकर्म, रागादय एव बन्धकारणमिति यदा जानाति जीवस्तदा रागद्वेषादिविकल्पजालत्यागेन रागादिविनाशार्थं निजशुद्धात्मानं भावयति। ततश्च रागादिविनाशो भवति। रागादिविनाशे चात्मा शुद्धो भवति। ततः परंपरया शुद्धात्मसाधकत्वादयमशुद्धनयोऽप्युपचारेण शुद्धनयो भण्यते, निश्चयनयो भण्यते, तथैवोपादेयो भण्यते इत्यभिप्रायः॥ १८९॥ एवमात्मा

वाला और छोड़नेवाला है; –ऐसा जो नय वह अशुद्धद्रव्यके [१]निरूपणस्वरूप व्यवहारनय है। यह दोनों (नय) हैं; क्योंकि शुद्धरूप और अशुद्धरूप – दोनों प्रकारसे द्रव्यकी प्रतीति की जाती है। किन्तु यहाँ निश्चयनय साधकतम (उत्कृष्ट साधक) होनेसे [२]ग्रहण किया जाता है; (क्योंकि) साध्यके शुद्ध होनेसे द्रव्यके शुद्धत्वका द्योतक (प्रकाशक) होनेसे निश्चयनय ही साधकतम है; किन्तु अशुद्धत्वका द्योतक व्यवहारनय साधकतम नहीं है॥ १८९॥

अब ऐसा कहते हैं कि अशुद्धनयसे अशुद्ध आत्माकी ही प्राप्ति होती है :–

---

[१] यहाँ शुद्धद्रव्यका कथन एक द्रव्याश्रित परिणामकी अपेक्षासे जानना चाहिये, और अशुद्धद्रव्यका कथन एक द्रव्यके परिणाम अन्यद्रव्यमें आरोपित करनेकी अपेक्षासे जानना चाहिये।

[२] निश्चयनय उपादेय है और व्यवहारनय हेय है।

प्रश्न :– द्रव्य सामान्यका आलम्बन ही उपादेय है, फिर भी यहाँ रागपरिणामकी ग्रहण-त्यागरूप पर्यायोंको स्वीकार करनेवाले निश्चयनयको उपादेय क्यों कहा है?

उत्तर :– 'रागपरिणामका कर्ता भी आत्मा ही है और वीतराग परिणामका भी; अज्ञानदशा भी आत्मा स्वतंत्रतया करता है और ज्ञानदशा भी'; – ऐसे यथार्थ ज्ञानके भीतर द्रव्यसामान्यका ज्ञान गर्भितरूपसे समा ही जाता है। यदि विशेषका भलीभाँति यथार्थ ज्ञान हो तो यह विशेषोंको करनेवाला सामान्यका ज्ञान होना ही चाहिये। द्रव्यसामान्यके ज्ञानके बिना पर्यायोंका यथार्थ ज्ञान हो ही नहीं सकता। इसलिए उपरोक्त निश्चयनयमें द्रव्यसामान्यका ज्ञान गर्भितरूपसे समा ही जाता है। जो जीव बंधमार्गरूप पर्यायमें तथा मोक्षमार्गरूप पर्यायमें आत्मा अकेला ही है, इसप्रकार यथार्थतया (द्रव्यसामान्यकी अपेक्षा सहित) जानता है, वह जीव परद्रव्यसे संपृक्त नहीं होता, और द्रव्यसामान्यके भीतर पर्यायोंको डुबाकर, एकरूप करके सुविशुद्ध होता है। इसप्रकार आलम्बनरूप अभिप्राय अपेक्षित होनेसे उपरोक्त निश्चयनयको उपादेय कहा है। [विशेष जानने के लिये १२६ वीं गाथाकी टीका देखनी चाहिये।]

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

ण चयदि जो दु ममत्तिं अहं ममेदं ति देहदविणेसु ।
सो सामण्णं चत्ता पडिवण्णो होदि उम्मग्गं ॥१९०॥

न त्यजति यस्तु ममतामहं ममेदमिति देहद्रविणेषु ।
स श्रामण्यं त्यक्त्वा प्रतिपन्नो भवत्युन्मार्गम् ॥ १९० ॥

स्वपरिणामानामेव कर्ता, न च द्रव्यकर्मणामिति कथनमुख्यतया गाथासप्तकेन षष्ठस्थलं गतम् । इति 'अरसमरूवं' इत्यादिगाथात्रयेण पूर्वं शुद्धात्मव्याख्याने कृते सति शिष्येण यदुक्तममूर्तस्यात्मनो मूर्तकर्मणा सह कथं बन्धो भवतीति तत्परिहारार्थं नयविभागेन बन्धसमर्थनमुख्यतयैकोनविंशतिगाथाभिः स्थलषट्केन तृतीयविशेषान्तराधिकारः समाप्तः । अतः परं द्वादशगाथापर्यन्तं चतुर्भिः स्थलैः शुद्धात्मानुभूतिलक्षणाविशेषभेदभावनारूपचूलिकाव्याख्यानं करोति । तत्र शुद्धात्मभावनाप्रधानत्वेन 'ण चयदि जो दु ममत्तिं' इत्यादिपाठक्रमेण प्रथमस्थले गाथा चतुष्टयम् । तदनन्तरं शुद्धात्मोपलम्भभावनाफलेन दर्शनमोहग्रन्थिविनाशस्तथैव चारित्रमोहग्रन्थिविनाशः क्रमेण तदुभयविनाशो भवतीति कथनमुख्यत्वेन 'जो एवं जाणित्ता' इत्यादि द्वितीयस्थले गाथात्रयम् । ततः परं केवलिध्यानोपचारकथनरूपेण 'णिहदघणघणादिकम्मो' इत्यादि तृतीयस्थले गाथाद्वयम् । तदनन्तरं दर्शनाधिकारोपसंहारप्रधानत्वेन 'एवं जिणा जिणिंदा' इत्यादि चतुर्थस्थले गाथाद्वयम् । ततः परं 'दंसणसंसुद्धाणं' इत्यादि नमस्कारगाथा चेति द्वादशगाथाभिश्चतुर्थस्थले विशेषान्तराधिकारे समुदायपातनिका । अथाशुद्धनयादशुद्धात्मलाभ एव भवतीत्युपदिशति – **ण चयदि जो दु ममत्तिं** न त्यजति यस्तु ममतां । ममकाराहंकारादिसमस्तविभावरहितसकलविमलकेवलज्ञानाद्यनन्तगुणस्वरूपनिजात्मपदार्थनिश्चलानुभूतिलक्षणनिश्चयनयरहि-

---

गाथा १९०

अन्वयार्थ :– [**यः तु**] जो [**देहद्रविणेषु**] देह-धनादिकमें [**अहं मम इदम्**] 'मैं यह हूं और यह मेरा है' [**इति ममतां**] ऐसी ममताको [**न त्यजति**] नहीं छोड़ता, [**सः**] वह [**श्रामण्यं त्यक्त्वा**] श्रमणताको छोड़कर [**उन्मार्गं प्रतिपन्नः भवति**] उन्मार्गका आश्रय लेता है ।

टीका :– जो आत्मा शुद्धद्रव्यके निरूपणस्वरूप [१]निश्चयनयसे निरपेक्ष रहकर अशुद्धद्रव्यके निरूपणस्वरूप व्यवहारनयसे जिसे मोह उत्पन्न हुआ है ऐसा वर्तता हुआ 'मैं यह हूँ और यह मेरा है' इसप्रकार [२]आत्मीयतासे देह धनादिक परद्रव्यमें ममत्व नहीं

---

[१] निश्चयनयसे निरपेक्ष=निश्चयनयके प्रति उपेक्षावान्; उसे न गिनने-माननेवाला ।

[२] आत्मीयतासे=निजरूपसे (अज्ञानी जीव शरीर, धन इत्यादि परद्रव्यको अपना मानकर उसमें ममत्व करता है ।)

'हुं आ अने आ मारुं, अे ममता न देह-धने तजे ।
ते छोड़ी जीव श्रामण्यने उन्मार्गनो आश्रय करे ॥ १९० ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यो हि नाम शुद्धद्रव्यनिरूपणात्मकनिश्चयनयनिरपेक्षोऽशुद्धद्रव्यनिरूपणात्मक-व्यवहारनयोपजनितमोहः सन् अहमिदं ममेदमित्यात्मात्मीयत्वेन देहद्रविणादौ परद्रव्ये ममत्वं न जहाति स खलु शुद्धात्मपरिणतिरूपं श्रामण्याख्यं मार्गं दूरादपहायाशुद्धात्म-परिणतिरूपमुन्मार्गमेव प्रतिपद्यते। अतोऽवधार्यते अशुद्धनयादशुद्धात्मलाभ एव ॥१९०॥

अथ शुद्धनयात् शुद्धात्मलाभ एवेत्यवधारयति –

णाहं होमि परेसिं ण मे परे संति णाणमहमेक्को।
इदि जो झायदि झाणे सो अप्पा णं हवदि झादा ॥१९१॥

नाहं भवामि परेषां न मे परे सन्ति ज्ञानमहमेकः।
इति यो ध्यायति ध्याने स आत्मा भवति ध्याता ॥ १९१ ॥

तत्वेन व्यवहारमोहितहृदयः सन् ममतां ममत्वभावं न त्यजति यः। केन रूपेण। **अहं ममेदं ति** अहं ममेदमिति। केषु विषयेषु। **देहदविणेसु** देहद्रव्येषु, देहे देहोऽहमिति, परद्रव्येषु ममेदमिति। **सो सामण्णं चत्ता पडिवण्णो होदि उम्मग्गं** स श्रामण्यं त्यक्त्वा प्रतिपन्नो भवत्युत्मार्गम्। स पुरुषो जीवितमरणलाभालाभसुखदुःखशत्रुमित्रनिन्दाप्रशंसादिपरममाध्यस्थ्यलक्षणं श्रामण्यं यतित्वं चारित्रं दूरादपहाय तत्प्रतिपक्षभूतमुन्मार्गं मिथ्यामार्गं प्रतिपन्नो भवति। उन्मार्गाच्च संसार परिभ्रमति। ततः स्थितं अशुद्धनयादशुद्धात्मलाभ एव ॥ १९० ॥ अथ शुद्धनयाच्छुद्धात्मलाभो भवतीति निश्चिनोति- **णाहं होमि परेसिं, ण मे परे संति** नाहं भवामि परेषाम्, न मे परे सन्तीति समस्तचेतनाचेतनपरद्रव्येषु स्वस्वामिसम्बन्धं मनोवचनकायैः कृतकारितानुमतैश्च स्वात्मानुभूतिलक्षणनिश्चयनयबलेन पूर्वमपहाय

छोड़ता वह आत्मा वास्तवमें शुद्धात्मपरिणतिरूप श्रामण्यनामक मार्गको दूरसे छोड़कर अशुद्धात्मपरिणतिरूप उन्मार्गका ही आश्रय लेता है। इससे निश्चित होता है कि अशुद्धनयसे अशुद्धात्माकी ही प्राप्ति होती है ॥ १९० ॥

अब ऐसा निश्चित करते हैं कि शुद्धनयसे शुद्धात्माकी ही प्राप्ति होती है :–

गाथा १९१

अन्वयार्थ :– '[**अहं परेषां न भवामि**] मैं परका नहीं हूँ, [**परे मे न सन्ति**] पर मेरे नहीं हैं, [**ज्ञानम् अहम् एकः**] मैं एक ज्ञान हूँ' [**इति यः ध्यायति**] इसप्रकार जो ध्यान करता है, [**सः ध्याता**] वह ध्याता [**ध्याने**] ध्यानकालमें [**आत्मा भवति**] आत्मा होता है।

हुं पर तणो नहि, पर न मारां, ज्ञान केवल अेक हुं।
जे अेम ध्यावे, ध्यानकाले तेह शुद्धात्मा बने ॥ १९१ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यो हि नाम स्वविषयमात्रप्रवृत्ताशुद्धद्रव्यनिरूपणात्मकव्यवहारनयाविरोधमध्यस्थः, शुद्धद्रव्यनिरूपणात्मकनिश्चयनयापहस्तितमोहः सन्, नाहं परेषामस्मि, न परे मे सन्तीति स्वपरयोः परस्परस्वस्वामिसंबन्धमुद्धूय, शुद्धज्ञानमेवैकमहमित्यनात्मानमुत्सृज्यात्मानमेवात्मत्वेनोपादाय परद्रव्यव्यावृत्तत्वादात्मन्येवैकस्मिन्नग्रे चिन्तां निरुणद्धि, स खल्वेकाग्र्यचिन्तानिरोधकस्तस्मिन्नैकाग्र्यचिन्तानिरोधसमये शुद्धात्मा स्यात् । अतोऽवधार्यते शुद्धनयादेव शुद्धात्मलाभः ॥ १९१ ॥

अथ ध्रुवत्वात् शुद्ध आत्मैवोपलम्भनीय इत्युपदिशति –

निराकृत्य। पश्चात् किं करोति। **णाणमहमेक्को** ज्ञानमहमेकः, सकलविमलकेवलज्ञानमेवाहं भावकर्मद्रव्यकर्मनोकर्मरहितत्वेनैकश्च । **इदि जो झायदि** इत्यनेन प्रकारेण योऽसौ ध्यायति चिन्तयति भावयति । क्व । **झाणे** निजशुद्धात्मध्याने स्थितः **सो अप्पाणं हवदि झादा** स आत्मानं भवति ध्याता। स चिदानन्दैकस्वभावपरमात्मानं ध्याता भवतीति । ततश्च परमात्मध्यानात्तादृशमेव परमात्मानं लभते । तदपि कस्मात्। उपादानकारणसदृशं कार्यमिति वचनात् । ततो ज्ञायते शुद्धनयाच्छुद्धात्मलाभ इति ॥ १९१ ॥ अथ ध्रुवत्वाच्छुद्धात्मानमेव भावयेऽहमिति विचारयति–'मण्णे'

टीका :– जो आत्मा, मात्र अपने विषयमें प्रवर्तमान अशुद्धद्रव्यनिरूपणात्मक (अशुद्धद्रव्यके निरूपणस्वरूप) व्यवहारनयमें अविरोधरूपसे मध्यस्थ रहकर, शुद्धद्रव्यके निरूपणस्वरूप निश्चयनयके द्वारा जिसने मोहको दूर किया है ऐसा होता हुआ, 'मैं परका नहीं हूं, पर मेरे नहीं हैं' इसप्रकार स्व-परके परस्पर [१]स्वस्वामिसम्बन्धको छोड़कर, 'शुद्धज्ञान ही एक मैं हूँ' इसप्रकार अनात्माको छोड़कर, आत्माको ही आत्मरूपसे ग्रहण करके, परद्रव्यसे भिन्नत्वके कारण आत्मारूप ही एक [२]अग्रमें चिन्ताको रोकता है, वह एकाग्र-चिन्तानिरोधक (एक विषयमें विचारको रोकनेवाला आत्मा) उस [३]एकाग्रचिन्तानिरोधके समय वास्तवमें शुद्धात्मा होता है । इससे निश्चित होता है कि शुद्धनयसे ही शुद्धात्माकी प्राप्ति होती है ॥ १९१ ॥

अब ऐसा उपदेश देते हैं कि ध्रुवत्वके कारण शुद्धात्मा ही उपलब्ध करने योग्य है :–

---

[१] जिसपर स्वामित्व है वह पदार्थ और स्वामीके बीचके संबंधको; स्व-स्वामि संबंध कहा जाता है ।

[२] अग्र=विषय; ध्येय; आलम्बन ।

[३] एकाग्रचिन्तानिरोध=एक ही विषयमें – ध्येयमें – विचारको रोकना; [एकाग्रचिन्तानिरोध नामक ध्यान है ।]

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

एवं णाणप्पाणं दंसणभूदं अदिंदियमहत्थं ।
धुवमचलमणालंबं मण्णेऽहं अप्पगं सुद्धं ॥ १९२ ॥

एवं ज्ञानात्मानं दर्शनभूतमतीन्द्रियमहार्थम् ।
ध्रुवमचलमनालम्बं मन्येऽहमात्माकं शुद्धम् ॥ १९२ ॥

आत्मनो हि शुद्ध आत्मैव सदहेतुकत्वेनानाद्यनन्तत्वात् स्वतःसिद्धत्वाच्च ध्रुवो, न किंचनाप्यन्यत् । शुद्धत्वं चात्मनः परद्रव्यविभागेन स्वधर्माविभागेन चैकत्वात् । तच्च ज्ञानात्मकत्वाद्दर्शनभूतत्वादतीन्द्रियमहार्थत्वादपचलत्वादनालम्बत्वाच्च । ज्ञानमेवात्मनि बिभ्रतः स्वयं दर्शनभूतस्य चातन्मयपरद्रव्यविभागेन स्वधर्माविभागेन चास्त्येकत्वम् ।

इत्यादिपदखण्डनारूपेण व्याख्यानं क्रियते – **मण्णे** मन्ये ध्यायामि सर्वप्रकारोपादेयत्वेन भावये । स कः । **अहं** अहं कर्ता । कं कर्मतापन्नम् । **अप्पगं** सहजपरमाह्लादैकलक्षणनिजात्मानम् । किंविशिष्टम् । **सुद्धं** रागादिसमस्तविभावरहितम् । पुनरपि किंविशिष्टम् । **धुवं** टङ्कोत्कीर्णज्ञायकैकस्वभावत्वेन ध्रुवमविनश्वरम् । पुनरपि कथंभूतम् । **एवं णाणप्पाणं दंसणभूदं** एवं बहुविधपूर्वोक्तप्रकारेणाखण्डैकज्ञान-

---

गाथा १९२

अन्वयार्थ :– [**अहम्**] मैं [**आत्मकं**] आत्माको [**एवं**] इसप्रकार [**ज्ञानात्मानं**] ज्ञानात्मक, [**दर्शनभूतम्**] दर्शनभूत, [**अतीन्द्रियमहार्थं**] अतीन्द्रिय महा पदार्थ [**ध्रुवम्**] ध्रुव, [**अचलम्**] अचल, [**अनालम्बं**] निरालम्ब और [**शुद्धम्**] शुद्ध [**मन्ये**] मानता हूँ ।

टीका :– शुद्धात्मा [१]सत् और [२]अहेतुक होनेसे अनादि-अनन्त और स्वतःसिद्ध है, इसलिये आत्माके शुद्धात्मा ही ध्रुव है, (उसके) दूसरा कुछ भी ध्रुव नहीं है । आत्मा शुद्ध इसलिये है कि उसे परद्रव्यसे विभाग (भिन्नत्व) और स्वधर्मसे अविभाग है इसलिये एकत्व है । वह एकत्व आत्माके (१) ज्ञानात्मकपनेके कारण, (२) दर्शनभूतपनेके कारण, (३) अतीन्द्रिय महा पदार्थपनेके कारण, (४) अचलपनेके कारण, और (५) निरालम्बपनेके कारण है ।

---

[१] सत्=विद्यमान; अस्तित्ववाला; होनेवाला ।

[२] अहेतुक=जिसका कोई कारण नहीं है ऐसा; अकारण ।

अे रीत दर्शन-ज्ञान छे, इन्द्रिय-अतीत महार्थ छे ।
मानुं हुं-आलंबन रहित, जीव शुद्ध, निश्चल, ध्रुव छे ॥ १९२ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

तथा प्रतिनियतस्पर्शरसगन्धवर्णगुणशब्दपर्यायग्राहीण्यनेकानीन्द्रियाण्यतिक्रम्य सर्वस्पर्श-रसगन्धवर्णगुणशब्दपर्यायग्राहकस्यैकस्य सतो महतोऽर्थस्येन्द्रियात्मकपरद्रव्यविभागेन स्पर्शादिग्रहणात्मकस्वधर्माविभागेन चास्त्येकत्वम्। तथा क्षणक्षयप्रवृत्तपरिच्छेद्यपर्याय-

---

दर्शनात्मकम्। पुनश्च किंरूपम्। **अदिंदियं** अतीन्द्रियं, मूर्तविनश्वरानेकेन्द्रियरहितत्वेनामूर्ताविनश्वरैकातीन्द्रियस्वभावम्। पुनश्च कीदृशम्। **महत्थं** मोक्षलक्षणमहापुरुषार्थसाधकत्वान्महार्थम्। पुनरपि किंस्वभावम्। **अचलं** अतिचपलचञ्चलमनोवाक्कायव्यापाररहितत्वेन स्वस्वरूपे निश्चलं स्थिरम्।

इनमें (१-२) जो ज्ञानको ही अपनेमें धारण कर रखता है और जो स्वयं दर्शनभूत है ऐसे आत्माका अतन्मय (ज्ञान-दर्शन रहित ऐसा) परद्रव्यसे भिन्नत्व है और स्वधर्मसे अभिन्नत्व है, इसलिये उसके एकत्व है; (३) और जो [१]प्रतिनिश्चित स्पर्श-रस-गंध-वर्णरूप गुण तथा शब्दरूप पर्यायको ग्रहण करनेवाली अनेक इन्द्रियोंका अतिक्रम (उल्लंघन) करके, समस्त स्पर्श-रस-गंध-वर्णरूप गुणों और शब्दरूप पर्यायको ग्रहण करनेवाला एक सत् महा पदार्थ है, ऐसे आत्माका इन्द्रियात्मक परद्रव्यसे विभाग है, और स्पर्शादिके ग्रहणस्वरूप (ज्ञानस्वरूप) स्वधर्मसे अविभाग है, इसलिये उसके एकत्व है, (४) और क्षणविनाशरूपसे प्रवर्तमान ज्ञेयपर्यायोंको (प्रतिक्षण नष्ट होनेवाली ज्ञातव्य पर्यायोंको) ग्रहण करने और छोड़नेका अभाव होनेसे जो अचल है ऐसे आत्माको ज्ञेयपर्यायस्वरूप परद्रव्यसे विभाग है और [२]तन्निमित्तक ज्ञानस्वरूप स्वधर्मसे अविभाग है, इसलिये उसके एकत्व है; (५) और नित्यरूपसे प्रवर्तमान (शाश्वत ऐसा) ज्ञेयद्रव्योंके आलम्बनका अभाव होनेसे जो निरालम्ब है ऐसे आत्माका ज्ञेय परद्रव्योंसे विभाग है और तन्निमित्तक ज्ञानस्वरूप स्वधर्मसे अविभाग है, इसलिये उसके एकत्व है।

इसप्रकार आत्मा शुद्ध है क्योंकि चिन्मात्र शुद्धनय उतना ही मात्र निरूपण-स्वरूप है (अर्थात् चैतन्यमात्र शुद्धनय आत्माको मात्र शुद्ध ही निरूपित करता है)। किसी पथिकके शरीरके अंगोंके साथ संसर्गमें आनेवाली मार्गके वृक्षोंकी अनेक छायाके समान अन्य जो अध्रुव (अन्य जो अध्रुव पदार्थ) उनसे क्या प्रयोजन है ?

---

[१] प्रतिनिश्चित=प्रतिनियत। (प्रत्येक इन्द्रिय अपने-अपने नियत विषयको ग्रहण करती है; जैसे चक्षु वर्णको ग्रहण करती है)

[२] ज्ञेय पर्यायें जिसकी निमित्त है ऐसा जो ज्ञान, उस-स्वरूप स्वधर्मसे (ज्ञानस्वरूप निजधर्मसे) आत्माकी अभिन्नता है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

ग्रहणमोक्षणाभावेनाचलस्य परिच्छेद्यपर्यायात्मकपरद्रव्यविभागेन तत्प्रत्ययपरिच्छेदात्मक-स्वधर्माविभागेन चास्त्येकत्वम्। तथा नित्यप्रवृत्तपरिच्छेद्यद्रव्यालम्बनाभावेनानालम्बस्य परिच्छेद्यपरद्रव्यविभागेन तत्प्रत्ययपरिच्छेदात्मकस्वधर्माविभागेन चास्त्येकत्वम्। एवं शुद्ध आत्मा, चिन्मात्रशुद्धनयस्य तावन्मात्रनिरूपणात्मकत्वात् अयमेक एव च ध्रुवत्वा-दुपलब्धव्यः किमन्यैरध्रुवनोनाङ्गसंगच्छमानानेकमार्गपादपच्छायास्थानीयैरध्रुवैः ॥ १९२ ॥

अथाध्रुवत्वादात्मनोऽन्यन्नोपलभनीयमित्युपदिशति –

देहा वा दविणा वा सुहदुक्खा वाध सत्तुमित्तजणा।
जीवस्स ण संति धुवा धुवोवओगप्पगो अप्पा ॥ १९३ ॥

देहा वा द्रविणानि वा सुखदुःखे वाथ शत्रुमित्रजनाः।
जोवस्य न सन्ति ध्रुवा ध्रुव उपयोगात्मक आत्मा ॥ १९३ ॥

पुनरपि किंविशिष्टम्। **अणालंबं** स्वाधीनद्रव्यत्वेन सालम्बनं भरितावस्थमपि समस्तपराधीनपर-द्रव्यालम्बनरहितत्वेन निरालम्बनमित्यर्थः ॥ १९२ ॥ अथात्मनः पृथग्भूतं देहादिकमध्रुवत्वान्न भावनीयमित्याख्याति – **ण संति धुवा** ध्रुवा अविनश्वरा नित्या न सन्ति। कस्य। **जीवस्स** जीवस्य।

भावार्थ :– आत्मा (१) ज्ञानात्मक, (२) दर्शनरूप, (३) इन्द्रियोंके विना ही सबको जाननेवाला महा पदार्थ, (४) ज्ञेय-परपर्यायोंका ग्रहण – त्याग न करनेसे अचल और (५) ज्ञेय-परद्रव्योंका आलम्बन न लेनेसे निरालम्ब है ; इसलिये वह एक है।

इसप्रकार एक होनेसे वह शुद्ध है। ऐसा शुद्धात्मा ध्रुव होनेसे, वही एक उपलब्ध करने योग्य है ॥ १९२ ॥

अब, ऐसा उपदेश देते हैं कि अध्रुवपनेके कारण आत्माके अतिरिक्त दूसरा कुछ भी उपलब्ध करने योग्य नहीं है :–

गाथा १९३

अन्वयार्थ :– [**देहाः वा**] शरीर, [**द्रविणानि वा**] धन, [**सुखदुःखे**] सुखदुःख [**वा अथ**] अथवा [**शत्रुमित्रजनाः**] शत्रुमित्रजन (यह कुछ) [**जीवस्य**] जीवके [**ध्रुवाः न सन्ति**] ध्रुव नहीं हैं ; [**ध्रुवः**] ध्रुव तो [**उपयोगात्मकः आत्मा**] उपयोगात्मक आत्मा है।

लक्ष्मी, शरीर, सुख-दुःख अथवा शत्रु-मित्र जनो अरे।
जीवने नथी कई ध्रुव, ध्रुव उपयोग-आत्मक जीवछे ॥ १९३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

आत्मनो हि परद्रव्याविभागेन परद्रव्योपरज्यमानस्वधर्मविभागेन चाशुद्धत्व-निबन्धनं न किंचनाप्यन्यदसद्धेतुमत्त्वेनाद्यन्तवत्त्वात्परतः सिद्धत्वाच्च ध्रुवमस्ति। ध्रुव उपयोगात्मा शुद्ध आत्मैव। अतोऽध्रुवं शरीरादिकमुपलभ्यमानमपि नोपलभे, शुद्धात्मा नमुपलभे ध्रुवम् ॥ १९३ ॥

अथैवं शुद्धात्मोपलम्भार्तिक स्यादिति निरूपयति –

जो एवं जाणित्ता झादि परं अप्पगं विसुद्धप्पा।
सागारोऽणागारो खवेदि सो मोहदुग्गंठिं ॥ १९४ ॥

य एवं ज्ञात्वा ध्यायति परमात्मानं विशुद्धात्मा।
साकारोऽनाकारः क्षपयति स मोहदुर्ग्रन्थिम् ॥ १९४ ॥

के ते। **देहा वा दविणा वा** देहा वा द्रव्याणि वा, सर्वप्रकारशुचिभूताद्देहरहितात्परमात्मनो विलक्षणा औदारिकादिपञ्चदेहास्तथैव च पञ्चेन्द्रियभोगोपभोगसाधकानि परद्रव्याणि च। न केवलं देहादयो ध्रुवा न भवन्ति, **सुहदुक्खा वा** निर्विकारपरमानन्दैकलक्षणस्वात्मोत्थसुखामृतविलक्षणानि सांसारिक-सुखदुःखानि वा। **अध** अहो भव्याः **सत्तुमित्तजणा** शत्रुमित्रादिभावरहितादात्मनो भिन्नाः शत्रुमित्रा-दिजनाश्च। यद्येतत् सर्वमध्रुवं तर्हि किं ध्रुवमिति चेत्। **धुवो** ध्रुवः शाश्वतः। स कः। **अप्पा** निजात्मा। किंविशिष्टः। **उवओगप्पगो** त्रैलोक्योदरविवरवर्तित्रिकालविषयसमस्तद्रव्यगुणपर्याय-युगपत्परिच्छित्तिसमर्थकेवलज्ञानदर्शनोपयोगात्मक इति। एवमध्रुवत्वं ज्ञात्वा ध्रुवस्वभावे स्वात्मनि भावना कर्तव्येति तात्पर्यम् ॥ १९३ ॥ एवमशुद्धनयादशुद्धात्मलाभो भवतीति कथनेन प्रथमगाथा।

टीका :– जो परद्रव्यसे अभिन्न होनेके कारण और परद्रव्यके द्वारा [1]उपरक्त होनेवाले स्वधर्मसे भिन्न होनेके कारण आत्माको अशुद्धपनेका कारण है, ऐसा (आत्माके अतिरिक्त) दूसरा कोई भी ध्रुव नहीं है, क्योंकि वह [2]असत् और [3]हेतुमान् होनेसे आदि-अन्तवाला और परतःसिद्ध है; ध्रुव तो उपयोगात्मक शुद्ध आत्मा ही है। ऐसा होनेसे मैं उपलभ्यमान अध्रुव ऐसे शरीरादिको – वे उपलब्ध होने

---

[1] उपरक्त=मलिन; विकारी [परद्रव्यके निमित्तसे आत्माका स्वधर्म उपरक्त होता है।]

[2] असत्=अस्तित्व रहित (अनित्य); [धन-देहादिक पुद्गल पर्याय हैं, इसलिये असत् हैं, इसीलिये आदि-अन्तवाली हैं।]

[3] हेतुमान्=सहेतुक; जिसकी उत्पत्तिमें कोई भी निमित्त हो ऐसा। [देह-धनादिकी उत्पत्तिमें कोई भी निमित्त होता है, इसलिये वे परतः सिद्ध हैं; स्वतः सिद्ध नहीं।]

-आ जाणी, शुद्धात्मा बनी, ध्यावे परम निज आत्मने।
साकार अण-आकार हो, ते मोहग्रंथि क्षय करे ॥ १९४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अमुना यथोदितेन विधिना शुद्धात्मानं ध्रुवमधिगच्छतस्तस्मिन्नेव प्रवृत्तेः शुद्धात्मत्वं स्यात्; ततोऽनन्तशक्तिचिन्मात्रस्य परमस्यात्मन एकाग्रसंचेतनलक्षणं ध्यानं स्यात्; ततः साकारोपयुक्तस्यानाकारोपयुक्तस्य वाविशेषेणैकाग्रचेतनप्रसिद्धेरासंसारबद्धदृढतरमोहदुर्ग्रन्थेरुद्ग्रथनं स्यात्। अतः शुद्धात्मोपलम्भस्य मोहग्रन्थिभेदः फलम् ॥ १९४ ॥

शुद्धनयाच्छुद्धात्मलाभो भवतीति कथनेन द्वितीया। ध्रुवत्वादात्मैव भावनीय इति प्रतिपादनेन तृतीया। आत्मनोऽन्यदध्रुवं न भावनीयमिति कथनेन चतुर्थी चेति शुद्धात्मव्याख्यानमुख्यत्वेन प्रथमस्थले गाथाचतुष्टयं गतम्। अथैवं पूर्वोक्तप्रकारेण शुद्धात्मोपलम्भे सति किं फलं भवतीति प्रश्ने प्रत्युत्तरमाह – **झादि** ध्यायति **जो** यः कर्ता। कम्। **अप्पगं** निजात्मानम्। कथंभूतम्। **परं** परमानन्तज्ञानादिगुणाधारत्वात्परमुत्कृष्टम्। किं कृत्वा पूर्वम्। **एवं जाणित्ता** एवं पूर्वोक्तप्रकारेण स्वात्मोपलम्भलक्षणस्वसंवेदनज्ञानेन ज्ञात्वा। कथंभूतः सन् ध्यायति। **विसुद्धप्पा** ख्यातिपूजालाभादिसमस्तमनोरथजालरहितत्वेन विशुद्धात्मा सन्। पुनरपि कथंभूतः **सागरोऽणागारो** सागारोऽनागारः। अथवा साकारानाकारः। सहाकारेण विकल्पेन वर्तते साकारो ज्ञानोपयोगः, अनाकारो निर्विकल्पो दर्शनोपयोगस्ताभ्यां युक्तः साकारानाकारः। अथवा साकारः सविकल्पो गृहस्थः, अनाकारो निर्विकल्पस्तपोधनः। अथवा सहाकारेण लिङ्गेन चिह्नेन वर्तते साकारो यतिः, अनाकारश्चिह्नरहितो गृहस्थः। **खवेदि सो मोहदुग्गंठि** य एवंगुणविशिष्टः क्षपयति स मोहदुर्ग्रन्थिम्। मोह एवं दुर्ग्रन्थिः मोहदुर्ग्रन्थिः शुद्धात्मरुचिप्रतिबन्धको दर्शनमोहस्तम्। ततः स्थितमेतत् – आत्मोपलम्भस्य मोहग्रन्थिविनाश एव

पर भी – उपलब्ध नहीं करता, और ध्रुव ऐसे शुद्धात्माको उपलब्ध करता हूं ॥ १९३ ॥

इसप्रकार शुद्धात्माकी उपलब्धिसे क्या होता है वह अब निरूपण करते हैं :–

गाथा १९४

अन्वयार्थ :– [**यः**] जो [**एवं ज्ञात्वा**] ऐसा जानकर [**विशुद्धात्मा**] विशुद्धात्मा होता हुआ [**परमात्मानं**] परम आत्माका [**ध्यायति**] ध्यान करता है, [**सः**] वह – [**साकारः अनाकारः**] साकार हो या अनाकार [**मोहदुर्ग्रंथिं**] मोहदुर्ग्रंथिका [**क्षपयति**] क्षय करता है।

टीका :– इस यथोक्त विधिके द्वारा जो शुद्धात्माको ध्रुव जानता है, उसे उसीमें प्रवृत्तिके द्वारा शुद्धात्मत्व होता है; इसलिये अनन्तशक्तिवाले [1]चिन्मात्र परम आत्माका [2]एकाग्रसंचेतनलक्षण ध्यान होता है; और इसलिये (उस ध्यानके कारण) साकार (सविकल्प) उपयोगवालेको या अनाकार (निर्विकल्प) उपयोगवालेको – दोनोंको

---

[1] चिन्मात्र=चैतन्यमात्र [परम आत्मा केवल चैतन्यमात्र है, जो कि अनन्त शक्तिवाला है।]

[2] एक अग्रका (विषयका, ध्येयका) संचेतन अर्थात् अनुभवन ध्यानका लक्षण है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ मोहग्रन्थिभेदार्तिक स्यादिति निरूपयति –

जो णिहदमोहगंठी रागपदोसे खवीय सामण्णे ।
होज्जं समसुहदुक्खो सो सोक्खं अक्खयं लहदि ॥१९५॥

यो निहतमोहग्रन्थी रागप्रद्वेषौ क्षपयित्वा श्रामण्ये ।
भवेत् समसुखदुःखः स सौख्यमक्षयं लभते ॥ १९५ ॥

फलम् ॥ १९४ ॥ अथ दर्शनमोहग्रन्थिभेदार्तिक भवतीति प्रश्ने समाधानं ददाति – **जो णिहदमोहगंठी** यः पूर्वसूत्रोक्तप्रकारेण निहतदर्शनमोहग्रन्थिर्भूत्वा **रागपदोसे खवीय** निजशुद्धात्मनिश्चलानुभूतिलक्षण-वीतरागचारित्रप्रतिबन्धकौ चरित्रमोहसंज्ञौ रागद्वेषौ क्षपयित्वा । क्व । **सामण्णे** स्वस्वभावलक्षणे श्रामण्ये । पुनरपि किं कृत्वा । होज्जं भूत्वा । किंविशिष्टः । **समसुहदुक्खो** निजशुद्धात्मसंवित्तिसमुत्पन्न-

---

अविशेषरूपसे एकाग्रसंचेतनकी प्रसिद्धि होनेसे – अनादि संसारसे बँधी हुई अतिदृढ़ मोहदुर्ग्रंथि (मोहकी दुष्ट गाँठ) छूट जाती है ।

इससे (ऐसा कहा गया है कि) मोहग्रंथि भेद (दर्शनमोहरूपी गाँठका टूटना) वह शुद्धात्माकी उपलब्धिका फल है ॥ १९४ ॥

अब, मोहग्रंथि टूटनेसे क्या होता है सो कहते हैं :–

गाथा १९५

अन्वयार्थ :– [**यः**] जो [**निहतमोहग्रंथी**] मोहग्रंथिको नष्ट करके, [**रागप्रद्वेषौ क्षपयित्वा**] राग-द्वेषका क्षय करके, [**समसुखदुःखः**] समसुख-दुःख होता हुआ [**श्रामण्ये भवेत्**] श्रमणता (मुनित्व) में परिणमित होता है, [**सः**] वह [**अक्षयं सौख्यं**] अक्षय सौख्यको [**लभते**] प्राप्त करता है ।

टीका :– मोहग्रंथिका क्षय करनेसे, मोहग्रंथि जिसका मूल है ऐसे राग-द्वेषका, क्षय होता है; उससे (राग-द्वेषका क्षय होनेसे), सुख-दुःख समान हैं ऐसे जीवका परम मध्यस्थता जिसका लक्षण है ऐसी श्रमणतामें परिणमन होता है; और उससे (श्रामण्यमें परिणमनसे) अनाकुलता जिसका लक्षण है ऐसे अक्षय सुखकी प्राप्ति होती है ।

इससे (ऐसा कहा है कि) मोहरूपी ग्रंथिके छेदनेसे अक्षय सौख्यरूप फल होता है ॥ १९५ ॥

हणी मोहग्रन्थि, क्षय करी रागादि, समसुखदुःख जे ।
जीव परिणमे श्रामण्यमां, ते सौख्य अक्षयने लहे ॥ १९५ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

मोहग्रन्थिक्षपणाद्धि तन्मूलरागद्वेषक्षपणं; ततः समसुखदुःखस्य परममाध्यस्थलक्षणे श्रामण्ये भवनं; ततोऽनाकुलत्वलक्षणाक्षयसौख्यलाभः । अतो मोहग्रन्थिभेदादक्षयसौख्यं फलम् ॥ १९५ ॥

अथैकाग्रसंचेतनलक्षणं ध्यानमशुद्धत्वमात्मनो नावहतीति निश्चिनोति –

जो खविदमोहकलुसो विसयविरत्तो मणो णिरुंभित्ता ।
समवट्ठिदो सहावे सो अप्पाणं हवदि झादा ॥१९६॥

यः क्षपितमोहकलुषो विषयविरक्तो मनो निरुध्य ।
समवस्थितः स्वभावे स आत्मानं भवति ध्याता ॥ १९६ ॥

रागादिविकल्पोपाधिरहितपरमसुखामृतानुभवेन सांसारिकसुखदुःखोत्पन्नहर्षविषादरहितत्वात्समसुखदुःखः । **सो सोक्खं अक्खयं लहदि** स एवंगुणविशिष्टो भेदज्ञानी सौख्यमक्षयं लभते । ततो ज्ञायते दर्शनमोहक्षयाच्चारित्रमोहसंज्ञरागद्वेषविनाशस्ततश्च सुखदुःखादिमाध्यस्थ्यलक्षणश्रामण्येऽवस्थानं तेनाक्षयसुखलाभो भवतीति ॥ १९५ ॥ अथ निजशुद्धात्मैकाग्र्यलक्षणध्यानमात्मनोऽत्यन्तविशुद्धिं करोतीत्यावेदयति–**जो खविदमोहकलुसो** यः क्षपितमोहकलुषः, मोहो दर्शनमोहः कलुषश्चारित्रमोहः,

---

अब, [1]एकाग्रसंचेतन जिसका लक्षण है, ऐसा ध्यान आत्मामें अशुद्धता नहीं लाता ऐसा निश्चित करते हैं :–

गाथा १९६

अन्वयार्थ :– [**यः**] जो [**क्षपितमोहकलुषः**] मोहमलका क्षय करके, [**विषयविरक्तः**] विषयसे विरक्त होकर, [**मनः निरुध्य**] मनका निरोध करके, [**स्वभावे समवस्थितः**] स्वभावमें समवस्थित है, [**सः**] वह [**आत्मानं**] आत्माका [**ध्याता भवति**] ध्यान करनेवाला है ।

टीका :– जिसने मोहमलका क्षय किया है ऐसे आत्माके, मोहमल जिसका मूल है ऐसी [2]परद्रव्यप्रवृत्तिका अभाव होनेसे विषयविरक्तता होती है; (उससे अर्थात्

---

[1] एकाग्र=जिसका एक ही विषय (आलंबन) हो ऐसा ।
[2] परद्रव्य प्रवृत्ति=परद्रव्यमें प्रवर्तन ।

जे मोहमल करी नष्ट, विषयविरक्त थई, मन रोकीने ।
आत्मस्वभावे स्थित छे, ते आत्मने ध्यानार छे ॥ १९६ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

आत्मनो हि परिक्षपितमोहकलुषस्य तन्मूलपरद्रव्यप्रवृत्त्यभावाद्विषयविरक्तत्वं स्यात्; ततोऽधिकरणभूतद्रव्यान्तराभावादुदधिमध्यप्रवृत्तैकपोतपतत्त्रिण इव अनन्यशरणस्य मनसो निरोधः स्यात्; ततस्तन्मूलचञ्चलत्वविलयादनन्तसहजचैतन्यात्मनि स्वभावे समवस्थानं स्यात्। तत्तु स्वरूपप्रवृत्तानाकुलैकाग्रसंचेतनत्वात् ध्यानमित्युपगीयते। अतः स्वभावावस्थानरूपत्वेन ध्यानमात्मनोऽनन्यत्वात् नाशुद्धत्वायेति ॥ १९६ ॥

पूर्वसूत्रद्वयकथितक्रमेण क्षपितमोहकलुषौ येन स भवति क्षपितमोहकलुषः। पुनरपि किंविशिष्टः। **विसयविरत्तो** मोहकलुषरहितस्वात्मसंवित्तिसमुत्पन्नसुखसुधारसास्वादबलेन कलुषमोहोदयजनितविषयसुखाकाङ्क्षारहितत्वाद्विषयविरक्तः। पुनरपि कथंभूतः। **समवट्ठिदो** सम्यगवस्थितः। क्व। **सहावे** निजपरमात्मद्रव्यस्वभावे। किं कृत्वा पूर्वम्। **मणो णिरुंभित्ता** विषयकषायोत्पन्नविकल्पजालरूपं मनो निरुध्य निश्चलं कृत्वा। **सो अप्पाणं हवदि झादा** स एवंगुणयुक्तः पुरुषः स्वात्मानं भवति ध्याता। तेनैव शुद्धात्मध्यानेनात्यन्तिकीं मुक्तिलक्षणां शुद्धिं लभत इति। ततः स्थितं शुद्धात्मध्यानाज्जीवो विशुद्धो भवतीति। किंच ध्यानेन किलात्मा शुद्धो जातः तत्र विषये चतुर्विधव्याख्यानं क्रियते। तथाहि – ध्यानं ध्यानसन्तानस्तथैव ध्यानचिन्ता ध्यानान्वयसूचनमिति। तत्रैकाग्रचिन्तानिरोधो **ध्यानम्**। तच्च शुद्धाशुद्धरूपेण द्विधा। अथ ध्यानसन्तानः कथ्यते – यत्रान्तर्मूहूर्तपर्यन्तं ध्यानं, तदनन्तरमन्तर्मूहूर्तपर्यन्तं तत्त्वचिन्ता, पुनरप्यन्तर्मूहूर्तपर्यन्तं ध्यानं, पुनरपि तत्त्वचिन्तेति प्रमत्ताप्रमत्तगुणस्थानवदन्तर्मूहूर्तेऽन्तर्मूहूर्ते गते सति परावर्तनमस्ति स **ध्यानसन्तानो** भण्यते। स च धर्म्यध्यानसंबन्धी। शुक्लध्यानं, पुनरुपशमश्रेणिक्षपकश्रेण्यारोहणे भवति। तत्र चाल्पकालत्वात्परावर्तनरूपध्यानसन्तानो न घटते। इदानीं ध्यानचिन्ता कथ्यते – यत्र ध्यानसन्तानवद्ध्यानपरावर्तो नास्ति, ध्यानसंबन्धिनी चिन्तास्ति, तत्र यद्यपि क्वापि काले ध्यानं करोति तथापि सा **ध्यानचिन्ता** भण्यते। अथ ध्यानान्वयसूचनं कथ्यते – यत्र ध्यानसामग्रीभूता द्वादशानुपेक्षा अन्यद्वा ध्यानसंबन्धि संवेगवैराग्यवचनं व्याख्यानं वा तत् **ध्यानान्वयसूचनमिति**। अन्यथा वा चतुर्विधं ध्यानव्याख्यानं – ध्याता ध्यानं फलं ध्येयमिति। अथवार्तरौद्रधर्म्यशुक्लविभेदेन चतुर्विधं ध्यानव्याख्यानं तदन्यत्र कथितमास्ते ॥ १९६ ॥

विषय विरक्त होनेसे), समुद्रके मध्यगत जहाजके पक्षीको भाँति, अधिकरणभूत द्रव्यान्तरोंका अभाव होनेसे जिसे अन्य कोई शरण नहीं रहा है ऐसे मनका निरोध होता है। (अर्थात् जैसे समुद्रके बीचमें पहुंचे हुए किसी एकाकी जहाज पर बैठे हुए पक्षीको उस जहाजके अतिरिक्त अन्य किसी जहाजका, वृक्षका या भूमि इत्यादिका आधार न होनेसे दूसरा कोई शरण नहीं है, इसलिये उसका उड़ना बन्द हो जाता है, उसीप्रकार विषयविरक्तता होनेसे मनको आत्मद्रव्यके अतिरिक्त किन्हीं अन्यद्रव्योंका आधार नहीं रहता इसलिये दूसरा कोई शरण न रहनेसे मन निरोधको प्राप्त होता है); और इसलिये (अर्थात् मनका निरोध होनेसे), मन जिसका मूल है ऐसी चञ्चलताका विलय होनेके कारण अनन्तसहज-चैतन्यात्मक स्वभावमें समवस्थान होता है वह

समवस्थान=स्थिरतया – दृढ़तया रहना – टिकना।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथोपलब्धशुद्धात्मा सकलज्ञानी किं ध्यायतीति प्रश्नमासूत्रयति –

णिहदघणघादिकम्मो पच्चक्खं सव्वभावतच्चण्हू ।
णेयंतगदो समणो झादि कमट्ठं असंदेहो ॥ १९७ ॥

निहतघनघातिकर्मा प्रत्यक्षं सर्वभावतत्त्वज्ञः ।
ज्ञेयान्तगतः श्रमणो ध्यायति कमर्थमसंदेहः ॥ १९७ ॥

एवमात्मपरिज्ञानाद्दर्शनमोहक्षपणं भवतीति कथनरूपेण प्रथमगाथा, दर्शनमोहक्षयाच्चारित्रमोहक्षपणं भवतीति कथनेन द्वितीया, तदुभयक्षयेण मोक्षो भवतीति प्रतिपादनेन तृतीया चेत्यात्मोपलम्भफल-कथनरूपेण द्वितीयस्थले गाथात्रयं गतम् । अथोपलब्धशुद्धात्मतत्त्वसकलज्ञानी किं ध्यायतीति प्रश्नमाक्षेपद्वारेण पूर्वपक्षं वा करोति–**णिहदघणघादिकम्मो** पूर्वसूत्रोदितनिश्चलनिजपरमात्मतत्त्व-परिणतिरूपशुद्धध्यानेन निहतघनघातिकर्मा । **पच्चक्खं सव्वभावतच्चण्हू** प्रत्यक्षं यथा भवति तथा सर्वभावतत्त्वज्ञः सर्वपदार्थपरिज्ञातस्वरूपः । **णेयंतगदो** ज्ञेयान्तगतः ज्ञेयभूतपदार्थानां परिच्छित्तिरूपेण

स्वभावसमवस्थान तो स्वरूपमें प्रवर्तमान, अनाकुल, एकाग्र संचेतन होनेसे उसे ध्यान कहा जाता है ।

इससे (यह निश्चित हुआ कि –) ध्यान, स्वभावसमवस्थानरूप होनेके कारण आत्मासे अनन्य होनेसे अशुद्धताका कारण नहीं होता ॥ १९६ ॥

अब, सूत्रद्वारा ऐसा प्रश्न करते हैं कि जिनने शुद्धात्माको उपलब्ध किया है ऐसे सकलज्ञानी (सर्वज्ञ) क्या ध्याते हैं ? :–

गाथा १९७

अन्वयार्थ :– [**निहतघनघातिकर्मा**] जिनने घनघातिकर्मका नाश किया है, [**प्रत्यक्षं सर्वभावतत्त्वज्ञः**] जो सर्व पदार्थोंके स्वरूपको प्रत्यक्ष जानते हैं और [**ज्ञेयान्तगतः**] जो ज्ञेयोंके पारको प्राप्त हैं, [**असंदेहः श्रमणः**] ऐसे संदेह रहित श्रमण [**कम् अर्थं**] किस पदार्थको [**ध्यायति**] ध्याते हैं ?

टीका :– लोकको (१) मोहका सद्भाव होनेसे तथा (२) ज्ञानशक्तिके प्रतिबन्धकका[1] सद्भाव होनेसे, (१) वह तृष्णा सहित है तथा (२) उसे पदार्थ

[1] ज्ञानावरणीय कर्म ज्ञानशक्तिका प्रतिबंधक अर्थात् ज्ञानके रुकनेमें निमित्तभूत है ।

शा अर्थने ध्यावे श्रमण, जे नष्टघातिकर्म छे ।
प्रत्यक्ष सर्व पदार्थ ने ज्ञेयान्तप्राप्त, निःशंक छे ॥ १९७ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

लोको हि मोहसद्भावे ज्ञानशक्तिप्रतिबन्धकसद्भावे च सतृष्णत्वादप्रत्यक्षार्थत्वानवच्छिन्नविषयत्वाभ्यां चाभिलषितं जिज्ञासितं संदिग्धं चार्थं ध्यायन् दृष्टः, भगवान् सर्वज्ञस्तु निहतघनघातिकर्मतया मोहाभावे ज्ञानशक्तिप्रतिबन्धकाभावे च निरस्ततृष्णत्वात्प्रत्यक्षसर्वभावतत्त्वज्ञेयान्तगतत्वाभ्यां च नाभिलषित, न जिज्ञासति, न संदिह्यति च; कुतोऽभिलषितो जिज्ञासितः संदिग्धश्चार्थः। एवं सति किं ध्यायति ॥ १९७ ॥

पारंगतः। एवंविशेषणत्रयविशिष्टः **समणो** जीवितमरणादिसमभावपरिणतात्मस्वरूपः श्रमणो महाश्रमणः सर्वज्ञः **झादि कमट्ठं** ध्यायति कमर्थमिति प्रश्नः। अथवा कमर्थं ध्यायति, न कमपीत्याक्षेपः। कथंभूतः सन्। **असंदेहो** असन्देहः संशयादिरहित इति। अयमत्रार्थः—यथा कोऽपि देवदत्तो विषयसुखनिमित्तं विद्याराधनाध्यानं करोति, यदा विद्या सिद्धा भवति तत्फलभूतं विषयसुखं च सिद्धं भवति तदाराधनाध्यानं न करोति, तथायं भगवानपि केवलज्ञानविद्यानिमित्तं तत्फलभूतानन्तसुखनिमित्तं च पूर्वं छद्मस्थावस्थायां शुद्धात्मभावनारूपं ध्यानं कृतवान्, इदानीं तद्ध्यानेन केवलज्ञानविद्या सिद्धा तत्फलभूतमनन्तसुखं च सिद्धम्; किमर्थं ध्यानं करोतीति प्रश्नः आक्षेपो वा; द्वितीयं च कारणं—परोक्षेऽर्थे ध्यानं भवति, भगवतः सर्वं प्रत्यक्षं कथं ध्यानमिति पूर्वपक्षद्वारेण गाथा गता ॥ १९७ ॥

प्रत्यक्ष नहीं है और वह विषयको [१]अवच्छेदपूर्वक नहीं जानता, इसलिये वह (लोक) [२]अभिलषित, [३]जिज्ञासित और [४]संदिग्ध पदार्थका ध्यान करता हुआ दिखाई देता है; परन्तु घनघातिकर्मका नाश किया जानेसे (१) मोहका अभाव होनेके कारण तथा (२) ज्ञानशक्तिके प्रतिबन्धकका अभाव होनेसे, (१) तृष्णा नष्ट की गई है तथा (२) समस्त पदार्थोंका स्वरूप प्रत्यक्ष है तथा ज्ञेयोंका पार पा लिया है इसलिये भगवान सर्वज्ञदेव अभिलाषा नहीं करते, जिज्ञासा नहीं करते और संदेह नहीं करते; तब फिर (उनके) अभिलषित, जिज्ञासित और संदिग्ध पदार्थ कहाँसे हो सकता है? ऐसा है तब फिर वे क्या ध्याते हैं?

भावार्थ :— लोकके (जगत्के सामान्य जीव समुदायके) मोहकर्मका सद्भाव होनेसे वह तृष्णा सहित है, इसलिये उसे इष्ट पदार्थकी अभिलाषा होती है; और उसके ज्ञानावरणीय कर्मका सद्भाव होनेसे वह बहुतसे पदार्थोंको तो जानता ही नहीं है तथा जिस पदार्थको जानता है उसे भी पृथक्करण पूर्वक — सूक्ष्मतासे—स्पष्टतासे नहीं जानता इसलिये उसे अज्ञात पदार्थको जाननेकी इच्छा (जिज्ञासा) होती है, और अस्पष्टतया

[१] अवच्छेदपूर्वक=पृथक्करण करके; सूक्ष्मतासे; विशेषतासे; स्पष्टतासे।

[२] अभिलषित=जिसकी इच्छा — चाह हो वह।

[३] जिज्ञासित=जिसकी जिज्ञासा जानने की इच्छा हो वह।

[४] संदिग्ध=जिसमें संदेह हो — संशय हो।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथैतदुपलब्धशुद्धात्मा सकलज्ञानी ध्यायतीत्युत्तरमासूत्रयति —

सव्वाबाधविजुत्तो समंतसव्वक्खसोक्खणाणड्ढो ।
भूदो अक्खातीदो झादि अणक्खो परं सोक्खं ॥ १९८ ॥

सर्वाबाधवियुक्तः समन्तसर्वाक्षसौख्यज्ञानाढ्यः ।
भूतोऽक्षातीतो ध्यायत्यनक्षः परं सौख्यम् ॥ १९८ ॥

अथात्र पूर्वपक्षे परिहारं ददाति – **झादि** ध्यायति एकाकारसमरसीभावेन परिणमत्यनुभवति । स कः कर्ता । भगवान् । किं ध्यायति । **सोक्खं** सौख्यम् । किंविशिष्टम् । **परं** उत्कृष्टं, सर्वात्मप्रदेशाह्लादक-परमानन्तसुखम् । कस्मिन्प्रस्तावे । यस्मिन्नेव क्षणे **भूदो** भूतः संजातः । किंविशिष्टः । **अक्खातीदो** अक्षातीतः इन्द्रियरहितः । न केवलं स्वयमतीन्द्रियो जातः परेषां **च अणक्खो** अनक्षः इन्द्रियविषयो न भवतीत्यर्थः । पुनरपि किंविशिष्टः । **सव्वाबाधविजुत्तो** प्राकृतलक्षणबलेन बाधाशब्दस्य ह्रस्वत्वं सर्वाबाधावियुक्तः । आसमन्ताद्बाधाः पीडा आबाधाः सर्वाश्चता आबाधाश्च सर्वाबाधास्ताभिर्वियुक्तो

जाने हुए पदार्थके संबंधमें संदेह होता है । ऐसा होनेसे उसके अभिलषित, जिज्ञासित और संदिग्ध पदार्थका ध्यान संभवित होता है । परन्तु सर्वज्ञ भगवानके तो मोहकर्मका अभाव होनेसे वे तृष्णारहित हैं, इसलिये उनके अभिलाषा नहीं है , और उनके ज्ञानावरणीय कर्मका अभाव होनेसे वे समस्त पदार्थोंको जानते हैं तथा प्रत्येक पदार्थको अत्यन्त स्पष्टतापूर्वक – परिपूर्णतया जानते हैं इसलिये उन्हें जिज्ञासा या सन्देह नहीं है । इसप्रकार उन्हें किसी पदार्थके प्रति अभिलाषा, जिज्ञासा या सन्देह नहीं होता ; तब फिर उन्हें किस पदार्थका ध्यान होता है ? ॥ १९७ ॥

अब, सूत्र द्वारा (उपरोक्त गाथाके प्रश्नका) उत्तर देते हैं कि – जिसने शुद्धात्माको उपलब्ध किया है वह सकलज्ञानी (सर्वज्ञ आत्मा) इस (परम सौख्य) का ध्यान करता है :–

गाथा १९८

अन्वयार्थ :– [**अनक्षः**] अनिन्द्रिय और [**अक्षातीतः भूतः**] इन्द्रियातीत हुआ आत्मा [**सर्वाबाधवियुक्तः**] सर्व बाधा रहित और [**समंतसर्वाक्षसौख्यज्ञानाढ्यः**] सम्पूर्ण आत्मामें समंत (सर्वप्रकारके, परिपूर्ण) सौख्य तथा ज्ञानसे समृद्ध वर्तता हुआ [**परं सौख्यं**] परम सौख्यका [**ध्यायति**] ध्यान करता है ।

बाधा रहित सकलात्ममां सम्पूर्ण सुखज्ञानाढ्य जे ।
इन्द्रिय-अतीत अनिन्द्रि ते ध्यावे परम आनंदने ॥ १९८ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अयमात्मा यदैव सहजसौख्यज्ञानबाधायतनानामसार्वदिक्कासकलपुरुषसौख्यज्ञानायतनानां चाक्षाणामभावात्स्वयमनक्षत्वेन वर्तते तदैव परेषामक्षातीतो भवन् निराबाधसहजसौख्यज्ञानत्वात् सर्वाबाधवियुक्तः, सार्वदिक्कसकलपुरुषसौख्यज्ञानपूर्णत्वात्समन्तसर्वाक्षसौख्यज्ञानाढ्यश्च भवति। एवंभूतश्च सर्वाभिलाषजिज्ञासासंदेहासंभवेऽप्यपूर्वमनाकुलत्वलक्षणं परमसौख्यं ध्यायति। अनाकुलत्वसंगतैकाग्रसंचेतनमात्रेणावतिष्ठत इति यावत्। ईदृशमवस्थानं च सहजज्ञानानन्दस्वभावस्य सिद्धत्वस्य सिद्धिरेव ॥ १९८ ॥

रहितः सर्वाबाधावियुक्तः। पुनश्च किंरूपः। **समंतसव्वक्खसोक्खणाणड्ढो** समन्ततः सामस्त्येन स्पर्शनादिसर्वाक्षसौख्यज्ञानाढ्यः। समन्ततः सर्वात्मप्रदेशैर्वा स्पर्शनादिसर्वेन्द्रियाणां सम्बन्धित्वेन ये ज्ञानसौख्ये द्वे ताभ्यामाढ्यः परिपूर्णः इत्यर्थः। तद्यथा – अयं भगवानेकदेशोद्भवसांसारिकज्ञानसुखकारणभूतानि सर्वात्मप्रदेशोद्भवस्वाभाविकातीन्द्रियज्ञानसुखविनाशकानि च यानीन्द्रियाणि निश्चयरत्नत्रयात्मककारणसमयसारबलेनातिक्रामति विनाशयति यदा तस्मिन्नेव क्षणे समस्तबाधारहितः सन्नतीन्द्रियमनन्तमात्मोत्थसुखं ध्यायत्यनुभवति परिणमति। ततो ज्ञायते केवलिनामन्यच्चिन्तानिरोधलक्षणं ध्यानं नास्ति, किंत्विदमेव परमसुखानुभवनं वा ध्यानकार्यभूतां कर्मनिर्जरां दृष्ट्वा ध्यानशब्देनोपचर्यते। यत्पुनः सयोगिकेवलिनस्तृतीयशुक्लध्यानमयोगिकेवलिनश्चतुर्थशुक्लध्यानं भवतीत्युक्तं तदुपचारेण ज्ञातव्यमिति सूत्राभिप्रायः ॥ १९८ ॥ एवं केवली किं ध्यायतीति प्रश्नमुख्यत्वेन प्रथमगाथा। परमसुखं

टीका :– जब यह आत्मा, जो सहज सुख और ज्ञानकी बाधाके [१]आयतन हैं (ऐसी) तथा जो [२]असकल आत्मामें [३]असर्वप्रकारके सुख और ज्ञानके आयतन हैं ऐसी इन्द्रियोंके अभावके कारण स्वयं 'अनिन्द्रिय' रूपसे वर्तता है, उसी समय वह दूसरोंको 'इन्द्रियातीत' (इंद्रियअगोचर) वर्तता हुआ, निराबाध सहजसुख और ज्ञानवाला होनेसे 'सर्वबाधा रहित' तथा सकल आत्मामें सर्वप्रकारके (परिपूर्ण) सुख और ज्ञानसे परिपूर्ण होनेसे 'समस्त आत्मामें समंत सौख्य और ज्ञानसे समृद्ध' होता है। इसप्रकारका वह आत्मा सर्व अभिलाषा, जिज्ञासा और संदेहका असंभव होनेपर भी अपूर्व और अनाकुलत्वलक्षण परमसौख्यका ध्यान करता है; अर्थात् अनाकुलत्वसंगत एक 'अग्र' के संचेतनमात्ररूपसे अवस्थित रहता है, (अर्थात् अनाकुलताके साथ रहनेवाले एक आत्मारूपी विषयके अनुभवनरूप ही मात्र स्थित रहता है) और ऐसा अवस्थान सहजज्ञानानन्दस्वभाव सिद्धत्वकी सिद्धि ही है (अर्थात् इसप्रकार स्थित रहना, सहजज्ञान और आनन्द जिसका स्वभाव है ऐसे सिद्धत्वकी प्राप्ति ही है।)

---

१ आयतन=निवास; स्थान।

२ असकल आत्मामें=आत्माके सर्व प्रदेशोंमें नहीं किन्तु थोड़े ही प्रदेशोंमें।

३ असर्वप्रकारके=सभी प्रकारके नहीं किन्तु अमुक ही प्रकारके; अपूर्ण [यह अपूर्ण सुख परमार्थतः सुखाभास होने पर भी, उसे 'सुख' कहनेकी अपारमार्थिक रूढ़ि है।]

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथायमेव शुद्धात्मोपलम्भलक्षणो मोक्षस्य मार्ग इत्यवधारयति –

एवं जिणा जिणिंदा सिद्धा मग्गं समुट्ठिदा समणा ।
जादा णमोत्थु तेसिं तस्स य णिव्वाणमग्गस्स ॥१९९॥

एवं जिना जिनेन्द्राः सिद्धा मार्गं समुत्थिताः श्रमणाः ।
जाता नमोऽस्तु तेभ्यस्तस्मै च निर्वाणमार्गाय ॥ १९९ ॥

ध्यायत्यनुभवतीति परिहारमुख्यत्वेन द्वितीया चेति ध्यानविषयपूर्वपक्षपरिहारद्वारेण तृतीयस्थले गाथाद्वयं गतम् । अथायमेव निजशुद्धात्मोपलब्धिलक्षणमोक्षमार्गो, नान्य इति विशेषेण समर्थयति – **जादा** जाता उत्पन्नाः । कथंभूताः । **सिद्धा** सिद्धाः सिद्धपरमेष्ठिनो मुक्तात्मान इत्यर्थः । के कर्तारः । **जिणा** जिनाः अनागारकेवलिनः । **जिणिंदा** न केवलं जिना जिनेन्द्राश्च तीर्थंकरपरमदेवाः । कथंभूताः सन्तः एते सिद्धा जाताः । **मग्गं समुट्ठिदा** निजपरमात्मतत्त्वानुभूतिलक्षणमार्गं मोक्षमार्गं समुत्थिता आश्रिताः । केन । **एवं** पूर्वं बहुधा व्याख्यातक्रमेण । न केवलं जिना जिनेन्द्रा अनेन मार्गेण सिद्धा जाताः, **समणा** सुखदुःखादिसमताभावनापरिणतात्मतत्त्वलक्षणाः शेषा अचरमदेहश्रमणाश्च । अचरमदेहानां कथं सिद्धत्वमिति चेत् । "तवसिद्धे णयसिद्धे संजमसिद्धे चरित्तसिद्धे य । णाणम्मि दंसणम्मि

भावार्थ :– १९७वीं गाथामें प्रश्न उपस्थित किया गया था कि सर्वज्ञभगवानको किसी पदार्थके प्रति अभिलाषा, जिज्ञासा या सन्देह नहीं है तब फिर वे किसी पदार्थका ध्यान करते हैं ? उसका उत्तर इस गाथामें इसप्रकार दिया गया है कि :– एक अग्र (विषय) का संवेदन ध्यान है । सर्व आत्मप्रदेशोंमें परिपूर्ण आनन्द और ज्ञानसे भरे हुए सर्वज्ञ भगवान परमानन्दसे अभिन्न ऐसे निजात्मरूपी एक विषयका संवेदन करते हैं इसलिये उनके परमानन्दका ध्यान है, अर्थात् वे परमसौख्यका ध्यान रखते हैं ॥ १९८ ॥

अब, यह निश्चित करते हैं कि – 'यही (पूर्वोक्त ही) शुद्ध आत्माकी उपलब्धि जिसका लक्षण है, ऐसा मोक्षका मार्ग है' :–

गाथा १९९

अन्वयार्थ :– [**जिनाः जिनेन्द्राः श्रमणाः**] जिन, जिनेन्द्र और श्रमण (अर्थात् सामान्यकेवली, तीर्थंकर और मुनि) [**एवं**] इस (पूर्वोक्त ही) प्रकारसे [**मार्गं समुत्थिताः**] मार्गमें आरूढ़ होते हुए [**सिद्धाः जाताः**] सिद्ध हुए [**नमोऽस्तु**] नमस्कार हो [**तेभ्यः**] उन्हें [**च**] और [**तस्मै निर्वाणमार्गाय**] उस निर्वाणमार्गको ।

श्रमणो, जिनो, तीर्थंकरो आ रीत सेवी मार्गने ।
सिद्धि वर्या; नमुं तेमने, निर्वाणना ते मार्गने ॥ १९९ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यतः सर्व एव सामान्यचरमशरीरास्तीर्थंकराः अचरमशरीरा मुमुक्षवश्चामुनैव यथोदितेन शुद्धात्मतत्त्वप्रवृत्तिलक्षणेन विधिना प्रवृत्तमोक्षस्य मार्गमधिगम्य सिद्धा बभूवुः, न पुनरन्यथापि। ततोऽवधार्यते केवलमयमेक एव मोक्षस्य मार्गो, न द्वितीय इति। अलं च प्रपञ्चेन। तेषां शुद्धात्मतत्त्वप्रवृत्तानां सिद्धानां तस्य शुद्धात्मतत्त्वप्रवृत्तिरूपस्य मोक्षमार्गस्य च प्रत्यस्तमितभाव्यभावकविभागत्वेन नोआगमभावनमस्कारोऽस्तु। अवधारितो मोक्षमार्गः, कृत्यमनुष्ठीयते ॥ १९९ ॥

अथोपसंपद्ये साम्यमिति पूर्वप्रतिज्ञां निर्वहन् मोक्षमार्गभूतां स्वयमपि शुद्धात्मप्रवृत्तिमासूत्रयति –

तम्हा तह जाणित्ता अप्पाणं जाणगं सभावेण।
परिवज्जामि ममत्तिं उवट्ठिदो णिम्ममत्तम्हि ॥ २०० ॥

तस्मात्तथा ज्ञात्वात्मानं ज्ञायकं स्वभावेन।
परिवर्जयामि ममतामुपस्थितो निर्ममत्वे ॥ २०० ॥

य सिद्धे सिरसा णमंसामि ॥" इति गाथाकथितक्रमेणैकदेशेन। **णमोत्थु तेसिं** नमोऽस्तु तेभ्यः। अनन्तज्ञानादिसिद्धगुणस्मरणरूपो भावनमस्कारोऽस्तु, **तस्य य णिव्वाणमग्गस्स** तस्मै निर्विकारस्वसंवित्तिलक्षणनिश्चयरत्नत्रयात्मकनिर्वाणमार्गाय च। ततोऽवधार्यते अयमेव मोक्षमार्गो, नान्य इति ॥ १९९ ॥

टीका :– सभी सामान्य चरमशरीरी, तीर्थंकर और अचरमशरीरी मुमुक्षु इसी यथोक्त शुद्धात्मतत्वप्रवृत्तिलक्षण (शुद्धात्मतत्व में प्रवृत्ति जिसका लक्षण है ऐसी) विधिसे प्रवर्तमान मोक्षमार्गको प्राप्त करके सिद्ध हुए; किन्तु ऐसा नहीं है कि किसी दूसरी विधिसे भी सिद्ध हुए हों। इससे निश्चित होता है कि केवल यह एक ही मोक्षका मार्ग है, दूसरा नहीं। – अधिक विस्तारसे बस हो! उस शुद्धात्मतत्वमें प्रवर्ते हुए सिद्धोंको तथा उस शुद्धात्मतत्वप्रवृत्तिरूप मोक्षमार्गको, जिसमेंसे भाव्य और भावकका विभाग अस्त हो गया है ऐसा नोआगमभावनमस्कार हो! मोक्षमार्ग अवधारित किया है, कृत्य किया जारहा है, (अर्थात् मोक्षमार्ग निश्चित किया है और उसमें) प्रवर्तन कर रहे हैं ॥ १९९ ॥

अब, 'साम्यको प्राप्त करता हूँ' ऐसी (पाँचवीं गाथामें की गई) पूर्वप्रतिज्ञाका निर्वहण करते हुए (आचार्यदेव) स्वयं भी मोक्षमार्गभूत शुद्धात्मप्रवृत्ति करते हैं :–

એ રીત તેથી આત્મને જ્ઞાયક સ્વભાવી જાણીને,
નિર્મમપણે રહી સ્થિત આ પરિવર્જું છું હું મમત્વને ॥ ૨૦૦ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अहमेष मोक्षाधिकारी ज्ञायकस्वभावात्मतत्त्वपरिज्ञानपुरस्सरममत्वनिर्ममत्वहानोपादानविधानेन कृत्यान्तरस्याभावात्सर्वारम्भेण शुद्धात्मनि प्रवर्ते। तथाहि – अहं हि तावत् ज्ञायक एव स्वभावेन, केवलज्ञायकस्य च सतो मम विश्वेनापि सहजज्ञेयज्ञायकलक्षण एव संबन्धः, न पुनरन्ये स्वस्वामिलक्षणादयः संबन्धाः। ततो मम न क्वचनापि ममत्वं, सर्वत्र निर्ममत्वमेव। अथैकस्य ज्ञायकभावस्य समस्तज्ञेयभावस्वभावत्वात् प्रोत्कीर्णलिखित-

---

अथ 'उवसंपयामि सम्मं जत्तो णिव्वाणसंपत्ती' इत्यादि पूर्वप्रतिज्ञां निर्वाहयन् स्वयमपि मोक्षमार्गपरिणतिं स्वीकरोतीति प्रतिपादयति – **तम्हा** यस्मात्पूर्वोक्तशुद्धात्मोपलम्भलक्षणमोक्षमार्गेण जिना जिनेन्द्राः श्रमणाश्च सिद्धा जातास्तस्मादहमपि **तह** तथैव तेनैव प्रकारेण **जाणित्ता** ज्ञात्वा। कम्। **अप्पाणं** निजपरमात्मानम्। किंविशिष्टम्। **जाणगं** ज्ञायकं केवलज्ञानाद्यनन्तगुणस्वभावम्। केन कृत्वा ज्ञात्वा। **सभावेण** समस्तरागादिविभावरहितशुद्धबुद्धैकस्वभावेन। पश्चात् किं करोमि। **परिवज्जामि** परि समन्ताद्वर्जयामि। काम्। **ममत्तिं** समस्तसचेतनाचेतनमिश्रपरद्रव्यसंबन्धिनीं ममताम्। कथंभूतः

गाथा २००

अन्वयार्थ :– [**तस्मात्**] ऐसा होनेसे (अर्थात् शुद्धात्मामें प्रवृत्तिके द्वारा ही मोक्ष होता होनेसे) [**तथा**] इसप्रकार [**आत्मानं**] आत्माको [**स्वभावेन ज्ञायकं**] स्वभावसे ज्ञायक [**ज्ञात्वा**] जानकर [**निर्ममत्वे उपस्थितः**] मैं निर्ममत्वमें स्थित रहता हुआ [**ममतां परिवर्जयामि**] ममताका परित्याग करता हूं।

टीका :– मैं यह मोक्षाधिकारी, ज्ञायकस्वभावी आत्मतत्त्वके परिज्ञानपूर्वक ममत्वकी त्यागरूप और निर्ममत्वकी ग्रहणरूप विधिके द्वारा सर्व आरम्भ (उद्यम) से शुद्धात्मामें प्रवृत्त होता हूँ, क्योंकि अन्य कृत्यका अभाव है। (अर्थात् दूसरा कुछ भी करने योग्य नहीं है।) वह इसप्रकार है (अर्थात् मैं इसप्रकार शुद्धात्मामें प्रवृत्त होता हूँ) :– प्रथम तो मैं स्वभावसे ज्ञायक ही हूं; केवल ज्ञायक होनेसे मेरा विश्व (समस्त पदार्थों) के साथ भी सहज ज्ञेयज्ञायकलक्षण सम्बन्ध ही है, किन्तु अन्य स्वस्वामिलक्षणादि सम्बन्ध नहीं हैं; इसलिये मेरा किसीके प्रति ममत्व नहीं है, सर्वत्र निर्ममत्व ही है। अब, एक ज्ञायकभावका समस्त ज्ञेयोंको जाननेका स्वभाव होनेसे, क्रमशः प्रवर्तमान, अनन्त, भूत-वर्तमान-भावी विचित्र पर्यायसमूहवाले, [२]अगाधस्वभाव और गम्भीर ऐसे समस्त द्रव्यमात्रको – मानों वे द्रव्य ज्ञायकमें उत्कीर्ण हो गये हों, चित्रित हो गए हों, भीतर घुस गये हों, कीलित हो गये हों, डूब गये हों, समा गये हों,

---

[१] भाव्य=ध्येय; भावक=ध्याता; भाव्य – भावकके अर्थके लिये देखो पृ० ६ में फुटनोट।

[२] जिनका स्वभाव अगाध है और जो गंभीर हैं ऐसे समस्त द्रव्योंको भूत, वर्तमान तथा भावीकालके क्रमसे होनेवाली, अनेक प्रकारकी अनन्त पर्यायोंसे युक्त एक समयमें ही प्रत्यक्ष जानना आत्माका स्वभाव है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

निखातकीलितमज्जितसमावर्तितप्रतिबिम्बितवत्तत्र क्रमप्रवृत्तानन्तभूतभवद्भाविविचित्र-पर्यायप्राग्भारमगाधस्वभावं गम्भीरं समस्तमपि द्रव्यजातमेकक्षण एव प्रत्यक्षयन्तं ज्ञेयज्ञायकलक्षणसंबन्धस्यानिवार्यत्वेनाशक्यविवेचनत्वादुपात्तवैश्वरूप्यमपि सहजानन्तशक्ति-ज्ञायकस्वभावेनैक्यरूप्यमनुज्झन्तमासंसारमनयैव स्थित्या स्थितं मोहेनान्यथाध्यवस्यमानं शुद्धात्मानमेष मोहमुत्खाय यथास्थितमेवातिनिःप्रकम्पः संप्रतिपद्ये। स्वयमेव भवतु चास्यैवं दर्शनविशुद्धिमूलया सम्यग्ज्ञानोपयुक्ततयात्यन्तमव्याबाधरतत्वात्साधोरपि साक्षात्सिद्धभूतस्य स्वात्मनस्तथाभूतानां परमात्मनां च नित्यमेव तदेकपरायणत्वलक्षणो भावनमस्कारः ॥ २०० ॥

सन्। **उवट्ठिदो** उपस्थितः परिणतः। क्व। **णिम्ममत्तम्मि** समस्तपरद्रव्यममकाराहंकाररहितत्वेन निर्ममत्वलक्षणे परमसाम्याभिधाने वीतरागचारित्रे तत्परिणतनिजशुद्धात्मस्वभावे वा। तथाहि – अहं तावत्केवलज्ञानदर्शनस्वभावत्वेन ज्ञायकैकटङ्कोत्कीर्णस्वभावः। तथाभूतस्य सतो मम न केवलं स्वस्वाम्यादयः परद्रव्यसंबन्धा न सन्ति। निश्चयेन ज्ञेयज्ञायकसंबन्धो नास्ति। ततः कारणात्समस्त-परद्रव्यममत्वरहितो भूत्वा परमसाम्यलक्षणे निजशुद्धात्मनि तिष्ठामीति। किंच 'उवसंपयामि सम्मं' इत्यादिस्वकीयप्रतिज्ञां निर्वाहयन्स्वयमपि मोक्षमार्गपरिणतिं स्वीकरोत्येवं यदुक्तं गाथापातनिका-प्रारम्भे तेन किमुक्तं भवति – ये तां प्रतिज्ञां गृहीत्वा सिद्धिं गतास्तैरेव सा प्रतिज्ञा वस्तुवृत्त्या समाप्तिं नीता। **कुन्दकुन्दाचार्यदेवैः** पुनर्ज्ञानदर्शनाधिकारद्वयरूपग्रन्थसमाप्तिरूपेण समाप्तिं नीता, शिवकुमार-महाराजेन तु तद्ग्रन्थश्रवणेन च। कस्मादिति चेत्। ये मोक्षं गतास्तेषां सा प्रतिज्ञा परिपूर्णा जाता, न च तेषाम्। कस्मात्। चरमदेहत्वाभावादिति ॥ २०० ॥ एवं ज्ञानदर्शनाधिकारसमाप्तिरूपेण चतुर्थस्थले गाथाद्वयं गतम्।

प्रतिबिम्बित हुए हों, इसप्रकार – एक क्षणमें ही जो (शुद्धात्मा) प्रत्यक्ष करता है, [1]ज्ञेयज्ञायकलक्षण संबंधकी अनिवार्यताके कारण ज्ञेय-ज्ञायकको भिन्न करना अशक्य होनेसे विश्वरूपता को प्राप्त होनेपर भी जो (शुद्धात्मा) सहज अनन्तशक्तिवाले ज्ञायकस्वभावके द्वारा एकरूपताको नहीं छोड़ता, जो अनादि संसारसे इसी स्थितिमें (ज्ञायक भावरूप ही) रहा है और जो मोहके द्वारा दूसरे रूपमें जाना – माना जाता है उस शुद्धात्माको यह मैं मोहको उखाड़ फेंककर, अतिनिष्कम्प रहता हुआ यथास्थित (जैसाका तैसा) ही प्राप्त करता हूं।

इसप्रकार दर्शनविशुद्धि जिसका मूल है ऐसी, सम्यग्ज्ञानमें उपयुक्तताके कारण अत्यन्त अव्याबाध (निर्विघ्न) लीनता होनेसे, साधु होने पर भी साक्षात् सिद्धभूत

[1] ज्ञेयज्ञायकस्वरूप सम्बन्ध टाला नहीं जासकता, इसलिये यह अशक्य है कि ज्ञेय ज्ञायकमें ज्ञात न हों, इसलिये आत्मा मानों समस्त द्रव्यरूपताको प्राप्त होता है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

शालिनी छन्द

जैनं ज्ञानं ज्ञेयतत्त्वप्रणेतृ
स्फीतं शब्दब्रह्म सम्यग्विगाह्य ।।
संशुद्धात्मद्रव्यमात्रैकवृत्त्या
नित्यं युक्तैः स्थीयतेऽस्माभिरेवम् ।। १० ।।

शालिनी छन्द

ज्ञेयीकुर्वन्नञ्जसासीमविश्वं
ज्ञानीकुर्वन् ज्ञेयमाक्रान्तभेदम् ।
आत्मीकुर्वन् ज्ञानमात्मान्यभासि
स्फूर्जत्यात्मा ब्रह्म संपद्य सद्यः ।। ११ ।।

एवं निजशुद्धात्मभावनारूपमोक्षमार्गेण ये सिद्धिं गता ये च तदाराधकास्तेषां दर्शनाधिकारापेक्षयावसानमङ्गलार्थं ग्रन्थापेक्षया मध्यमङ्गलार्थं च तत्पदाभिलाषी भूत्वा नमस्कार करोति—

दंसणसंसुद्धाणं सम्मण्णाणोवजोगजुत्ताणं ।
अव्वाबाधरदाणं णमो णमो सिद्धसाहूणं ।। *१४ ।।

णमो णमो नमो नमः । पुनः पुनर्नमस्करोमीति भक्तिप्रकर्षं दर्शयति । केभ्यः । **सिद्धसाहूणं** सिद्धसाधुभ्यः । सिद्धशब्दवाच्यस्वात्मोपलब्धिलक्षणार्हत्सिद्धेभ्यः, साधुशब्दवाच्यमोक्षसाधकाचार्योपाध्यायसाधुभ्यः । पुनरपि कथंभूतेभ्यः । **दंसणसंसुद्धाणं** मूढत्रयादिपञ्चविंशतिमलरहितसम्यग्दर्शनसंशुद्धेभ्यः । पुनरपि कथंभूतेभ्यः । **सम्मण्णाणोवजोगजुत्ताणं** संशयादिरहितं सम्यग्ज्ञानं, तस्योपयोगः सम्यग्ज्ञानोपयोगः, योगो निर्विकल्पसमाधिर्वीतरागचारित्रमित्यर्थः, ताभ्यां युक्ताः सम्यग्ज्ञानोपयोगयुक्तास्तेभ्यः । पुनश्च किंरूपेभ्यः । **अव्वाबाधरदाणं** सम्यग्ज्ञानादिभावनोत्पन्नाव्याबाधानन्तसुखरतेभ्यश्च ।। *१४ ।। इति नमस्कारगाथासहितस्थलचतुष्टयेन चतुर्थविशेषान्तराधिकारः समाप्तः ।

ऐसा यह निज आत्माको तथा तथाभूत (सिद्धभूत) परमात्माओंको, [1]उसीमें एकपरायणता जिसका लक्षण है ऐसा भावनमस्कार सदा ही [2]स्वयमेव हो ।। २०० ।।

[अब श्लोक द्वारा जिनेन्द्रोक्त शब्दब्रह्मके सम्यक् अभ्यासका फल कहा जाता है] –

अर्थ :– इसप्रकार ज्ञेयतत्त्वको समझानेवाले जैन ज्ञानमें – विशाल शब्दब्रह्ममें – –सम्यक्तया अवगाहन करके (डुबकी लगाकर, गहराईमें उतरकर, निमग्न होकर) हम मात्र शुद्धआत्मद्रव्यरूप एक वृत्तिसे (परिणतिसे) सदा युक्त रहते हैं ।। १० ।।

---

[1] उसीमें=नमस्कार करने योग्य पदार्थमें; भाव्यमें । [मात्र भाव्यमें ही परायण, एकाग्र, लीन होना भाव-नमस्कारका लक्षण है ।]

[2] स्वयमेव=[आचार्यदेव शुद्धात्मामें लीन होते हैं इसलिये स्वयमेव भावनमस्कार हो जाता है ।]

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

वसन्ततिलका छन्द

द्रव्यानुसारि चरणं चरणानुसारि
द्रव्यं मिथो द्वयमिदं ननु सव्यपेक्षम् ।
तस्मान्मुमुक्षुरधिरोहतु मोक्षमार्गं
द्रव्यं प्रतीत्य यदि वा चरणं प्रतीत्य ॥ १२ ॥

एवं 'अत्थित्तणिच्छिदस्स हि' इत्याद्येकादशगाथापर्यन्तं शुभाशुभशुद्धोपयोगत्रयमुख्यत्वेन प्रथमो विशेषान्तराधिकारस्तदनन्तरं 'अपदेसो परमाणू पदेसमेत्तो य' इत्यादिगाथानवकपर्यन्तं पुद्गलानां परस्परबन्धमुख्यत्वेन द्वितीयो विशेषान्तराधिकारस्ततः परं 'अरसमरूवं' इत्याद्यकोनविंशतिगाथापर्यन्तं जीवस्य पुद्गलकर्मणा सह बन्धमुख्यत्वेन तृतीयो विशेषान्तराधिकारस्ततश्च 'ण चयदि जो दु ममत्तिं' इत्यादिद्वादशगाथापर्यन्तं विशेषभेदभावनाचूलिकाव्याख्यानरूपश्चतुर्थो विशेषान्तराधिकार इत्येकाधिकपञ्चाशद्गाथाभिर्विशेषान्तराधिकारचतुष्टयेन विशेषभेदभावनाभिधानश्चतुर्थोऽन्तराधिकारः समाप्तः ।

इति **श्रीजयसेनाचार्य**कृतायां तात्पर्यवृत्तौ 'तम्हा तस्स णमाइं' इत्यादिपञ्चत्रिंशद्गाथापर्यन्तं सामान्यज्ञेयव्याख्यानं, तदनन्तरं 'दव्वं जीवं' इत्याद्येकोनविंशतिगाथापर्यन्तं जीवपुद्गलधर्मादिभेदेन विशेषज्ञेयव्याख्यानं, ततश्च 'सपदेसेहिं समग्गो' इत्यादिगाथाष्टकपर्यन्तं सामान्यभेदभावना, ततः परं

[अब श्लोकके द्वारा मुक्तात्माके ज्ञानकी महिमा गाकर ज्ञेयतत्त्व-प्रज्ञापनाधिकारकी पूर्णाहुति की जा रही है ।] :–

अर्थ :– आत्मा ब्रह्मको (परमात्मत्वको, सिद्धत्वको) शीघ्र प्राप्त करके, असीम (अनन्त) विश्वको शीघ्रतासे (एक समयमें) ज्ञेयरूप करता हुआ, भेदोंको प्राप्त ज्ञेयोंको ज्ञानरूप करता हुआ (अनेक प्रकारके ज्ञेयोंको ज्ञानमें जानता हुआ) और स्व-परप्रकाशक ज्ञानको आत्मारूप करता हुआ, प्रगट-दैदीप्यमान होता है ॥ ११ ॥

[अब श्लोक द्वारा, द्रव्य और चरणका संबंध बतलाकर, ज्ञेयतत्व – प्रज्ञापन नामक द्वितोयाधिकारकी और चरणानुयोगसूचक चूलिका नामक तृतीयाधिकारकी संधि बतलाई जाती है ।] :–

अर्थ :– चरण द्रव्यानुसार होता है और द्रव्य चरणानुसार होता है – इसप्रकार वे दोनों परस्पर अपेक्षासहित हैं; इसलिये या तो द्रव्यका आश्रय लेकर अथवा तो चरणका आश्रय लेकर मुमुक्षु (ज्ञानी, मुनि) मोक्षमार्गमें आरोहण करो ।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

इति तत्त्वदीपिकायां प्रवचनसारवृत्तौ **श्रीमदमृतचन्द्रसूरिविरचितायां ज्ञेयतत्त्व-प्रज्ञापनो** नाम द्वितीयः श्रुतस्कन्धः समाप्तः ॥२॥

'अत्थित्तणिच्छिदस्स हि' इत्याद्येकाधिकपञ्चाशद्गाथापर्यन्तं विशेषभेदभावना चेत्यन्तराधिकार-चतुष्टयेन त्रयोदशाधिकशतगाथाभिः **सम्यग्दर्शनाधिकार**नामा **ज्ञेयाधिकारा**परसंज्ञो द्वितीयो महा-धिकारः समाप्तः ॥ २ ॥

इसप्रकार (श्रीमद्भगवत्कुन्दकुन्दाचार्यदेव प्रणीत) श्री प्रवचनसार शास्त्रकी श्रीमदमृतचन्द्राचार्यदेवविरचित तत्वदीपिकानामक टीकाका यह **'ज्ञेयतत्त्व-प्रज्ञापन'** नामक द्वितीयश्रुतस्कंध (का भाषानुवाद) समाप्त हुआ ।

■

Please inform us of any errors on rajesh@AtmaDharma.com

— ३ —

चरणानुयोगसूचक चूलिका

अथ परेषां चरणानुयोगसूचिका चूलिका ।

तत्र —

★ इन्द्रव्रजा छन्द ★

द्रव्यस्य सिद्धौ चरणस्य सिद्धिः
द्रव्यस्य सिद्धिश्चरणस्य सिद्धौ ।
बुद्ध्वेति कर्माविरताः परेऽपि
द्रव्याविरुद्धं चरणं चरंतु ।। १३ ।।

इति चरणाचरणे परान् प्रयोजयति –

कार्यं प्रत्यत्रैव ग्रन्थः समाप्त इति ज्ञातव्यम् । कस्मादिति चेत् । 'उवसंपयामि सम्मं' इति प्रतिज्ञासमाप्तेः । अतःपरं यथाक्रमेण सप्ताधिकनवतिगाथापर्यन्तं चूलिकारूपेण चारित्राधिकार-व्याख्यानं प्रारभ्यते । तत्र तावदुत्सर्गरूपेण चारित्रस्य संक्षेपव्याख्यानम् । तदनन्तरमपवादरूपेण तस्यैव

— ३ —

चरणानुयोगसूचक चूलिका

अब दूसरोंको चरणानुयोगकी सूचक [1]चूलिका है ।

[उसमें, प्रथम श्री अमृतचन्द्राचार्यदेव श्लोकके द्वारा अब इस–आगामी गाथाकी उत्थानिका करते हैं ।]

[**अर्थ :–** द्रव्यकी सिद्धिमें चरणकी सिद्धि है, और चरणकी सिद्धिमें द्रव्यकी सिद्धि है – यह जानकर, कर्मोंसे (शुभाशुभ भावों से) अविरत दूसरे भी, द्रव्यसे अविरुद्ध चरण (चारित्र) का आचरण करो ।

– इसप्रकार (श्रीमद् भगवत्कुन्दकुन्दाचार्यदेव इस आगामी गाथाके द्वारा) दूसरोंको चरण (चारित्र) के आचरण करनेमें युक्त करते (जोड़ते) हैं ।

---

[1] चूलिका=जो शास्त्रमें नहीं कहा गया है उसका व्याख्यान करना, अथवा कहे गये का विशेष व्याख्यान करना या दोनोंका यथायोग्य व्याख्यान करना ।

Version 001: remember to check http://www.AtmaDharma.com for updates

'एस सुरासुरमणुसिंदवंदिदं धोदघाइकम्ममलं। पणमामि वड्ढमाणं तित्थं धम्मस्स कत्तारं ॥ सेसे पुण तित्थयरे ससव्वसिद्धे विसुद्धसब्भावे। समणे य णाणदंसणचरित्ततव-वीरियायारे ॥ ते ते सव्वे समगं समगं पत्तेगमेव पत्तेगं। वंदामि य वट्टंते अरहंते माणुसे खेत्ते ॥'[1]

एवं पणमिय सिद्धे जिणवरवसहे पुणो पुणो समणे ॥
पडिवज्जदु सामण्णं जदि इच्छदि दुक्खपरिमोक्खं ॥ २०१ ॥

एवं प्रणम्य सिद्धान् जिनवरवृषभान् पुनः पुनः श्रमणान्।
प्रतिपद्यतां श्रामण्यं यदीच्छति दुःखपरिमोक्षम् ॥ २०१ ॥

चारित्रस्य विस्तरव्याख्यानम्। ततश्च श्रामण्यापरनाममोक्षमार्गव्याख्यानम्। तदनन्तरं शुभोपयोग-व्याख्यानमित्यन्तराधिकारचतुष्टयं भवति। तत्रापि प्रथमान्तराधिकारे पञ्च स्थलानि। एवं पणमिय सिद्धे' इत्यादिगाथासप्तकेन दीक्षाभिमुखपुरुषस्य दीक्षाविधानकथनमुख्यतया प्रथमस्थलम्। अतःपरं 'वदसमिदिंदिय' इत्यादि मूलगुणकथनरूपेण द्वितीयस्थले गाथाद्वयम्। तदनन्तरं गुरुव्यवस्थाज्ञापनार्थं 'लिंगग्गहणे' इत्यादि एका गाथा, तथैव प्रायश्चित्तकथनमुख्यतया 'पयदम्हि' इत्यादि गाथाद्वयमिति समुदायेन तृतीयस्थले गाथात्रयम्। अथाचारादिशास्त्रकथितक्रमेण तपोधनस्य संक्षेपसमाचारकथनार्थं 'अधिवासे व' इत्यादि चतुर्थस्थले गाथात्रयम्। तदनन्तरं भावहिंसाद्रव्यहिंसापरिहारार्थं 'अपयता वा चरिया' इत्यादि पञ्चमस्थले सूत्रषट्कमित्येकविंशतिगाथाभिः स्थलपञ्चकेन प्रथमान्तराधिकारे समुदायपातनिका। तद्यथा – अथासन्नभव्यजीवांश्चारित्रे प्रेरयति – **पडिवज्जदु** प्रतिपद्यतां स्वीकरोतु।

[अब गाथाके प्रारंभ करनेसे पूर्व उसकी संधिके लिये श्री अमृतचन्द्राचार्यदेवने पंच परमेष्ठीको नमस्कार करनेके लिये निम्नप्रकारसे ज्ञानतत्त्व-प्रज्ञापन अधिकारकी प्रथम तीन गाथायें लिखी हैं :–

"एस सुरासुरमणुसिंदवंदिदंधोदघाइकम्ममलं।
पणमामि वड्ढमाणं तित्थं धम्मस्स कत्तारं ॥
सेसे पुण तित्थयरे ससव्वसिद्धे विसुद्धसब्भावे।
समणे य णाणदंसणचरित्ततववीरियायारे ॥
ते ते सव्वे समगं समगं पत्तेगमेव पत्तेगं।
वंदामि य वट्टंते अरहंते माणुसे खेत्ते ॥"

[अब, इस अधिकारकी गाथा प्रारंभ करते हैं :–]

---

[1] यह, ज्ञानतत्वप्रज्ञापनकी चौथी और पांचवीं गाथायें हैं।

अे रीत प्रणमी सिद्ध, जिनवरवृषभ, मुनिने फरी-फरी।
श्रामण्य अंगीकृत करो, अभिलाष जो दुःखमुक्तिनो ॥ २०१ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यथा ममात्मना दुःखमोक्षार्थिना, 'किच्चा अरहंताणं सिद्धाणं तह णमो गणहराणं । अज्झावयवग्गाणं साहूणं चेवि सव्वेसिं ।। तेसिं विसुद्धदंसणणाणपहाणासमं समासेज्ज । उवसंपयामि सम्मं जत्तो णिव्वाणसंपत्ती ।।" इति अर्हत्सिद्धाचार्योपाध्यायसाधूनां प्रणतिवन्दनात्मकनमस्कारपुरःसरं विशुद्धदर्शनज्ञानप्रधानं साम्यनाम श्रामण्यमवान्तर-ग्रन्थसन्दर्भोभयसंभावितसौस्थित्यं स्वयं प्रतिपन्नं, परेषामात्मापि यदि दुःखमोक्षार्थी तथा

किम् **सामण्णं** श्रामण्यं चारित्रम् । यदि किम् । **इच्छदि जदि दुक्खपरिमोक्खं** यदि चेत् दुःखपरिमोक्ष-मिच्छति । स कः कर्ता । परेषामात्मा । कथं प्रतिपद्यताम् । **एवं** एवं पूर्वोक्तप्रकारेण 'एस सुरासुर-मणुसिंद' इत्यादिगाथापञ्चकेन पञ्चपरमेष्ठिनमस्कारं कृत्वा ममात्मना दुःखमोक्षार्थिनान्यैः पूर्वोक्त-भव्यैर्वा यथा तच्चारित्रं प्रतिपन्नं तथा प्रतिपद्यताम् । किं कृत्वा पूर्वम् । **पणमिय** प्रणम्य । कान् । **सिद्धे** अञ्जनपादुकादिसिद्धिविलक्षणस्वात्मोपलब्धिसिद्धिसमेतसिद्धान् । **जिणवरवसहे** सासादनादिक्षीण-कषायान्ता एकदेशजिना उच्यन्ते, शेषाश्चानागारकेवलिनो जिनवरा भण्यन्ते, तीर्थकरपरमदेवाश्च जिनवरवृषभा इति, तान् जिनवरवृषभान् । न केवलं तान् प्रणम्य, **पुणो पुणो समणे** चिच्चमत्कारमात्र-निजात्मसम्यक्श्रद्धानज्ञानानुष्ठानरूपनिश्चयरत्नत्रयाचरणप्रतिपादनसाधकत्वोद्यतान् श्रमणशब्दवा-च्यानाचार्योपाध्यायसाधूंश्च पुनः पुनः प्रणम्येति । किंच पूर्वं ग्रन्थप्रारम्भकाले साम्यमाश्रयामीति

गाथा २०१

अन्वयार्थ :—[**यदि दुःखपरिमोक्षम् इच्छति**] यदि दुःखोंसे परिमुक्त होनेकी (छुटकारा पानेकी) इच्छा हो तो, [**एवं**] पूर्वोक्त प्रकारसे (ज्ञानतत्व-प्रज्ञापनकी प्रथम तीन गाथाओंके अनुसार) [**पुनः पुनः**] बारंबार [**सिद्धान्**] सिद्धोंको, [**जिनवरवृषभान्**] जिनवरवृषभोंको (अर्हन्तोंको) तथा [**श्रमणान्**] श्रमणोंको [**प्रणम्य**] प्रणाम करके, [**श्रामण्यं प्रतिपद्यताम्**] (जीव) श्रामण्यको अंगीकार करो ।

टीका :—जैसे दुःखोंसे मुक्त होनेके अर्थी मेरे आत्माने— [१]"किच्चा अरहंताणं सिद्धाणं तह णमो गणहराणं । अज्झावयवग्गाणं साहूणं चेव सव्वेसिं ।। तेसिं विसुद्धदं-सणणाणपहाणासमं समासेज्ज । उवसंपयामि सम्मं जत्तो णिव्वाणसंपत्ती ।" इसप्रकार अर्हन्तों, सिद्धों, आचार्यों, उपाध्यायों तथा साधुओंको [२]प्रणाम-वंदनात्मक नमस्कारपूर्वक [३]विशुद्धदर्शनज्ञानप्रधान साम्यनामक श्रामण्यको — जिसका इस ग्रंथमें कहे हुए (ज्ञानतत्व-प्रज्ञापन और ज्ञेयतत्वप्रज्ञापन नामक) दो अधिकारोंकी रचना द्वारा सुस्थितपन हुआ है

---

[१] यह, ज्ञानतत्वप्रज्ञापनकी चौथी और पाँचवीं गाथायें हैं ।

[२] नमस्कार प्रणाम-वंदनमय है । (विशेषके लिये देखो पृष्ठ ४ का फुटनोट)

[३] विशुद्धदर्शनज्ञानप्रधान=जिसमें विशुद्ध दर्शन और ज्ञान प्रधान है ऐसा । [साम्य नामक श्रामण्यमें विशुद्ध दर्शन और ज्ञान प्रधान है ।]

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

तत्प्रतिपद्यताम्। यथानुभूतस्य तत्प्रतिपत्तिवर्त्मनः प्रणेतारो वयमिमे तिष्ठाम इति ॥ २०१ ॥

अथ श्रमणो भवितुमिच्छन् पूर्वं किं किं करोतीत्युपदिशति –

आपिच्छ बंधुवग्गं विमोचिदो गुरुकलत्तपुत्तेहिं।
आसिज्ज णाणदंसणचरित्ततववीरियायारं ॥ २०२ ॥

आपृच्छ्य बन्धुवर्गं विमोचितो गुरुकलत्रपुत्रैः।
आसाद्य ज्ञानदर्शनचारित्रतपोवीर्याचारम् ॥ २०२ ॥

शिवकुमारमहाराजनामा प्रतिज्ञां करोतीति भणितम्, इदानीं तु ममात्मना चारित्रं प्रतिपन्नमिति पूर्वापरविरोधः। परिहारमाह – ग्रन्थप्रारम्भात्पूर्वमेव दीक्षा गृहीता तिष्ठति, परं किंतु ग्रन्थकरण-व्याजेन क्वाप्यात्मानं भावनापरिणतं दर्शयति, क्वापि शिवकुमारमहाराजं, क्वाप्यन्यं भव्यजीवं वा। तेन कारणेनात्र ग्रन्थे पुरुषनियमो नास्ति, कालनियमो नास्तीत्यभिप्रायः ॥ २०१ ॥ अथ श्रमणो भवितुमिच्छन्पूर्वं क्षमितव्यं करोति – 'उवट्ठिदो होदि सो समणो' इत्यग्रे षष्ठगाथायां यद्व्याख्यानं तिष्ठति तन्मनसि धृत्वा पूर्वं किं कृत्वा श्रमणो भविष्यतीति व्याख्याति – **आपिच्छ** आपृच्छ्य पृष्ट्वा। कम्। **बंधुवग्गं** बन्धुवर्गं गोत्रम्। ततः कथंभूतो भवति। **विमोचिदो** विमोचितस्त्यक्तो भवति। कैः कर्तृभूतैः। **गुरुकलत्तपुत्तेहिं** पितृमातृकलत्रपुत्रैः पुनरपि किं कत्वा श्रमणो भविष्यति। **आसिज्ज** आसाद्य आश्रित्य। कम्। **णाणदंसणचरित्ततववीरियायारं** ज्ञानदर्शनचारित्रतपोवीर्याचारमिति। अथ विस्तरः – अहो बन्धुवर्गपितृमातृकलत्रपुत्राः, अयं मदीयात्मा सांप्रतमुद्भिन्नपरमविवेकज्योतिस्सन् स्वकीयचिदानन्दैकस्वभावं परमात्मानमेव निश्चयनयेनानादिबन्धुवर्गं पितरं मातरं कलत्रं पुत्रं चाश्रयति, तेन कारणेन मां मुञ्चत यूयमिति क्षमितव्यं करोति। ततश्च किं करोति। परमचैतन्य-मात्र-

---

उसे – स्वयं अंगीकार किया, उसीप्रकार दूसरोंका आत्मा भी, यदि दुःखोंसे मुक्त होनेका अर्थी (इच्छुक) हो तो, उसे अंगीकार करे। उस (श्रामण्य) को अंगीकार करनेका जो [1] यथानुभूत मार्ग है उसके प्रणेता हम यह खड़े हैं ॥ २०१ ॥

अब, श्रमण होनेका इच्छुक पहले क्या-क्या करता है उसका उपदेश करते हैं :–

गाथा २०२

अन्वयार्थ :– (श्रामण्यार्थी) [**बन्धुवर्गम् आपृच्छ्य**] बंधुवर्गसे विदा माँगकर [**गुरुकलत्रपुत्रैः विमोचितः**] बड़ोंसे, स्त्री और पुत्रसे मुक्त किया हुआ [**ज्ञानदर्शन-**

[1] यथानुभूत=जैसा (हमने) अनुभव किया है वैसा।

बंधुजनोनी विदाय लई, स्त्री-पुत्र-वडीलोथी छूटी।
दृग ज्ञान-तप-चारित्र-वीर्याचार अंगीकृतकरी ॥ २०२ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यो हि नाम श्रमणो भवितुमिच्छति स पूर्वमेव बन्धुवर्गमापृच्छते, गुरुकलत्रपुत्रेभ्य आत्मानं विमोचयति, ज्ञानदर्शनचारित्रतपोवीर्याचारमासीदति। तथाहि – एवं बन्धुवर्गमापृच्छते, अहो इदंजनशरीरबन्धुवर्गवर्तिन आत्मानः, अस्य जनस्य आत्मा न किंचनापि युष्माकं भवतीति निश्चयेन यूयं जानीत; तत आपृष्टा यूयं; अयमात्मा अद्योद्भिन्नज्ञानज्योतिः आत्मानमेवात्मनोऽनादिबन्धुमुपसर्पति। अहो इदंजनशरीरजनकस्यात्मन्, अहो इदंजनशरीरजनन्या आत्मन्, अस्य जनस्यात्मा न युवाभ्यां जनितो भवतीति निश्चयेन

निजात्मतत्त्वसर्वप्रकारोपादेयरुचिपरिच्छित्तिनिश्चलानुभूतिसमस्तपरद्रव्येच्छानिवृत्तिलक्षणतपश्चरण – स्वशक्त्यनवगूहनवीर्याचाररूपं निश्चयपञ्चाचारमाचारादिचरणग्रन्थकथिततत्साधकव्यवहारपञ्चाचारं चाश्रयतीत्यर्थः। अत्र यद्गोत्रादिभिः सह क्षमितव्यव्याख्यानं कृतं तदत्रातिप्रसंगनिषेधार्थम्। तत्र

चारित्रतपोवीर्याचारम् आसाद्य] ज्ञानाचार, दर्शनाचार, चारित्राचार, तपाचार और वीर्याचारको अंगीकार करके.....

टीका :– जो श्रमण होना चाहता है, वह पहले ही बंधुवर्गसे (सगेसंबंधियोंसे) विदा माँगता है, गुरुजनों (बड़ों) से, स्त्री और पुत्रोंसे अपनेको छुड़ाता है, ज्ञानाचार, दर्शनाचार, चारित्राचार, तपाचार तथा वीर्याचारको अंगीकार करता है। वह इसप्रकार है :–

बंधुवर्गसे इसप्रकार विदा लेता है :– अहो ! इस पुरुषके शरीरके बंधुवर्गमें प्रवर्तमान आत्माओ ! इस पुरुषका आत्मा किंचित्मात्र भी तुम्हारा नहीं है, – इसप्रकार तुम निश्चयसे जानो। इसलिये मैं तुमसे विदा लेता हूँ। जिसे ज्ञानज्योति प्रगट हुई है ऐसा यह आत्मा आज अपने आत्मारूपी अपने अनादिबंधुके पास जा रहा है।

अहो ! इस पुरुषके शरीरके जनक (पिता) के आत्मा ! अहो ! इस पुरुषके शरीरकी जननी (माता) के आत्मा ! इस पुरुषका आत्मा तुम्हारे द्वारा जनित (उत्पन्न) नहीं है, ऐसा तुम निश्चयसे जानो। इसलिये तुम इस आत्माको छोड़ो। जिसे ज्ञानज्योति प्रगट हुई है ऐसा यह आत्मा आज आत्मारूपी अपने अनादिजनकके पास जा रहा है। अहो ! इस पुरुषके शरीरकी रमणी (स्त्री) के आत्मा ! तू इस पुरुषके आत्माको रमण नहीं कराता, ऐसा तू निश्चयसे ज्ञान। इसलिये तू इस आत्माको छोड़। जिसे ज्ञानज्योति प्रगट हुई है ऐसा यह आत्मा आज अपनी स्वानुभूतिरूपी अनादि-रमणीके पास जारहा है। अहो ! इस पुरुषके शरीरके पुत्र आत्मा ! तू इस पुरुषके आत्माका जन्य (उत्पन्न किया गया – पुत्र) नहीं है, ऐसा तू निश्चयसे जान। इसलिये तू इस

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

युवां जानीतं; तत इममात्मानं युवां विमुञ्चतं; अयमात्मा अद्योद्भिन्नज्ञानज्योतिः आत्मानमेवात्मनोऽनादिजनकमुपसर्पति। अहो इदंजनशरीररमण्या आत्मन्, अस्य जनस्यात्मानं न त्वं रमयसीति निश्चयेन त्वं जानीहि; तत इममात्मानं विमुञ्च; अयमात्मा अद्योद्भिन्नज्ञानज्योतिः स्वानुभूतिमेवात्मनोऽनादिरमणीमुपसर्पति। अहो इदंजनशरीरपुत्रस्यात्मन्, अस्य जनस्यात्मनो न त्वं जन्यो भवसीति निश्चयेन त्वं जानीहि; तत इममात्मानं विमुञ्च; अयमात्मा अद्योद्भिन्नज्ञानज्योतिः आत्मानमेवात्मनोऽनादिजन्यमुपसर्पति। एवं गुरुकलत्रपुत्रेभ्य आत्मानं विमोचयति। तथा अहो कालविनयोपधानबहुमानानिह्नवार्थव्यञ्जनतदुभयसंपन्नत्वलक्षणज्ञानाचार, न शुद्धस्यात्मनस्त्वमसीति निश्चयेन जानामि तथापि त्वां तावदासीदामि यावत्त्वत्प्रसादात् शुद्धमात्मानमुपलभे। अहो

नियमो नास्ति। कथमिति चेत्। पूर्वकाले प्रचुरेण भरतसगररामपाण्डवादयो राजान एव जिनदीक्षां गृह्णन्ति, तत्परिवारमध्ये यदा कोऽपि मिथ्यादृष्टिर्भवति तदा धर्मस्योपसर्गं करोतीति। यदि पुनः कोऽपि मन्यते गोत्रसम्मतं कृत्वा पश्चात्तपश्चरणं करोमि तस्य प्रचुरेण तपश्चरणमेव नास्ति, कथमपि

आत्माको छोड़। जिसे ज्ञानज्योति प्रगट हुई है ऐसा यह आत्मा आज आत्मारूपी अपने अनादि जन्यके पास जा रहा है।—इसप्रकार बड़ोंसे, स्त्रीसे और पुत्रसे अपनेको छुड़ाता है।

(यहाँ ऐसा समझना चाहिये कि जो जीव मुनि होना चाहता है वह कुटुम्बसे सर्वप्रकारसे विरक्त ही होता है। इसलिये कुटुम्बकी सम्मतिसे ही मुनि होनेका नियम नहीं है। इसप्रकार कुटुम्बके भरोसे रहने पर तो, यदि कुटुम्ब किसीप्रकारसे सम्मति ही नहीं दे तो मुनि ही नहीं हुआ जासकेगा। इसप्रकार कुटुम्बको सम्मत करके ही मुनित्वके धारण करनेका नियम न होने पर भी, कुछ जीवोंको मुनि होनेसे पूर्व वैराग्यके कारण कुटुम्बको समझानेकी भावनासे पूर्वोक्त प्रकारके वचन निकलते हैं। ऐसे वैराग्यके वचन सुनकर, कुटुम्बमें यदि कोई अल्पसंसारी जीव हो तो वह भी वैराग्यको प्राप्त होता है।)

(अब निम्न प्रकारसे पंचाचारको अंगीकार करता है :)

(जिसप्रकार बंधुवर्गसे विदा ली, अपनेको बड़ोंसे, स्त्री और पुत्रसे छुड़ाया) उसीप्रकार—अहो काल, विनय, उपधान, बहुमान, अनिह्नव, अर्थ, व्यंजन और तदुभयसंपन्न ज्ञानाचार! मैं यह निश्चयसे जानता हूँ कि तू शुद्धात्माका नहीं है; तथापि मैं तुझे तब तक अंगीकार करता हूँ जबतक कि तेरे प्रसादसे शुद्धात्माको उपलब्ध

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

निःशङ्कितत्वनिः काङ्क्षितत्वनिर्विचिकित्सत्वनिर्मूढदृष्टित्वोपबृंहणस्थितिकरणवात्सल्य-प्रभावनालक्षणदर्शनाचार, न शुद्धस्यात्मनस्त्वमसीति निश्चयेन जानामि, तथापि त्वां तावदासीदामि यावत् त्वत्प्रसादात् शुद्धमात्मानमुपलभे। अहो मोक्षमार्गप्रवृत्ति-कारणपञ्चमहाव्रतोपेतकायवाङ्मनोगुप्तीर्याभाषैषणादाननिक्षेपणप्रतिष्ठापनसमितिलक्षण - चारित्राचार, न शुद्धस्यात्मनस्त्वमसीति निश्चयेन जानामि, तथापि त्वां तावदासीदामि यावत्त्वत्प्रसादात् शुद्धमात्मानमुपलभे। अहो अनशनावमौदर्यवृत्तिपरिसंख्यानरसपरित्याग-विविक्तशय्यासनकायक्लेशप्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायध्यानव्युत्सर्गलक्षणतपआचार . न शुद्धस्यात्मनस्त्वमसीति निश्चयेन जानामि, तथापि त्वां तावदासीदामि यावत्त्वत्प्रसा-

---

तपश्चरणे गृहीतेऽपि यदि गोत्रादिममत्वं करोति तदा तपोधन एव न भवति। तथाचोक्तम्–"जो

कर लूँ। अहो निःशंकितत्व, निकांक्षितत्व, निर्विचिकित्सत्व, निर्मूढदृष्टित्व, उपबृंहण, स्थितिकरण, वात्सल्य, और प्रभावनास्वरूप दर्शनाचार! मैं यह निश्चयसे जानता हूँ कि तू शुद्धात्माका नहीं है, तथापि तुझे तबतक अंगीकार करता हूँ जब तक कि तेरे प्रसादसे शुद्धात्माको उपलब्ध कर लूँ। अहो, मोक्षमार्गमें प्रवृत्तिके कारणभूत, पंचमहा-व्रतसहित काय-वचन-मनगुप्ति और ईर्या-भाषा-एषण-आदाननिक्षेपण-प्रतिष्ठापनसमिति-स्वरूप चारित्राचार! मैं यह निश्चयसे जानता हूँ कि तू शुद्धात्माका नहीं है, तथापि तुझे तबतक अंगीकार करता हूँ जबतक कि तेरे प्रसादसे शुद्धात्माको उपलब्ध कर लूँ। अहो अनशन, अवमौदर्य, वृत्तिपरिसंख्यान, रसपरित्याग, विविक्त शय्यासन, कायक्लेश, प्रायश्चित, विनय, वैयावृत्य, स्वाध्याय, ध्यान और व्युत्सर्गस्वरूप तपाचार! मैं यह निश्चयसे जानता हूँ कि तू शुद्धात्मा नहीं है तथापि तुझे तबतक अंगीकार करता हूँ जबतक तेरे प्रसादसे शुद्धात्माको उपलब्ध कर लूँ! अहो समस्त इतर (वीर्याचारके अतिरिक्त अन्य) आचारमें प्रवृत्ति करानेवाली स्वशक्तिके अगोपनस्वरूप वीर्याचार! मैं यह निश्चयसे जानता हूँ कि तू शुद्धात्माका नहीं है, तथापि तुझे तबतक अंगीकार करता हूं जबतक कि तेरे प्रसादसे शुद्धात्माको उपलब्ध कर लूँ – इसप्रकार ज्ञानाचार, दर्शना-चार, चारित्राचार, तपाचार तथा वीर्याचारको अंगीकार करता है।

(सम्यग्दृष्टि जीव अपने स्वरूपको जानता है – अनुभव करता है और अपनेको अन्य समस्त व्यवहारभावोंसे भिन्न जानता है। जबसे उसे स्व-परका विवेकस्वरूप भेद-विज्ञान प्रगट हुआ था तभीसे वह समस्त विभावभावोंका त्याग कर चुका है और तभीसे उसने टंकोत्कीर्ण निजभाव अंगीकार किया है। इसलिये उसे न तो त्याग करनेको

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

दात् शुद्धमात्मानमुपलभे । अहो समस्तेतराचारप्रवर्तकस्वशक्त्यनिगूहनलक्षणवीर्याचार, न शुद्धस्यात्मनस्त्वमसीति निश्चयेन जानामि, तथापि त्वां तावदासीदामि यावत्त्वत्प्रसादात् शुद्धमात्मानमुपलभे । एवं ज्ञानदर्शनचारित्रतपोवीर्याचारमासीदति च ॥ २०२ ॥

अथातः कीदृशो भवतीत्युपदिशति –

समणं गणिं गुणड्ढं कुलरूववयोविसिट्ठमिट्ठदरं ।
समणेहि तं पि पणदो पडिच्छ मं चेदि अणुगहिदो ॥ २०३ ॥

श्रमणं गणिनं गुणाढ्यं कुलरूपवयोविशिष्टमिष्टतरम् ।
श्रमणैस्तमपि प्रणतः प्रतीच्छ मां चेत्यनुगृहीतः ॥ २०३ ॥

सकलणयररज्जं पुव्वं च इऊण कुणइ य ममत्ति । सो णवरि लिंगधारी संजमसारेण णिस्सारो" ॥ २०२ ॥ अथ जिनदीक्षार्थी भव्यो जैनाचार्यमाश्रयति – **समणं** निन्दाप्रशंसादिसमचित्तत्वेन पूर्वसूत्रोदितनिश्चय-व्यवहारपञ्चाचारस्याचरणाचारणप्रवीणत्वात् श्रमणम् । **गुणड्ढं** चतुरशीतिलक्षगुणाष्टादशसहस्रशील-सहकारिकारणोत्तमनिजशुद्धात्मानुभूतिगुणेनाढ्यं भृतं परिपूर्णत्वाद्गुणाढ्यम् । **कुलरूववयोविसिट्ठं** लोकदुगुंच्छारहितत्वेन जिनदीक्षायोग्यं कुलं भण्यते । अन्तरङ्गशुद्धात्मानुभूतिज्ञापकं निर्ग्रन्थनिर्विकारं रूपमुच्यते । शुद्धात्मसंवित्तिविनाशकारिवृद्धबालयौवनोद्रेकजनितबुद्धिवैकल्यरहितं वयश्चेति । तैः

रहा है और न कुछ ग्रहण करनेको – अंगीकार करनेको रहा है । स्वभावदृष्टिकी अपेक्षासे ऐसा होने पर भी, वह पर्यायमें पूर्वबद्ध कर्मोंके उदयके निमित्तसे अनेक प्रकारके विभावभावरूप परिणमित होता है । इस विभावपरिणतिको पृथक् होती न देखकर वह आकुल-व्याकुल भी नहीं होता और वह सकल विभावपरिणतिको दूर करनेका पुरुषार्थ किये बिना भी नहीं रहता । सकल विभावपरिणतिसे रहित स्वभावदृष्टिके बलस्वरूप पुरुषार्थसे गुणस्थानोंकी परिपाटीके सामान्य क्रमानुसार उसके प्रथम अशुभ परिणतिकी हानि होती है, और फिर धीरे-धीरे शुभ परिणति भी छूटती जाती है । ऐसा होनेसे वह शुभरागके उदयकी भूमिकामें गृहवासका और कुटुम्बका त्यागी होकर व्यवहार-रत्नत्रयरूप पंचाचारको अंगीकार करता है । यद्यपि वह ज्ञानभावसे समस्त शुभाशुभ क्रियाओंका त्यागी है तथापि पर्यायमें शुभराग नहीं छूटनेसे वह पूर्वोक्तप्रकारसे पंचाचारको ग्रहण करता है ।) ॥ २०२ ॥

पश्चात् वह कैसा है इसका उपदेश करते हैं :–

'मुजने ग्रहो' कही, प्रणत थई, अनुगृहीत थाय गणी वडे ।
वयरूपकुलविशिष्ट, योगी, गुणाढ्य ने मुनि-इष्ट जे ॥ २०३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

ततो हि श्रामण्यार्थी प्रणतोऽनुगृहीतश्च भवति। तथाहि – आचरिताचारितसमस्त-विरतिप्रवृत्तिसमानात्मरूपश्रामण्यत्वात् श्रमणं, एवंविधश्रामण्याचरणाचारणप्रवीणत्वात् गुणाढ्यं, सकललौकिकजननिःशङ्कसेवनीयत्वात् कुलक्रमागतक्रौर्यादिदोषवर्जितत्वाच्च कुलविशिष्टं, अन्तरङ्गशुद्धरूपानुमापकबहिरङ्गशुद्धरूपत्वात् रूपविशिष्टं, शैशववार्धक्यकृत-

---

कुलरूपवयोभिर्विशिष्टत्वात् कुलरूपवयोविशिष्टम्। **इट्ठदरं** इष्टतरं सम्मतम्। कैः। **समणेहिं** निज-परमात्मतत्त्वभावनासहितसमचित्तश्रमणैरन्याचार्यैः। **गणिं** एवंविधगुणविशिष्टं परमात्मभावना-साधकदीक्षादायकमाचार्यम्। **तं पि पणदो** न केवलं तमाचार्यमाश्रितो भवति, प्रणतोऽपि भवति। केन रूपेण। **पडिच्छ मं** हे भगवन्, अनन्तज्ञानादिनिजगुणसंपत्तिकारणभूताया अनादिकालेऽत्यन्तदुर्लभाया भावसहितजिनदीक्षायाः प्रदानेन प्रसादेन मां प्रतीच्छ स्वीकुरु। **चेदि अणुगहिदो** न केवलं प्रणतो

गाथा २०३

अन्वयार्थ :–[**श्रमणं**] जो श्रमण है, [**गुणाढ्यं**] गुणाढ्य है, [**कुलरूपवयो विशिष्टं**] कुल, रूप तथा वयसे विशिष्ट है, और [**श्रमणैः इष्टतरं**] श्रमणोंको अति इष्ट है [**तम् अपि गणिनं**] ऐसे गणीको [**माम् प्रतीच्छ इति**] 'मुझे स्वीकार करो' ऐसा कहकर [**प्रणतः**] प्रणत होता है (प्रणाम करता है) [**च**] और [**अनुग्रहीतः**] अनुगृहीत होता है।

टीका :–पश्चात् श्रामण्यार्थी प्रणत और अनुगृहीत होता है। वह इसप्रकार है कि– आचरण करनेमें और आचरण करानेमें आनेवाली समस्त विरतिकी प्रवृत्तिके [१]समान आत्मरूप – ऐसे श्रामण्यपनेके कारण जो 'श्रमण' है; ऐसे श्रामण्यका आचरण करनेमें और आचरण करानेमें प्रवीण होनेसे जो 'गुणाढ्य' है; सर्व लौकिक जनोंके द्वारा निःशंकतया सेवा करने योग्य होनेसे और कुलक्रमागत (कुलक्रमसे उत्तर आनेवाले) क्रूरतादि दोषोंसे रहित होनेसे जो 'कुलविशिष्ट है; अंतरंग शुद्धरूपका अनुमान करानेवाला बहिरंग शुद्धरूप होनेसे जो 'रूपविशिष्ट' है, बालकत्व और वृद्धत्वसे होनेवाली [२]बुद्धिविक्लवताका अभाव होनेसे तथा [३]यौवनोद्रेककी विक्रियासे रहित बुद्धि होनेसे जो 'वयविशिष्ट' है; और यथोक्त श्रामण्यका आचरण करने तथा आचरण कराने सम्बन्धी [४]पौरुषेय दोषोंको

---

१ समान=तुल्य, बराबर, एकसा, मिलता हुआ। [विरतिकी प्रवृत्तिके तुल्य आत्माका रूप अर्थात् विरतिकी प्रवृत्तिसे मिलती हुई – समान आत्मदशा सो श्रामण्य है।]

२ विक्लवता=अस्थिरता; विकलता।

३ यौवनोद्रेक=यौवनका जोश, यौवनकी अतिशयता।

४ पौरुषेय=मनुष्यके लिये संभवति।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

बुद्धिविक्लवत्वाभावाद्यौवनोद्रेकविक्रियाविवित्तबुद्धित्वाच्च वयोविशिष्टं, निःशेषितयथोक्त-श्रामण्याचरणाचारणविषयपौरुषेयदोषत्वेन मुमुक्षुभिरभ्युपगततरत्वात् श्रमणैरिष्टतरं च गणिनं शुद्धात्मतत्त्वोपलम्भसाधकमाचार्यं शुद्धात्मतत्त्वोपलम्भसिद्धया मामनुगृह्णाणेत्युपसर्पन् प्रणतो भवति। एवमियं ते शुद्धात्मतत्त्वोपलम्भसिद्धिरिति तेन प्रार्थितार्थेन संयुज्यमानो-ऽनुगृहीतो भवति ॥ २०३ ॥

अथातोऽपि कीदृशो भवतीत्युपदिशति –

णाहं होमि परेसिं ण मे परे णत्थि मज्झमिह किंचि ।
इदि णिच्छिदो जिदिंदो जादो जधजादरूवधरो ॥ २०४ ॥

नाहं भवामि परेषां न मे परे नास्ति ममेह किंचित् ।
इति निश्चितो जितेन्द्रियः जातो यथाजातरूपधरः ॥ २०४ ॥

भवति, तेनाचार्येणानुगृहीतः स्वीकृतश्च भवति । हे भव्य, निस्सारसंसारे दुर्लभबोधिं प्राप्य निजशुद्धात्मभावनारूपया निश्चयचतुर्विधाराधनया मनुष्यजन्म सफलं कुर्वित्यनेन प्रकारेणानुगृहीतो भवतीत्यर्थः ॥ २०३ ॥ अथ गुरुणा स्वीकृतः सन् कीदृशो भवतीत्युपदिशति – **णाहं होमि परेसिं** नाहं

निःशेषतया नष्ट कर देनेसे मुमुक्षुओंके द्वारा (प्रायश्चित्तादिके लिये) जिनका बहुआश्रय लिया जाता है इसलिये जो 'श्रमणोंको अतिइष्ट' है, ऐसे गणीके निकट – शुद्धात्मतत्वकी उपलब्धिके साधक आचार्यके निकट – 'शुद्धात्मतत्वकी उपलब्धिरूप सिद्धिसे मुझे अनुगृहीत करो' ऐसा कहकर (श्रामण्यार्थी) जाता हुआ प्रणत होता है। 'इसप्रकार यह तुझे शुद्धात्मतत्वकी उपलब्धिरूप सिद्धि' ऐसा (कहकर) उस गणीके द्वारा (वह श्रामण्यार्थी) [1]प्रार्थित अर्थसे संयुक्त किया जाता हुआ अनुगृहीत होता है ॥ २०३ ॥

पश्चात् वह कैसा होता है, सो उपदेश करते हैं :–

गाथा २०४

अन्वयार्थ :– [**अहं**] मैं [**परेषां**] दूसरोंका [**न भवामि**] नहीं हूं [**परे मे न**] पर मेरे नहीं हैं, [**इह**] इस लोकमें [**मम**] मेरा [**किंचित्**] कुछ भी [**न अस्ति**] नहीं है – [**इति निश्चितः**] ऐसा निश्चयवान् और [**जितेन्द्रियः**] जितेन्द्रिय होता हुआ [**यथाजातरूपधरः**] यथाजातरूपधर (सहजरूपधारी) [**जातः**] होता है।

---

[1] प्रार्थित अर्थ=प्रार्थना करके मांगी गई वस्तु।

परनो न हुं, पर छे न मुज, मारुं नथी कंई पण जगे ।
–अे रीत निश्चित ने जितेंद्रिय साहजिकरूपधर बने ॥ २०४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

ततोऽपि श्रामण्यार्थी यथाजातरूपधरो भवति। तथाहि – अहं तावन्न किंचिदपि परेषां भवामि परेऽपि न किंचिदपि मम भवन्ति, सर्वद्रव्याणां परैः सह तत्त्वतः समस्त-संबन्धशून्यत्वात्। तदिह षड्द्रव्यात्मके लोके न मम किंचिदप्यात्मनोऽन्यदस्तीति निश्चित-मतिः परद्रव्यस्वस्वामिसंबंधनिबंधनानामिन्द्रियनोइन्द्रियाणां जयेन जितेन्द्रियश्च सन् धृतयथानिष्पन्नात्मद्रव्यशुद्धरूपत्वेन यथाजातरूपधरो भवति॥ २०४॥

अथैतस्य यथाजातरूपधरत्वस्यासंसारानभ्यस्तत्वेनात्यन्तमप्रसिद्धस्याभिनवाभ्यास-कौशलोपलभ्यमानायाः सिद्धेर्गमकं बहिरङ्गान्तरङ्गलिङ्गद्वैतमुपदिशति –

भवामि परेषाम्। निजशुद्धात्मनः सकाशात्परेषां भिन्नद्रव्याणां संबन्धी न भवाम्यहम्। **ण मे परे** न मे संबन्धीनि परद्रव्याणि। **णत्थि मज्झमिह किंचि** नास्ति ममेह किंचित्। इह जगति निजशुद्धात्मनो भिन्नं किंचिदपि परद्रव्यं मम नास्ति। **इदि णिच्छिदो** इति निश्चितमतिर्जातः। **जिंदिदो जादो** इन्द्रियमनोजनितविकल्पजालरहितानन्तज्ञानादिगुणस्वरूपनिजपरमात्मद्रव्याद्विपरीतेन्द्रियनोइन्दियाणां जयेन जितेन्द्रियश्च संजातः सन् **जधजादरूवधरो** यथाजातरूपधरः, व्यवहारेण नग्नत्वं यथाजातरूपं, निश्चयेन तु स्वात्मरूपं, तदित्थंभूतं यथाजातरूपं धरतीति यथाजातरूपधरः निर्ग्रन्थो जात इत्यर्थः॥ २०४॥ अथ तत्य पूर्वसूत्रोदितयथाजातरूपधरस्य निर्ग्रन्थस्यानादिकालदुर्लभायाः स्वात्मोपलब्धि-

---

टीका :– और तत्पश्चात् श्रामण्यार्थी [१]यथाजातरूपधर होता है। वह इसप्रकार :– 'प्रथम तो मैं किंचित्मात्र भी परका नहीं हूँ, पर भी किंचित्मात्र मेरे नहीं हैं, क्योंकि समस्त द्रव्य [२]तत्वतः परके साथ समस्त सम्बन्ध रहित हैं; इसलिये इस षड्द्रव्यात्मक लोकमें आत्मासे अन्य कुछ भी मेरा नहीं है;'– इसप्रकार निश्चित मतिवाला (वर्तता हुआ) और परद्रव्योंके साथ स्व-स्वामिसंबंध जिनका आधार है ऐसी इन्द्रियों और नो-इन्द्रियोंके जयसे जितेन्द्रिय होता हुआ वह (श्रामण्यार्थी) आत्मद्रव्यका [३]यथानिष्पन्न शुद्धरूप धारण करनेसे यथाजातरूपधर होता है॥ २०४॥

अब, अनादि संसारसे अनभ्यस्त होनेसे जो अत्यन्त अप्रसिद्ध है और [४]अभिनव अभ्यासमें कौशल्यद्वारा जिसकी सिद्धि उपलब्ध होती है ऐसे इस यथाजातरूपधरपनेके बहिरंग और अंतरंग दो लिंगोंका उपदेश करते हैं :–

---

१ यथाजातरूपधर = (आत्माका) जैसा, मूलभूत रूप है वैसा (सहज, स्वाभाविक) रूप धारण करनेवाला।

२ तत्वतः = वास्तवमें; तत्त्वकी दृष्टिसे; परमार्थतः।

३ यथानिष्पन्न = जैसा बना हुआ है वैसा, सहज, स्वाभाविक।

४ अभिनव = बिलकुल नया। (अनादि संसारसे अनभ्यस्त यथाजातरूपधरपना अभिनव अभ्यासमें प्रवीणताके द्वारा सिद्ध होता है।)

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

जधजादरूवजादं उप्पाडिदकेसमंसुगं सुद्धं ।
रहिदं हिंसादीदो अप्पडिकम्मं हवदि लिंग ॥ २०५ ॥
मुच्छारंभविजुत्तं जुत्तं उवओगजोगसुद्धीहिं ।
लिंगं ण परावेक्खं अपुणब्भवकारणं जेण्हं ॥ २०६ ॥ [जुगलं]

यथाजातरूपजातमुत्पाटितकेशश्मश्रुकं शुद्धम् ।
रहितं हिंसादितोऽप्रतिकर्म भवति लिङ्गम् ॥ २०५ ॥
मूर्च्छारम्भवियुक्तं युक्तमुपयोगयोगशुद्धिभ्याम् ।
लिङ्गं न परापेक्षमपुनर्भवकारणं जैनम् ॥ २०६ ॥ [युगलम्]

लक्षणसिद्धेर्गमकं चिह्नं बाह्याभ्यन्तरलिङ्गद्वयमादिशति – **जधजादरूवजादं** पूर्वसूत्रोक्तलक्षणयथाजातरूपेण निर्ग्रन्थत्वेन जातमुत्पन्नं यथाजातरूपजातम् । **उप्पाडिदकेसमंसुगं** केशश्मश्रुसंस्कारोत्पन्नरागादिदोषवर्जनार्थमुत्पाटितकेशश्मश्रुत्वादुत्पाटितकेशश्मश्रुकम् । **सुद्धं** निरवद्यचैतन्यचमत्कारविसदृशेन सर्वसावद्ययोगेन रहितत्वाच्छुद्धम् । **रहिदं हिंसादीदो** शुद्धचैतन्यरूपनिश्चयप्राणहिंसाकारणभूताया रागादिपरिणतिलक्षणनिश्चयहिंसाया अभावात् हिंसादिरहितम् । **अप्पडिकम्मं हवदि** परमोपेक्षासंयमबलेन देहप्रतिकाररहितत्वादप्रतिकर्म भवति । किम् । **लिंगं** एवं पञ्चविशेषणविशिष्टं लिङ्गं द्रव्यलिङ्गं ज्ञातव्यमिति प्रथमगाथा गता ॥ **मुच्छारंभविमुक्कं** परद्रव्यकाङ्क्षारहितनिर्मोहपरमात्म-

---

गाथा २०५-२०६

अन्वयार्थ :– [**यथाजातरूपजातम्**] जन्मसमयके रूप जैसा रूपवाला, [**उत्पाटितकेशश्मश्रुकं**] सिर और डाढ़ी-मूछके बालोंका लोंच किया हुआ, [**शुद्धं**] शुद्ध (अकिंचन), [**हिंसादितः रहितम्**] हिंसादिसे रहित और [**अप्रतिकर्म**] प्रतिकर्म (शारीरिक शृंगार) से रहित – [**लिंगम् भवति**] ऐसा (श्रामण्यका बहिरंग) लिंग है ।

[**मूर्च्छारम्भवियुक्तम्**] मूर्च्छा (ममत्व) और आरम्भ रहित, [**उपयोगयोगशुद्धिभ्यां युक्तं**] उपयोग और योगकी शुद्धिसे युक्त तथा [**न परापेक्षं**] परकी अपेक्षासे रहित – ऐसा [**जैनं**] जिनेन्द्रदेवकथित [**लिंगम्**] (श्रामण्यका अंतरंग) लिंग है [**अपुनर्भवकारणम्**] जो कि मोक्षका कारण है ।

जन्म्या प्रमाणे रूप, लुंचन केशनुं, शुद्धत्व ने ।
हिंसादिथी शून्यत्व, देह-असंस्करण – अे लिंग छे ॥ २०५ ॥
आरंभ मूर्छाशून्यता, उपयोग योग विशुद्धता ।
निरपेक्षता परथी,–जिनोदित मोक्षकारण लिंग आ ॥ २०६ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

आत्मनो हि तावदात्मना यथोदितक्रमेण यथाजातरूपधरस्य जातस्यायथाजातरूपधरत्वप्रत्ययानां मोहरागद्वेषादिभावानां भवत्येवाभावः, तदभावात्तु तद्भावभाविनो निवसनभूषणधारणस्य मूर्धजव्यञ्जनपालनस्य सकिंचनत्वस्य सावद्ययोगयुक्तत्वस्य शरीरसंस्कारकरणत्वस्य चाभावाद्यथाजातरूपत्वमुत्पाटितकेशश्मश्रुत्वं शुद्धत्वं हिंसादिरहितत्वमप्रतिकर्मत्वं च भवत्येव, तदेतद्बहिरंगं लिंगम्। तथात्मनो यथाजातरूपधरत्वापसारिता

ज्योतिर्विलक्षणा बाह्यद्रव्ये ममत्वबुद्धिर्मूर्च्छा भण्यते, मनोवाक्कायव्यापाररहितचिच्चमत्कारप्रतिपक्षभूत आरम्भो व्यापारस्ताभ्यां मूर्च्छारम्भाभ्यां विमुक्तं मूर्च्छारम्भविमुक्तम्। **जुत्तं उवजोगजोगसुद्धीहिं** निर्विकारस्वसंवेदनलक्षण उपयोगः, निर्विकल्पसमाधिर्योगः, तयोरुपयोगयोगयोः शुद्धिरुपयोगयोगशुद्धिस्तया युक्तम्। **ण परावेक्खं** निर्मलानुभूतिपरिणतेः परस्य परद्रव्यस्यापेक्षया रहितं, न परापेक्षम्।

टीका :– प्रथम तो अपनेसे, यथोक्तक्रमसे [१]यथाजातरूपधर हुए आत्माके [२]अयथाजातरूपधरपनेके कारणभूत मोहरागद्वेषादिभावोंका अभाव होता ही है; और उनके अभावके कारण, जो कि उनके सद्भावमें होते हैं ऐसे (१) वस्त्राभूषणका धारण, (२) सिर और डाढ़ी-मूछोंके बालोंका रक्षण, (३) [३]सकिंचनत्व, (४) सावद्ययोगसे युक्तता तथा (५) शारीरिक संस्कारका करना, इन (पाँचों) का अभाव होता है; जिससे (उस आत्माके) (१) जन्मसमयके रूप जैसा रूप, (२) सिर और डाढ़ी-मूछके बालोंका लोंच, (३) शुद्धत्व, (४) हिंसादिरहितता तथा (५) अप्रतिकर्मत्व (शारीरिक शृंगार-संस्कारका अभाव) होता ही है। इसलिये यह बहिरंग लिंग है।

और फिर, आत्माके यथाजातरूपधरपनेसे दूर किया गया जो अयथाजातरूपधरपना, उसके कारणभूत मोहरागद्वेषादिभावोंका अभाव होनेसे ही जो उनके सद्भावमें होते हैं ऐसे जो (१) ममत्वके और [४]कर्मप्रक्रमके परिणाम, (२) शुभाशुभ उपरक्त उपयोग और [५]तत्पूर्वक तथाविध योगकी अशुद्धिसे युक्तता तथा (३) परद्रव्यसे सापेक्षता; इस (तीनों) का अभाव होता है; इसलिये (उस आत्माके) (१) मूर्छा और आरम्भसे रहितता, (२) उपयोग और योगकी शुद्धिसे युक्तता तथा (३) परकी अपेक्षासे रहितता होती ही है। इसलिये यह अंतरंग लिंग है॥ २०५-२०६॥

---

१ यथाजातरूपधर = (आत्माका) सहजरूप धारण करनेवाला।

२ अयथाजातरूपधर = (आत्माका) असहजरूप धारण करनेवाला।

३ सकिंचन = जिसके पास कुछ भी (परिग्रह) हो ऐसा।

४ कर्मप्रक्रम = कामको अपने ऊपर लेना; काममें युक्त होना, कामकी व्यवस्था।

५ तत्पूर्वक = उपरक्त (मलिन) उपयोगपूर्वक।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यथाजातरूपधरत्वप्रत्ययमोहरागद्वेषादिभावानामभावादेव तद्भावभाविनो ममत्वकर्म-प्रक्रमपरिणामस्य शुभाशुभोपरक्तोपयोगतत्पूर्वकतथाविधयोगाशुद्धियुक्तत्वस्य परद्रव्य-सापेक्षत्वस्य चाभावान्मूर्च्छारम्भवियुक्तत्वमुपयोगयोगशुद्धियुक्तत्वमपरापेक्षत्वं च भवत्येव, तदेतदन्तरंगं लिंगम् ॥ २०५ । २०६ ॥

अथैतदुभयलिंगमादायैतदेतत्कृत्वा च श्रमणो भवतीति भवतिक्रियायां बन्धुवर्ग-प्रच्छनक्रियादिशेषसकलक्रियाणां चैककर्तृकत्वमुद्योतयन्नियता श्रामण्यप्रतिपत्तिर्भवतीत्युप-दिशति –

आदाय तं पि लिंगं गुरुणा परमेण तं णमंसित्ता ।
सोच्चा सवदं किरियं उवट्ठिदो होदि सो समणो ॥ २०७ ॥

आदाय तदपि लिंगं गुरुणा परमेण तं नमस्कृत्य ।
श्रुत्वा सव्रतां क्रियामुपस्थितो भवति स श्रमणः ॥ २०७ ॥

अपुणब्भवकारणं पुनर्भवविनाशकशुद्धात्मपरिणामाविपरीतापुनर्भवस्य मोक्षस्य कारणमपुनर्भव-कारणम् । **जेण्हं** जिनस्य संबन्धीदं जिनेन प्रोक्तं वा जैनम् । एवं पञ्चविशेषणविशिष्टं भवति । किम् । **लिंगं** भावलिङ्गमिति । इति द्रव्यलिङ्गभावलिङ्गस्वरूपं ज्ञातव्यम् ॥ २०५ । २०६ ॥ अथैतल्लिङ्ग-द्वैतमादाय पूर्वं भाविनैगमनयेन यदुक्तं पञ्चाचारस्वरूपं तदिदानीं स्वीकृत्य तदाधारेणोपस्थितः स्वस्थो भूत्वा श्रमणो भवतीत्याख्याति – **आदाय तं पि लिंगं** आदाय गृहीत्वा तत्पूर्वोक्तं लिङ्गद्वयमपि । कथंभूतम् । दत्तमिति क्रियाध्याहारः । केन दत्तम् । **गुरुणा परमेण** दिव्यध्वनिकाले परमागमोपदेश-

---

अब (श्रामण्यार्थी) इन दोनों लिंगोंको ग्रहण करके और इतना-इतना करके श्रमण होता है – इसप्रकार [1]भवतिक्रियामें, बंधुवर्गसे विदा लेनेरूप क्रियासे लेकर शेष सभी क्रियाओंका एक कर्ता दिखलाते हुए, इतनेसे (अर्थात् इतना करनेसे) श्रामण्यकी प्राप्ति होती है, ऐसा उपदेश करते हैं :–

गाथा २०७

अन्वयार्थ :– [**परमेण गुरुणा**] परम गुरुके द्वारा प्रदत्त [**तदपि लिंगम्**] उन दोनों लिंगोंको [**आदाय**] ग्रहण करके, [**तं नमस्कृत्य**] उन्हें नमस्कार करके [**सव्रतां क्रियां**

[1] भवतिक्रिया = होनेरूप क्रिया ।

ग्रही परमगुरु-दी धेल लिंग, नमस्करण करी तेमने ।
व्रत ने क्रिया सुणी, थई उपस्थित, थाय छे मुनिराजअे ॥ २०७ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

ततोऽपि श्रमणो भवितुमिच्छन् लिंगद्वैतमादत्ते, गुरुं नमस्यति, व्रतक्रिये शृणोति, अथोपतिष्ठते; उपस्थितश्च पर्याप्तश्रामण्यसामग्रीकः श्रमणो भवति। तथाहि – तत इदं यथाजातरूपधरत्वस्य गमकं बहिरंगमन्तरंगमपि लिंगं प्रथममेव गुरुणा परमेणार्हद्भट्टारकेण तदात्वे च दीक्षाचार्येण तदादानविधानप्रतिपादकत्वेन व्यवहारतो दीयमानत्वाद्दत्तमादानक्रियया संभाव्य तन्मयो भवति। ततो भाव्यभावकभावप्रवृत्तेतरेतरसंवलनप्रत्यस्त-

---

रूपेणार्हद्भट्टारकेण, दीक्षाकाले तु दीक्षागुरुणा। लिङ्गग्रहणानन्तरं तं **णमंसित्ता** तं गुरुं नमस्कृत्य, **सोच्चा** तदनन्तरं श्रुत्वा। काम्। **किरियं** क्रियां बृहत्प्रतिक्रमणाम्। किंविशिष्टाम्। **सव्वदं** सव्रतां व्रतारोपणसहिताम्। **उवट्ठिदो** ततश्चोपस्थितः स्वस्थः सन् **होदि सो समणो** स पूर्वोक्तस्तपोधन इदानीं श्रमणो भवतीति। इतो विस्तरः– पूर्वोक्तलिङ्गद्वयग्रहणानन्तरं पूर्वसूत्रोक्तपञ्चाचारमाश्रयति,

---

श्रुत्वा] व्रत सहित क्रियाको सुनकर [**उपस्थितः**] उपस्थित (आत्माके समीप स्थित) होता हुआ [**सः**] वह [**श्रमणः भवति**] श्रमण होता है।

टीका :–तत्पश्चात् श्रमण होनेका इच्छुक दोनों लिंगोंको ग्रहण करता है, गुरुको नमस्कार करता है, व्रत तथा क्रियाको सुनता है और उपस्थित होता है; उपस्थित होता हुआ श्रामण्यकी सामग्री पर्याप्त (परिपूर्ण) होनेसे श्रमण होता है। वह इसप्रकार –

परम गुरु – प्रथम ही अर्हंतभट्टारक और उस समय (दीक्षाकालमें) दीक्षाचार्य– इस यथाजातरूपधरत्वके सूचक बहिरंग तथा अंतरंग लिंगके ग्रहणकी-विधिके प्रतिपादक होनेसे, व्यवहारसे उस लिंगके देनेवाले हैं। इसप्रकार उनके द्वारा दिये गये उन लिंगोंको ग्रहण क्रियाके द्वारा संभावित-सम्मानित करके (श्रामण्यार्थी) तन्मय होता है। और फिर जिन्होंने सर्वस्व दिया है ऐसे [१]मूल और उत्तर परमगुरुको, [२]भाव्यभावकताके कारण प्रवर्तित *इतरेतरमिलनके कारण जिसमेंसे स्व-परका विभाग अस्त हो गया है ऐसी नमस्कार क्रियाके द्वारा संभावित करके-सम्मानित करके [३]भावस्तुति वन्दनामय होता है। पश्चात् सर्व सावद्ययोगके प्रत्याख्यानस्वरूप एक महाव्रतको सुननेरूप श्रुतज्ञानके द्वारा समयमें परिणमित होते हुए आत्माको जानता हुआ [४]सामायिकमें आरूढ़ होता है। पश्चात्

---

[१] मूल परमगुरु अर्हन्तदेव तथा उत्तरपरमगुरु दीक्षाचार्यके प्रति अत्यन्त आराध्यभावके कारण आराध्य परमगुरु और आराधक ऐसे निजका भेद अस्त होजाता है।

[२] भाव्य और भावकके अर्थके लिये देखो पृष्ठ ८ का पाद टिप्पण।

★ इसका स्पष्टीकरण प्रथमकी ५ गाथाओंके टिप्पण पत्रमें देखिये।

[३] भावस्तुतिवन्दनामय = भावस्तुतिमय और भाववन्दनामय।

[४] समयमें (आत्मद्रव्यमें, निजद्रव्यस्वभावमें) परिणमित होना सो सामायिक है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

मितस्वपरविभागत्वेन दत्तसर्वस्वमूलोत्तरपरमगुरुनमस्क्रिययया संभाव्य भावस्तववन्दनामयो भवति। ततः सर्वसावद्ययोगप्रत्याख्यानलक्षणैकमहाव्रतश्रवणात्मना श्रुतज्ञानेन समये भवन्तमात्मानं जानन् सामायिकमधिरोहति। ततः प्रतिक्रमणालोचनप्रत्याख्यानलक्षणक्रियाश्रवणात्मना श्रुतज्ञानेन त्रैकालिककर्मभ्यो विविच्यमानमात्मानं जानन्नतीतप्रत्युत्पन्नानुपस्थितकायवाङ्मनःकर्मविविक्तत्वमधिरोहति। ततः समस्तावद्यकर्मायतनं कायमुत्सृज्य यथाजातरूपं स्वरूपमेकमेकाग्रेणालम्ब्य व्यवतिष्ठमान उपस्थितो भवति उपस्थितस्तु सर्वत्र समदृष्टित्वात्साक्षाच्छ्रमणो भवति ॥ २०७ ॥

अथाविच्छिन्नसामायिकाधिरूढोऽपि श्रमणः कदाचिच्छेदोपस्थापनमर्हतीत्युपदिशति-

वदसमिदिंदियरोधो लोचावस्सयमचेलमण्हाणं।
खिदिसयणमदंतवणं ठिदिभोयणमेगभत्तं च ॥ २०८ ॥

ततश्चानन्तज्ञानादिगुणस्मरणरूपेण भावनमस्कारेण तथैव तद्गुणप्रतिपादकवचनरूपेण द्रव्यनमस्कारेण च गुरुं नमस्करोति। ततः परं समस्तशुभाशुभपरिणामनिवृत्तिरूपं स्वस्वरूपे निश्चलावस्थानं परमसामायिकव्रतमारोहति स्वीकरोति। मनोवचनकायैः कृतकारितानुमतैश्च जगत्त्रये कालत्रयेऽपि समस्तशुभाशुभकर्मभ्यो भिन्ना निजशुद्धात्मपरिणतिलक्षणा या तु क्रिया सा निश्चयेन बृहत्प्रतिक्रमणा भण्यते। व्रतारोपणानन्तरं तां च शृणोति। ततो निर्विकल्पसमाधिबलेन कायमुत्सृज्योपस्थितो भवति। ततश्चैवं परिपूर्णश्रमणसामग्र्यां सत्यां परिपूर्णश्रमणो भवतीत्यर्थः ॥ २०७ ॥ एवं दीक्षाभिमुखपुरुषस्य दीक्षाविधानकथनमुख्यत्वेन प्रथमस्थले गाथासप्तकं गतम्। अथ निर्विकल्पसामायिकसंयमे यदा च्युतो भवति तदा सविकल्पं छेदोपस्थापनचारित्रमारोहतीति प्रतिपादयति –

---

[1]प्रतिक्रमण-आलोचना-प्रत्याख्यान-स्वरूप क्रियाको सुननेरूप श्रुतज्ञानके द्वारा त्रैकालिक कर्मोंसे विविक्त (भिन्न) किये जानेवाले आत्माको जानता हुआ, अतीत-अनागत-वर्तमान, मन-वचन-कायसंबंधी कर्मोंसे विविक्तता (भिन्नता) में आरूढ़ होता है। पश्चात् समस्त सावद्य कर्मोंके [2]आयतनभूत कायका उत्सर्ग (उपेक्षा) करके यथाजातरूपवाले स्वरूपको, एकको एकाग्रतया अवलम्बित करके रहता हुआ, उपस्थित होता है। और उपस्थित होता हुआ, सर्वत्र समदृष्टिपनेके कारण साक्षात् श्रमण होता है ॥ २०७ ॥

अविच्छिन्न सामायिकमें आरूढ़ हुआ होने पर भी श्रमण कदाचित् छेदोपस्थापनाके योग्य है, ऐसा अब उपदेश करते हैं :–

---

[1] अतीत-वर्तमान-अनागत काय-वचन-मनसंबंधी कर्मोंसे भिन्न निजशुद्धात्मपरिणति वह प्रतिक्रमण-आलोचना-प्रत्याख्यानरूप क्रिया है।

[2] आयतन = स्थान, निवास।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

एदे खलु मूलगुणा समणाणं जिणवरेहिंपण्णत्ता ।
तेसु पमत्तो समणो छेदोवट्ठावगो होदि ॥२०९॥ [जुग्मं]

व्रतसमितीन्द्रियरोधो लोचावश्यकमचेलमस्नानम् ।
क्षितिशयनमदन्तधावनं स्थितिभोजनमेकभक्तं च ॥ २०८ ॥

एते खलु मूलगुणाः श्रमणानां जिनवरैः प्रज्ञप्ताः ।
तेषु प्रमत्तः श्रमणः छेदोपस्थापको भवति ॥ २०९ ॥ [युग्मम्]

वदसमिदिंदियरोधो व्रतानि च समितयश्चेन्द्रियरोधश्च व्रतसमितीन्द्रियरोधः। **लोचावस्सयं** लोचश्चावश्यकानि च लोचावश्यकं, "समाहारस्यैकवचनम्"। **अचेलमण्हाणं खिदिसयणमदंतवणं ठिदिभोयणमेगभत्तं च** अचेलकास्नानक्षितिशयनादन्तधावनस्थितिभोजनैकभक्तानि। **एदे खलु मूलगुणा समणाणं जिणवरेहिं पण्णत्ता** एते खलु स्फुटं अष्टाविंशतिमूलगुणाः श्रमणानां जिनवरैः प्रज्ञप्ताः। **तेसु पमत्तो समणो छेदोवट्ठावगो होदि** तेषु मूलगुणेषु यदा प्रमत्तः च्युतो भवति। सः कः। श्रमणस्तपोधनस्तदाकाले छेदोपस्थापको भवति। छेदे व्रतखण्डने सति पुनरप्युपस्थापकश्छेदोपस्थापक इति। तथाहि – निश्चयेन

गाथा २०८-२०९

अन्वयार्थ :– [**व्रतसमितीन्द्रियरोधः**] व्रत, समिति, इन्द्रियरोध, [**लोचावश्यकम्**] लोच, आवश्यक, [**अचेलम्**] अचेलपना, [**अस्नानं**] अस्नान, [**क्षितिशयनम्**] भूमिशयन, [**अदंतधावनं**] अदंतधावन, [**स्थितिभोजनम्**] खड़े-खड़े भोजन, [**च**] और [**एकभक्तं**] एकबार आहार – [**एते**] ये [**खलु**] वास्तवमें [**श्रमणानां मूलगुणाः**] श्रमणोंके मूलगुण [**जिनवरैः प्रज्ञप्ताः**] जिनवरोंने कहे हैं; [**तेषु**] उनमें [**प्रमत्तः**] प्रमत्त होता हुआ [**श्रमणः**] श्रमण [**छेदोपस्थापकः भवति**] छेदोपस्थापक होता है ।

टीका :– सर्व सावद्ययोगके प्रत्याख्यानस्वरूप एक महाव्रतकी व्यक्तियाँ (विशेष, प्रगटताएँ) होनेसे हिंसा, असत्य, चोरी, अब्रह्म और परिग्रहकी विरतिस्वरूप पांच प्रकारके व्रत तथा उसकी [1]परिकरभूत पाँच प्रकारकी समिति, पाँच प्रकारका इन्द्रिय-

[1] परिकर = अनुसरण करनेवाला समुदाय; अनुचरसमूह; [समिति, इन्द्रियरोध, इत्यादि गुण पाँच व्रतोंके पीछे-पीछे होते ही हैं, इसलिये समिति इत्यादि गुण पाँच व्रतोंका परिकर अर्थात् अनुचर समूह है] ।

व्रत, समिति, लुंचन, आवश्यक, अणचेल, इन्द्रियरोधनं, ।
नहि स्नान-दातण, अेक भोजन, भूशयन, स्थितिभोजनं ॥ २०८ ॥

–आ मूलगुण श्रमणो तणा जिनदेवथी प्रज्ञप्त छे ।
तेमां प्रमत्त थतां श्रमण छेदोपस्थापक थाय छे ॥ २०९ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

सर्वसावद्ययोगप्रत्याख्यानलक्षणैकमहाव्रतव्यक्तिवशेन हिंसानृतस्तेयाब्रह्मपरिग्रह-विरत्यात्मकं पञ्चतयं व्रतं, तत्परिकरश्च पञ्चतयी समितिः पञ्चतय इन्द्रियरोधो लोचः षट्तयमावश्यकमचेलक्यमस्नानं क्षितिशयनमदन्तधावनं स्थितिभोजनमेकभक्तश्चैवं एते निर्विकल्पसामायिकसंयमविकल्पत्वात् श्रमणानां मूलगुणा एव। तेषु यदा निर्विकल्प-सामायिकसंयमाधिरूढत्वेनानभ्यस्तविकल्पत्वात्प्रमाद्यति तदा केवलकल्याणमात्रार्थिनः कुण्डलवलयांगुलीयादिपरिग्रहः किल श्रेयान्, न पुनः सर्वथा कल्याणलाभ एवेति संप्रधार्य विकल्पेनात्मानमुपस्थापयन् छेदोपस्थापको भवति ॥ २०८। २०९ ॥

अथास्य प्रव्रज्यादायक इव छेदोपस्थापकः परोऽप्यस्तीत्याचार्यविकल्पप्रज्ञापनद्वारे-णोपदिशति –

मूलमात्मा, तस्य केवलज्ञानाद्यनन्तगुणा मूलगुणास्ते च निर्विकल्पसमाधिरूपेण परमसामायिकाभिधानेन निश्चयैकव्रतेन मोक्षबीजभूतेन मोक्षे जाते सति सर्वे प्रकटा भवन्ति। तेन कारणेन तदेव सामायिकं मूलगुणव्यक्तिकारणत्वात् निश्चयमूलगुणो भवति। यदा पुनर्निर्विकल्पसमाधौ समर्थो न भवत्ययं जीवस्तदा यथा कोऽपि सुवर्णार्थी पुरुषः सुवर्णमलभमानस्तत्पर्यायानपि कुण्डलादीन् गृह्णाति, न च सर्वथा त्यागं करोति; तथायं जीवोऽपि निश्चयमूलगुणाभिधानपरमसमाध्यभावे छेदोपस्थापनं चारित्रं गृह्णाति। छेदे सत्युपस्थापनं छेदोपस्थापनम्। अथवा छेदेन व्रतभेदेनोपस्थापनं छेदोपस्थापनम्। तच्च संक्षेपेण पञ्चमहाव्रतरूपं भवति। तेषां व्रतानां च रक्षणार्थं पञ्चसमित्यादिभेदेन पुनरष्टाविंशतिमूल-गुणभेदा भवन्ति। तेषां च मूलगुणानां रक्षणार्थं द्वाविंशतिपरीषहजयद्वादशविधतपश्चरणभेदेन चतुस्त्रिंशदुत्तरगुणा भवन्ति। तेषां च रक्षणार्थं देवमनुष्यतिर्यगचेतनकृतचतुर्विधोपसर्गजयद्वादशानु-प्रेक्षाभावनादयश्चेत्यभिप्रायः ॥ २०८। २०९ ॥ एवं मूलोत्तरगुणकथनरूपेण द्वितीयस्थले सूत्रद्वयं

रोध, लोच, छह प्रकारके आवश्यक, [1]अचेलपना, अस्नान, भूमिशयन, अदंतधावन (दातुन न करना), खड़े-खड़े भोजन, और एकबार आहार – इसप्रकार ये (अट्ठाईस) निर्विकल्प सामायिकसंयमके विकल्प (भेद) होनेसे श्रमणोंके मूलगुण ही हैं। जब (श्रमण) निर्विकल्प सामायिकसंयममें आरूढ़ताके कारण जिसमें विकल्पोंका अभ्यास (सेवन) नहीं है ऐसी दशामेंसे च्युत होता है, तब 'केवलसुवर्णमात्रके अर्थीको कुण्डल, कंकण, अंगूठी आदिको ग्रहण करना (भी) श्रेय है, किन्तु ऐसा नहीं है कि (कुण्डल इत्यादिका ग्रहण कभी न करके) सर्वथा स्वर्णकी ही प्राप्ति करना ही श्रेय है' ऐसा विचार करके मूलगुणोंमें विकल्परूपसे (भेदरूपसे) अपनेको स्थापित करता हुआ छेदोपस्थापक होता है ॥ २०८-२०९ ॥

---

[1] अचेलपना = वस्त्ररहितपना, दिगम्बरपना।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

लिंगग्गहणे तेसिं गुरु त्ति पव्वज्जदायगो होदि ।
छेदेसूवट्ठवगा सेसा णिज्जावगा समणा ॥ २१० ॥

लिङ्गग्रहणे तेषां गुरुरिति प्रव्रज्यादायको भवति ।
छेदयोरुपस्थापकाः शेषा निर्यापकाः श्रमणाः ॥ २१० ॥

यतो लिङ्गग्रहणकाले निर्विकल्पसामायिकसंयमप्रतिपादकत्वेन यः किलाचार्यः प्रव्रज्यादायकः स गुरुः, यः पुनरनन्तरं सविकल्पच्छेदोपस्थापनसंयमप्रतिपादकत्वेन छेदं

गतम् । अथास्य तपोधनस्य प्रव्रज्यादायक इवान्योऽपि निर्यापकसंज्ञो गुरुरस्ति इति गुरुव्यवस्थां निरूपयति – **लिंगग्गहणे तेसिं** लिङ्गग्रहणे तेषां तपोधनानां **गुरु त्ति होदि** गुरुर्भवतीति । स कः । **पव्वज्जदायगो** निर्विकल्पसमाधिरूपपरमसामायिकप्रतिपादको योऽसौ प्रव्रज्यादायकः स एव दीक्षागुरुः, **छेदेसु अ वट्ठगा** छेदयोश्च वर्तकाः ये **सेसा णिज्जावगा समणा** ते शेषाः श्रमणा निर्यापका भवन्ति शिक्षागुरवश्च भवन्तीति । अयमत्रार्थः – निर्विकल्पसमाधिरूपसामायिकस्यैकदेशेन च्युतिरेकदेशच्छेदः, सर्वथा च्युतिः सकलच्छेद इति देशसकलभेदेन द्विधा छेदः । तयोश्छेदयोर्ये प्रायश्चित्तं दत्वा संवेग-

---

अब इनके (श्रमणके) प्रव्रज्यादायककी भाँति छेदोपस्थापक पर (दूसरा) भी होता है ऐसा, आचार्यके भेदोंके प्रज्ञापन द्वारा उपदेश करते हैं :-

गाथा २१०

अन्वयार्थ :– [**लिंगग्रहणे**] लिंगग्रहणके समय [**प्रव्रज्यादायकः भवति**] जो प्रव्रज्या (दीक्षा) दायक हैं वह [**तेषां गुरुः इति**] उनके गुरु हैं और [**छेदयोः उपस्थापकाः**] जो [1]छेदद्वयमें उपस्थापक हैं (अर्थात् १ – जो भेदोंमें स्थापित करते हैं तथा २ – जो संयममें छेद होनेपर पुनः स्थापित करते हैं) [**शेषाः श्रमणाः**] वे शेष श्रमण [**निर्यापकाः**] [2]निर्यापक हैं ।

टीका :– जो आचार्य लिंगग्रहणके समय निर्विकल्प सामायिकसंयमके प्रतिपादक होनेसे प्रव्रज्यादायक हैं, वे गुरु हैं ; और तत्पश्चात् तत्काल ही जो (आचार्य) सविकल्प छेदोपस्थापनासंयमके प्रतिपादक होनेसे 'छेदके प्रति उपस्थापक (भेदमें स्थापित करने-

---

[1] छेदद्वय=दो प्रकारके छेद । [यहाँ, (१) संयममें जो २८ मूलगुणरूप भेद होते हैं उसे भी छेद कहा है और (२) खण्डन अथवा दोषको भी छेद कहा है ।]

[2] निर्यापक = निर्वाह करनेवाला; सदुपदेशसे दृढ़ करनेवाला; शिक्षागुरु, श्रुतगुरु ।

जे लिंगग्रहणे साधुपद देनार ते गुरु जाणवा ।
छेदद्वये स्थापन करे ते शेष मुनि निर्यापका ॥ २१० ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

प्रत्युपस्थापकः स निर्यापकः, योऽपि छिन्नसंयमप्रतिसंधानविधानप्रतिपादकत्वेन छेदे सत्युपस्थापकः सोऽपि निर्यापक एव। ततश्छेदोपस्थापकः परोऽप्यस्ति ॥ २१० ॥

अथ छिन्नसंयमप्रतिसंधानविधानमुपदिशति—

पयदम्हि समारद्धे छेदो समणस्स कायचेट्ठम्हि।
जायदि जदि तस्स पुणो आलोयणपुव्विया किरिया ॥२११॥
छेदुवजुत्तो समणो समणं ववहारिणं जिणमदम्हि।
आसेज्जालोचित्ता उवदिट्ठं तेण कायव्वं ॥२१२॥ [जुगलं]

प्रयतायां समारब्धायां छेदः श्रमणस्य कायचेष्टायाम्।
जायते यदि तस्य पुनरालोचनपूर्विका क्रिया ॥२११॥
छेदोपयुक्तः श्रमणः श्रमणं व्यवहारिणं जिनमते।
आसाद्यालोच्योपदिष्टं तेन कर्तव्यम् ॥२१२॥ [युग्मं]

वैराग्यजनकपरमागमवचनैः संवरणं कुर्वन्ति ते निर्यापकाः शिक्षागुरवः श्रुतगुरवश्चेति भण्यन्ते। दीक्षादायकस्तु दीक्षागुरुरित्यभिप्रायः ॥ २१० ॥ अथ पूर्वसूत्रोक्तच्छेदद्वयस्य प्रायश्चित्तविधानं कथयति –

वाले)' हैं, वे निर्यापक हैं; उसीप्रकार जो (आचार्य) [1]छिन्न संयमके [2]प्रतिसंधानकी विधिके प्रतिपादक होनेसे 'छेद होनेपर उपस्थापक (संयममें छेद होनेपर उसमें पुनः स्थापित करनेवाले)' हैं, वे भी निर्यापक ही हैं। इसलिये [3]छेदोपस्थापक, पर भी होते हैं ॥ २१० ॥

---

[1] छिन्न=छेदको प्राप्त; खण्डित; टूटा हुआ, दोष प्राप्त।

[2] प्रतिसंधान=पुनः जोड़ देना वह; दोषोंको दूर करके एकसा (दोष रहित) कर देना वह।

[3] छेदोपस्थापकके दो अर्थ हैं : (१) जो 'छेद (भेद) के प्रति उपस्थापक' है, अर्थात् जो २८ मूलगुणरूप भेदको समझाकर उसमें स्थापित करता है वह छेदोपस्थापक है; तथा (२) जो 'छेदके होनेपर उपस्थापक' है, अर्थात् संयमके छिन्न (खण्डित) होनेपर उसमें पुनः स्थापित करता है, वह भी छेदोपस्थापक है।

जो छेदथाय प्रयत्न सह कृत कायनी चेष्टाविषे।
आलोचना पूर्वक क्रिया कर्त्तव्य छे ते साधुने ॥ २११ ॥
छेदोपयुक्त मुनि, श्रमण व्यवहारविज्ञ कने जई।
निज दोष आलोचन करी, श्रमणोपदिष्ट करे विधि ॥ २१२ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

द्विविधः किल संयमस्य छेदः, बहिरङ्गोऽन्तरङ्गश्च। तत्र कायचेष्टामात्राधिकृतो बहिरङ्गः, उपयोगाधिकृतः पुनरन्तरंगः। तत्र यदि सम्यगुपयुक्तस्य श्रमणस्य प्रयत्नसमारब्धायाः काय-चेष्टायाः कथंचिद्बहिरंगच्छेदो जायते तदा तस्य सर्वथांतरंगच्छेदवर्जितत्वादालोचनपूर्विकया

पयदम्हि समारद्धे छेदो समणस्स कायचेट्ठम्हि जायदि जदि प्रयतायां समारब्धायां छेदः श्रमणस्य कायचेष्टायां जायते यदि चेत्। अथ विस्तरः – छेदो जायते यदि चेत्। स्वस्थभावच्युतिलक्षणः छेदो भवति। कस्याम्। कायचेष्टायाम्। कथंभूतायाम्। प्रयतायां स्वस्थभावलक्षणप्रयत्नपरायां समारब्धायां अशनशयनयानस्थानादिप्रारब्धायाम्। **तस्स पुणो आलोयणपुव्विया किरिया** तस्य पुनरालोचनपूर्विका क्रिया। तदाकाले तस्य तपोधनस्य स्वस्थभावस्य बहिरङ्गसहकारिकारणभूता प्रतिक्रमणलक्षणालोचनपूर्विका पुनः क्रियैव प्रायश्चित्तं प्रतिकारो भवति, न चाधिकम्। कस्मादिति

अब छिन्नसंयमके प्रतिसंधानकी विधिका उपदेश करते हैं :—

गाथा २११-२१२

अन्वयार्थ :– [**यदि**] यदि [**श्रमणस्य**] श्रमणके [**प्रयतायां**] [1]प्रयत्नपूर्वक [**समारब्धायां**] की जानेवाली [**कायचेष्टायां**] कायचेष्टामें [**छेदः जायते**] छेद होता है तो [**तस्य पुनः**] उसे तो [**आलोचनापूर्विका क्रिया**] [2]आलोचनापूर्वक क्रिया करना चाहिये।

[**श्रमणः छेदोपयुक्तः**] (किन्तु) यदि श्रमण छेदमें उपयुक्त हुआ हो तो उसे [**जिनमते**] जैनमतमें [**व्यवहारिणं**] व्यवहारकुशल [**श्रमणं आसाद्य**] श्रमणके पास जाकर [**आलोच्य**] [3]आलोचना करके (अपने दोषका निवेदन करके), [**तेन उपदिष्टं**] वे जैसा उपदेश दें वह [**कर्तव्यम्**] करना चाहिये।

टीका :– संयमका छेद दो प्रकारका है; बहिरंग और अन्तरंग। उसमें मात्र कायचेष्टा संबंधी वह बहिरंग है और उपयोग संबंधी वह अन्तरंग है। उसमें, यदि भलीभाँति उपर्युक्त श्रमणके प्रयत्नकृत कायचेष्टाका कथंचित बहिरंग छेद होता है, तो

---

[1] मुनिके (मुनित्वोचित) शुद्धोपयोग वह अन्तरंग अथवा निश्चयप्रयत्न है, और उस शुद्धोपयोगदशामें प्रवर्तमान (हठ रहित) देहचेष्टादि संबन्धी शुभोपयोग वह बहिरंग अथवा व्यवहारप्रयत्न है। [जहाँ शुद्धोपयोगदशा नहीं होती वहाँ शुभोपयोग हठसहित होता है; वह शुभोपयोग व्यवहार-प्रयत्नको भी प्राप्त नहीं होता।]

[2] आलोचना = सूक्ष्मतासे देख लेना वह, सूक्ष्मतासे विचारना वह, ठीक ध्यानमें लेना वह।

[3] निवेदन ; कथन।

[२११ वीं गाथामें आलोचनाका प्रथम अर्थ घटित होता है और २१२ वीं में दूसरा]

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

क्रिययैव प्रतिकारः। यदा तु स एवोपयोगाधिकृतच्छेदत्वेन साक्षाच्छेद एवोपयुक्तो भवति तदा जिनोदितव्यवहारविधिविदग्धश्रमणाश्रययालोचनपूर्वकतदुपदिष्टानुष्ठानेन प्रतिसंधानम् ॥ २११ । २१२ ॥

अथ श्रामण्यस्य छेदायतनत्वात् परद्रव्यप्रतिबन्धाः प्रतिषेध्या इत्युपदिशति –

अधिवासे व विवासे छेदविहूणो भवीय सामण्णे ॥
समणो विहरदु णिच्चं परिहरमाणो णिबंधाणि ॥ २१३ ॥

अधिवासे वा विवासे छेदविहीनो भूत्वा श्रामण्ये ।
श्रमणो विहरतु नित्यं परिहरमाणो निबन्धान् ॥ २१३ ॥

चेत्। अभ्यन्तरे स्वस्थभावचलनाभावादिति प्रथमगाथा गता। **छेदपउत्तो समणो** छेदे प्रयुक्तः श्रमणो, निर्विकारस्वसंवित्तिभावनाच्युतिलक्षणच्छेदेन यदि चेत् प्रयुक्तः सहितः श्रमणो भवति। **समणं ववहारिणं जिणमदम्हि** श्रमणं व्यवहारिणं जिनमते, तदा जिनमते व्यवहारज्ञं प्रायश्चित्तकुशलं श्रमणं **आसेज्ज** आसाद्य प्राप्य, न केवलमासाद्य **आलोचित्ता** निःप्रपञ्चभावेनालोच्य दोषनिवेदनं कृत्वा। **उवदिट्ठं तेण कायव्वं** उपदिष्टं तेन कर्तव्यम्। तेन प्रायश्चित्तपरिज्ञानसहिताचार्येण निर्विकारस्वसंवित्तिभावनानुकूलं यदुपदिष्टं प्रायश्चित्तं तत्कर्तव्यमिति सूत्रतात्पर्यम् ॥ २११ । २१२ ॥ एवं गुरुव्यवस्था-

---

वह सर्वथा अन्तरंग छेदसे रहित है इसलिये आलोचनापूर्वक क्रियासे ही उसका प्रतीकार (इलाज) होता है। किन्तु यदि वही श्रमण उपयोगसंबंधी छेद होनेसे साक्षात् छेदमें ही उपयुक्त होता है तो जिनोक्त व्यवहारविधिमें कुशल श्रमणके आश्रयसे, आलोचनापूर्वक, उनके द्वारा उपदिष्ट अनुष्ठान द्वारा (संयमका) प्रतिसंधान होता है।

भावार्थ :—यदि मुनिके स्वस्थभावलक्षण प्रयत्न सहित की जानेवाली अशन-शयन-गमनादिक शारीरिक चेष्टासंबंधी छेद होता है तो उस तपोधनके स्वस्थभावकी बहिरंग सहकारीकारणभूत प्रतिक्रमणस्वरूप आलोचनापूर्वक क्रियासे ही उसका प्रतीकार–प्रायश्चित्त होजाता है, क्योंकि वह स्वस्थभावसे चलित नहीं हुआ है। किन्तु यदि उसके निर्विकार स्वसंवेदनभावनासे च्युतिस्वरूप छेद होता है, तो उसे जिनमतमें व्यवहारज्ञ – प्रायश्चित्तकुशल – आचार्यके निकट जाकर, निष्प्रपंचभावसे दोषका निवेदन करके, वे आचार्य निर्विकार स्वसंवेदनभावनाके अनुकूल जो कुछ भी प्रायश्चित्त उपदेशें वह करना चाहिये ॥२११–२१२॥

प्रतिबंध परित्यागी सदा अधिवास अगर विवासमां ।
मुनिराज विहरो सर्वदा थई छेदहीन श्रामण्यमां ॥ २१३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

सर्व एव हि परद्रव्यप्रतिबन्धा उपयोगोपरञ्जकत्वेन निरुपरागोपयोगरूपस्य श्रामण्यस्य छेदायतनानि तदभावादेवाछिन्नश्रामण्यम्। अत आत्मन्येवात्मनो नित्याधिकृत्य वासे वा, गुरुत्वेन गुरूनधिवृत्य वासे वा, गुरुभ्यो विशिष्टे वासे वा, नित्यमेव प्रतिषेधयन् परद्रव्यप्रतिबन्धान् श्रामण्ये छेदविहीनो भूत्वा श्रमणो वर्तताम् ॥ २१३ ॥

कथनरूपेण प्रथमगाथा, यथैव प्रायश्चित्तकथनार्थं गाथाद्वयमिति समुदायेन तृतीयस्थले गाथात्रयं गतम्। अथ निर्विकारश्रामण्यच्छेदजनकान्परद्रव्यानुबन्धान्निषेधयति – **विहरदु** विहरतु विहारं करोतु। स कः। **समणो** शत्रुमित्रादिसमचित्तश्रमणः। **णिच्चं** नित्यं सर्वकालम्। किं कुर्वन्सन्। **परिहरमाणो** परिहरन्सन्। कान्। **णिबंधाणि** चेतनाचेतनमिश्रपरद्रव्येष्वनुबन्धान्। क्व विहरतु। **अधिवासे** अधिकृतगुरुकुलवासे निश्चयेन स्वकीयशुद्धात्मवासे वा, **विवासे** गुरुविरहितवासे वा। किं कृत्वा। **सामण्णे** निजशुद्धात्मानुभूतिलक्षणनिश्चयचारित्रे **छेदविहूणो भवीय** छेदविहीनो भूत्वा, रागादिरहितनिजशुद्धात्मानुभूतिलक्षणनिश्चयचारित्रच्युतिरूपच्छेदरहितो भूत्वा। तथाहि – गुरुपार्श्वे यावन्ति शास्त्राणि तावन्ति पठित्वा तदनन्तरं गुरुं पृष्ट्वा च समशीलतपोधनैः सह, भेदाभेदरत्नत्रयभावनया भव्यानामानन्दं जनयन्, तपःश्रुतसत्त्वैकत्वसन्तोषभावनापञ्चकं भावयन्, तीर्थंकरपरमदेवगणधरदेवादिमहापुरुषाणां चरितानि स्वयं भावयन्, परेषां प्रकाशयंश्च, विहरतीति भावः ॥ २१३ ॥ अथ श्रामण्यपरिपूर्णकारणत्वात्स्व-

---

अब, श्रामण्यके छेदके आयतन होनेसे [१]परद्रव्य-प्रतिबंध निषेध करने योग्य हैं, ऐसा उपदेश करते हैं :–

गाथा २१३

अन्वयार्थ :– [**अधिवासे**] अधिवासमें (आत्मवासमें अथवा गुरुओंके सहवासमें) वसते हुए [**वा**] या [**विवासे**] विवासमें (गुरुओंसे भिन्न वासमें) बसते हुए, [**नित्यं**] सदा [**निबंधान्**] (परद्रव्यसम्बन्धी) प्रतिबंधोंको [**परिहरमाणः**] परिहरण करता हुआ [**श्रामण्ये**] श्रामण्यमें [**छेदविहीनः भूत्वा**] छेदविहीन होकर [**श्रमणः विहरतु**] श्रमण विहरो।

टीका :– वास्तवमें सभी परद्रव्य-प्रतिबंध उपयोगके [२]उपरंजक होनेसे [३]निरुपराग उपयोगरूप श्रामण्यके छेदके आयतन हैं; उनके अभावसे ही अछिन्न श्रामण्य होता है। इसलिये आत्मामें ही आत्माको सदा [४]अधिकृत करके (आत्माके भीतर) बसते हुए

---

[१] परद्रव्यप्रतिबंध=परद्रव्योंमें रागादिपूर्वक संबंध करना; परद्रव्योंमें बँधना – रुकना; लीन होना; परद्रव्योंमें रुकावट।

[२] उपरंजक=उपराग करनेवाले, मलिनता – विकार करनेवाले।

[३] निरुपराग=उपरागरहित; विकाररहित।

[४] अधिकृत करके=स्थापित करके; रखकर।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ श्रामण्यस्य परिपूर्णतायतनत्वात् स्वद्रव्य एव प्रतिबन्धो विधेय इत्युपदिशति –

चरदि णिबद्धो णिच्चं समणो णाणम्हि दंसणमुहम्हि ।
पयदो मूलगुणेसु य जो सो पडिपुण्णसामण्णो ॥२१४॥

चरति निबद्धो नित्यं श्रमणो ज्ञाने दर्शनमुखे ।
प्रयतो मूलगुणेषु च यः स परिपूर्णश्रामण्यः ॥ २१४ ॥

एक एव हि स्वद्रव्यप्रतिबन्ध उपयोगमार्जकत्वेन मार्जितोपयोगरूपस्य श्रामण्यस्य परिपूर्णतायतनं, तत्सद्भावादेव परिपूर्णं श्रामण्यम् । अतो नित्यमेव ज्ञाने दर्शनादौ च प्रतिबद्धेन मूलगुणप्रयततया चरितव्यं; ज्ञानदर्शनस्वभावशुद्धात्मद्रव्यप्रतिबद्धशुद्धास्तित्व-

---

शुद्धात्मद्रव्ये निरन्तरमवस्थानं कर्तव्यमित्याख्याति - **चरदि** चरति वर्तते । कथंभूतः । **णिबद्धो** आधीनः, **णिच्चं** नित्यं सर्वकालम् । सः कः कर्ता । **समणो** लाभालाभादिसमचित्तश्रमणः । क्व । निबद्धः । **णाणम्मि** वीतरागसर्वज्ञप्रणीतपरमागमज्ञाने तत्फलभूतस्वसंवेदनज्ञाने वा, **दंसणमुहम्मि** दर्शनं तत्त्वार्थश्रद्धानं तत्फलभूतनिजशुद्धात्मोपादेयरुचिरूपनिश्चयसम्यक्त्वं वा तत्प्रमुखेष्वनन्तसुखादिगुणेषु । **पयदो मूलगुणेसु य** प्रयतः प्रयत्नपरश्च । केषु । मूलगुणेषु निश्चयमूलगुणाधारपरमात्मद्रव्ये वा । **जो सो पडिपुण्णसामण्णो** य एवंगुणविशिष्टश्रमणः स परिपूर्णश्रामण्यो भवतीति । अयमत्रार्थः – निजशुद्धात्म-

---

अथवा गुरुरूपसे गुरुओंको [1]अधिकृत करके (गुरुओंके सहवासमें) निवास करते हुए या गुरुओंसे विशिष्ट – भिन्न वासमें वसते हुए, सदा ही परद्रव्यप्रतिबंधोंको निषेधता (परिहरता) हुआ श्रामण्यमें छेदविहीन होकर श्रमण वर्तो ॥ २१३ ॥

अब, श्रामण्यकी परिपूर्णताका आयतन होनेसे स्वद्रव्यमें ही प्रतिबंध (सम्बन्ध लीनता) करने योग्य है, ऐसा उपदेश करते हैं :–

गाथा २१४

अन्वयार्थ :– [**यः श्रमणः**] जो श्रमण [**नित्यं**] सदा [**ज्ञाने दर्शनमुखे**] ज्ञानमें और दर्शनादिमें [**निबद्धः**] प्रतिबद्ध [**च**] तथा [**मूलगुणेषु प्रयतः**] मूलगुणोंमें प्रयत (प्रयत्नशील) [**चरति**] विचरण करता है, [**सः**] वह [**परिपूर्णश्रामण्यः**] परिपूर्ण श्रामण्यवान् है ।

टीका :– एक स्वद्रव्य-प्रतिबंध ही, उपयोगका मार्जन (शुद्धत्व) करनेवाला होनेसे, मार्जित (शुद्ध) उपयोगरूप श्रामण्यकी परिपूर्णताका आयतन है; उसके सद्भावसे ही

---

[1] अधिकृत करके=अधिकार देकर; स्थापित करके; अंगीकृत करके ।

जे श्रमण ज्ञान-दृगादिके प्रतिबद्ध विचरे सर्वदा ।
ने प्रयत मूलगुणो विषे, श्रामण्य छे परिपूर्ण त्यां ॥ २१४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

मात्रेण वर्तितव्यमिति तात्पर्यम् ॥ २१४ ॥

अथ श्रामण्यस्य छेदायतनत्वात् यतिजनासन्नः सूक्ष्मपरद्रव्यप्रतिबन्धोऽपि प्रतिषेध्य इत्युपदिशति –

भत्ते वा खमणे वा आवसधे वा पुणो विहारे वा ।
उवधिम्हि वा णिबद्धं णेच्छदि समणम्हि विकधम्हि ॥ २१५ ॥

भक्ते वा क्षपणे वा आवसथे वा पुनर्विहारे वा ।
उपधौ वा निबद्धं नेच्छति श्रमणे विकथायाम् ॥ २१५ ॥

भावनारतानामेव परिपूर्णश्रामण्यं भवतीति ॥ २१४ ॥ अथ श्रामण्यछेदकारणत्वात्प्रासुकाहारादिष्वपि ममत्वं निषेधयति – **णेच्छदि** नेच्छति । कम् । **णिबद्धं** निबद्धमाबद्धम् । क्व । **भत्ते वा** शुद्धात्मभावना-सहकारिभूतदेहस्थितिहेतुत्वेन गृह्यमाणे भक्ते वा प्रासुकाहारे, **खमणे वा** इन्द्रियदर्पविनाशकारण-भूतत्वेन निर्विकल्पसमाधिहेतुभूते क्षपणे वानशने, **आवसधे वा** परमात्मतत्त्वोपलब्धिसहकारिभूते

परिपूर्ण श्रामण्य होता है । इसलिये सदा ज्ञानमें और दर्शनादिकमें [१]प्रतिबद्ध रहकर मूलगुणोंमें प्रयत्नशीलतासे विचरना; – ज्ञानदर्शनस्वभाव शुद्धात्मद्रव्यमें प्रतिबद्ध ऐसा शुद्ध अस्तित्वमात्ररूपसे वर्तना, यह तात्पर्य है ॥ २१४ ॥

अब, मुनिजनको [२]निकटका [३]सूक्ष्मपरद्रव्यप्रतिबंध भी, श्रामण्यके छेदका आयतन होनेसे निषेध्य है, ऐसा उपदेश करते हैं :–

गाथा २१५

अन्वयार्थ :– [**भक्ते वा**] मुनि आहारमें, [**क्षपणे वा**] क्षपणमें (उपवासमें), [**आवसथे वा**] आवासमें (निवासस्थानमें), [**पुनः विहारे वा**] और विहारमें [**उपधौ**] उपधिमें (परिग्रहमें), [**श्रमणे**] श्रमणमें (अन्य मुनिमें) [**वा**] अथवा [**विकथायाम्**]

---

[१] प्रतिबद्ध = संबद्ध; रुका हुआ; बँधा हुआ; स्थित; स्थिर; लीन ।

[२] आगम विरुद्ध आहारविहारादि तो मुनिके छूटा हुवा ही होनेसे उसमें प्रतिबन्ध होना तो मुनिके लिये दूर है; किन्तु आगमकथित आहार विहारादिमें मुनि प्रवर्तमान है इसलिये उसमें प्रतिबंध हो जाना संभवित होनेसे वह प्रतिबंध निकटका है ।

[३] सूक्ष्मपरद्रव्यप्रतिबन्ध = परद्रव्यमें सूक्ष्म प्रतिबन्ध ।

मुनि क्षपण मांही, निवासस्थान, विहार वा भोजन महीं ।
उपाधि-श्रमण-विकथा महीं प्रतिबंधने इच्छे नहीं ॥ २१५ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

श्रामण्यपर्यायसहकारिकारणशरीरवृत्तिहेतुमात्रत्वेनादीयमाने भक्ते तथाविधशरीरवृत्त्यविरोधेन शुद्धात्मद्रव्यनीरंगनिस्तरंगविश्रान्तिसूत्रणानुसारेण प्रवर्तमाने क्षपणे, नीरंगनिस्तरंगान्तरंगद्रव्यप्रसिद्धयर्थमध्यास्यमाने गिरीन्द्रकन्दरप्रभृतावावसथे, यथोक्तशरीरवृत्तिहेतुमार्गणार्थमारभ्यमाणे विहारकर्मणि श्रामण्यपर्यायसहकारिकारणत्वेनाप्रतिषिध्यमाने केवलदेहमात्र उपधौ अन्योन्यबोध्यबोधकभावमात्रेण कथंचित्परिचिते श्रमणे, शब्दपुद्ग-

---

गिरिगुहाद्यावसथे वा, **पुणो विहारे वा** शुद्धात्मभावनासहकारिभूताहारनीहारार्थव्यवहारार्थव्यवहारे वा पुनर्देशान्तरविहारे वा, **उवधिम्हि** शुद्धोपयोगभावनासहकारिभूतशरीरपरिग्रहे ज्ञानोपकरणादौ वा, **समणम्हि** परमात्मपदार्थविचारसहकारिकारणभूते श्रमणे समशीलसंघातकतपोधने वा, **विकधम्हि**

---

[1]विकथामें [**निबद्ध**] प्रतिबन्ध [**न इच्छति**] नहीं चाहता।

टीका :– (१) श्रामण्यपर्यायके सहकारी कारणभूत शरीरकी [2]वृत्तिके हेतुमात्ररूपसे ग्रहण किया जानेवाला जो आहार, (१) [3]तथाविध शरीरकी वृत्तिके साथ विरोध विना, शुद्धात्मद्रव्यमें [4]नीरंग और निस्तरंग विश्रांतिकी रचनानुसार प्रवर्तमान जो क्षपण (अर्थात् शरीरके टिकनेके साथ विरोध न आये इसप्रकार, शुद्धात्मद्रव्यमें विकाररहित और तरंगरहित स्थिरता होती जाये, तदनुसार प्रवर्तमान अनशनमें), (३) नीरंग और निस्तरंग-अन्तरंग द्रव्यकी प्रसिद्धि (प्रकृष्ट सिद्धि) के लिये सेवन किया जानेवाला जो गिरीन्द्रकन्दरादिक आवसथमें (उच्च पर्वतकी गुफा इत्यादि निवासस्थानमें), (४) यथोक्त शरीरकी वृत्तिकी कारणभूत भिक्षाके लिये किये जानेवाले विहारकार्यमें, (५) श्रामण्यपर्यायका सहकारी कारण होनेसे जिसका निषेध नहीं है ऐसे केवल देहमात्र परिग्रहमें, (६) मात्र अन्योन्य [5]बोध्यबोधकरूपसे जिनका कथंचित् परिचय वर्तता है ऐसे श्रमण (अन्य मुनि) में, और (७) शब्दरूप पुद्गलोल्लास (पुद्गलपर्याय) के साथ संबंधसे जिसमें चैतन्यरूपी भित्तिका भाग मलिन होता है,

---

[1] छद्मस्थ मुनिके धार्मिक कथा-वार्त्ता करते हुये भी निर्मल चैतन्य विकल्पमुक्त होता है इसलिये अंशतः मलिन होता है, अतः उस धार्मिक कथाको भी विकथा अर्थात् शुद्धात्मद्रव्यसे विरुद्ध कथा कहा है।

[2] वृत्ति = निर्वाह ; टिकना।

[3] तथाविध = वैसा (श्रामण्यपर्यायका सहकारी कारणभूत)

[4] नीरंग = नीराग ; निर्विकार।

[5] बोध्य वह है जिसे समझाया जाता है अथवा जिसे उपदेश दिया जाता है। और बोधक वह है जो समझाता है, अर्थात् जो उपदेश देता है। मात्र अन्य श्रमणोंसे स्वयंबोध ग्रहण करनेके लिये अथवा अन्य श्रमणोंको बोध देनेके लिये मुनिका अन्य श्रमणके साथ परिचय होता है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

लोल्लाससंवलनकश्मलितचिद्वृत्तिभागायां शुद्धात्मद्रव्यविरुद्धायां कथायां चैतेष्वपि तद्विकल्पाचित्रितचित्तभित्तितया प्रतिषेध्यः प्रतिबन्धः ॥ २१५ ॥

अथ को नाम छेद इत्युपदिशति –

अपयत्ता वा चरिया सयणासणठाणचंकमादीसु ।
समणस्स सव्वकाले हिंसा सा संतय त्ति मदा ॥ २१६ ॥

अप्रयता वा चर्या शयनासनस्थानचङ्क्रमणादिसु ।
श्रमणस्य सर्वकाले हिंसा सा संततेति मता ॥ २१६ ॥

परमसमाधिविघातकशृङ्गारवीररागादिकथायां चेति । अयमत्रार्थः – आगमविरुद्धाहारविहारादिषु तावत्पूर्वमेव निषिद्धः, योग्याहारविहारादिष्वपि ममत्वं न कर्तव्यमिति ॥ २१५ ॥ एवं संक्षेपेणाचाराराधनादिकथिततपोधनविहारव्याख्यानमुख्यत्वेन चतुर्थस्थले गाथात्रयं गतम् । अथ शुद्धोपयोगभावनाप्रतिबन्धकच्छेदं कथयति – **मदा** मता सम्मता । का । **हिंसा** शुद्धोपयोगलक्षणश्रामण्यछेद-

---

ऐसी शुद्धात्मद्रव्यसे विरुद्ध कथामें भी प्रतिबंध निषेध्य – त्यागने योग्य है अर्थात् उनके विकल्पोंसे भी चित्तभूमिको चित्रित होने देना योग्य नहीं है ।

भावार्थ :– आगमविरुद्ध आहारविहारादि तो मुनिने पहले ही छोड़ दिये हैं । अब संयमके निमित्तपनेकी बुद्धिसे मुनिने जो आगमोक्त आहार, अनशन, गुफादिमें निवास, विहार, देहमात्र परिग्रह, अन्य मुनियोंका परिचय और धार्मिक चर्चा-वार्ता पाये जाते हैं, उनके प्रति भी रागादि करना योग्य नहीं है, – उनके विकल्पोंसे भी मनको रँगने देना योग्य नहीं है ; इसप्रकार आगमोक्त आहार-विहारादिमें भी प्रतिबंध प्राप्त करना योग्य नहीं है, क्योंकि उससे संयममें छेद होता है ॥ २१५ ॥

अब छेद क्या है, (अर्थात् छेद किसे कहते हैं) उसका उपदेश करते हैं :–

गाथा २१६

अन्वयार्थ :– [**श्रमणस्य**] श्रमणके [**शयनासनस्थानचंक्रमणादिषु**] शयन, आसन (बैठना), स्थान (खड़े रहना), गमन इत्यादिमें [**अप्रयता वा चर्या**] जो अप्रयत चर्या है [**सा**] वह [**सर्वकाले**] सदा [**संतता हिंसा इति मता**] सतत हिंसा मानी गई है ।

आसन-शयन-गमनादिके चर्या प्रयत्नविहीन जे ।
ते जाणवी हिंसा सदा संतानवाहिनी श्रमणने ॥ २१६ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अशुद्धोपयोगो हि छेदः, शुद्धोपयोगरूपस्य श्रामण्यस्य छेदनात्; तस्य हिंसनात् स एव च हिंसा। अतः श्रमणस्याशुद्धोपयोगाविनाभाविनी शयनासनस्थानचंक्रमणादिष्वप्रयता या चर्या सा खलु तस्य सर्वकालमेव संतानवाहिनी छेदानर्थान्तरभूता हिंसैव ॥ २१६ ॥

अथान्तरंगबहिरंगत्वेन छेदस्य द्वैविध्यमुपदिशति –

मरदु व जियदु व जीवो अयदाचारस्स णिच्छिदा हिंसा।
पयदस्स णत्थि बंधो हिंसामेत्तेण समिदस्स ॥ २१७ ॥

म्रियतां वा जीवतु वा जीवोऽयताचारस्य निश्चिता हिंसा।
प्रयतस्य नास्ति बन्धो हिंसामात्रेण समितस्य ॥ २१७ ॥

कारणभूता हिंसा। कथंभूता। **संतत्तिय त्ति** संतता निरन्तरेति। का हिंसा मता। **चरिया** चर्या चेष्टा। यदि चेत् कथंभूता। **अपयत्ता वा** अप्रयत्ना वा, निःकषायस्वसंवित्तिरूपप्रयत्नरहिता संक्लेश-सहितेत्यर्थः। केषु विषयेषु। **सयणासणठाणचंकमादीसु** शयनासनस्थानचङ्क्रमणस्वाध्यायतपश्चरणादिषु। कस्य। **समणस्स** श्रमणस्य तपोधनस्य। क्व। **सव्वकाले** सर्वकाले। अयमत्रार्थः – बाह्य-व्यापाररूपाः शत्रवस्तावत्पूर्वमेव त्यक्तास्तपोधनैः, अशनशयनादिव्यापारैः पुनस्त्यक्तं नायाति। ततः कारणादन्तरङ्गक्रोधादिशत्रुनिग्रहार्थं तत्रापि संक्लेशो न कर्तव्य इति ॥ २१६ ॥ अथान्तरङ्गबहिरङ्ग-

---

टीका :– अशुद्धोपयोग वास्तवमें छेद है, क्योंकि (उससे) शुद्धोपयोगरूप श्रामण्यका छेदन होता है; और वही (अशुद्धोपयोग ही) हिंसा है, क्योंकि (उससे) शुद्धोप-योगरूप श्रामण्यका हिंसन (हनन) होता है। इसलिये श्रमणके, जो अशुद्धोपयोगके बिना नहीं होती ऐसी शयन-आसन-स्थान-गमन-इत्यादिमें [1]अप्रयत चर्या (आचरण) वह वास्तवमें उसके लिये सर्वकालमें (सदा) ही [2]संतानवाहिनी हिंसा ही है – जो कि छेदसे अनन्यभूत है (अर्थात् छेदसे कोई भिन्न वस्तु नहीं है।)

भावार्थ :– अशुद्धोपयोगसे शुद्धोपयोगरूप मुनित्व (१) छिदता है (२) हनन होता है, इसलिये अशुद्धोपयोग (१) छेद ही है, (२) हिंसा ही है। और जहाँ सोने,

---

[1] अप्रयत=प्रयत्न रहित, असावधान, असंयमी, निरंकुश, स्वच्छन्दी। [अप्रयत चर्या अशुद्धोपयोगके बिना कभी नहीं होती।]

[2] संतानवाहिनी=संतत, सतत, निरंतर, धारावाही, अटूट; [जबतक अप्रयत चर्या है तब तक सदा ही हिंसा संततरूपसे चालू रहती है।]

जीवो-मरो जीव, यत्नहीन आचार त्यां हिंसा नक्की।
समिति-प्रयत्नसहितने नहि बंध हिंसामात्रथी ॥ २१७ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अशुद्धोपयोगोऽन्तरंगच्छेदः परप्राणव्यपरोपो बहिरंगः। तत्र परप्राणव्यपरोपसद्भावे तदसद्भावे वा तदविनाभाविनाप्रयताचारेण प्रसिद्धयशुद्धोपयोगसद्भावस्य सुनिश्चित-हिंसाभावप्रसिद्धेः, तथा तद्विनाभाविना प्रयताचारेण प्रसिद्धयदशुद्धोपयोगासद्भावपरस्य परप्राणव्यपरोपसद्भावेऽपि बन्धाप्रसिद्धया सुनिश्चितहिंसाऽभावप्रसिद्धेश्चान्तरंग एव

हिंसारूपेण द्विविधच्छेदमाख्याति – **मरदु व जियदु व जीवो, अयदाचारस्स णिच्छिदा हिंसा** म्रियतां वा जीवतु वा जीवः, प्रयत्नरहितस्य निश्चिता हिंसा भवति; बहिरङ्गान्यजीवस्य मरणेऽमरणे वा, निर्विकारस्वसंवित्तिलक्षणप्रयत्नरहितस्य निश्चयशुद्धचैतन्यप्राणव्यपरोपणरूपा निश्चयहिंसा भवति। **पयदस्स णत्थि बंधो** बाह्याभ्यन्तरप्रयत्नपरस्य नास्ति बन्धः। केन। **हिंसामेत्तेण** द्रव्यहिंसामात्रेण।

बैठने, खड़े, होने, चलने इत्यादिमें अप्रयत आचरण होता है वहाँ नियमसे अशुद्धोपयोग तो होता ही है, इसलिये अप्रयत आचरण छेद ही है, हिंसा ही है ॥ २१६ ॥

अब छेदके अन्तरंग और बहिरंग ऐसे दो प्रकार बतलाते हैं :–

गाथा २१७

अन्वयार्थ :– [**जीवः**] जीव [**म्रियतां वा जीवतु वा**] मरे या जिये [**अयताचारस्य**] अप्रयत आचारवालेके [**हिंसा**] (अंतरंग) हिंसा [**निश्चिता**] निश्चित है; [**प्रयतस्य समितस्य**] [1]प्रयतके, [2]समितिवान्के [**हिंसामात्रेण**] (बहिरंग) हिंसामात्रसे [**बन्धः**] बंध [**नास्ति**] नहीं है।

टीका :– अशुद्धोपयोग अंतरंग छेद है; परप्राणोंका व्यपरोप (विच्छेद) वह बहिरंगछेद है। इनमेंसे अन्तरंग छेद ही विशेष बलवान है, बहिरंग छेद नहीं; क्योंकि – परप्राणोंके व्यपरोपका सद्भाव हो या असद्भाव, जो अशुद्धोपयोगके बिना नहीं होता ऐसे [3]अप्रयत आचारसे प्रसिद्ध होनेवाला (जाननेमें आनेवाला) अशुद्धोपयोगका सद्भाव

---

[1] प्रयत=प्रयत्नशील, सावधान, संयमी [प्रयत्नके अर्थके लिये देखो गाथा २११ का फुटनोट।]

[2] शुद्धात्मस्वरूपमें (मुनित्वोचित) सम्यक् 'इति' अर्थात् परिणति वह निश्चय समिति है। और उस दशामें होनेवाली (हठ रहित) ईर्या-भाषादि संबन्धी शुभ परिणति वह व्यवहारसमिति है। [जहाँ शुद्धात्मस्वरूपमें सम्यक्-परिणतिरूप दशा नहीं होती वहाँ शुभ परिणति हठ सहित होती है; वह शुभपरिणति व्यवहारसमिति भी नहीं है।]

[3] अशुद्धोपयोगके बिना अप्रयत आचार कभी नहीं होता, इसलिये जिसके अप्रयत आचार वर्तता है उसके अशुद्ध उपयोग अवश्यमेव होता है। इसप्रकार अप्रयत आचारके द्वारा अशुद्ध उपयोग प्रसिद्ध होता है–जाना जाता है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

छेदो बलीयान् न पुनर्बहिरंगः। एवमप्यन्तरंगच्छेदायतनमात्रत्वाद्बहिरंगच्छेदोऽभ्युपगम्येतैव ॥ २१७ ॥

अथ सर्वथान्तरंगच्छेदः प्रतिषेध्य इत्युपदिशति –

कथंभूतस्य पुरुषस्य। **समिदस्स** समितस्य शुद्धात्मस्वरूपे सम्यगितो गतः परिणतः समितस्तस्य समितस्य, व्यवहारेणेर्यादिपञ्चसमितियुक्तस्य च। अयमत्रार्थः – स्वस्थभावनारूपनिश्चयप्राणस्य विनाशकारणभूता रागादिपरिणतिर्निश्चयहिंसा भण्यते, रागाद्युत्पत्तेर्बहिरङ्गनिमित्तभूतः परजीवघातो व्यवहारहिंसेति द्विधा हिंसा ज्ञातव्या। किंतु विशेषः–बहिरङ्गहिंसा भवतु वा मा भवतु, स्वस्थभावनारूपनिश्चयप्राणघाते सति निश्चयहिंसा नियमेन भवतीति। ततः कारणात्सैव मुख्येति ॥ २१७ ॥ अथ तमेवार्थं दृष्टान्तदार्ष्टान्ताभ्यां दृढयति –

उच्चालियम्हि पाए इरियासमिदस्स णिग्गमत्थाए।
आबाधेज्ज कुलिंगं मरिज्ज तं जोगमासेज्ज ॥ ❀१५ ॥

जिसके पाया जाता है उसके हिंसाके सद्भावकी प्रसिद्धि सुनिश्चित है; और इसप्रकार जो अशुद्धोपयोगके बिना होता है ऐसे[1] प्रयत आचारसे प्रसिद्ध होनेवाला अशुद्धोपयोगका असद्भाव जिसके पाया जाता है उसके, परप्राणोंके व्यपरोपके सद्भावमें भी बंधकी अप्रसिद्धि होनेसे, हिंसाके अभावकी प्रसिद्धि सुनिश्चित है। ऐसा होने पर भी (अर्थात् अंतरंग छेद ही विशेष बलवान है बहिरंग छेद नहीं, ऐसा होने पर भी) बहिरंग छेद अंतरंग छेदका आयतनमात्र है, इसलिये उसे (बहिरंग छेदको) स्वीकार तो करना ही चाहिये अर्थात् उसे मानना ही चाहिये।

भावार्थ:– शुद्धोपयोगका हनन होना वह अन्तरंग हिंसा – अन्तरंग छेद है, और दूसरेके प्राणोंका विच्छेद होना बहिरंग हिंसा – बहिरंग छेद है।

जीव मरे या न मरे, जिसके अप्रयत आचरण है उसके शुद्धोपयोगका हनन होनेसे अन्तरंग हिंसा होती ही है और इसलिये अन्तरंग छेद होता ही है। जिसके प्रयत आचरण है उसके, परप्राणोंके व्यपरोपरूप बहिरंग हिंसाके – बहिरंग छेदके – सद्भावमें भी शुद्धोपयोगका हनन नहीं होनेसे अन्तरंग हिंसा नहीं होती और इसलिये अन्तरंग छेद नहीं होता है ॥ २१७ ॥

अब सर्वथा अन्तरंग छेद निषेध्य – त्याज्य है ऐसा उपदेश करते हैं :–

---

[1] जहाँ अशुद्ध उपयोग नहीं होता वहीं प्रयत आचार पाया जाता है, इसलिये प्रयत आचारके द्वारा अशुद्ध उपयोगका असद्भाव सिद्ध होता है – जाना जाता है।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अयदाचारो समणो छस्सु वि कायेसु वधकरो त्ति मदो।
चरदि जदं जदि णिच्चं कमलं व जले णिरुवलेवो॥ २१८॥

अयताचारः श्रमणः षट्स्वपि कायेषु वधकर इति मतः।
चरति यतं यदि नित्यं कमलमिव जले निरुपलेपः॥ २१८॥

ण हि तस्स तण्णिमित्तो बंधो सुहुमो य देसिदो समये।
मुच्छा परिग्गहो च्चिय अज्झप्पपमाणदो दिट्ठो॥ ❀१६॥ (जुम्मं)

उच्चालियम्हि पाए उत्क्षिप्ते चालिते सति पादे। कस्य। **इरियासमिदस्स** ईर्यासमितितपोधनस्य। क्व। **णिग्गमत्थाए** विवक्षितस्थानान्निर्गमस्थाने। **आबाधेज्ज** आबाध्येत पीड्येत। स कः। **कुलिंगं** सूक्ष्मजन्तुः। न केवलमाबाध्येत, **मरिज्ज** म्रियतां वा। किं कृत्वा। **तं जोगमासेज्ज**। पूर्वोक्तं पादयोगं पादसंघट्टनमाश्रित्य प्राप्येति। **ण हि तस्स तण्णिमित्तो बंधो सुहुमो य देसिदो समये** न हि तस्य तन्निमित्तो बन्धः सूक्ष्मोऽपि देशितः समये; तस्य तपोधनस्य तन्निमित्तो सूक्ष्मजन्तुघातनिमित्तो बन्धः सूक्ष्मोऽपि स्तोकोऽपि नैव दृष्टः समये परमागमे। दृष्टान्तमाह–**मुच्छा परिग्गहो च्चिय** मूर्च्छा परिग्रहश्चैव **अज्झप्पपमाणदो दिट्ठो** अध्यात्मप्रमाणतो दृष्ट इति। अयमत्रार्थः–'मूर्च्छा परिग्रहः' इति सूत्रे यथाध्यात्मानुसारेण मूर्च्छारूपरागादिपरिणामानुसारेण परिग्रहो भवति, न च बहिरङ्गपरिग्रहानुसारेण; तथात्र सूक्ष्मजन्तुघातेऽपि यावतांशेन स्वस्थभावचलनरूपा रागादिपरिणति-

---

गाथा २१८

अन्वयार्थ :– [**अयताचारः श्रमणः**] अप्रयत आचारवाला श्रमण [**षट्सु अपि कायेषु**] छहों काय संबंधी [**वधकरः**] वधका करनेवाला [**इति मतः**] माननेमें – कहनेमें आया है; [**यदि**] यदि [**नित्यं**] सदा [**यतं चरति**] प्रयतरूपसे आचरण करे तो [**जले कमलम् इव**] जलमें कमल की भाँति [**निरुपलेपः**] निर्लेप कहा गया है।

टीका :– जो अशुद्धोपयोगके विना नहीं होता ऐसे अप्रयत आचारके द्वारा प्रसिद्ध (ज्ञात) होनेवाला अशुद्धोपयोगका सद्भाव हिंसक ही है, क्योंकि छहकायके प्राणोंके व्यपरोपके आश्रयसे होनेवाले बंधकी प्रसिद्धि है; और जो अशुद्धोपयोगके बिना होता है ऐसे प्रयत आचारसे प्रसिद्ध होनेवाला अशुद्धोपयोगका असद्भाव अहिंसक ही है, क्योंकि परके आश्रयसे होनेवाले लेशमात्र भी बंधका अभाव होनेसे जलमें झूलते हुए कमलकी भाँति निर्लेपताकी प्रसिद्धि है। इसलिये उन-उन सर्वप्रकारसे अशुद्धोपयोगरूप

मुनि यत्नहीन आचारवंत छ कायनो हिंसक कह्यो।
जलकमलवत् निर्लेप भाख्यो, नित्य यत्नसहित जो॥ २१८॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यतस्तदविनाभाविना अप्रयताचारत्वेन प्रसिद्धयदशुद्धोपयोगसद्भावः षट्कायप्राण-व्यपरोपप्रत्ययबन्धप्रसिद्धया हिंसक एव स्यात्। यतश्च तद्विनाभाविना प्रयताचारत्वेन प्रसिद्धयदशुद्धोपयोगासद्भावः परप्रत्ययबन्धलेशस्याप्यभावाज्जलदुर्ललितं कमलमिव निरुपलेपत्वप्रसिद्धेर्हिंसक एव स्यात्। ततस्तैस्तैः सर्वैः प्रकारैरशुद्धोपयोगरूपोऽन्तरङ्गच्छेदः प्रतिषेध्यो यैर्यैस्तदायतनमात्रभूतः परप्राणव्यपरोपरूपो बहिरङ्गच्छेदो दूरादेव प्रतिषिद्धः स्यात् ॥ २१८ ॥

अथैकान्तिकान्तरंगच्छेदत्वादुपधिस्तद्वत्प्रतिषेध्य इत्युपदिशति –

हवदि व ण हवदि बंधो मदम्हि जीवेऽध कायचेट्ठम्हि।
बंधो धुवमुवधीदो इदि समणा छड्डिया सव्वं ॥ २१९ ॥

भवति वा न भवति बन्धो मृते जीवेऽथ कायचेष्टायाम्।
बन्धो ध्रुवमुपधेरिति श्रमणास्त्यक्तवन्तः सर्वम् ॥ २१९ ॥

लक्षण भावहिंसा तावतांशेन बन्धो भवति, न च पादसंघट्टनमात्रेण। तस्य तपोधनस्य रागादि-परिणतिलक्षणभावहिंसा नास्ति। ततः कारणाद्बन्धोऽपि नास्तीति ॥ ★१५–१६ ॥ अथ निश्चयहिंसा-रूपोऽन्तरङ्गच्छेदः सर्वथा प्रतिषेध्य इत्युपदिशति – **अयदाचारो** निर्मलात्मानुभूतिभावनालक्षणप्रयत्न-रहितत्वेन अयताचारः प्रयत्नरहितः। स कः। **समणो** श्रमणस्तपोधनः। **छस्सु वि कायेसु वधकरो त्ति मदो** षट्स्वपि कायेषु वधकरो हिंसाकर इति मतः सम्मतः कथितः। **चरदि** आचरति वर्तते। कथं। यथा भवति **जदं** यतं यत्नपरं, **जदि** यदि चेत्, **णिच्चं** नित्यं सर्वकालं तदा **कमलं व जले णिरु-वलेवो** कमलमिव जले निरुपलेप इति। एतावता किमुक्तं भवति – शुद्धात्मसंवित्तिलक्षणशुद्धोपयोग-परिणतपुरुषः षड्जीवकुले लोके विचरन्नपि यद्यपि बहिरङ्गद्रव्यहिंसामात्रमस्ति, तथापि निश्चयहिंसा नास्ति। ततः कारणाच्छुद्धपरमात्मभावनाबलेन निश्चयहिंसैव सर्वतात्पर्येण परिहर्तव्येति ॥ २१८ ॥

अन्तरंग छेद निषेध्य – त्यागने योग्य है, जिन-जिन प्रकारोंसे उसका आयतनमात्रभूत परप्राणव्यपरोपरूप बहिरंग छेद अत्यन्त निषिद्ध हो।

भावार्थ :– शास्त्रोंमें अप्रयत-आचारवान् अशुद्धोपयोगीको छह कायका हिंसक कहा है और प्रयत-आचारवान् शुद्धोपयोगीको अहिंसक कहा है, इसलिये शास्त्रोंमें जिस-जिस प्रकारसे छह कायकी हिंसाका निषेध किया गया हो, उस-उस समस्त प्रकारसे अशुद्धोप-योगका निषेध समझना चाहिये ॥ २१८ ॥

दैहिक क्रिया थकी जीव मरतां बंध थाय-न थाय छे।
परिग्रह थकी ध्रुव बंध, तेथी समस्त छोड्यो योगीओ ॥ २१९ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यथा हि कायव्यापारपूर्वकस्य परप्राणव्यपरोपस्याशुद्धोपयोगसद्भावासद्भावाभ्यामनैकान्तिकबन्धत्वेन छेदत्वमनैकान्तिकमिष्टं, न खलु तथोपधेः, तस्य सर्वथा तदविनाभावित्वप्रसिद्धयदैकान्तिकाशुद्धोपयोगसद्भावस्यैकान्तिकबन्धत्वेन छेदत्वमैकान्तिकमेव। अत

अथ बहिरङ्गजीवघाते बन्धो भवति, न भवति वा, परिग्रहे सति नियमेन भवतीति प्रतिपादयति – **हवदि व ण हवदि बंधो** भवति वा न भवति बन्धः। कस्मिन्सति। **मदम्हि जीवे** मृते सत्यन्यजीवे। **अध** अहो। कस्यां सत्याम्। **कायचेट्ठम्हि** कायचेष्टायाम्। तर्हि कथं बन्धो भवति। **बंधो धुवमुवधीदो** बन्धो भवति ध्रुवं निश्चितम्। कस्मात्। उपधेः परिग्रहात्सकाशात्। **इदि** इति हेतोः **समणा छड्डिया सव्वं** श्रमणा महाश्रमणाः सर्वज्ञाः पूर्वं दीक्षाकाले शुद्धबुद्धैकस्वभावं निजात्मानमेव परिग्रहं कृत्वा, शेषं समस्तं बाह्याभ्यन्तरपरिग्रहं छर्दितवन्तस्त्यक्तवन्तः। एवं ज्ञात्वा शेषतपोधनैरपि निजपरमात्मपरिग्रहं स्वीकारं कृत्वा, शेषः सर्वोऽपि परिग्रहो मनोवचनकायैः कृतकारितानुमतैश्च त्यजनीय

अब, उपधि (परिग्रह) को ऐकान्तिक अन्तरंग-छेदत्व होनेसे उपधि अन्तरंग छेदकी भाँति त्याज्य है, ऐसा उपदेश करते हैं :–

गाथा २१९

अन्वयार्थ :– [**अथ**] अब (उपधिके संबंधमें ऐसा है कि), [**कायचेष्टायाम्**] कायचेष्टापूर्वक [**जीवे मृते**] जीवके मरने पर [**बन्धः**] बंध [**भवति**] होता है [**वा**] अथवा [**न भवति**] नहीं होता ; [**उपधेः**] (किन्तु) उपधिसे-परिग्रहसे [**ध्रुवम् बंधः**] निश्चय ही बंध होता है ; [**इति**] इसलिये [**श्रमणाः**] श्रमणों (अर्हन्तदेवों) ने [**सर्वं**] सर्व परिग्रहको [**त्यक्तवन्तः**] छोड़ा है।

टीका :– जैसे कायव्यापारपूर्वक परप्राणव्यपरोपको अशुद्धोपयोगके सद्भाव और असद्भावके द्वारा अनैकांतिक[1] बंधरूप होनेसे उसे (कायव्यापारपूर्वक परप्राणव्यपरोपको) छेदपना अनैकांतिक माना गया है, वैसा उपधि – परिग्रहका नहीं है। परिग्रह सर्वथा अशुद्धोपयोगके बिना नहीं होता, ऐसा जो परिग्रहका सर्वथा अशुद्धोपयोगके साथ अविनाभावित्व है उससे प्रसिद्ध होनेवाले ऐकान्तिक[2] अशुद्धोपयोगके सद्भावके कारण परिग्रह तो ऐकांतिक बंधरूप है, इसलिये उसे (परिग्रहको) छेदपना ऐकान्तिक ही है। इसीलिये भगवन्त अर्हन्तोंने – परम श्रमणोंने – स्वयं ही पहले ही सर्व परिग्रहको छोड़ा है ; और इसीलिये दूसरोंको भी, अन्तरंग छेदकी भाँति प्रथम ही सर्व परिग्रह छोड़ने योग्य है, क्योंकि वह (परिग्रह) अन्तरङ्ग छेदके बिना नहीं होता।

---

[1] अनैकान्तिक = अनिश्चित ; नियमरूप न हो ; ऐकांतिक न हो।

[2] ऐकान्तिक = निश्चित ; अवश्यंभावी ; नियमरूप।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

एव भगवन्तोऽर्हन्तः परमाः श्रमणाः स्वयमेव प्रागेव सर्वमेवोपधिं प्रतिषिद्धवन्तः। अत एव चापरैरप्यन्तरङ्गच्छेदवत्तदनान्तरीयकत्वात्प्रागेव सर्व एवोपधिः प्रतिषेध्यः ॥ २१९ ॥

***वक्तव्यमेव किल यत्तदशेषमुक्त-**
मेतावतैव यदि चेतयतेऽत्र कोऽपि।
व्यामोहजालमतिदुस्तरमेव नूनं
निश्चेतनस्य वचसामतिविस्तरेऽपि ॥ १४ ॥

इति। अत्रेदमुक्तं भवति – शुद्धचैतन्यरूपनिश्चयप्राणे रागादिपरिणामरूपनिश्चयहिंसया पातिते सति नियमेन बन्धो भवति। परजीवघाते पुनर्भवति वा न भवतीति नियमो नास्ति, परद्रव्ये ममत्वरूप-मूर्च्छापरिग्रहेण तु नियमेन भवत्येवेति ॥ २१९ ॥ एवं भावहिंसाव्याख्यानमुख्यत्वेन पञ्चमस्थले

भावार्थ :– अशुद्धोपयोगका असद्भाव हो, तथापि कायकी हलनचलनादि क्रिया होनेसे परजीवोंके प्राणोंका घात होजाता है। इसलिये कायचेष्टापूर्वक परप्राणोंके घातसे बंध होनेका नियम नहीं है ; – अशुद्धोपयोगके सद्भावमें होनेवाले कायचेष्टापूर्वक परप्राणोंके घातसे तो बंध होता है, और अशुद्धोंपयोगके असद्भावमें होनेवाले कायचेष्टा-पूर्वक परप्राणोंके घातसे बंध नहीं होता; इसप्रकार कायचेष्टापूर्वक होनेवाले परप्राणोंके घातसे बंधका होना अनैकान्तिक होनेसे उसके छेदपना अनैकान्तिक है – नियमरूप नहीं है।

जैसे भावके बिना भी परप्राणोंका घात हो जाता है, उसीप्रकार भाव न हो तथापि परिग्रहका ग्रहण हो जाय, ऐसा कभी नहीं हो सकता। जहाँ परिग्रहका ग्रहण होता है वहाँ अशुद्धोपयोगका सद्भाव अवश्य होता ही है। इसलिये परिग्रहसे बंधका होना ऐकांतिक-निश्चित-नियमरूप है। इसलिये परिग्रहके छेदपना ऐकान्तिक है। ऐसा होनेसे ही परम श्रमण ऐसे अर्हन्त भगवन्तोंने पहलेसे ही सर्व परिग्रहका त्याग किया है और अन्य श्रमणोंको भी पहलेसे ही सर्व परिग्रहका त्याग करना चाहिये ॥ २१९ ॥

[अब, 'कहने योग्य सब कहा गया है' इत्यादि कथन श्लोक द्वारा किया जाता है।]

[**अर्थ**] :– जो कहने योग्य ही था वह अशेषरूपसे कहा गया है, इतने मात्रसे ही यदि यहाँ कोई चेत जाय – समझले तो, (अन्यथा) वाणीका अतिविस्तार किया जाय तथापि निश्चेतन (जड़वत्, नासमझ) को व्यामोहका जाल वास्तवमें अति दुस्तर है।

---

* वसन्ततिलका छन्द।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथान्तरङ्गच्छेदप्रतिषेध एवायमुपधिप्रतिषेध इत्युपदिशति –

ण हि णिरवेक्खो चागो ण हवदि भिक्खुस्स आसयविसुद्धी ।
अविसुद्धस्स य चित्ते कहं णु कम्मक्खओ विहिदो ॥२२०॥

न हि निरपेक्षस्त्यागो न भवति भिक्षोराशयविशुद्धिः ।
अविशुद्धस्य च चित्ते कथं नु कर्मक्षयो विहितः ॥ २२० ॥

गाथाषट्कं गतम् । इति पूर्वोक्तक्रमेण 'एवं पणमिय सिद्धे' इत्याद्येकविंशतिगाथाभिः स्थलपञ्चकेनोत्सर्ग-चारित्रव्याख्याननामा प्रथमोऽन्तराधिकारः समाप्तः । अतः परं चारित्रस्य देशकालापेक्षयापहृतसंयम-रूपेणापवादव्याख्यानार्थं पाठक्रमेण त्रिंशद्गाथाभिर्द्वितीयोऽन्तराधिकारः प्रारभ्यते । तत्र चत्वारि स्थलानि भवन्ति । तस्मिन्प्रथमस्थले निर्ग्रन्थमोक्षमार्गस्थापनामुख्यत्वेन 'ण हि णिरवेक्खो चागो' इत्यादि गाथापञ्चकम् । अत्र टीकायां गाथात्रयं नास्ति । तदनन्तरं सर्वसावद्यप्रत्याख्यानलक्षणसामायिक-संयमासमर्थानां यतीनां संयमशौचज्ञानोपकरणनिमित्तमपवादव्याख्यानमुख्यत्वेन 'छेदो जेण ण विज्जदि' इत्यादि सूत्रत्रयम् । तदनन्तरं स्त्रीनिर्वाणनिराकरणप्रधानत्वेन 'पेच्छदि ण हि इह लोगं' इत्याद्येकादश गाथा भवन्ति । **ताश्चामृतचन्द्रटीकायां** न सन्ति । ततः परं सर्वोपेक्षासंयमासमर्थस्य तपोधनस्य देशकालापेक्षया किंचित्संयमसाधकशरीरस्य निरवद्याहारादिसहकारिकारणं ग्राह्यमिति पुनरप्यपवाद-विशेषव्याख्यानमुख्यत्वेन 'उवयरणं जिणमग्गे' इत्याद्येकादशगाथा भवन्ति । अत्र टीकायां गाथाचतुष्टयं नास्ति । एवं मूलसूत्राभिप्रायेण त्रिंशद्गाथाभिः, टीकापेक्षया पुनर्द्वादशगाथाभिः द्वितीयान्तराधिकारे समुदायपातनिका । तथाहि—अथ भावशुद्धिपूर्वकबहिरङ्गपरिग्रहपरित्यागे कृते सति अभ्यन्तरपरिग्रह-परित्यागः कृत एव भवतीति निर्दिशति—**ण हि णिरवेक्खो चागो** न हि निरपेक्षस्त्यागः यदि चेत्, परिग्रहत्यागः सर्वथा निरपेक्षो न भवति किंतु किमपि वस्त्रपात्रादिकं ग्राह्यमिति भवता भण्यते, तर्हि हे शिष्य **ण हवदि भिक्खुस्स आसयविसुद्धी** न भवति भिक्षोराशयविशुद्धिः, तदा सापेक्षपरिणामे सति

अब, इस उपधि (परिग्रह) का निषेध वह अंतरंग छेदका ही निषेध है, ऐसा उपदेश करते हैं :–

गाथा २२०

अन्वयार्थ :– [**निरपेक्षः त्यागः न हि**] यदि निरपेक्ष (किसी भी वस्तुकी अपेक्षा-रहित) त्याग न हो तो [**भिक्षोः**] भिक्षुके [**आशयविशुद्धः**] भावकी विशुद्धि [**न भवति**] नहीं होती; [**च**] और [**चित्ते अविशुद्धस्य**] जो भावमें अविशुद्ध है उसके [**कर्मक्षयः**] कर्मक्षय [**कथं नु**] कैसे [**विहितः**] हो सकता है ?

निरपेक्ष त्याग न होय तो नहि भावशुद्धि भिक्षुने ।
ने भावमां अविशुद्धने क्षय कर्मनो कइ रीत बने ॥ २२० ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

न खलु बहिरङ्गसंगसद्भावे तुषसद्भावे तण्डुलगताशुद्धत्वस्येवाशुद्धोपयोगरूपस्यान्तरङ्गच्छेदस्य प्रतिषेधः, तद्भावे च न शुद्धोपयोगमूलस्य कैवल्यस्योपलम्भः। अतोऽशुद्धोपयोगरूपस्यान्तरंगच्छेदस्य प्रतिषेधं प्रयोजनमपेक्ष्योपधेर्विधीयमानः प्रतिषेधोऽन्तरंगच्छेदप्रतिषेध एव स्यात् ॥ २२० ॥

अथैकान्तिकान्तरंगच्छेदत्वमुपधेर्विस्तरेणोपदिशति—

किध तम्हि णत्थि मुच्छा आरंभो वा असंजमो तस्स।
तध परदव्वम्मि रदो कधमप्पाणं पसाधयदि ॥२२१॥

कथं तस्मिन्नास्ति मूर्च्छा आरम्भो वा असंयमस्तस्य।
तथा परद्रव्ये रतः कथमात्मानं प्रसाधयति ॥ २२१ ॥

भिक्षोस्तपोधनस्य चित्तशुद्धिर्न भवति। **अविसुद्धस्य हि चित्ते** शुद्धात्मभावनारूपशुद्धिरहितस्य तपोधनस्य चित्ते मनसि हि स्फुटं **कहं तु कम्मक्खओ विहिओ** कथं तु कर्मक्षयो विहितः उचितो, न कथमपि। अनेनैतदुक्तं भवति—यथा बहिरङ्गतुषसद्भावे सति तण्डुलस्याभ्यन्तरशुद्धिं कर्तुं नायाति तथा विद्यमाने वा बहिरङ्गपरिग्रहाभिलाषे सति निर्मलशुद्धात्मानुभूतिरूपां चित्तशुद्धिं कर्तुं नायाति। यदि पुनर्विशिष्टवैराग्यपूर्वकपरिग्रहत्यागो भवति तदा चित्तशुद्धिर्भवत्येव, ख्यातिपूजालाभनिमित्तत्यागे तु न भवति ॥ २२० ॥ अथ तमेव परिग्रहत्यागं द्रढयति—

गेण्हदि व चेलखंडं भायणमत्थि त्ति भणिदमिह सुत्ते।
जदि सो चत्तालंबो हवदि कहं वा अणारंभो ॥ ❀१७ ॥
वत्थक्खंडं दुद्दियभायणमण्णं च गेण्हदि णियदं।
विज्जदि पाणारंभो विक्खेवो तस्स चित्तम्मि ॥ ❀१८ ॥
गेण्हइ विधुणइ धोवइ सोसेइ जदं तु आदवे खित्ता।
पत्तं व चेलखंडं बिभेदि परदो य पालयदि ॥ ❀१९ ॥

टीका :— जैसे छिलकेके सद्भावमें चावलोंमें पाई जानेवाली (रक्ततारूप) अशुद्धताका त्याग (नाश, अभाव) नहीं होता, उसीप्रकार बहिरंग संगके सद्भावमें अशुद्धोपयोगरूप अंतरंग छेदका त्याग नहीं होता और उसके सद्भावमें शुद्धोपयोगमूलक कैवल्य (मोक्ष) की उपलब्धि नहीं होती। (इससे ऐसा कहा गया है कि) अशुद्धोपयोगरूप अंतरंग छेदके निषेधरूप प्रयोजनकी अपेक्षा रखकर विहित (आदेश) किया जानेवाला उपधिका निषेध वह अन्तरंग छेदका ही निषेध है ॥२२०॥

आरंभ, अणसंयम अने मूर्छा न त्यां — अे कयम बने ?।
परद्रव्यरत जे होय ते कई रीत साधे आत्मने ? ॥ २२१ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

उपधिसद्भावे हि ममत्वपरिणामलक्षणाया मूर्च्छायास्तद्विषयकर्मप्रक्रमपरिणाम-लक्षणस्यारम्भस्य शुद्धात्मरूपहिंसनपरिणामलक्षणस्यासंयमस्य वावश्यंभावित्वात्तथोपधि-

---

गेण्हदि व चेलखंडं गृह्णाति वा चेलखण्डं वस्त्रखण्डं, **भायणं** भिक्षाभाजनं वा **अत्थि त्ति भणिदं** अस्तीति भणितमास्ते। **क्व।** **इह सुत्ते** इहं विवक्षितागमसूत्रे **जदि** यदि चेत्। **सो चत्तालंबो हवदि कहं** निरालम्बनपरमात्मतत्त्वभावनाशून्यः सन् स पुरुषो बहिर्द्रव्यालम्बनरहितः कथं भवति, न कथमपि; **वा अणारंभो** निःक्रियनिरारम्भनिजात्मतत्त्वभावनारहितत्वेन निरारम्भो वा कथं भवति, किंतु सारम्भ एव; इति प्रथमगाथा। **वत्थक्खंडं दुद्दियभायणं** वस्त्रखण्डं दुग्धिकाभाजनं **अण्णं च गेण्हदि** अन्यच्च गृह्णाति कम्बलमृदुशयनादिकं यदि चेत्। तदा किं भवति। **णियदं विज्जदि पाणारंभो** निजशुद्धचैतन्यलक्षणप्राणविनाशरूपो परजीवप्राणविनाशरूपो वा नियतं निश्चितं प्राणारम्भः प्राणवधो विद्यते, न केवलं प्राणारम्भः, **विक्खेवो तस्स चित्तम्मि** अविक्षिप्तचित्तपरमयोगरहितस्य सपरिग्रह-पुरुषस्य विक्षेपस्तस्य विद्यते चित्ते मनसीति। इति द्वितीयगाथा। गेण्हइ स्वशुद्धात्मग्रहणशून्यः सन् गृह्णाति किमपि बहिर्द्रव्यं; **विधुणइ** कर्मधूलिं विहाय बहिरङ्गधूलिं विधूनोति विनाशयति; **धोवइ** निर्मलपरमात्मतत्त्वमलजनकरागादिमलं विहाय बहिरङ्गमलं धौति प्रक्षालयति; **सोसेइ जदं तु आदवे खित्ता** निर्विकल्पध्यानातपेन संसारनदीशोषणमकुर्वन् शोषयति शुष्कं करोति यतं तु यत्नपरं तु यथा भवति। किं कृत्वा। आतपे निक्षिप्य। किं तत्। **पत्तं व चेलखंडं** पात्रं वस्त्रखण्डं वा। **बिभेदि** निर्भयशुद्धात्मतत्त्वभावनाशून्यः सन् बिभेति भयं करोति। कस्मात्सकाशात्। **परदो य** परतश्चौरादेः। **पालयदि** परमात्मभावनां न पालयन्न रक्षन्परद्रव्यं किमपि पालयतीति तृतीयगाथा॥ ★१७–१९॥

अब, 'उपधि वह ऐकान्तिक अन्तरंग छेद है' ऐसा विस्तारसे उपदेश करते हैं :–

गाथा २२१

अन्वयार्थ :– [**तस्मिन्**] उपधिके सद्भावमें [**तस्य**] उस (भिक्षु) के [**मूर्च्छा**] मूर्छा, [**आरम्भः**] आरंभ [**वा**] या [**असंयमः**] असंयम [**नास्ति**] न हो [**कथं**] यह कैसे हो सकता है ? (कदापि नहीं हो सकता), [**तथा**] तथा [**परद्रव्ये रतः**] जो पर-द्रव्यमें रत हो वह [**आत्मानं**] आत्माको [**कथं**] कैसे [**प्रसाधयति**] साध सकता है ?

टीका :– उपधिके सद्भावमें, (१) ममत्व-परिणाम जिसका लक्षण है ऐसी मूर्छा, (२) उपधि संबंधी [१]कर्मप्रक्रमके परिणाम जिसका लक्षण है ऐसा आरम्भ, अथवा (३) शुद्धात्मस्वरूपकी हिंसारूप परिणाम जिसका लक्षण है ऐसा असंयम अवश्यमेव होता ही है; तथा उपधि जिसका द्वितीय हो (अर्थात् आत्मासे अन्य ऐसा परिग्रह जिसने ग्रहण किया हो) उसके परद्रव्य में रतपना (-लीनता) होनेके कारण शुद्धात्मद्रव्यकी साध-कताका अभाव होता है; इससे उपधिके ऐकान्तिक अन्तरंग छेदपना निश्चित होता ही है।

---

[१] कर्मप्रक्रम = काममें युक्त होना ; कामकी व्यवस्था ।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

द्वितीयस्य परद्रव्यरतत्वेन शुद्धात्मद्रव्यप्रसाधकत्वाभावाच्च ऐकान्तिकान्तरंगच्छेदत्वमुपधेरवधार्यत एव। इदमत्र तात्पर्यमेवंविधत्वमुपधेरवधार्यं स सर्वथा संन्यस्तव्यः ॥ २२१ ॥

अथ कस्यचित्क्वचित्कदाचित्कथंचित्कश्चिदुपधिरप्रतिषिद्धोऽप्यस्तीत्यपवादमुपदिशति –

छेदो जेण ण बिज्जदि गहणविसग्गेसु सेवमाणस्स।
समणो तेणिह वट्टदु कालं खेत्तं वियाणित्ता ॥ २२२ ॥

छेदो येन न विद्यते ग्रहणविसर्गेषु सेवमानस्य।
श्रमणस्तेनेह वर्ततां कालं क्षेत्रं विज्ञाय ॥ २२२ ॥

अथ सपरिग्रहस्य नियमेन चित्तशुद्धिर्नश्यतीति विस्तरेणाख्याति—**किध तम्हि णत्थि मुच्छा** परद्रव्यममत्वरहितचिच्चमत्कारपरिणतेर्विसदृशा मूर्च्छा कथं नास्ति, अपि त्वस्त्येव। क्व। तस्मिन् परिग्रहाकाङ्क्षितपुरुषे। **आरंभो वा** मनोवचनकायक्रियारहितपरमचैतन्यप्रतिबन्धक आरम्भो वा कथं नास्ति, किन्त्वस्त्येव; **असंजमो तस्स** शुद्धात्मानुभूतिविलक्षणासंयमो वा कथं नास्ति, किन्त्वस्त्येव तस्य सपरिग्रहस्य। **तध परदव्वम्मि रदो** तथैव निजात्मद्रव्यात्परद्रव्ये रतः **कधमप्पाणं पसाधयदि** स तु सपरिग्रहपुरुषः कथमात्मानं प्रसाधयति, न कथमपीति ॥ २२१ ॥ एवं श्वेताम्बरमतानुसारिशिष्यसम्बोधनार्थं निर्ग्रन्थमोक्षमार्गस्थापनमुख्यत्वे प्रथमस्थले गाथापञ्चकं गतम्। अथ कालापेक्षया परमोपेक्षासंयमशक्त्यभावे सत्याहारसंयमशौचज्ञानोपकरणादिकं किमपि ग्राह्यमित्यपवादमुपदिशति—**छेदो**

यहाँ यह तात्पर्य है कि – 'उपधि ऐसी है, (परिग्रह वह अन्तरङ्ग छेद ही है), ऐसा निश्चित करके उसे सर्वथा छोड़ना चाहिये ॥ २२१ ॥

अब; 'किसीके कहीं कभी किसी प्रकार कोई उपधि अनिषिद्ध भी है' ऐसे अपवादका उपदेश करते हैं :–

गाथा २२२

अन्वयार्थ :– [**ग्रहणविसर्गेषु**] जिस उपधिके (आहार-नीहारादिके) ग्रहणविसर्जनमें सेवन करनेमें [**येन**] जिससे [**सेवमानस्य**] सेवन करनेवालेके [**छेदः**] छेद [**न विद्यते**] नहीं होता, [**तेन**] उस उपधियुक्त, [**कालं क्षेत्रं विज्ञाय**] काल क्षेत्रको जानकर, [**इह**] इस लोकमें [**श्रमणः**] श्रमण [**वर्तताम्**] भले वर्तें।

ग्रहणे विसर्गे सेवतां नहि छेद जेथी थाय छे।
ते उपधि सह वर्तो भले मुनि कालक्षेत्र विजाणीने ॥ २२२ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

आत्मद्रव्यस्य द्वितीयपुद्गलद्रव्याभावात्सर्व एवोपधिः प्रतिषिद्ध इत्युत्सर्गः। अयं तु विशिष्टकालक्षेत्रवशात्कश्चिदप्रतिषिद्ध इत्यपवादः। यदा हि श्रमणः सर्वोपधिप्रतिषेधमास्थाय परममुपेक्षासंयमं प्रतिपत्तुकामोऽपि विशिष्टकालक्षेत्रवशावसन्नशक्तिर्न प्रतिपत्तुं क्षमते, तदापकृष्य संयमं प्रतिपद्यमानस्तद्बहिरङ्गसाधनमात्रमुपधिमातिष्ठते। स तु तथा स्थीयमानो न खलूपधित्वाच्छेदः, प्रत्युत छेदप्रतिषेध एव। यः किलाशुद्धोपयोगाविनाभावी स छेदः। अयं तु श्रामण्यपर्यायसहकारिकारणशरीरवृत्तिहेतुभूताहारनिर्हारादिग्रहणविसर्जनविषयच्छेदप्रतिषेधार्थमुपादीयमानः सर्वथा शुद्धोपयोगाविनाभूतत्वाच्छेदप्रतिषेध एव स्यात् ॥ २२२ ॥

जेण ण विज्जदि छेदो येन न विद्यते। येनोपकरणेन शुद्धोपयोगलक्षणसंयमस्य छेदो विनाशो न विद्यते। कयोः। **गहणविसग्गेसु** ग्रहणविसर्गयोः। यस्योपकरणस्यान्यवस्तुनो वा ग्रहणे स्वीकारे विसर्जने त्यागे। किं कुर्वतः तपोधनस्य। **सेवमाणस्स** तदुपकरणं सेवमानस्य। **समणो तेणिह वट्टदु कालं खेत्तं वियाणित्ता** श्रमणस्तेनोपकरणेनेह लोके वर्तताम्। किं कृत्वा। कालं क्षेत्रं च विज्ञायेति। अयमत्र भावार्थः— कालं पञ्चमकालं शीतोष्णादिकालं वा, क्षेत्रं भरतक्षेत्रं मनुष्यजाङ्गलादिक्षेत्रं वा विज्ञाय येनोपकरणेन स्वसंवित्तिलक्षणभावसंयमस्य बहिरङ्गद्रव्यसंयमस्य वा छेदो न भवति तेन वर्तत इति ॥ २२२ ॥

टीका :— आत्मद्रव्यके द्वितीय पुद्गलका अभाव होनेसे समस्त ही उपधि निषिद्ध है — ऐसा उत्सर्ग (सामान्य नियम) है; और विशिष्ट कालक्षेत्रके वश कोई उपधि अनिषिद्ध है — ऐसा अपवाद है। जब श्रमण सर्व उपधिके निषेधका आश्रय लेकर [१]परमोपेक्षासंयमको प्राप्त करनेका इच्छुक होने पर भी विशिष्ट कालक्षेत्रके वश हीन शक्तिवाला होनेसे उसे प्राप्त करनेमें असमर्थ होता है, तब उसमें [२]अपकर्षण करके (अनुत्कृष्ट) संयम प्राप्त करता हुआ उसकी बहिरङ्ग साधनमात्र उपधिका आश्रय करता है। इसप्रकार जिसका आश्रय किया जाता है ऐसी वह उपधि उपधिपनेके कारण वास्तवमें छेदरूप नहीं है, प्रत्युत छेदकी निषेधरूप (त्यागरूप) ही है। जो उपधि अशुद्धोपयोगके बिना नहीं होती वह छेद है। किन्तु यह (संयमकी बाह्यसाधनमात्रभूत उपधि) तो श्रामण्यपर्यायकी सहकारी कारणभूत शरीरकी वृत्तिके हेतुभूत आहार-नीहारादिके ग्रहण-विसर्जन (ग्रहण-त्याग) संबंधी छेदके निषेधार्थ ग्रहण की जानेसे सर्वथा शुद्धोपयोग सहित है, इसलिये छेदके निषेधरूप ही है ॥ २२२ ॥

---

[१] परमोपेक्षासंयम = परम-उपेक्षासंयम [उत्सर्ग, निश्चयनय, सर्वपरित्याग परमोपेक्षासंयम, वीतराग चारित्र, और शुद्धोपयोग ; — ये सब एकार्थवाची हैं।]

[२] अपकर्षण = हीनता [अपवाद, व्यवहारनय, एकदेशपरित्याग, अपहृतसंयम (अल्पता-हीनतावाला संयम) सरागचारित्र और शुभोपयोग — ये सब एकार्थवाची हैं।]

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथाप्रतिषिद्धोपधिस्वरूपमुपदिशति –

अप्पडिकुट्ठं उवधिं अपत्थणिज्जं असंजदजणेहिं ।
मुच्छादिजणणरहिदं गेण्हदु समणो जदि वि अप्पं ॥ २२३ ॥

अप्रतिक्रुष्टमुपधिमप्रार्थनीयमसंयतजनैः ।
मूर्च्छादिजननरहितं गृह्णातु श्रमणो यद्यप्यल्पम् ॥ २२३ ॥

यः किलोपधिः सर्वथा बन्धासाधकत्वादप्रतिक्रुष्टः संयमादन्यत्रानुचितत्वादसंयतजनाप्रार्थनीयो रागादिपरिणाममन्तरेण धार्यमाणत्वान्मूर्च्छादिजननरहितश्च भवति, स खल्वप्रतिषिद्धः । अतो यथोदितस्वरूप एवोपधिरूपादेयो, न पुनरल्पोऽपि यथोदितविपर्यस्तस्वरूपः ॥ २२३ ॥

अथ पूर्वसूत्रोदितोपकरणस्वरूपं दर्शयति—**अप्पडिकुट्ठं उवधिं** निश्चयव्यवहारमोक्षमार्गसहकारिकारणत्वेनाप्रतिषिद्धमुपधिमुपकरणरूपोपधिं, **अपत्थणिज्जं असंजदजणेहिं** अप्रार्थनीयं निर्विकारात्मोपलब्धिलक्षणभावसंयमरहितस्यासंयतजनस्यानभिलषणीयम् **मुच्छादिजणणरहिदं** परमात्मद्रव्यविलक्षणबहिर्द्रव्यममत्वरूपमूर्च्छारञ्जनार्जनसंस्कारादिदोषजननरहितम्, **गेण्हदु समणो जदि वि अप्पं** गृह्णातु श्रमणो यमप्यल्पं पूर्वोक्तमुपकरणोपधिं यद्यप्यल्पं तथापि पूर्वोक्तोचितलक्षणमेव ग्राह्यं, न च तद्विपरीतमधिकं

अब, अनिषिद्ध उपधिका स्वरूप कहते हैं:—

गाथा २२३

अन्वयार्थ :– [**यद्यपि अल्पम्**] भले ही अल्प हो तथापि, [**अप्रतिक्रुष्टम्**] जो अनिंदित हो, [**असंयतजनैः अप्रार्थनीयं**] असंयतजनोंसे अप्रार्थनीय हो और [**मूर्च्छादिजननरहितं**] जो मूर्च्छादिकी जननरहित हो – [**उपधिं**] ऐसे ही उपधिको [**श्रमणः**] श्रमण [**गृह्णातु**] ग्रहण करो ।

टीका :– जो उपधि सर्वथा बंधका असाधक होनेसे अनिंदित है, संयतके अतिरिक्त अन्यत्र अनुचित होनेसे असंयतजनोंके द्वारा अप्रार्थनीय (अनिच्छनीय) है और रागादिपरिणामके बिना धारण की जानेसे मूर्च्छादिके उत्पादनसे रहित है, वह वास्तवमें अनिषिद्ध है । इससे यथोक्त स्वरूपवाली उपधि ही उपादेय है, किन्तु किंचित्मात्र भी तथोक्त स्वरूपसे विपरीत स्वरूपवाली उपधि उपादेय नहीं है ॥ २२३ ॥

उपधि अनिंदितने, असंयत जन थकी अणप्रार्थ्यने ।
मूर्छादिजनन रहितने ज ग्रहो श्रमण, थोडो भले ॥ २२३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथोत्सर्ग एव वस्तुधर्मो, न पुनरपवाद इत्युपदिशति –

किं किंचण त्ति तक्कं अपुणब्भवकामिणोध देहे वि ।
संग ति जिणवरिंदा अप्पडिकम्मत्तमुद्दिट्ठा ॥२२४॥

किं किंचनमिति तर्कः अपुनर्भवकामिनोऽथ देहेऽपि ।
संग इति जिनवरेन्द्रा अप्रतिकर्मत्वमुद्दिष्टवन्तः ॥ २२४ ॥

अत्र श्रामण्यपर्यायसहकारिकारणत्वेनाप्रतिषिध्यमानेऽत्यन्तमुपात्तदेहेऽपि परद्रव्यत्वात्परिग्रहोऽयं न नामानुग्रहार्हः किंतूपेक्ष्य एवेत्यप्रतिकर्मत्वमुपदिष्टवन्तो भगवन्तोऽर्हद्देवाः । अथ तत्र शुद्धात्मतत्त्वोपलम्भसंभावनरसिकस्य पुंसः शेषोऽन्योऽनुपात्तः परिग्रहो

वेत्यभिप्रायः ॥ २२३ ॥ अथ सर्वसङ्गपरित्याग एव श्रेष्ठः, शेषमशक्यानुष्ठानमिति प्ररूपयति – **किं किंचण त्ति तक्कं** किं किंचनमिति तर्कः, किं किंचन परिग्रह इति तर्को विचारः क्रियते तावत् । कस्य । **अपुणब्भवकामिणो** अपुनर्भवकामिनः अनन्तज्ञानादिचतुष्टयात्मकमोक्षाभिलाषिणः । **अध** अहो, **देहो वि** देहोऽपि **संग त्ति** सङ्गः परिग्रह इति हेतोः **जिणवरिंदा** जिनवरेन्द्राः कर्तारः **णिप्पडिकम्मत्तमुद्दिट्ठा** निःप्रतिकर्मत्वमुपदिष्टवन्तः । शुद्धोपयोगलक्षणपरमोपेक्षासंयमबलेन देहेऽपि

अब, 'उत्सर्ग ही वस्तुधर्म है, अपवाद नहीं' ऐसा उपदेश करते हैं :–

गाथा २२४

अन्वयार्थ :– [**अथ**] जब कि [**जिनवरेन्द्राः**] जिनवरेन्द्रोंने [**अपुनर्भवकामिनः**] मोक्षाभिलाषीके, [**संगः इति**] 'देह परिग्रह है' ऐसा कहकर [**देहे अपि**] देहमें भी [**अप्रतिकर्मत्वम्**] अप्रतिकर्मपना (संस्काररहितपना) [**उद्दिष्टवन्तः**] कहा (उपदेशा) है, तब [**किं किंचनम् इति तर्कः**] उनका यह (स्पष्ट) आशय है कि उसके अन्य परिग्रह तो कैसे हो सकता है ?

टीका :– यहाँ, श्रामण्यपर्यायका सहकारी कारण होनेसे जिसका निषेध नहीं किया गया है ऐसे अत्यन्त[1] उपात्त शरीरमें भी, 'यह (शरीर) परद्रव्य होनेसे परिग्रह है, वास्तवमें यह अनुग्रहयोग्य नहीं, किन्तु उपेक्षा योग्य ही है' ऐसा कहकर, भगवन्त

[1] उपात्त = प्राप्त, मिला हुआ ।

क्यम अन्य परिग्रह होय ज्यां कही देहने परिग्रह अहो ! ।
मोक्षेच्छुने देहेय निष्प्रतिकर्म उपदेशे जिनो ? ॥ २२४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

वराकः किं नाम स्यादिति व्यक्त एव हि तेषामाकूतः। अतोऽवधार्यते उत्सर्ग एव वस्तुधर्मो न पुनरपवादः। इदमत्र तात्पर्यं, वस्तुधर्मत्वात्परमनैर्ग्रन्थ्यमेवावलम्ब्यम् ॥ २२४ ॥

अथ केऽपवादविशेषा इत्युपदिशति –

उवयरणं जिणमग्गे लिंगं जहजादरूवमिदि भणिदं।
गुरुवयणं पि य विणओ सुत्तज्झयणं णिद्दिट्ठं ॥ २२५ ॥

उपकरणं जिनमार्गे लिङ्गं यथाजातरूपमिति भणितम्।
गुरुवचनमपि च विनयः सूत्राध्ययनं च निर्दिष्टम् ॥ २२५ ॥

निःप्रतिकारित्वं कथितवन्त इति। ततो ज्ञायते मोक्षसुखाभिलाषिणां निश्चयेन देहादिसर्वसङ्गपरित्याग एवोचितोऽन्यस्तूपचार एवेति ॥ २२४ ॥ एवमपवादव्याख्यानरूपेण द्वितीयस्थले गाथात्रयं गतम्। अथैकादशगाथापर्यन्तं स्त्रीनिर्वाणनिराकरणमुख्यत्वेन व्याख्यानं करोति। तद्यथा – श्वेताम्बरमतानुसारी शिष्यः पूर्वपक्षं करोति –

अर्हन्तदेवोंने अप्रतिकर्मपनेका उपदेश दिया है, तब फिर वहाँ शुद्धात्मतत्त्वोपलब्धिकी संभावनाके रसिक पुरुषोंके शेष अन्य [1]अनुपात्त परिग्रह बेचारा कैसे (अनुग्रह योग्य) हो सकता है ? – ऐसा उनका (अर्हन्त देवोंका) आशय व्यक्त ही है। इससे निश्चित होता है कि – उत्सर्ग ही वस्तुधर्म है, अपवाद नहीं।

यहाँ ऐसा तात्पर्य है कि वस्तुधर्म होनेसे परम निर्ग्रंथपना ही अवलम्बन योग्य है ॥२२४॥

अब, अपवादके कौनसे विशेष (भेद) हैं, सो कहते हैं :–

गाथा २२५

अन्वयार्थ :–[**यथाजातरूपं लिंगं**] यथाजातरूप (जन्मजात-नग्न) जो लिंग वह [**जिन-मार्गे**] जिनमार्गमें [**उपकरणं इति भणितम्**] उपकरण कहा गया है, [**गुरुवचनं**] गुरु के वचन, [**सूत्राध्ययनं च**] सूत्रोंका अध्ययन [**च**] और [**विनयः अपि**] विनय भी [**निर्दिष्टम्**] उपकरण कही गई है।

[1] अनुपात्त = अप्राप्त।

जन्म्या प्रमाणे रूप भाख्युं उपकरण जिनमार्गमां।
गुरुवचन ने सूत्राध्ययन, वली विनयपण उपकरणमां ॥ २२५ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यो हि नामाप्रतिषिद्धोऽस्मिन्नुपधिरपवादः, स खलु निखिलोऽपि श्रामण्यपर्यायसहकारिकारणत्वेनोपकारकारकत्वादुपकरणभूत एव, न पुनरन्यः। तस्य तु विशेषाः सर्वाहार्यवर्जितसहजरूपापेक्षितयथाजातरूपत्वेन बहिरंगलिंगभूताः कायपुद्गलाः श्रूयमाणतत्कालबोधकगुरुगीर्यमाणात्मतत्त्वद्योतकसिद्धोपदेशवचनपुद्गलाः, तथाधीयमाननित्यबोधकानादि-

---

पेच्छदि ण हि इह लोगं परं च समणिददेसिदो धम्मो।
धम्मम्हि तम्हि कम्हा वियप्पियं लिंगमित्थीणं॥ ⋆२०॥

पेच्छदि ण हि इह लोगं निरुपरागनिजचैतन्यनित्योपलब्धिभावनाविनाशकं ख्यातिपूजालाभरूपं प्रेक्षते न च हि स्फुटं इह लोकम्। न च केवलमिह लोकं, **परं च** स्वात्मप्राप्तिरूपं मोक्षं विहाय स्वर्गभोगप्राप्तिरूपं परं च परलोकं च नेच्छति। स कः। **समणिददेसिदो धम्मो** श्रमणेन्द्रदेशितो धर्मः, जिनेन्द्रोपदिष्ट इत्यर्थः। **धम्मम्हि तम्हि कम्हा** धर्मे तस्मिन् कस्मात् **वियप्पियं** विकल्पितं निर्ग्रन्थलिङ्गाद्वस्त्रप्रावरणेन पृथक्कृतम्। किम्। **लिंगं** सावरणचिह्नम्। कासां संबन्धि। **इत्थीणं** स्त्रीणामिति पूर्वपक्षगाथा॥ ⋆२०॥ अथ परिहारमाह—

णिच्छयदो इत्थीणं सिद्धी ण हि तेण जम्मणा दिट्ठा।
तम्हा तप्पडिरूवं वियप्पियं लिंगमित्थीणं॥ ⋆२१॥

णिच्छयदो इत्थीणं सिद्धी ण हि तेण जम्मणा दिट्ठा निश्चयतः स्त्रीणां नरकादिगतिविलक्षणानन्तसुखादिगुणस्वभावा तेनैव जन्मना सिद्धिर्न दृष्टा, न कथिता। **तम्हा तप्पडिरूवं** तस्मात्कारणात्तत्प्रतियोग्यं सावरणरूपं **वियप्पियं लिंगमित्थीणं** निर्ग्रन्थलिङ्गात्पृथक्त्वेन विकल्पितं कथितं लिङ्गं प्रावरणसहितं चिह्नम्। कासाम्। स्त्रीणामिति॥ ⋆२१॥ अथ स्त्रीणां मोक्षप्रतिबन्धकं प्रमादबाहुल्यं दर्शयति –

पइडीपमादमइया एदासिं वित्ति भासिया पमदा।
तम्हा ताओ पमदा पमादबहुला त्ति णिद्दिट्ठा॥ ⋆२२॥

टीका :– यथोक्त लक्षणवाले श्रमण ही – जो कि मोह, द्वेष और अप्रशस्त रागके उच्छेदसे अशुभोपयोगरहित वर्तते हुए, समस्त कषायोदयके विच्छेदसे कदाचित् शुद्धोपयुक्त [शुद्धोपयोगमें युक्त] और प्रशस्त रागके विपाकसे कदाचित् शुभोपयुक्त होते हैं वे – स्वयं मोक्षायतन [मोक्षके स्थान] होनेसे लोकको तार देते हैं, और उनके प्रति भक्तिभावसे जिनके प्रशस्त भाव प्रवर्तता है ऐसे पर जीव पुण्यके भागी (पुण्यशाली) होते हैं ॥२६०॥

अशुभोपयोग रहित श्रमणो – शुद्ध वा शुभयुक्त जे ।
ते लोकने तारे; अने तद्भक्त पामे पुण्यने ॥ २६० ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यथोक्तलक्षणा एव श्रमणा मोहद्वेषाप्रशस्तरागोच्छेदादशुभोपयोगवियुक्ताः सन्तः, सकलकषायोदयविच्छेदात् कदाचित् शुद्धोपयुक्ताः प्रशस्तरागविपाकात्कदाचिच्छुभोपयुक्ताः, स्वयं मोक्षायतनत्वेन लोकं निस्तारयन्ति ; तद्भक्तिभावप्रवृत्तप्रशस्तभावा भवन्ति परे च पुण्यभाजः ॥ २६० ॥

अथाविपरीतफलकारणाविपरीतकारणसमुपासनप्रवृत्तिं सामान्यविशेषतो विधेयतया सूत्रद्वैतेनोपदर्शयति –

दिट्ठा पगदं वत्थु अब्भुट्ठाणप्पधाणकिरियाहिं ।
वट्टदु तदो गुणादो विसेसिदव्वो त्ति उवदेसो ॥ २६१ ॥

दृष्ट्वा प्रकृतं वस्त्वभ्युत्थानप्रधानक्रियाभिः ।
वर्ततां ततो गुणाद्विशेषितव्य इति उपदेशः ॥ २६१ ॥

परंपरया मोक्षं चेति भावार्थः ॥ २६० ॥ एवं पात्रापात्रपरीक्षाकथनमुख्यतया गाथाषट्केन तृतीयस्थलं गतम् । इत ऊर्ध्वं आचारकथितक्रमेण पूर्वं कथितमपि पुनरपि दृढीकरणार्थं विशेषेण तपोधनसमाचारं कथयति । अथाभ्यागततपोधनस्य दिनत्रयपर्यन्तं सामान्यप्रतिपत्तिं, तदनन्तरं विशेषप्रतिपत्तिं दर्शयति – **वट्टदु** वर्ततां । स कः । अत्रत्य आचार्यः । किं कृत्वा । **दिट्ठा** दृष्ट्वा । किम् । **वत्थुं** तपोधनभूतं पात्रं वस्तु । किंविशिष्टम् । **पगदं प्रकृतं** अभ्यन्तरनिरुपरागशुद्धात्मभावनाज्ञापकबहिरङ्गनिर्ग्रन्थनिर्विकाररूपम् । काभिः कृत्वा वर्ततां । **अब्भुट्ठाणप्पधाणकिरियाहिं** अभ्यागतयोग्याचार-

---

अब, अविपरीत फलका कारण ऐसा जो 'अविपरीत कारण' उसकी उपासनारूप प्रवृत्ति सामान्य और विशेषरूपसे करने योग्य है ऐसा दो सूत्रों द्वारा बतलाते हैं–

गाथा २६१

अन्वयार्थ :– [**प्रकृतं वस्तु**] [1]प्रकृत वस्तुको [**दृष्ट्वा**] देखकर [प्रथम तो] [**अभ्युत्थानप्रधानक्रियाभिः**] [2]अभ्युत्थान आदि क्रियाओंसे [**वर्तताम्**] [श्रमण] वर्तो; [**ततः**] फिर [**गुणात्**] गुणानुसार [**विशेषितव्यः**] भेद करना, –

---

[1] प्रकृत वस्तु=अविकृत वस्तु; अविपरीत पात्र (अभ्यंतर-निरुपराग-शुद्ध आत्माकी भावनाको बतानेवाला जो बहिरंग-निर्ग्रंथ-निर्विकाररूप है उस रूपवाले श्रमणको यहां 'प्रकृत-वस्तु' कहा है ।)

[2] अभ्युत्थान=सम्मानार्थ खड़े हो जाना और सम्मुख जाना ।

प्रकृत वस्तु देखी अभ्युत्थान आदि क्रिया थकी ।
वर्तो श्रमण, पछी वर्तनीय गुणानुसार विशेषथी ॥ २६१ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

श्रमणानामात्मविशुद्धिहेतौ प्रकृते वस्तुनि तदनुकूलक्रियाप्रवृत्त्या गुणातिशयाधानमप्रतिषिद्धम् ॥ २६१ ॥

अब्भुट्ठाणं गहणं उवासणं पोसणं च सक्कारं ।
अंजलिकरणं पणमं भणिदमिह गुणाधिगाणं हि ॥ २६२ ॥

अभ्युत्थानं ग्रहणमुपासनं पोषणं च सत्कारः ।
अञ्जलिकरणं प्रणामो भणितमिह गुणाधिकानां हि ॥ २६२ ॥

विहिताभिरभ्युत्थानादिक्रियाभिः । **तदो गुणादो** ततो दिनत्रयानन्तरं गुणाद्गुणविशेषात् **विसेसिदव्वो** तेन आचार्येण स तपोधनो रत्नत्रयभावनावृद्धिकारणक्रियाभिर्विशेषितव्यः **त्ति उवदेसो** इत्युपदेशः सर्वज्ञगणधरदेवादीनामिति ॥ २६१ ॥ अथ तमेव विशेषं कथयति । **भणिदं** भणितं कथितं इह

[**इति उपदेशः**] ऐसा उपदेश है ।

टीकाः —श्रमणोंके आत्मविशुद्धिकी हेतुभूत प्रकृत वस्तु (श्रमण) के प्रति उसके योग्य (श्रमण योग्य) क्रियारूप प्रवृत्तिसे गुणातिशयताका आरोपण करनेका निषेध नहीं है ।

भावार्थ :— यदि कोई श्रमण अन्य श्रमणको देखे तो, प्रथम ही, मानो व अन्य श्रमण गुणातिशयवान् हों इसप्रकार उनके प्रति (अभ्युत्थानादि) व्यवहार करना चाहिये । फिर उनका परिचय होनेके बाद उनके गुणानुसार बर्ताव करना चाहिये ॥ २६१ ॥

(इसप्रकार पहला सूत्र कहकर अब इसी विषयका दूसरा सूत्र कहते हैं :—)

गाथा २६२

अन्वयार्थ :— [**गुणाधिकानां हि**] गुणोंमें अधिक (श्रमणों) के प्रति [**अभ्युत्थानं**] अभ्युत्थान, [**ग्रहणं**] ग्रहण (आदरसे स्वीकार), [**उपासनं**] उपासन (सेवा), [**पोषणं**] पोषण (उनके अशन, शयनादिकी चिन्ता), [**सत्कारः**] सत्कार (गुणों की प्रशंसा), [**अञ्जलिकरणं**] अञ्जलि करना (विनयपूर्वक हाथ जोड़ना) [**च**] और [**प्रणामः**] प्रणाम करना [**इह**] यहाँ [**भणितम्**] कहा है ।

गुणथी अधिक श्रमणो प्रति सत्कार, अभ्युत्थान ने ।
अंजलिकरण, पोषण, ग्रहण, सेवन अहीं उपदिष्ट छे ॥ २६२ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

श्रमणानां स्वतोऽधिकगुणानामभ्युत्थानग्रहणोपासनपोषणसत्काराञ्जलिकरण-प्रणामप्रवृत्तयो न प्रतिषिद्धाः ॥ २६२ ॥

अथ श्रमणाभासेषु सर्वाः प्रवृत्तीः प्रतिषेधयति –

अब्भुट्ठेया समणा सुत्तत्थविसारदा उवासेया ।
संजमतवणाणड्ढा पणिवदणीया हि समणेहिं ॥ २६३ ॥

अभ्युत्थेयाः श्रमणाः सूत्रार्थविशारदा उपासेयाः ।
संयमतपोज्ञानाढ्याः प्रणिपतनीया हि श्रमणैः ॥ २६३ ॥

अस्मिन्ग्रन्थे । केषां संबन्धी । **गुणाधिगाणं हि** गुणाधिकतपोधनानां हि स्फुटम् । किं भणितम् । **अब्भुट्ठाणं गहणं उवासणं पोसणं च सक्कारं अंजलिकरणं पणमं** अभ्युत्थानग्रहणोपासनपोषणसत्काराञ्जलिकरणप्रणामादिकम् । अभिमुखगमनभ्युत्थानम्, ग्रहणं स्वीकारः, उपासनं शुद्धात्मभावनासहकारिकारणनिमित्तं सेवा, तदर्थमेवाशनशयनादिचिन्ता पोषणम्, भेदाभेदरत्नत्रयगुणप्रकाशनं सत्कारः, बद्धाञ्जलिनमस्कारोऽञ्जलिकरणम्, नमोस्त्वतिवचनव्यापारः प्रणाम इति ॥ २६२ ॥ अथाभ्यागतानां तदेवाभ्युत्थानादिकं प्रकारान्तरेण निर्दिशति – **अब्भुट्ठेया** यद्यपि चारित्रगुणेनाधिका न भवन्ति, तपसा वा, तथापि सम्यग्ज्ञानगुणेन ज्येष्ठत्वाच्छ्रुतविनयार्थमभ्युत्थेयाः अभ्युत्थानयोग्या भवन्ति । के ते । **समणा** श्रमणा निर्ग्रन्थाचार्याः । किंविशिष्टाः । **सुत्तत्थविसारदा** विशुद्धज्ञानदर्शनस्वभावपरमात्मतत्त्वप्रभृत्यनेकान्तात्मकपदार्थेषु वीतरागसर्वज्ञप्रणीतमार्गेण प्रमाणनयनिक्षेपैर्विचार

टीका :– श्रमणोंको अपनेसे अधिक गुणवान (श्रमण) के प्रति अभ्युत्थान, ग्रहण, उपासन, सत्कार, अंजलिकरण और प्रणामरूप प्रवृत्तियाँ निषिद्ध नहीं हैं ॥ २६२ ॥

अब श्रमणाभासोंके प्रति समस्त प्रवृत्तियोंका निषेध करते हैं :–

गाथा २६३

अन्वयार्थ :–[**श्रमणैः हि**] श्रमणोंके द्वारा [**सूत्रार्थविशारदाः**] सूत्रार्थविशारद (सूत्रोंके और सूत्रकथित पदार्थोंके ज्ञानमें निपुण) तथा [**संयमतपोज्ञानाढ्याः**] संयम-तपज्ञानाढ्य, (संयम, तप और आत्मज्ञानमें समृद्ध) [**श्रमणः**] श्रमण [**अभ्युत्थेयाः उपासेयाः प्रणिपतनीयाः**] अभ्युत्थान, उपासना और प्रणाम करने योग्य हैं।

मुनिसूत्र-अर्थ प्रवीण संयमज्ञानतपसमृद्धने ।
प्रणिपात, अभ्युत्थान, सेवा साधुओ कर्तव्य छे ॥ २६३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

सूत्रार्थवैशारद्यप्रवर्तितसंयमतपःस्वतत्त्वज्ञानानामेव श्रमणानामभ्युत्थानादिकाः प्रवृत्तयोऽप्रतिषिद्धा, इतरेषां तु श्रमणाभासानां ताः प्रतिषिद्धा एव ॥ २६३ ॥

अथ कीदृशः श्रमणाभासो भवतीत्याख्याति –

ण हवदि समणो त्ति मदो संजमतवसुत्तसंपजुत्तो वि ।
जदि सद्दहदि ण अत्थे आदपधाणे जिणक्खादे ॥ २६४ ॥

न भवति श्रमण इति मतः संयमतपःसूत्रसंप्रयुक्तोऽपि ।
यदि श्रद्धत्ते नार्थानात्मप्रधानान् जिनाख्यातान् ॥ २६४ ॥

चतुरचेतसः सूत्रार्थविशारदाः । न केवलमभ्युत्थेयाः, **उवासेया** परमचिज्ज्योतिःपरमात्मपदार्थपरिज्ञानार्थमुपासेयाः परमभक्त्या सेवनीयाः । **संजमतवणाणड्ढा पणिवदणीया हि** संयमतपोज्ञानाढ्याः प्रणिपतनीयाः हि स्फुटं । बहिरङ्गेन्द्रियसंयमप्राणसंयमबलेनाभ्यन्तरे स्वशुद्धात्मनि यत्नपरत्वं संयमः । बहिरङ्गानशनादितपोबलेनाभ्यन्तरे परद्रव्येच्छानिरोधेन च स्वस्वरूपे प्रतपनं विजयनं तपः । बहिरङ्गपरमागमाभ्यासेनाभ्यन्तरे स्वसंवेदनज्ञानं सम्यग्ज्ञानम् । एवमुक्तलक्षणैः संयमतपोज्ञानैराढ्याः परिपूर्णा यथासंभवं प्रतिवन्दनीयाः । कैः । **समणेहिं** श्रमणैरिति । अत्रेदं तात्पर्यम् – ये बहुश्रुता अपि चारित्राधिका न भवन्ति, तेऽपि परमागमाभ्यासनिमित्तं यथायोग्यं वन्दनीयाः । द्वितीयं च कारणम् – ते सम्यक्त्वे ज्ञाने च पूर्वमेव दृढतराः, अस्य तु नवतरतपोधनस्य सम्यक्त्वे ज्ञाने चापि दार्ढ्यं नास्ति । तर्हि स्तोकचारित्राणां किमर्थमागमे वन्दनादिनिषेधः कृत इति चेत् । अतिप्रसंगनिषेधार्थमिति ॥ २६३ ॥

टीका :– जिनके सूत्रोंमें और पदार्थोंमें विशारदपनेके द्वारा संयम, तप और स्वतत्वका ज्ञान प्रवर्तता है उन श्रमणोंके प्रति ही अभ्युत्थानादिक प्रवृत्तियाँ अनिषिद्ध हैं, परन्तु उनके अतिरिक्त अन्य श्रमणाभासोंके प्रति वे प्रवृत्तियाँ निषिद्ध ही हैं ॥ २६३ ॥

अब, कैसा जीव श्रमणाभास है सो कहते हैं :–

गाथा २६४

अन्वयार्थ :– [**संयमतपःसूत्रसंप्रयुक्तः अपि**] सूत्र, संयम और तपसे संयुक्त होने पर भी [**यदि**] यदि (वह जीव) [**जिनाख्यातान्**] जिनोक्त [**आत्मप्रधानान्**] आत्मप्रधान [**अर्थान्**] पदार्थोंका [**न श्रद्धत्ते**] श्रद्धान नहीं करता तो वह [**श्रमणः न भवति**] श्रमण नहीं है,– [**इति मतः**] ऐसा (आगममें) कहा है ।

शास्त्रे कह्यु – तपसूत्रसंयमयुक्तपण साधु नहीं ।
जिन-उक्त आत्मप्रधान सर्व पदार्थ जो श्रद्धे नहीं ॥ २६४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

आगमज्ञोऽपि, संयतोऽपि, तपःस्थोऽपि जिनोदितमनन्तार्थनिर्भरं विश्वं स्वेनात्मना ज्ञेयत्वेन निष्पीतत्वादात्मप्रधानमश्रद्दधानः श्रमणाभासो भवति ॥ २६४ ॥

अथ श्रामण्येन सममननुमन्यमानस्य विनाशं दर्शयति –

अववददि सासणत्थं समणं दिट्ठा पदोसदो जो हि ।
किरियासु णाणुमण्णदि हवदि हि सो णट्ठचारित्तो ॥ २६५ ॥

अपवदति शासनस्थं श्रमणं दृष्ट्वा प्रद्वेषतो यो हि ।
क्रियासु नानुमन्यते भवति हि स नष्टचारित्रः ॥ २६५ ॥

अथ श्रमणाभासः कीदृणो भवनीति पृष्टे प्रत्युत्तरं ददाति – **ण हवदि समणो** स श्रमणो न भवति **त्ति मदो** इति मतः सम्मतः। क्व। आगमे। कथंभूतोऽपि। **संजमतवसुत्तसंपजुत्तो वि** संयमतपःश्रुतैः संप्रयुक्तोऽपि सहितोऽपि। यदि किम्। **जदि सद्दहदि ण** यदि चेन्मूढत्रयादिपञ्चविंशतिसम्यक्त्वमल-सहितः सन् न श्रद्धत्ते, न रोचते, न मन्यते। कान्। **अत्थे** पदार्थान्। कथंभूतान्। **आदपधाणे** निर्दोषिपरमात्मप्रभृतीन्। पुनरपि कथंभूतान्। **जिणक्खादे** वीतरागसर्वज्ञजिनेश्वरेणाख्यातान्, दिव्यध्वनिना प्रणीतान्, गणधरदेवैर्ग्रन्थविरचितानित्यर्थः ॥ २६४ ॥ अथ मार्गस्थश्रमणदूषणे दोषं

टीका :– आगमका ज्ञाता होनेपर भी, संयत होनेपर भी, तपमें स्थित होनेपर भी, जिनोक्त अनन्त पदार्थोंसे भरे हुए विश्व को – जो कि (विश्व) अपने आत्मासे ज्ञेयरूपसे पिया जाता होनेके कारण [१]आत्मप्रधान है उसका – जो जीव श्रद्धान नहीं करता वह श्रमणाभास है ॥ २६४ ॥

अब, जो श्रामण्यसे समान हैं उनका अनुमोदन (आदर) न करनेवालेका विनाश बतलाते हैं :–

गाथा २६५

अन्वयार्थ :– [**यः हि**] जो [**शासनस्थं श्रमणं**] शासनस्थ (जिनदेवके शासनमें स्थित) श्रमणको [**दृष्ट्वा**] देखकर [**प्रद्वेषतः**] द्वेषसे [**अपवदति**] उसका अपवाद करता है और [**क्रियासु न अनुमन्यते**] (सत्कारादि) क्रियाओंके करनेमें अनुमत (प्रसन्न) नहीं है [**सः नष्टचारित्रः हि भवति**] उसका चारित्र नष्ट होता है ।

---

[१] आत्मप्रधान=जिसमें आत्मा प्रधान है ऐसा; [आत्मा समस्त विश्वको जानता है इसलिये वह विश्वमें—विश्वके समस्त पदार्थोंमें—प्रधान है ।]

मुनि शासने स्थित देखीने जे द्वेषथी निंदा करे ।
अनुमत नहीं किरिया विषे, ते नाश चरण तणो करे ॥ २६५ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

श्रमणं शासनस्थमपि प्रद्वेषादपवदतः क्रियास्वननुमन्यमानस्य च प्रद्वेषकषायितत्वा-च्चारित्रं नश्यति ॥ २६५ ॥

अथ श्रामण्येनाधिकं हीनमिवाचरतो विनाशं दर्शयति –

गुणदोधिगस्स विणयं पडिच्छगो जो वि होमि समणो त्ति ।
होज्जं गुणाधरो जदि सो होदि अणंतसंसारी ॥ २६६ ॥

गुणतोऽधिकस्य विनयं प्रत्येषको योऽपि भवामि श्रमण इति ।
भवन् गुणाधरो यदि स भवत्यनन्तसंसारी ॥ २६६ ॥

दर्शयति – **अववददि** अपवदति दूषयत्यपवादं करोति । स कः । **जो हि** यः कर्ता हि स्फुटम् । कम् । **समणं** श्रमणं तपोधनम् । कथंभूतम् । **सासणत्थं** शासनस्थं निश्चयव्यवहारमोक्षमार्गस्थम् । कस्मात् । **पदोसदो** निर्दोषिपरमात्मभावनाविलक्षणात् प्रद्वेषात्कषायात् । किं कृत्वा पूर्वम् । **दिट्ठा** दृष्ट्वा । न केवलं अपवदति, **णाणुमण्णदि** नानुमन्यते । कासु विषये । **किरियासु** यथायोग्यं वन्दनादिक्रियासु । **हवदि हि सो** भवति हि स्फुटं सः । किंविशिष्टः । **णट्ठचारित्तो** कथंचिदति-प्रसंगान्नष्टचारित्रो भवतीति । तथाहि – मार्गस्थतपोधनं दृष्ट्वा यदि कथंचिन्मात्सर्यवशाद्दोषग्रहणं करोति तदा चारित्रभ्रष्टो भवति स्फुटं; पश्चादात्मनिन्दां कृत्वा निवर्तते तदा दोषो नास्ति, कालान्तरे वा निवर्तते तथापि दोषो नास्ति । यदि पुनस्तत्रैवानुबन्धं कृत्वा तीव्रकषायवशादतिप्रसंगं करोति तदा चारित्रभ्रष्टो भवतीति । अयमत्र भावार्थः–बहुश्रुतैरल्पश्रुततपोधना दोषो न ग्राह्यस्तैरपि तपोधनैः किमपि पाठमात्रं गृहीत्वा तेषां दोषो न ग्राह्यः, किंतु किमपि सारपदं गृहीत्वा स्वयं भावनैव कर्तव्या । कस्मादिति चेत् । रागद्वेषोत्पत्तौ सत्यां बहुश्रुतानां श्रुतफलं नास्ति, तपोधनानां तपःफलं चेति ॥ २६५ ॥ अत्राह शिष्यः– अपवादव्याख्यानप्रस्तावे शुभोपयोगो व्याख्यातः,

---

टीका :– जो श्रमण द्वेषके कारण शासनस्थ श्रमणका भी अपवाद बोलता है और (उसके प्रति सत्कारादि) क्रियायें करनेमें अनुमत नहीं है, वह श्रमण द्वेषसे [1]कषायित होनेसे उसका चारित्र नष्ट हो जाता है ॥ २६५ ॥

अब, जो श्रामण्यमें अधिक हो उसके प्रति जैसे कि वह श्रामण्यमें हीन (अपनेसे मुनिपनेमें नीचा) हो ऐसा आचरण करनेवालेका विनाश बतलाते हैं :–

---

[1] कषायित=क्रोधमानादिक कषायवाले; रंगित; विकारी ।

जे हीनगुण होवा छतां 'हुं पण श्रमण छुं' मदकरे ।
इच्छे विनय गुण-अधिक पास, अनंतसंसारी बने ॥ २६६ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

स्वयं जघन्यगुणः सन् श्रमणोऽहमपीत्यवलेपात्परेषां गुणाधिकानां विनयं प्रतीच्छन् श्रामण्यावलेपवशात् कदाचिदनन्तसंसार्यपि भवति ।। २६६ ।।

अथ श्रामण्येनाधिकस्य हीनं सममिवाचरतो विनाशं दर्शयति –

पुनरपि किमर्थं अत्र व्याख्यानं कृतमिति। परिहारमाह – युक्तमिदं भवदीयवचनं, किंतु तत्र सर्वत्यागलक्षणोत्सर्गव्याख्याने कृते सति तत्रासमर्थतपोधनैः कालापेक्षया किमपि ज्ञानसंयमशौचोपकरणादिकं ग्राह्यमित्यपवादव्याख्यानमेव मुख्यम्। अत्र तु यथा भेदनयेन सम्यग्दर्शनज्ञानचारित्रतपश्चरणरूपा चतुर्विधाराधना भवति, सैवाभेदनयेन सम्यक्त्वचारित्ररूपेण द्विधा भवति, तत्राप्यभेदविवक्षया पुनरेकैव वीतरागचारित्राराधना, तथा भेदनयेन सम्यग्दर्शनसम्यग्ज्ञानसम्यक्चारित्ररूपस्त्रिविधमोक्षमार्गो भवति, स एवाभेदनयेन श्रामण्यापरमोक्षमार्गनामा पुनरेक एव, स चाभेदरूपो मुख्यवृत्त्या 'एयग्गगदो समणो' इत्यादिचतुर्दशगाथाभिः पूर्वमेव व्याख्यातः। अयं तु भेदरूपो मुख्यवृत्त्या शुभोपयोगरूपेणेदानीं व्याख्यातो, नास्ति पुनरुक्तदोष इति। एवं समाचारविशेषविवरणरूपेण चतुर्थस्थले गाथाष्टकं गतम्। अथ स्वयं गुणहीनः सन् परेषां गुणाधिकानां योऽसौ विनयं वाञ्छति, तस्य गुणविनाशं दर्शयति – **सो होदि अणंतसंसारी** स कथंचिदनन्तसंसारी संभवति। यः किं करोति। **पडिच्छणो जो दु** प्रत्येषको यस्तु, अभिलाषकोऽपेक्षक इति। कम्। **विणयं** वन्दनादिविनयम्। कस्य संबन्धिनम्। **गुणदोधिगस्स** बाह्याभ्यन्तररत्नत्रयगुणाभ्यामधिकस्यान्यतपोधनस्य। केन कृत्वा। **होमि समणो त्ति** अहमपि श्रमणो भवामीत्यभिमानेन गर्वेण। यदि किम्। **होज्जं गुणाधरो जदि** निश्चयव्यवहाररत्नत्रयगुणाभ्यां हीनः स्वयं यदि चेद्भवतीति। अयमत्रार्थः– यदि चेद्गुणाधिकेभ्यः सकाशाद्गर्वेण पूर्वं विनयावाच्छां करोति, पश्चाद्विवेकबलेनात्मनिन्दां करोति, तदानन्तसंसारी न भवति, यदि पुनस्तत्रैव मिथ्याभिमानेन ख्यातिपूजालाभार्थं दुराग्रहं करोति तदा भवति। अथवा यदि कालान्तरेऽप्यात्मनिन्दां करोति तथापि न भवतीति ।। २६६ ।। अथ स्वयमधिकगुणाः सन्तो यदि

गाथा २६६

अन्वयार्थ :– [**यः**] जो श्रमण [**यदि गुणाधरः भवन्**] गुणोंमें हीन होनेपर भी [**अपि श्रमणः भवामि**] 'मैं भी श्रमण हूँ' [**इति**] ऐसा मानकर अर्थात् गर्व करके [**गुणतः अधिकस्य**] गुणोंमें अधिक (ऐसे श्रमण) के पाससे [**विनयं प्रत्येषकः**] विनय (करवाना) चाहता है [**सः**] वह [**अनन्तसंसारी भवति**] अनन्तसंसारी होता है।

टीका :– जो श्रमण स्वयं जघन्य गुणोंवाला होनेपर भी 'मैं भी श्रमण हूँ' ऐसे गर्वके कारण दूसरे अधिक गुणवालों (श्रमणों) से विनयकी इच्छा करता है, वह श्रामण्यके गर्वके वशसे कदाचित् अनन्त संसारी भी होता है ।। २६६ ।।

अब, जो श्रमण श्रामण्यसे अधिक हो वह, जो अपनेसे हीन श्रमणके प्रति समान जैसा (अपने बराबरी वाले जैसा) आचरण करे तो उसका विनाश बतलाते हैं :–

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अधिगगुणा सामण्णे वट्टंति गुणाधरेहिं किरियासु ।
जदि ते मिच्छुवजुत्ता हवंति पब्भट्ठचारित्ता ॥ २६७ ॥

अधिकगुणाः श्रामण्ये वर्तन्ते गुणाधरैः क्रियासु ।
यदि ते मिथ्योपयुक्ता भवन्ति प्रभ्रष्टचारित्राः ॥ २६७ ॥

स्वयमधिकगुणा गुणाधरैः परैः सह क्रियासु वर्तमानामोहादसम्यगुपयुक्तत्वाच्चारित्राद्भ्रश्यन्ति ॥ २६७ ॥

गुणाधरैः सह वन्दनादिक्रियासु वर्तन्ते तदा गुणविनाशं दर्शयति – **वट्टंति** वर्तन्ते प्रवर्तन्ते **जदि** यदि चेत् । क्व वर्तन्ते । **किरियासु** वन्दनादिक्रियासु । कैः सह । **गुणाधरेहिं** गुणाधरैर्गुणरहितैः । स्वयं कथंभूताः सन्तः । **अधिगगुणा** अधिकगुणा । क्व । **सामण्णे** श्रामण्ये चारित्रे । **ते मिच्छत्तपउत्ता हवंति** ते कथंचिदतिप्रसंगान्मिथ्यात्वप्रयुक्ता भवन्ति । न केवलं मिथ्यात्वप्रयुक्ताः, **पब्भट्ठचारित्ता** प्रभ्रष्टचारित्राश्च भवन्ति । तथाहि – यदि बहुश्रुतानां पार्श्वे ज्ञानादिगुणवृद्ध्यर्थं स्वयं चारित्रगुणाधिका अपि वन्दनादिक्रियासु वर्तन्ते तदा दोषो नास्ति । यदि पुनः केवलं ख्यातिपूजालाभार्थं वर्तन्ते तदातिप्रसंगाद्दोषो भवति । इदमत्र तात्पर्यम् – वन्दनादिक्रियासु वा तत्त्वविचारादौ वा यत्र रागद्वेषोत्पत्तिर्भवति तत्र सर्वत्र दोष एव । ननु भवदीयकल्पनेयमागमे तथा नास्ति । नैवम्, आगमः सर्वोऽपि रागद्वेषपरिहारार्थं एव, परं किंतु ये केचनोत्सर्गापवादरूपेणागमनयविभागं न जानन्ति त एव रागद्वेषौ कुर्वन्ति, न चान्य इति ॥ २६७ ॥ इति पूर्वोक्तक्रमेण 'एयग्गगदो' इत्यादिचतुर्दशगाथाभिः स्थलचतुष्टयेन श्रामण्यापरनामा मोक्षमार्गाभिधानस्तृतीयोऽन्तराधिकारः समाप्तः । अथानन्तरं

गाथा २६७

अन्वयार्थ :– [**यदि श्रामण्ये अधिकगुणाः**] जो श्रामण्यमें अधिक गुणवाले हैं, तथापि [**गुणाधरैः**] हीनगुणवालोंके प्रति [**क्रियासु**] (वंदनादि) क्रियाओंमें [**वर्तन्ते**] वर्तते हैं, [**ते**] वे [**मिथ्योपयुक्ताः**] मिथ्या उपयुक्त होते हुए [**प्रभ्रष्टचारित्राः भवन्ति**] चारित्रसे भ्रष्ट होते हैं ।

टीका :– जो स्वयं अधिक गुणवाले होनेपर भी अन्य हीनगुणवालों (श्रमणों) के प्रति (वंदनादि) क्रियाओंमें वर्तते हैं वे मोहके कारण असम्यक् उपयुक्त होते हुए (मिथ्याभावोंमें युक्त होते हुए) चारित्रसे भ्रष्ट होते हैं ॥ २६७ ॥

अब, असत्संग निषेध्य है ऐसा बतलाते हैं :–

मुनि अधिकगुण हीनगुण प्रति वर्ते यदि विनयादिमां ।
तो भ्रष्ट थाय चरित्रथी उपयुक्त मिथ्या भावमां ॥ २६७ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथासत्संगं प्रतिषेध्यत्वेन दर्शयति –

णिच्छिदसुत्तत्थपदो समिदकसाओ तवोधिगो चावि ।
लोगिगजणसंसग्गं ण चयदि जदि संजदो ण हवेदि ॥ २६८ ॥

निश्चितसूत्रार्थपदः समितकषायस्तपोऽधिकश्चापि ।
लौकिकजनसंसर्गं न त्यजति यदि संयतो न भवति ॥ २६८ ॥

द्वात्रिंशद्गाथापर्यन्तं पञ्चभिः स्थलैः शुभोपयोगाधिकारः कथ्यते । तत्रादौ लौकिकसंसर्गनिषेधमुख्यत्वेन 'णिच्छिदसुत्तत्थपदो' इत्यादिपाठक्रमेण गाथापञ्चकम् । तदनन्तरं सरागसंयमापरनामशुभोपयोग-स्वरूपकथनप्रधानत्वेन 'समणा सुद्धवजुता' इत्यादि सूत्राष्टकम् । ततश्च पात्रापात्रापरीक्षाप्रति-पादनरूपेण 'रागो पसत्थभूदो' इत्यादि गाथाषट्कम् । ततः परमाचारादिविहितक्रमेण पुनरपि संक्षेप-रूपेण समाचारव्याख्यानप्रधानत्वेन 'दिट्ठा पगदं वत्थुं' इत्यादि सूत्राष्टकम् । ततः परं पञ्चरत्नमुख्यत्वेन

गाथा २६८

अन्वयार्थ :– [**निश्चितसूत्रार्थपदः**] जिसने सूत्रों और अर्थोंके पदको – अधिष्ठानको (अर्थात् ज्ञातृतत्त्वको) निश्चित किया है, [**समितकषायः**] जिसने कषायोंका शमन किया है, [**च**] और [**तपोऽधिकः अपि**] जो अधिक तपवान् है – ऐसा जीव भी [**यदि**] यदि [**लौकिकजनसंसर्गं**] लौकिकजनोंके संसर्गको [**न त्यजति**] नहीं छोड़ता, [**संयतः न भवति**] तो वह संयत नहीं है (अर्थात् असंयत हो जाता है) ।

टीका :– (१) विश्वके वाचक, 'सत्' लक्षणवान् ऐसा जो शब्दब्रह्म और उस शब्दब्रह्मके वाच्य 'सत्' लक्षणवाला ऐसा जो सम्पूर्ण विश्व उन दोनोंके ज्ञेयाकार अपनेमें युगपत् गुंथ जानेसे (-ज्ञातृतत्त्वमें एक ही साथ ज्ञात होनेसे) उन दोनोंका [1]अधिष्ठान-भूत ऐसा 'सत्' लक्षणवाले ज्ञातृत्वका निश्चय किया होनेसे 'जिसने सूत्रों और अर्थोंके पदको (-अधिष्ठानको) निश्चित किया है ऐसा' हो, (२) निरुपराग उपयोगके कारण

---

[1] ज्ञातृतत्त्वका स्वभाव शब्दब्रह्मको और उसके वाच्यरूप विश्वको युगपद् जाननेका है इसलिये उस अपेक्षा ज्ञातृ-तत्त्वको शब्दब्रह्मका तथा विश्वका अधिष्ठान–आधार कहा गया है । संयत जीवको ऐसे ज्ञातृतत्त्वका निश्चय होता है ।

सूत्रार्थ पद निश्चय, कषायप्रशांति, तप-अधिकत्व छे ।
ते पण असंयत थाय, जो छोडे न लौकिक-संगने ॥ २६८ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यतः सकलस्यापि विश्ववाचकस्य सल्लक्ष्मणः शब्दब्रह्मणस्तद्वाच्यस्य सकलस्यापि सल्लक्ष्मणो विश्वस्य च युगपदनुस्यूततदुभयज्ञेयाकारतयाधिष्ठानभूतस्य सल्लक्ष्मणो ज्ञातृतत्त्वस्य निश्चयनान्निश्चितसूत्रार्थपदत्वेन, निरुपरागोपयोगत्वात् समितकषायत्वेन, बहुशोऽभ्यस्तनिष्कम्पोपयोगत्वात्तपोऽधिकत्वेन च सुष्ठु संयतोऽपि सप्तार्चिःसंगतं तोयमिवावश्यंभाविविकारत्वात् लौकिकसंगादसंयत एव स्यात्। ततस्तत्संगः सर्वथा प्रतिषेध्य एव ॥ २६८ ॥

अथ लौकिकलक्षणमुपलक्षयति –

,जे अजधागहिदत्था' इत्यादि गाथापञ्चकम्। एवं द्वात्रिंशद्गाथाभिः स्थलपञ्चकेन चतुर्थान्तराधिकारे समुदायपातनिका। तद्यथा – अथ लौकिकसंसर्गं प्रतिषेधयति – **णिच्छिदसुत्तत्थपदो** निश्चितानि ज्ञातानि निर्णीतान्यनेकान्तस्वभावनिजशुद्धात्मादिपदार्थप्रतिपादकानि सूत्रार्थपदानि येन स भवति निश्चितसूत्रार्थपदः, **समिदकसाओ** परविषये क्रोधादिपरिहारेण तथाभ्यन्तरे परमोपशमभावपरिणतनिजशुद्धात्मभावनाबलेन च शमितकषायः, **तवोधिगो चावि** अनशनादिबहिरङ्गतपोबलेन तथैवाभ्यन्तरे शुद्धात्मतत्त्वभावनाविषये प्रतपनाद्विजयनाच्च तपोऽधिकश्चापि सन् स्वयं संयतः कर्ता **लोगिगजणसंसग्गं ण चयदि जदि** लौकिकाः स्वेच्छाचारिणस्तेषां संसर्गो लौकिकसंसर्गस्तं न त्यजति यदि चेत् **संजदो ण हवदि** तर्हि संयतो न भवतीति। अयमत्रार्थः – स्वयं भावितात्मापि यद्यसंवृतजनसंसर्गं न त्यजति तदातिपरिचयादग्निसङ्गतं जलमिव विकृतिभावं गच्छतीति ॥ २६८ ॥

'जिसने कषायोंको शमित किया है ऐसा' हो, और (३) निष्कंप उपयोगका [1]बहुशः अभ्यास करनेसे 'अधिक तपवाला' हो – इसप्रकार (इन तीन कारणोंसे) जो जीव भलीभाँति संयत हो, वह भी लौकिक (जनोंके) संगसे असंयत ही होता है, क्योंकि अग्निकी संगतिमें रहे हुए पानीकी भाँति उसे विकार अवश्यंभावी है। इसलिये लौकिक संग सर्वथा निषेध्य ही है।

भावार्थ :– जो जीव संयत हो, अर्थात् (१) जिसने शब्दब्रह्मको और उसके वाच्यरूप समस्त पदार्थोंको जाननेवाले ज्ञातृतत्त्वका निर्णय किया हो, (२) जिसने कषायोंको शमित किया हो (३) और जो अधिक तपवान् हो, वह जीव भी लौकिकजनके संगसे असंयत ही होता है; क्योंकि जैसे अग्निके संगसे पानीमें उष्णतारूप विकार अवश्य होता है, उसीप्रकार लौकिकजनके संसर्गको न छोड़नेवाले संयतके असंयततारूप विकार अवश्य होता है। इसलिये लौकिक जनोंका संग सर्वप्रकारसे त्याज्य ही है ॥ २६८ ॥

अब, 'लौकिक' (जन) का लक्षण कहते हैं :–

[1] बहुधा=(१) बहुत; खूब (२) बारंबार।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

णिग्गंथं पव्वइदो वट्टदि जदि एहिगेहिं कम्मेहिं ।
सो लोगिगो त्ति भणिदो संजमतवसंपजुत्तो वि ॥२६९॥

नैर्ग्रन्थ्यं प्रव्रजितो वर्तते यद्यैहिकैः कर्मभिः ।
स लौकिक इति भणितः संयमतपःसंप्रयुक्तोऽपि ॥ २६९ ॥

प्रतिज्ञातपरमनैर्ग्रन्थ्यप्रव्रज्यत्वादुद्वहसंयमतपोभारोऽपि मोहबहुलतया श्लथीकृतशुद्धचेतनव्यवहारो मुहुर्मनुष्यव्यवहारेण व्याधूर्णमानत्वादैहिककर्मानिवृत्तौ लौकिक इत्युच्यते ॥ २६९ ॥

अथानुकम्पालक्षणं कथ्यते—

तिसिदं बुभुक्खिदं वा दुहिदं दट्ठूण जो हि दुहिदमणो ।
पडिवज्जदि तं किवया तस्सेसा होदि अणुकंपा ॥ *३६ ॥

तिसिदं बुभुक्खिदं वा दुहिदं दट्ठूण जो हि दुहिदमणो पडिवज्जदि तृषितं वा बुभुक्षितं वा दुःखितं वा दृष्ट्वा कमपि प्राणिनं यो हि स्फुटं दुःखितमनाः सन् प्रतिपद्यते स्वीकरोति । कं कर्मतापन्नम् । **तं** तं प्राणिनम् । कया । **किवया** कृपया दयापरिणामेन । **तस्सेसा होदि अणुकंपा** तस्य पुरुषस्यैषा प्रत्यक्षीभूता शुभोपयोगरूपानुकम्पा दया भवतीति । इमां चानुकम्पां ज्ञानी स्वस्थभावनामविनाशयन् संक्लेशपरिहारेण करोति । अज्ञानी पुनः संक्लेशेनापि करोतीत्यर्थः ॥ ❀३६ ॥ अथ लौकिकलक्षणं कथयति – **णिग्गंथो पव्वइदो** वस्त्रादिपरिग्रहरहितत्वेन निर्ग्रन्थोऽपि दीक्षाग्रहणेन प्रव्रजितोऽपि **वट्टदि जदि** वर्तते यदि चेत् । कैः । **एहिगेहि कम्मेहिं** ऐहिकैः कर्मभिः भेदाभेदरत्नत्रयभावनाशकैः ख्यातिपूजालाभनिमित्तैर्ज्योतिषमन्त्रवादवैदकादिभिरैहिकजीवनोपायकर्मभिः । **सो लोगिगो त्ति भणिदो** स लौकिको व्यावहारिक इति भणितः । किंविशिष्टोऽपि । **संजमतवसंजुदो चावि** द्रव्यरूपसंयमतपोभ्यां संयुक्तश्चापीत्यर्थः ॥ २६९ ॥ अथोत्तमसंसर्गः कर्तव्य इत्युपदिशति – **तम्हा**

गाथा २६९

अन्वयार्थ :– [**नैर्ग्रन्थ्यं प्रव्रजितः**] जो (जीव) निर्ग्रंथरूपसे दीक्षित होनेके कारण [**संयमतपःसंप्रयुक्तः अपि**] संयमतपसंयुक्त हो उसे भी, [**यदि सः**] यदि वह [**ऐहिकैः कर्मभिः वर्तते**] ऐहिक कार्यों सहित वर्तता हो तो, [**लौकिकः इति भणितः**] 'लौकिक' कहा गया है ।

टीका :– परमनिर्ग्रंथतारूप प्रव्रज्याकी प्रतिज्ञा ली होनेसे जो जीव संयमतपके भारको वहन करता हो उसे भी, यदि उस मोहकी बहुलताके कारण शुद्धचेतन व्यव-

---

निर्ग्रंथरूप दीक्षा वडे संयमतपे संयुक्त जे ।
लौकिक कह्यो तेने य, जो छोडे न ऐहिक कर्मने ॥ २६९ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ सत्संगं विधेयत्वेन दर्शयति –

तम्हा समं गुणादो समणो समणं गुणेहिं वा अहियं ।
अधिवसदु तम्हि णिच्चं इच्छदि जदि दुक्खपरिमोक्खं ॥२७०॥

तस्मात्समं गुणात् श्रमणः श्रमणं गुणैर्वाधिकम् ।
अधिवसतु तत्र नित्यं इच्छति यदि दुःखपरिमोक्षम् ॥ २७० ॥

यस्माद्धीनसंसर्गाद्गुणहानिर्भवति तस्मात्कारणात् **अधिवसदु** अधिवसतु तिष्ठतु । स कः कर्ता । **समणो** श्रमणः । क्व । **तम्हि** तस्मिन्नधिकरणभूते । **णिच्चं** नित्यं सर्वकालम् । तस्मिन्कुत्र । **समणं** श्रमणे । लक्षणवशादधिकरणे कर्म पठ्यते । कथंभूते श्रमणे । **समं** समे समाने । कस्मात् । **गुणादो** बाह्याभ्यन्तररत्नत्रयलक्षणगुणात् । पुनरपि कथंभूते । **अहियं वा** स्वस्मादधिके वा । कैः । **गुणेहिं** मूलोत्तरगुणैः । यदि किम् । **इच्छदि जदि** इच्छति वाञ्छति यदि चेत् । कम् । **दुक्खपरिमोक्खं** स्वात्मोत्थसुखविलक्षणानां नारकादिदुःखानां मोक्षं दुःखपरिमोक्षमिति । अथ विस्तरः—यथाग्नि-

---

हारको छोड़कर निरंतर मनुष्यव्यवहारके द्वारा चक्कर खानेसे [1]ऐहिक कर्मोंसे अनिवृत्त हो तो, 'लौकिक' कहा जाता है ॥ २६९ ॥

अब, सत्संग विधेय (–करने योग्य) है, ऐसा बतलाते हैं :–

गाथा २७०

अन्वयार्थ :– [**तस्मात्**] (लौकिकजनके संगसे संयत भी असंयत होता है) इसलिये [**यदि**] यदि [**श्रमणः**] श्रमण [**दुःखपरिमोक्षम् इच्छति**] दुःखसे परिमुक्त होना चाहता हो तो वह [**गुणात्समं**] समान गुणोंवाले श्रमणके [**वा**] अथवा [**गुणैः अधिकं श्रमणं तत्र**] अधिक गुणोंवाले श्रमणके संगमें [**नित्यम्**] सदा [**अधिवस्तु**] निवास करो ।

टीका :– आत्मा परिणामस्वभाववाला है इसलिये अग्निके संगमें रहे हुए पानीकी भाँति (संयतके भी लौकिकसंगसे विकार अवश्यंभावी होनेसे संयत भी असंयत ही हो जाता है । इसलिये दुःखमोक्षार्थी (दुःखोंसे मुक्ति चाहनेवाले) श्रमणको (१) समान

---

[1] ऐहिक = लौकिक ।

तेथी श्रमणने होय जो दुःखमुक्ति केरी भावना ।
तो नित्य वसवुं समान अगर विशेष गुणीना संगमां ॥ २७० ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यतः परिणामस्वभावत्वेनात्मनः सप्तार्चिःसंगतं तोयमिवावश्यंभाविविकारत्वाल्लौकिकसंगात्संयतोऽप्यसंयत एव स्यात्; ततो दुःखमोक्षार्थिना गुणैः समोऽधिको वा श्रमणः श्रमणेन नित्यमेवाधिवसनीयः तथास्य शीतापवरककोणनिहितशीततोयवत्समगुणसंङ्गात्गुणरक्षा। शीततरतुहिनशर्करासंपृक्तशीततोयवत् गुणाधिकसंगात् गुणवृद्धिः ॥ २७० ॥

***इत्यध्यास्य शुभोपयोगजनितां कांचित्प्रवृत्तिं यतिः**
सम्यक् संयमसौष्ठवेन परमां क्रामन्निवृत्तिं क्रमात्।
हेलाक्रान्तसमस्तवस्तुविसरप्रस्तारारम्योदयां
ज्ञानानन्दमयीं दशामनुभवत्वेकान्ततः शाश्वतीम् ॥ १७ ॥

— इति शुभोपयोगप्रज्ञापनम्।

संयोगात् जलस्य शीतलगुणविनाशो भवति तथा व्यावहारिकजनसंसर्गात्संयतस्य संयमगुणविनाशो भवतीति ज्ञात्वा तपोधनः कर्ता समगुणं गुणाधिकं वा तपोधनमाश्रयति, तदास्य तपोधनस्य यथा शीतलभाजनसहितशीतलजलस्य शीतलगुणरक्षा भवति तथा समगुणसंसर्गाद्गुणरक्षा भवति। यथा च तस्यैव जलस्य कर्पूरशर्करादिशीतलद्रव्यनिक्षेपे कृते सति शीतलगुणवृद्धिर्भवति तथा निश्चयव्यवहाररत्नत्रयगुणाधिकसंसर्गाद्गुणवृद्धिर्भवतीति सूत्रार्थः ॥ २७० ॥ इतःपरं पञ्चमस्थले संक्षेपेण संसार-

---

गुणवाले श्रमणके साथ अथवा (२) अधिक गुणवाले श्रमणके साथ सदा ही निवास करना चाहिये। इसप्रकार उस श्रमणके (१) शीतल घरके कोनेमें रखे हुए शीतल पानीकी भाँति समान गुणवालेकी संगतिसे गुणरक्षा होती है और (२) अधिक शीतल हिम (बरफ) के संपर्कमें रहनेवाले शीतल पानीकी भाँति अधिक गुणवालेके संगसे गुणवृद्धि होती है ॥ २७० ॥

अब श्लोक द्वारा यह कहते हैं कि श्रमण क्रमशः परम निवृत्तिको प्राप्त करके शाश्वत ज्ञानानन्दमयदशाका अनुभव करो :—

[**अर्थ** :—] इसप्रकार शुभोपयोगजनित किंचित् प्रवृत्तिका सेवन करके यति सम्यक् प्रकारसे संयमके सौष्ठव (श्रेष्ठता, सुन्दरता) से क्रमशः परम निवृत्तिको प्राप्त होता हुआ ; जिसका रम्य उदय समस्त वस्तुसमूहके विस्तारको लीलामात्रसे प्राप्त हो जाता है (जान लेता है) ऐसी शाश्वती ज्ञानानन्दमयी दशाका एकान्ततः (केवल, सर्वथा, अत्यन्त) अनुभव करो।

*** इसप्रकार शुभोपयोग-प्रज्ञापन पूर्ण हुआ। ***

---

* शार्दूलविक्रीड़ित छन्द।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अथ पञ्चरत्नम् ।

शार्दूलविक्रीड़ित छन्द

तन्त्रस्यास्य शिखण्डमण्डनमिव प्रद्योतयत्सर्वतो-
द्वैतीयीकमथार्हतो भगवतः संक्षेपतः शासनम् ।
व्याकुर्वञ्जगतो विलक्षणपथां संसारमोक्षस्थितिं
जीयात्संप्रति पञ्चरत्नमनघं सूत्रैरिभैः पञ्चभिः ॥ १८ ॥

अथ संसारतत्त्वमुद्घाटयति –

जे अजधागहिदत्था एदे तच्च त्ति णिच्छदा समये ।
अच्चंतफलसमिद्धं भमंति ते तो परं कालं ॥ २७१ ॥

ये अयथागृहीतार्था एते तत्त्वमिति निश्चिताः समये ।
अत्यन्तफलसमृद्धं भ्रमन्ति ते अतः परं कालम् ॥ २७१ ॥

स्वरूपस्य मोक्षस्वरूपस्य च प्रतीत्यर्थं पञ्चरत्नभूतगाथापञ्चकेन व्याख्यानं करोति। तद्यथा–अथ संसारस्वरूपं प्रकटयति – **जे अजधागहिदत्था** वीतरागसर्वज्ञप्रणीतनिश्चयव्यवहाररत्नत्रयार्थपरिज्ञानाभावात् येऽयथागृहीतार्थाः विपरीतगृहीतार्थाः। पुनरपि कथंभूताः। **एदे तच्च त्ति णिच्छिदा** एते तत्त्वमिति निश्चिताः, एते ये मया कल्पिताः पदार्थास्त एव तत्त्वमिति निश्चिताः, निश्चयं

अब पंचरत्न हैं (अर्थात् पाँच रत्नों जैसी पाँच गाथायें कहते हैं) ।

[वहाँ पहले, श्लोक द्वारा उन पाँच गाथाओंकी महिमा कहते हैं –

अर्थ :– अब इस शास्त्रके कलगीके अलङ्कार जैसे (–चूड़ामणि–मुकुटमणि समान) यह पाँच सूत्ररूप निर्मल पंचरत्न – जोकि संक्षेपसे अर्हन्तभगवानके समग्र अद्वितीय शासनको सर्वतः प्रकाशित करते हैं वे –[1] विलक्षण पंथवाली संसार-मोक्षकी स्थितिको जगतके समक्ष प्रकट करते हुए जयवन्त वर्तो ।

अब संसारतत्वको प्रकट करते हैं :-

---

[1] विलक्षण=भिन्न-भिन्न [संसार और मोक्षकी स्थिति भिन्न-भिन्न पंथवाली है, अर्थात् संसार और मोक्षका मार्ग अलग-अलग है ।]

समयस्थ हो पण सेवी भ्रम अयथा ग्रहे जे अर्थने ।
अत्यन्तफलसमृद्ध भावी कालमां जीव ते भमे ॥ २७१ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

ये स्वयमविवेकतोऽन्यथैव प्रतिपद्यार्थानित्यमेव तत्त्वमिति निश्चयमारचयन्तः सततं समुपचीयमानमहामोहमलमलीमसमानसतया नित्यमज्ञानिनो भवन्ति, ते खलु समये स्थिता अप्यनासादितपरमार्थश्रामण्यतया श्रमणाभासाः सन्तोऽनन्तकर्मफलोपभोगप्राग्भारभयंकर-मनन्तकालमनन्तभावान्तरपरावर्तैरनवस्थितवृत्तयः संसारतत्त्वमेवावबुध्यताम् ॥ २७१ ॥

अथ मोक्षतत्त्वमुद्घाटयति—

कृतवन्तः। क्व स्थित्वा। **समये** निर्ग्रंथरूपद्रव्यसमये। **अच्चंतफलसमिद्धं भमंति ते तो परं कालं** अत्यन्तफलसमृद्धं भ्रमन्ति ते अतः परं कालम्। द्रव्यक्षेत्रकालभवभावपञ्चप्रकारसंसारपरिभ्रमण-रहितशुद्धात्मस्वरूपभावनाच्युताः सन्तः परिभ्रमन्ति। कम्। परं कालं अनन्तकालम्। नारकादि-दुःखरूपात्यन्तफलसमृद्धम्। पुनरपि कथंभूतम्। अतो वर्तमानकालात्परं भाविनमिति। कथंभूतम्। अयमत्रार्थः – इत्थंभूतसंसारपरिभ्रमणपरिणतपुरुषा एवाभेदेन संसारस्वरूपं ज्ञातव्यमिति ॥ २७१ ॥ अथ

गाथा २७१

अन्वयार्थ :– [**ये**] जो [**समये**] भले ही समयमें हों (भले ही वे द्रव्यलिंगीके रूपमें जिनमतमें हों) तथापि वे [**एते तत्त्वम्**] 'यह तत्त्व है (वस्तुस्वरूप ऐसा ही है)' [**इति निश्चिताः**] इस प्रकार निश्चयवान वर्तते हुए [**अयथागृहीतार्थाः**] पदार्थोंको अयथार्थरूपसे ग्रहण करते हैं (जैसे नहीं हैं वैसा समझते हैं), [**ते**] वे [**अत्यन्तफल-समृद्धम्**] अत्यन्तफलसमृद्ध (अनन्त कर्मफलोंसे भरे हुए) ऐसे [**अतः परं कालं**] अबसे आगामी कालमें [**भ्रमन्ति**] परिभ्रमण करेंगे।

टीका :– जो स्वयं अविवेकसे पदार्थोंको अन्यथा ही अंगीकृत करके (अन्य प्रकारसे ही समझकर) 'ऐसा ही तत्व (वस्तुस्वरूप) है' ऐसा निश्चय करते हुए, सतत एकत्रित किये जानेवाले महा मोहमलसे मलिन मनवाले होनेसे नित्य अज्ञानी हैं, वे भले ही समयमें (द्रव्यलिंगी रूपसे जिनमार्गमें) स्थित हों तथापि परमार्थ श्रामण्यको प्राप्त न होनेसे वास्तवमें श्रमणाभास वर्तते हुए अनन्त कर्मफलकी उपभोगराशिसे भयंकर ऐसे अनन्तकाल तक अनन्त भावान्तररूप परावर्त्तनोंसे [1]अनवस्थित वृत्तिवाले रहनेसे, उनको संसारतत्व ही जानना ॥ २७१ ॥

अब मोक्ष तत्वको प्रगट करते हैं :–

---

[1] अनवस्थित=अस्थिर। मिथ्यादृष्टियोंने भले ही द्रव्यलिंग धारण किया हो तथापि उनके अनन्तकाल तक अनन्त भिन्न-भिन्न भावरूपसे भावान्तररूपसे परावर्तन होते रहनेसे वे अस्थिर परिणतिवाले रहेंगे, और इसलिए वे संसारतत्व ही हैं।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अजधाचारविजुत्तो जधत्थपदणिच्छिदो पसंतप्पा ।
अफले चिरं ण जीवदि इह सो संपुण्णसामण्णो ॥ २७२ ॥

अयथाचारवियुक्तो यथार्थपदनिश्चितः प्रशान्तात्मा ।
अफले चिरं न जीवति इह स संपूर्णश्रामण्यः ॥ २७२ ॥

मोक्षस्वरूपं प्रकाशयति – **अजधाचारविजुत्तो** निश्चयव्यवहारपञ्चाचारभावनापरिणतत्वादयथाचार-वियुक्तः, विपरीताचाररहित इत्यर्थः, **जधत्थपदणिच्छिदो** सहजानन्दैकस्वभावनिजपरमात्मादिपदार्थ-परिज्ञानसहितत्वाद्यथार्थपदनिश्चितः, **पसंतप्पा** विशिष्टपरमोपशमभावपरिणतनिजात्मद्रव्यभावना-सहितत्वात्प्रशान्तात्मा, **जो** यः कर्ता **सो संपुण्णसामण्णो** स संपूर्णश्रामण्यः सन् **चिरं ण जीवदि** चिरं

गाथा २७२

अन्वयार्थ :– **(यथार्थपदनिश्चितः)** जो जीव यथार्थतया पदोंका तथा अर्थों (पदार्थों) का निश्चयवाला होनेसे **(प्रशान्तात्मा)** [1]प्रशान्तात्मा है और **(अयथाचार-वियुक्तः)** अयथाचार (-अन्यथाआचरण अयथार्थआचरण) रहित है, **(सः संपूर्णश्रामण्यः)** वह संपूर्ण श्रामण्यवाला जीव **(अफले)** अफल (-कर्मफल रहित हुए) **(इह)** इस संसारमें **(चिरं न जीवति)** चिरकाल तक नहीं रहता (-अल्पकालमें ही मुक्त होता है ।)

टीका :– जो (श्रमण) त्रिलोककी चूलिका (कलगी) के समान निर्मल विवेकरूपी दीपिकाके प्रकाशवाला होनेसे यथास्थित पदार्थनिश्चयसे उत्सुकता निवर्तन करके [2]स्वरूपमंथर रहनेसे सतत 'उपशांतात्मा' वर्तता हुआ, स्वरूपमें एकमें ही अभिमुख-रूपसे विचरता (क्रीड़ा करता) होनेसे 'अयथाचार रहित' वर्तता हुआ नित्य ज्ञानी हो, वास्तवमें उस सम्पूर्ण श्रामण्यवाले साक्षात् श्रमणको मोक्षतत्व जानना, क्योंकि पहलेके सकल कर्मोंके फल उसने लीलामात्रसे नष्ट कर दिये हैं इसलिये और वह नूतन कर्म-

---

[1] प्रशांतात्मा = प्रशांतस्वरूप; प्रशांतमूर्ति; उपशांत; स्थिर हुआ ।

[2] स्वरूपमंथर = स्वरूपमें जमा हुआ [मन्थरका अर्थ है सुस्त, आलसी । यह श्रमण स्वरूपमें तृप्त होनेसे मानो वह स्वरूपसे बाहर निकलनेको सुस्त या आलसी हो, इस प्रकार स्वरूपप्रशांतिमें मग्न होकर रहा है ।

अयथाचरणहीन, सूत्र-अर्थसुनिश्चयी उपशांत जे,
ते पूर्ण साधु अफल आ संसारमां चिर नहि रहे ॥ २७२ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यस्त्रिलोकचूलिकायमाननिर्मलविवेकदीपिकालोकशालितया यथावस्थितपदार्थनिश्चयनिर्वर्तितौत्सुक्यस्वरूपमन्थरसततोपशान्तात्मा सन् स्वरूपमेकमेवाभिमुख्येन चरन्नयथाचारवियुक्तो नित्यं ज्ञानी स्यात्, स खलु संपूर्णश्रामण्यः साक्षात् श्रमणो हेलावकीर्णसकलप्राक्तनकर्मफलत्वादनिष्पादितनूतनकर्मफलत्वाच्च पुनः प्राणधारणदैन्यमनास्कन्दन् द्वितीयभावपरावर्ताभावात् शुद्धस्वभावावस्थितवृत्तिर्मोक्षतत्त्वमवबुध्यताम् ॥ २२७ ॥

अथ मोक्षतत्त्वसाधनतत्त्वमुद्घाटयति —

सम्मं विदिदपदत्था चत्ता उवहिं बहित्थमज्झत्थं ।
विसयेसु णावसत्ता जे ते सुद्धा त्ति णिद्दिट्ठा ॥ २७३ ॥

सम्यग्विदितपदार्थास्त्यक्त्वोपधिं बहिस्थमध्यस्थम् ।
विषयेषु नावसक्ता ये ते शुद्धा इति निर्दिष्टाः ॥ २७३ ॥

बहुतरकालं न जीवति, न तिष्ठति । क्व । **अफले** शुद्धात्मसंवित्तिसमुत्पन्नसुखामृतरसास्वादरहितत्वेनाफले फलरहिते संसारे । किन्तु शीघ्रं मोक्षं गच्छतीति । अयमत्र भावार्थः - इत्थंभूतमोक्षतत्त्वपरिणतपुरुष एवाभेदेन मोक्षस्वरूपं ज्ञातव्यमिति ॥ २७२ ॥ अथ मोक्षकारणमाख्याति – **सम्मं विदिदपदत्था** संशयविपर्ययानध्यवसायरहितानन्तज्ञानादिस्वभावनिजपरमात्मपदार्थप्रभृतिसमस्तवस्तुविचारचतुरचित्तचातुर्यप्रकाशमानसातिशयपरमविवेकज्योतिषा सम्यग्विदितपदार्थाः । पुनरपि किंरूपाः । **विसयेसु णावसत्ता** पञ्चेन्द्रियविषयाधीनरहितत्वेन निजात्मतत्त्वभावनारूपपरमसमाधि-

---

फलोंको उत्पन्न नहीं करता इसलिये पुनः प्राणधारणरूप दीनताको प्राप्त न होता हुआ द्वितीय भावरूप परावर्तनके अभावके कारण शुद्धस्वभावमें [1]अवस्थित वृत्तिवाला रहता है ॥ २७२ ॥

अब मोक्षतत्वका साधनतत्व प्रकट करते हैं :—

गाथा २७३

अन्वयार्थ :– **[सम्यग्विदितपदार्थाः)** सम्यक् (यथार्थतया) पदार्थोंको जानते हुए **(ये)** जो **(बहिःस्थमध्यस्थम्)** बहिरंग तथा अंतरंग **(उपधिं)** परिग्रहको

---

[1] अवस्थित = स्थिर, [इस संपूर्ण श्रामण्यवाले जीवको अन्यभावरूप परावर्तन (पलटन) नहीं होता, वह सदा एक ही भावरूप रहता है—शुद्ध स्वभावमें स्थिर परिणतिरूपसे रहता है; इसलिये वह जीव मोक्षतत्व ही है ।]

जाणी यथार्थ पदार्थने, तजी संग अंतर्बाह्यने,
आसक्त नहि विषयो विषे जे, 'शुद्ध' भाख्या तेमने ॥ २७३ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

अनेकान्तकलितसकलज्ञातृज्ञेयतत्त्वयथावस्थितस्वरूपपाण्डित्यशौण्डाः सन्तः समस्त-बहिरङ्गान्तरङ्गसङ्गतिपरित्यागविविक्तान्तश्चकचकायमानानन्तशक्तिचैतन्यभास्वरात्मतत्त्व-स्वरूपाः स्वरूपगुप्तसुषुप्तकल्पान्तस्तत्त्ववृत्तितया विषयेषु मनागप्यासक्तिमनासादयन्तः समस्तानुभाववन्तो भगवन्तः शुद्धा एवासंसारघटितविकटकर्मकवाटविघटनपटीयसाध्य-वसायेन प्रकटीक्रियमाणावदाना मोक्षतत्त्वसाधनतत्त्वमवबुध्यताम् ॥ २७३ ॥

अथ मोक्षतत्त्वसाधनतत्त्वं सर्वमनोरथस्थानत्वेनाभिनन्दयति –

सुद्धस्स य सामण्णं भणियं सुद्धस्स दंसणं णाणं ।
सुद्धस्स य णिव्वाणं सो च्चिय सिद्धो णमो तस्स ॥ २७४ ॥

शुद्धस्य च श्रामण्यं भणितं शुद्धस्य दर्शनं ज्ञानम् ।
शुद्धस्य च निर्वाणं स एव सिद्धो नमस्तस्मै ॥ २७४ ॥

संजातपरमानन्दैकलक्षणसुखसुधारसास्वादानुभवबलेन विषयेषु मनागप्यनासक्ताः । किं कृत्वा । पूर्वं स्वस्वरूपपरिग्रहं स्वीकारं कृत्वा, **चत्ता** त्यक्त्वा । कम् । **उवहिं** उपधिं परिग्रहम् । किंविशिष्टम् । **बहित्थमज्झत्थं** बहिस्थं क्षेत्रवास्त्वाद्यनेकविधं मध्यस्थं मिथ्यात्वादिचतुर्दशभेदभिन्नम् । **जे** एवंगुण-विशिष्टाः ये महात्मानः **ते सुद्ध त्ति णिद्दिट्ठा** ते शुद्धाः शुद्धोपयोगिनः इति निर्दिष्टाः कथिताः । अनेन व्याख्यानेन किमुक्तं भवति – इत्थंभूताः परमयोगिन एवाभेदेन मोक्षमार्ग इत्यवबोद्धव्यम् ॥ २७३ ॥

(त्यक्त्वा) छोड़कर **(विषयेषु न अवसक्ताः)** विषयोंमें आसक्त नहीं हैं, **(ते)** वे **(शुद्धाः इति निर्दिष्टाः)** 'शुद्ध' कहे गये हैं।

टीका :– अनेकान्तके द्वारा ज्ञात सकल ज्ञातृतत्व और ज्ञेयतत्वके यथास्थित स्वरूपमें जो प्रवीण हैं, अन्तरंगमें चकचकित होते हुए अनन्तशक्तिवाले चैतन्यसे भास्वर (तेजस्वी) आत्मतत्वके स्वरूपको जिनने समस्त बहिरंग तथा अन्तरंग संगतिके परित्यागसे विविक्त (भिन्न) किया है, और (इसलिये) अन्तःतत्वकी वृत्ति (आत्माकी परिणति) स्वरूप गुप्त तथा सुषुप्त (जैसे कि सो गया हो) समान (-प्रशांत) रहनेसे जो विषयोंमें किंचित् भी आसक्तिको प्राप्त नहीं होते, – ऐसे जो सकल-महिमावान् भगवन्त 'शुद्ध' (शुद्धोपयोगी) हैं उन्हे ही मोक्षतत्वका साधनतत्व जानना । (अर्थात् वे शुद्धोपयोगी मोक्षमार्गरूप हैं), क्योंकि वे अनादि संसार से रचित - बन्द

रे 'शुद्धने श्रामण्य भाख्युं, ज्ञान दर्शन शुद्धने, ।
छे शुद्धने निर्वाण, शुद्ध ज सिद्ध, प्रणमुं तेहने ॥ २७४ ॥

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यत्तावत्सम्यग्दर्शनज्ञानचारित्रयौगपद्यप्रवृत्तैकाग्र्यलक्षणं साक्षान्मोक्षमार्गभूतं श्रामण्यं तच्च शुद्धस्यैव। यच्च समस्तभूतभवद्भाविव्यतिरेककरम्बितानन्तवस्त्वन्वयात्मकविश्वसामान्यविशेषप्रत्यक्षप्रतिभासात्मकं दर्शनं ज्ञानं च तत् शुद्धस्यैव। यच्च निःप्रतिघविजृम्भितसहजज्ञानानन्दमुद्रितदिव्यस्वभावं निर्वाणं तत् शुद्धस्यैव। यश्च टङ्कोत्कीर्णपरमानन्दावस्थासुस्थितात्मस्वभावोपलम्भगम्भीरो भगवान् सिद्धः स शुद्ध एव। अलं वाग्वि-

---

अथ शुद्धोपयोगलक्षणमोक्षमार्गं सर्वमनोरथस्थानत्वेन प्रदर्शयति – **भणियं** भणितम्। किम्। **सामण्णं** सम्यग्दर्शनज्ञानचारित्रैकाग्र्यलक्षणंशत्रुमित्रादिसमभावपरिणतिरूपं साक्षान्मोक्षकारणं यच्छ्रामण्यम्। तत्तावत्कस्य। **सुद्धस्स य** शुद्धस्य च शुद्धोपयोगिन एव। **सुद्धस्य दंसणं णाणं** त्रैलोक्योदरविवरवर्तित्रिकालविषयसमस्तवस्तुगतानन्तधर्मैकसमयसामान्यविशेषपरिच्छित्तिसमर्थं यद्दर्शनज्ञानद्वयं तच्छुद्धस्यैव। **सुद्धस्स य णिव्वाणं** अव्याबाधानन्तसुखादिगुणाधारभूतं पराधीनरहितत्वेन स्वायत्तं यन्निर्वाणं तच्छुद्धस्यैव। **सो च्चिय सिद्धो** यो लौकिकमायाञ्जनरसदिग्विजयमन्त्रयन्त्रादिसिद्धविलक्षणः स्वशुद्धात्मोपलम्भलक्षणः टङ्कोत्कीर्णज्ञायकैकस्वभावो ज्ञानावरणाद्यष्टविधकर्मरहितत्वेन सम्यक्त्वाद्यष्टगुणान्तर्भूतानन्तगुणसहितः सिद्धो भगवान् स चैव शुद्धः एव। **णमो तस्स** निर्दोषिनिजपरमात्मन्या-

---

रहे हुए विकट कर्मकपाटको तोड़ने-खोलनेके अति उग्र प्रयत्नसे पराक्रम प्रगट कर रहे हैं ॥ २७३ ॥

अब मोक्षतत्वके साधनतत्वका (अर्थात् शुद्धोपयोगीका) सर्व मनोरथोंके स्थानके रूपमें अभिनन्दन (प्रशंसा) करते हैं :–

गाथा २७४

अन्वयार्थ :– [**शुद्धस्य च**] शुद्ध (शुद्धोपयोगी) को [**श्रामण्यं भणितं**] श्रामण्य कहा है, [**शुद्धस्य च**] और शुद्धको [**दर्शनं ज्ञानं**] दर्शन तथा ज्ञान कहा है, [**शुद्धस्य च**] शुद्धके [**निर्वाणं**] निर्वाण होता है; [**सः एव**] वही (शुद्ध ही) [**सिद्धः**] सिद्ध होता है; [**तस्मै नमः**] उसे नमस्कार हो।

टीका :– प्रथम तो, सम्यग्दर्शनज्ञान-चारित्रके युगपद्पनेरूपसे प्रवर्तमान एकाग्रता जिसका लक्षण है ऐसा जो साक्षात् मोक्षमार्गभूत श्रामण्य, 'शुद्ध' के ही होता है; समस्त भूत-वर्तमान-भावी व्यतिरेकोंके साथ मिलित (मिश्रित), अनन्त वस्तुओंका अन्वयात्मक जो विश्व उसके (१) सामान्य और (२) विशेषके प्रत्यक्ष प्रतिभास-स्वरूप जो (१) दर्शन और (२) ज्ञान वे 'शुद्ध' के ही होते हैं; निर्विघ्न-खिले हुए सहज ज्ञानानन्दकी मुद्रावाला (स्वाभाविक ज्ञान और आनन्दकी छापवाला) दिव्य

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

स्तरेण, सर्वमनोरथस्थानस्य मोक्षतत्त्वसाधनतत्त्वस्य शुद्धस्य परस्परमङ्गाङ्गिभावपरिणतभाव्यभावकभावत्वात्प्रत्यस्तमितस्वपरविभागो भावनमस्कारोऽस्तु ।। २७४ ।।

अथ शिष्यजनं शास्त्रफलेन योजयन् शास्त्रं समापयति –

बुज्झदि सासणमेयं सागारणगारचरियया जुत्तो ।
जो सो पवयणसारं लहुणा कालेण पप्पोदि ।। २७५ ।।

बुध्यते शासनमेतत् साकारानाकारचर्यया युक्तः ।
यः स प्रवचनसारं लघुना कालेन प्राप्नोति ।। २७५ ।।

राध्याराधकसंबन्धलक्षणो भावनमस्कारोऽस्तु तस्यैव । अत्रैतदुक्तं भवति – अस्य मोक्षकारणभूतशुद्धोपयोगस्य मध्ये सर्वेष्टमनोरथा लभ्यन्त इति मत्वा शेषमनोरथपरिहारेण तत्रैव भावना कर्तव्येति ।। २७४ ।। अथ शिष्यजनं शास्त्रफलं दर्शयन् शास्त्रं समापयति – **पप्पोदि** प्राप्नोति । **सो**

जिसका स्वभाव है ऐसा जो निर्वाण, वह 'शुद्ध' के ही होता है; और टंकोत्कीर्ण परमानन्द-अवस्थारूपसे सुस्थित आत्मस्वभावकी उपलब्धिसे गंभीर ऐसे जो भगवान सिद्ध, वे 'शुद्ध' ही होते हैं (अर्थात् शुद्धोपयोगी ही सिद्ध होते हैं), वचनविस्तारसे बस हो ! सर्व मनोरथोंके स्थानभूत, मोक्षतत्वके साधनतत्वरूप, 'शुद्ध'को, जिसमें परस्पर अंगअंगीरूपसे परिणमित [1]भावक-भाव्यताके कारण स्व-परका विभाग अस्त हुआ है ऐसा भावनमस्कार हो ।। २७४ ।।

अब (भगवान कुन्दकुन्दाचार्यदेव) शिष्यजनको शास्त्रके फलके साथ जोड़ते हुए शास्त्र समाप्त करते हैं :–

गाथा २७५

अन्वयार्थ :– [**यः**] जो [**साकारानाकारचर्यया युक्तः**] साकार-अनाकार चर्यासे युक्त वर्तता हुआ [**एतत् शासनं**] इस उपदेशको [**बुध्यते**] जानता है, [**सः**] वह

---

[1] भावक (भावनमस्कार करनेवाला) वह अंग (अंश) है और भाव्य (भावनमस्कार करने योग्य पदार्थ) वह अंगी (अंशी) है, इसलिये इस भावनमस्कारमें भावक तथा भाव्य स्वयं ही है । ऐसा नहीं है कि भावक स्वयं हो और भाव्य पर हो ।

साकार अण-आकार चर्यायुक्त आ उपदेशने ;
जे जाणतो, ते अल्पकाले सार प्रवचननो लसे ।। २७५ ।।

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

यो हि नाम सुविशुद्धज्ञानदर्शनमात्रस्वरूपव्यवस्थितवृत्तसमाहितत्वात् साकारानाकारचर्यया युक्तः सन् शिष्यवर्गः स्वयं समस्तशास्त्रार्थविस्तरसंक्षेपात्मकश्रुतज्ञानोपयोगपूर्वकानुभावेन केवलमात्मानमनुभवन् शासनमेतद्बुध्यते स खलु निरवधित्रिसमयप्रवाहावस्थायित्वेन सकलार्थसार्थात्मकस्य प्रवचनस्य सारभूतं भूतार्थस्वसंवेद्यदिव्यज्ञानानन्दस्वभावमननुभूतपूर्वं भगवन्तमात्मानमवाप्नोति ॥२७५॥

स शिष्यजनः कर्ता। कम्। **पवयणसारं** प्रवचनसारशब्दवाच्यं निजपरमात्मानम्। केन। **लहुणा कालेण** स्तोककालेन। यः किं करोति। **जो बुज्झदि** यः शिष्यजनो बुध्यते जानाति। किम्। **सासणमेयं** शास्त्रमिदं। किं नाम। **पवयणसारं** प्रवचनसारं, – सम्यग्ज्ञानस्य तस्यैव ज्ञेयभूतपरमात्मादिपदार्थानां तत्साध्यस्य निर्विकारस्वसंवेदनज्ञानस्य च, तथैव तत्त्वार्थश्रद्धानलक्षणसम्यग्दर्शनस्य तद्विषयभूतानेकान्तात्मकपरमात्मादिद्रव्याणां तेन व्यवहारसम्यक्त्वेन साध्यस्य निजशुद्धात्मरुचिरूपनिश्चयसम्यक्त्वस्य च, तथैव च व्रतसमितिगुप्त्याद्यनुष्ठानरूपस्य सरागचारित्रस्य तेनैव साध्यस्य स्वशुद्धात्मनिश्चलानुभूतिरूपस्य वीतरागचारित्रस्य च प्रतिपादकत्वात्प्रवचनसाराभिधेयम्। कथंभूतः सः शिष्यजनः। **सागारणगारचरियया जुत्तो** सागारानागारचर्यया युक्तः। आभ्यन्तररत्नत्रयानुष्ठानमुपादेयं कृत्वा बहिरङ्गरत्नत्रयानुष्ठानं सागारचर्या श्रावकचर्या। बहिरङ्गरत्नत्रयाधारेणाभ्यन्तररत्नत्रयानुष्ठानमनागारचर्या प्रमत्तसंयतादितपोधनचर्येत्यर्थः ॥ २७५ ॥ इति गाथापञ्चकेन पञ्चरत्नसंज्ञं

[**लघुना कालेन**] अल्प कालमें ही [**प्रवचनसारं**] प्रवचनके सारको (भगवान आत्माको) [**प्राप्नोति**] पाता है।

टीका :– [1]सुविशुद्धज्ञानदर्शनमात्र स्वरूपमें अवस्थित परिणतिमें लगा होनेसे साकार-अनाकार चर्यासे युक्त वर्तता हुआ, जो शिष्यवर्ग स्वयं समस्त शास्त्रोंके अर्थोंके [2]विस्तारसंक्षेपात्मक श्रुतज्ञानोपयोगपूर्वक प्रभाव द्वारा केवल आत्माको अनुभवता हुआ, इस उपदेशको जानता है, वह वास्तवमें, [3]भूतार्थस्वसंवेद्य-दिव्य ज्ञानानन्द जिसका स्वभाव है, पूर्वकालमें कभी जिसका अनुभव नहीं किया, ऐसे भगवान् आत्माको प्राप्त करता है – जो कि [जो आत्मा] तीनों कालके निरवधि प्रवाहमें स्थायी होनेसे [4]सकल पदार्थोंके समूहात्मक प्रवचनका सारभूत है ॥ २७५ ॥

---

[1] आत्माका स्वरूप मात्र सुविशुद्ध ज्ञान और दर्शन है। [इसमें, ज्ञान साकार है और दर्शन अनाकार है।]

[2] विस्तारसंक्षेपात्मक = विस्तारात्मक या संक्षेपात्मक।

[3] भूतार्थ पारमार्थिक-(सत्यार्थ), स्वसंवेद्य और दिव्य ऐसे जो ज्ञान और आनन्द वह भगवान आत्माका स्वभाव है।

[4] प्रवचन सकल पदार्थोंके समूहका प्रतिपादन करता है, इसलिये उसे सकल पदार्थोंका समूहात्मक कहा है। [निज शुद्धात्मा प्रवचनका सारभूत है, क्योंकि प्रवचन जो सर्वपदार्थसमूहका प्रतिपादन करता है उसमें एक निजात्मपदार्थ ही स्वयंको ध्रुव है, दूसरा कोई पदार्थ स्वयंको ध्रुव नहीं,]

Please inform us of any errors on rajesh@AtmaDharma.com

Version 001: remember to check http://www.AtmaDharma.com for updates

इति तत्त्वदीपिकायां **श्रीमदमृतचन्द्रसूरिविरचितायां** प्रवचनसारवृत्तौ **चरणानुयोग-सूचिका चूलिका** नाम तृतीयः श्रुतस्कन्धः समाप्तः ॥ ३ ॥

* * * *

पञ्चमस्थलं व्याख्यातम्। एवं 'णिच्छितसुत्तत्थपदो' इत्यादि द्वात्रिंशद्गाथाभिः स्थलपञ्चकेन शुभोपयोगाभिधानश्चतुर्थान्तराधिकारः समाप्तः ॥

इति **श्रीजयसेनाचार्य**कृतायां तात्पर्यवृत्तौ पूर्वोक्तक्रमेण 'एवं पणमिय सिद्धे' इत्याद्येकविंशतिगाथाभिरुत्सर्गाधिकारः। तदनन्तरं 'ण हि णिरवेक्खो चागो' इत्यादि त्रिंशद्गाथाभिरपवादाधिकारः ततः परं 'एयग्गगदो समणो' इत्यादिचतुर्दशगाथाभिः श्रामण्यापरनामा मोक्षमार्गाधिकारः। ततोऽप्यनन्तरं 'णिच्छिदसुत्तत्थपदो' इत्यादिद्वात्रिंशद्गाथाभिः शुभोपयोगाधिकारश्चेत्यन्तराधिकारचतुष्टयेन सप्तनवतिगाथाभिश्च**रणानुयोगचूलिका** नामा तृतीयो महाधिकारः समाप्तः ॥ ३ ॥

* * * *

इसप्रकार (श्रीमद् भगवत्कुन्दकुन्दाचार्यदेवप्रणीत) श्री प्रवचनसार शास्त्रकी श्रीमद्अमृतचन्द्राचार्यदेव विरचित तत्वदीपिका नामक टीकामें चरणानुयोगसूचक चूलिका नामका तृतीय श्रुतस्कंध समाप्त हुआ ॥

* * * *

Please inform us of any errors on rajesh@AtmaDharma.com

परिशिष्ट

सैंतालीस नय

ननु कोऽयमात्मा कथं चावाप्यत इति चेत्, अभिहितमेतत् पुनरप्यभिधीयते । आत्मा हि तावच्चैतन्यसामान्यव्याप्तानन्तधर्माधिष्टात्रेकं द्रव्यमनन्तधर्मव्यापकानन्तनयव्याप्येकश्रुतज्ञानलक्षणप्रमाणपूर्वकस्वानुभवप्रमीयमाणत्वात् । तत्तु द्रव्यनयेन पटमात्रवच्चिन्मात्रम् १ । पर्यायनयेन तन्तुमात्रवद्दर्शनज्ञानादिमात्रम् २ । अस्तित्वनयेनायोमयगुणकार्मुकान्तरालवर्तिसंहितावस्थलक्ष्योन्मुखविशिखवत् स्वद्रव्यक्षेत्रकालभावैरस्तित्ववत् ३ ।

